35. *Ibid.* – "Words and phrases must be streched towards a generality, foreign to their usage, and however such elements of language be stabilised as technicalities, they remain metaphors mutely appealing for an imaginative leap. p. 263.

36. *Indian Philosophy*, Vol. II, p. 720.

expression of atheism in the guise of *Vedântic* exegesis! And an irreverent attitude to scriptures.

See the equally spirited reply to this of J. A. B. Van Buitenin also:

"Other worldly stories never sound convincing to unbelieving ears; neither do *Śankara's !* " [37] *"Râmânuja* worships a God that is verily *Supreme* and includes in His concept all that is this world, to the point of affirming this world, just because it is related to God. Devout *Vaisṇava* if ever there is one, his vision can be understood. *Visṇu,* the God of incarnations *par excellence,* who in every age takes personally a hand in the direction of the world's affairs, God of preservation and maintenance, who pervades the universe, the *Viśvarûpa* and omnipresent one, will lead his devotees to a very different conception of Absolute and world from that to which *Siva* would inspire, the god of annihilation, who presents yogic renunciation and systematic abnegation".[38]

How then does an aspirant attain such a Supreme? Such God?

Râmânuja replies: "by surrendering at His Feet, and obtaining His (आभिमुख्य) 'favourable look', and thus by washing away all sins accrued over ages and cycles of rebirths; then by approaching a right preceptor to obtain the true import of scriptures, to know Him as He is; and by acquiring the right and proper virtues and qualities that are conducive to it; and then by discharging the duties proper to one's vocation and station in life dedicatedly as worship at His Feet, by surrendering all one's belongings and oneself even, at His Feet, and by worshipping Him, praising Him, serving Him, remembering Him,

37. *Vedârthasangrahah,* p. 36
38. *Ibid,* Pp. 65-66

hearing of His glories, His names, His exploits, etc., as prompted by love for Him, and thus by attaining a clear and exceedingly dear vision of that Supreme Lord, having no motives other than this attainment as an End in itself. This is how one must spend one's life time till this loving contemplation called *Bhakti,* yields that result".

A minor question: "Is not servitude condemned in *Smrti* as leading to sorrow?" (सेवा श्ववृत्तिः – मनु)

Râmânuja replies: "No. That is in the case of undeserved human masters. Here we are talking of the Supreme Compassionate Lord, who loves His creatures, and *Sâstra* is clear about this service as *kainkarya* as of exceeding bliss in its nature as an end in itself". This is attainable through *bhakti,* which is not blind or any unenlightened love, but is of the very nature of knowledge or experience of God maturing to a loving vision (भक्तिश्च ज्ञानविशेष एव).

But the individual soul cannot have this for his mere asking. He has been given freedom, as a part of the sport of this creative process, and he must use it rightly with discrimination. *Râmânuja* discusses in detail the problems of bondage, sin, salvation etc., in the context of human freedom, and this part of *Vedârthasangrahah* is of crucial importance as it avoids the pitfalls of illusionism, fatalism and other forms of pre-determinism haunting many in another school of *Vedânta* (*Râmânuja* is very original in all this, too).

Râmânuja concludes this treatise with a penchant, to the effect that, "this attempt to call out the essence of vedic teachings has been

made with the belief that there are still those among vedântins who can discriminate between essentials and non-essentials, free from prejudices, and bound by rules of interpretation, and wedded to well established sources of knowledge, the (true) elders indeed ![39]

What a world of meaning in how small a verse?

9. Possible Date and Circumstances of the Composition of *Vedârthasangrahah*

Most scholars agree, fortunately, that this was the earliest work of the *Âcârya,* and so there is no doubt about its chronology.

The learned and authoritative *Sudarśanasuri* begins his gloss with a statement that this was a lecture delivered (or read out) in the presence of the most learned and impartial listeners of those days, on the Holy Seven Hills of Lord *Śrinivasa* on *Tirumalai,* and with Him presiding over that function.[40] *Râmânuja* had not yet become the *Śrîbhâṣyakâra,* by then. (It is *Śrîbhâṣyam* that refers to this work and not *Vice versa*).

What was the occasion? How old (or young) was *Râmânuja* then? What prompted this lecture? Alas ! We have no details, and cannot vouch for the circumstances, decisively. We can only speculate: Perhaps *Râmânuja* had by then conclusively broken his pupilship of *Yâdavaprakâsa's* academy (as he criticises his views openly and sternly). Perhaps he had already been installed on *Yâmuna's* seat, as a young ascetic and read through his works diligently. (Notice the influence of these works on the present work) and by then mastered all

39. सारसारविवेकज्ञाः गरीयांसो विमत्सराः। प्रमाणतन्त्राः सन्तीति कृतो वेदार्थसङ्ग्रहः॥

40. श्रीभाष्यकृदुपन्यस्तो यश्श्रीशैलपतेः पुरः। वेदार्थसङ्ग्रहस्यास्य कुर्मस्तात्पर्यदीपिकाम्॥

that there was available, for this interpretation of *Vedânta.* This would s how him as between 20 and 30 years of age, on the basis of *Guruparamparâ.* It is evident he has only heard of Bodhâyana at this stage, but has not read through his *vṛtti,* as no quotations are made here, as in *Śrîbhâṣyam.* But he has already carefully mastered Tanka's *Vâkya* and Dramida's *Bhâṣya,* as he quotes from them profusely. Perhaps Râmânuja had *advaitins* in large numbers among his audience, who were wavering in their faith in Śankara and who did not take Bhâskara or Yâdava seriously — this is suggested in the concluding verse. It is true that large numbers of these, later on took to his views. Perhaps his maternal uncle *Śrîsailapûrna* had already done enough ground work there, in this respect, and perhaps this was Râmânuja's first visit to the Hills and this Holy Shrine after becoming an ascetic and an *Âcârya* in his own right. But his language and expression though characteristic of youthful enthusiasm and playful logic, humour, and vigour, are yet mature with wisdom, persuasive force, dipped in devotion and conviction, and cloaked in poetic excellence. Very unusual for mere logicians or *mîmâmsakâs,* indeed! All this would show him as a genius at a very early age. The intention of the lecture is not yet to found or support a new school of thought— as he has no name for it — but to uphold all that there is in *the Veda* as valid and interpret it rightly, (and win back those that had been led astray by Śankara, Bhâskara and Yâdava,) as he himself says: सर्वं समर्थितम् . The force and tone of persuasiveness of his language would prove this. More cannot be surmised, unfortunately.

10. The Relevance of Râmânuja and Vedârthasangrahaḥ for Today.

The world of today requires a philosphy that upholds the values of life, and not one that decries life as 'unreal' or 'real

values of life, and not one that decries life as 'unreal' or 'real in a different sense' as *mâyâ* ! Enough harm has been done to India and the world by those who negated everything dear to man, God, life, values, harmless pleasures here, and Bliss hereafter. Indian History speaks eloquently about this devastation since the days of *Buddhism* and Nihilism. There is the need to build a society in which all enjoy equal respect as children of God, as His *amśas,* aspects, as being related to Him inseparably. We have seen the horrors of Political Absolutism in the form of Statism, Communism and Fascism and their grand edifices of one time crumbling into dust in our own lifetimes ! Absolutism in any form means the same dangers of the denial of this many-ness, Individuality and Freedom, ultimately. Hegel, Bradley and others in the West and Śankara and *Buddhists* in India are outdated in the context of the birth pangs of a new world order that hankers after Freedom, Peace, Love, Relations, Harmony, Understanding, Devotion and Faith in a Supreme Benevolent Superhuman Agency in whose care all will be well for this emerging order.

Râmânuja is the only answer for this, as shown in detail so far. His *Vedârthasaṅgrahaḥ,* is not a mere primer of his thought, but a mature and brief vision of cosmos, God, life, man's place on this earth and his mission, as visualised by this great *Âcârya.* It is handy, easily readable, understandable, and the subtle emotional overtones and undertones between its lines have a magic of their own, even for students of his later and more voluminous works. It is indispensable to all those who want to understand Râmânuja in a nutshell, and the *Upanisadic Philosophy* at its best, with its brilliant features, at a glance.

The Academy of Sanskrit Research have done a timely service to the world of *Vedântic* thought by editing, and publishing this great work, with an appropriately abridged edition of its commentary by *Sudarśana.*

I am grateful to the authorities of this Institute of learning, and particularly to its Director, Prof. M. A. Lakshmithathacharyaswâmy, for having bestowed on me this privilege of introducing this text to our modern members of the English-Sanskrit reading community, in our altered context of the world circumstances, educationally, socially and politically. I do not know how well or ill I have rendered this *kainkarya,* but I must confer that I have done it with utmost devotion and dedication to all the values of life I love and to Râmânuja, who embodies them.

The *Vedârthasaṅgrahaḥ* deserves to be studied in richer detail, and greater depth, from various new angles. The reopening or revising of our views of the so called '*Karmakânda*' as understood by Râmânuja, in its proper relation with *Vedânta,* would be one such angle. The efforts of *Vedânta Desika,* well begun in his *Mîmâmsâpâdukâ,* and *Seśvaramîmâmsâ* are yet to be continued and completed. The realism of Râmânuja merits a full-length study, separately. *Viśiṣṭâdvaita* in its relations with *Purâṇâs* would be another dimension to receive attention. No one has yet undertaken a study of the influence of the *Âlwârs* on *Râmânuja's* works, in English, till date, though some spade work in Tamil has been done in writing by the late lamented *Mahâmahimopâdhyaya, Padma-vibhûṣana, Prativâdibhâyankaram Kânchi Annangarâcâryaswâmy*

Prof. Lakshmithathacharya has been goading me to undertake this work myself! If *Lord Tirunârâyana* and *Sevlappillai* will it, and if Râmânuja's grace descends on me, who am I to deny it, or escape it?

May this work reopen the eyes of all earnest *Vedântins* groping in the dark, looking for values in systems that are barren of it by scope and limitations.

May philosophy emerge from its otherwise dull shell of abstract and idle speculations as unrelated to life.

May the Supreme All Merciful Lord be pleased.

K. S. NARAYANACHAR

सङ्केताक्षरविवरणम्

अथर्वशिखोपनिषत्	अ. शिखा.
अथर्वशिरोपनिषत्	अ.शि.
आपस्तम्बधर्मसूत्रम्	आप.ध.सू.
आत्मसिद्धिः	आ.सि.
ईशावास्योपनिषत्	ईशा.उ.
उत्तररामायणम्	उ.रा.
ऐतरेयारण्यकम्	ऐत.आर.
ऐतरेयोपनिषत्	ऐत.उ.
कठोपनिषत्	क.उ.
कात्यायनश्रौतसूत्रम्	का.श्रौ.सू.
कुमारिलवार्तिकम्	कु.वा.
केनोपनिषत्	के.उ.
कैयट वृत्तिः	कै.वृ.
कौषीतक्युपनिषत्	कौषी.उ.
छान्दोग्योपनिषत्	छा.उ.
जितन्तेस्तोत्रम्	जि.स्तो.
तैत्तिरीयनारायणोपनिषत्	तै.ना.उ.
तैत्तिरीयब्राह्मणम्	तै.ब्रा.
तैत्तिरीयसंहिता	तै.सं
तैत्तिरीयसंहिता सायणभाष्यम्	तै.सं.सा.भा.
तैत्तिरीयारण्यकम्	तै.आर.
तैत्तिरीयोपनिषत् आनन्दवल्ली	तै.उ.आन.
तैत्तिरीयोपनिषत् भृगुवल्ली	तै.उ.भृ.

तैत्तिरीयोपनिषत् शिक्षावल्ली	तै.उ.शि.
दक्षस्मृतिः	द.स्मृ.
द्रमिडभाष्यम्	द्र.भा.
प्रकरणपंचिका	प्र.पं.
पाणिनीयधातुः	पा.धा.
पाणिनीयसूत्रम्	पा.सू.
पूर्वमीमांसासूत्रम्	पू.मी.सू.
बृहदारण्यकोपनिषत्	बृ.उ.
बृहदारण्यकोपनिषत् माध्यन्दिनपाठः	बृ.उ.मा.पा.
ब्रह्मनन्दिवार्तिकम्	ब्र.नं.वा.
ब्रह्मसूत्रम्	ब्र.सू.
भगवद्गीता	भ.गी.
मत्स्यपुराणम्	म.पु.
मनुस्मृतिः	म.स्मृ.
मन्त्रिकोपनिषत्	मन्त्रि.उ.
महाभारते अनुशासनपर्व	म.भा.अनु.
महाभारते कर्णपर्व	म.भा.क.
महाभारते मौसलपर्व	म.भा.मौ.
महाभारते शान्तिपर्व	म.भा.शां
महाभारते सभापर्व	म.भा.स.
महोपनिषत्	महो.
मुण्डकोपनिषत्	मुण्ड. उ.
मैत्रायणि उपनिषत्	मैत्रा. उ.
याज्ञवल्क्यस्मृतिः	याज्ञ.स्मृ.
योगशिखोपनिषत्	यो.शि.
वाल्मीकिरामायणे बालकाण्डः	वा.रा.बा.
वाल्मीकिरामायणे सुन्दरकाण्डः	वा.रा.सु.
वाल्मीकिरामायणे युद्धकाण्डः	वा.रा.यु.
विष्णुपुराणम्	वि.पु.
श्वेताश्वतरोपनिषत्	श्वे.उ.
सांख्यकारिका	सां.का.
सुबालोपनिषत्	सु.बा.उ.

श्रीः

श्रीमते रामानुजाय नमः

सव्याख्यवेदार्थसंग्रहस्य

भूमिका

य इह विसृमरगोभिरान्ध्यं क्षपयति कुमतमूकदर्शनस्य ।
यतिपतिदिनकृत् स विश्वसेव्यः धत्तु मम चेतसि तामसं प्रसारम् ॥

त्रयीपदार्थानां तत्त्वमिति त्रय्यन्तविदां सिद्धान्तः । तत्र द्वयी चिदचितोः एकेन परमात्मना व्याप्ता नित्यनियाम्या नियमेन तदेकशेषभूता चेति तदपृथक्भावात् तेन तस्याः तादात्म्यम् *ऐतदात्म्यमिदं सर्वम्* इति श्रुतिप्रतिपन्नम्। नचेदं तादात्म्यं स्वरूपैक्यरूपमिति *स ते आत्मा एष ते आत्मा* इति श्रुतिरेव व्यधिकरणनिर्देशं हेतूकुर्वती स्पष्टयति । तस्यान्तरात्मतां तयोश्च तच्छरीरतां अभ्यासेन ब्रुवत्याः श्रुतेः आन्यपर्यं न शक्यशङ्कं कथंचिदपि। अमुख्यः अप्रामाणिकोऽर्थः नहि पुनः पुनः अभ्यस्यते। एवमपृथक्स्थितिनिबन्धनमेव निदर्शितशरीरात्मभावायत्तं तादात्म्यं चिदचितोः ब्रह्मणा सिद्धमिति स्वीकारे, का कथा निर्विशेषतत्त्ववादस्य? का च जगन्मिथ्यात्ववादस्य? एवं विशिष्टैक्यरूपेण तत्त्वे प्रमाणप्रतिपन्ने तत्र विशेष्यप्राधान्यं विशेषणयोः तदेकशेषत्वं च लोकवेदावगतं न अपह्नवमर्हति ।

प्रमेयसिद्धेः प्रमाणायत्तत्वे, प्रमाणानां च इदमित्थमित्येव प्रमेयनिष्कर्षकत्वे, सर्वप्रमाणैरपि निर्विशेषासिद्धेः चकितैरिव येयं स्वानुभवसिद्धत्वगतिः अन्यादृशी पुरस्क्रियते, तत्रापि तद्वादिनां अनाश्वासः । कीदृशोऽयं स्वानुभव इति प्रश्नस्य मूकरसास्वादवत् दुरुत्तरत्वात् । *इदमेवं इयमहमदर्शम्* इति स्वानुभवाभिलापे तस्य सविशेषत्वानतिरिक्तत्वात् गतमेव निर्विशेषत्वम् । युक्त्याभासैरपि हेतूकृतैः निर्विशेषत्वे साध्ये पक्षे ब्रह्मणि तैः साध्यसाधनैः इष्टव्यतिरेक-

सिद्धिरेव । एवं निर्विशेष दौर्घट्यं बहुमुखमुपपाद्य विशिष्टाद्वैतमेव श्रुतिप्रमाणसिद्धमिति श्रीभाष्यकारैः अभिभाषितम् ।

परमऋषिणा व्यासेन औपनिषदं ब्रह्मतत्त्वं निर्दिधारयिषता विविधवेदान्तवाक्यानां आपाततो दृष्टं विरोधं परिहृत्य न्यायनिबन्धनेन सावमर्शं सम्पादितः समुचितसमन्वयः । जगत्कारणं ब्रह्म स्वस्यैव जगद्रूपेण बहुभवनं सङ्कल्पयतीति *तदैक्षत बहुस्यां प्रजायेय* इति, *तदात्मानं स्वयमकुरुत* इत्यादि श्रुतिवाक्यसिद्धं उपादानत्वं ब्रह्मणः परिणामरूपमेवेति ज्ञातम् । तथा सृष्टिबोधकश्रुत्यन्तरादपि तत्सिद्धं *यथोर्णनाभिः सृजते गृह्णते च - - - - - - यथा सतः पुरुषात् केशलोमानि* इत्यादिना । उपबृंहितं चेदं *सोऽभिध्याय शरीरात्स्वात् सिसृक्षुर्विविधाः प्रजाः* इति ब्रुवता । एवं स्वशरीरभूतचिदचिद्द्वारा परिणामाश्रयत्वरूपं उपादानत्वम् इदमेव सूत्रितं च व्यासेन *प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्* इत्यधिकरणे *आत्मकृतेः परिणामात्* इति विस्पष्टं ब्रुवता । न पुनः *विवर्तात्* इति । वाक्यकारेण च दध्यादिवदिति निदर्शयता परिणामवाद एव हि स्वीकृतः । जीवे बालत्वयुवत्वादिवत् परिणामस्य स्वशरीरभूतचिदचिद्द्वारकत्वकथनादेव निर्विकारश्रुतिः अनुपरुद्धा ज्ञानानन्दात्मके भगवत्स्वरूपे पर्यवस्यतीति न काचित् क्षतिः ।

एवं श्रुत्या सूत्रकारोक्त्या तद्व्याख्यातृभिः वाक्यकारादिभिश्च क्षुण्णेपथिनिष्कण्टके कण्टकक्षेपेण कैश्चिदर्वाचीनैः व्याख्यातृभिः व्याकुलत्वमापादितम् । स्वाभिमतार्थपरतया हठादिव श्रुतिसूत्रादिकं आकृष्टम् । साम्प्रदायिकाश्च आर्षाः पूर्वव्याख्याः अनादरपदं गमिताः । क्वचिच्च खण्डिताः । व्यासस्य एकान्तरितप्रशिष्यो बोधायन इति पाराशर्यविजये महाचार्योक्तिः । एवं व्यासस्य सकाशात् स्वगुरुपरम्परया प्राप्तमेवार्थजातं बोधायनेन स्ववृत्तिग्रन्थे निक्षिप्तं न प्रमाणं चेत् , कथमत्रभवता नवीनेन इदंप्रथमतया दर्शितं अपूर्वमर्थं अनुपपत्तिशतसङ्कुलं प्रमाणयेम । श्रुत्यनुसारी सूत्रकृत् आनन्दमयं ब्रह्मेति ब्रवीति । भवांस्तु तदन्यम् । तथा *विवक्षितगुणोपपत्तेश्च, आनन्दादयः प्रधानस्य* इत्यादिना सगुणत्वं सूत्रकारेष्टम् , भवतश्च अन्यथैव मतम् । किं बहुना? चतुर्थे फलाध्याये साकल्येन यत् मुक्तिफलं देहान्निष्क्रमणमारभ्य अनावृत्तिपर्यन्तं कर्मध्वंसार्चिरादिमार्गगमनगुणाष्टकाविर्भावादिरूपं सूत्रकृता यथाश्रुति विपुलमुपन्यस्तं ; तत्र हि निर्गुणमुक्तेः स्वरूपमपि दुर्भिक्षम् । तदुक्तमधिकरणसारावल्याम् कवितार्किक केसरिभिः श्रीवेदान्तदेशिकैः —

ध्यानादिं तत्प्रभावं करणभृत इतो देहकारात्कुटीरात्
निष्क्रान्तिं ब्रह्मनाड्या गतिमपि सुपथा स्वप्रकाशं च साध्यम् ।
इच्छातः स्वेष्टसृष्टिं परममपि परब्रह्मणा भोगमात्रे
साम्यं मायामतस्थः कथमिव घटयेदन्तिमाध्यायसारम् ॥ इति ॥

अतश्च सूत्रव्याख्यानच्छलेन प्रवृत्त्या स्वाभ्यूहितमेवार्थं *यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमत्र प्रदर्शयिष्यामः* इति तदुपरि बलादारोपयतो वचनानि कथं प्रामाणिकैः परिग्राह्याणि ।

एवं वेदान्तार्थविज्ञानाय सूत्रतद्वृत्तिकारैः कल्पितमविषमं पन्थानां अर्वाचीनैरीदृशैः उपप्लुतं परिशोध्य परिष्कृत्य च सद्गतिं प्रेप्सतां प्रदर्शयितुमेव वेदार्थसङ्ग्रहप्रबन्धोऽयं भगवद्रामानुजार्यैः आविर्भावितः।

अद्वैतमतगभनिका तत्प्रभेदाश्च

श्रीशङ्करभगवत्पादेभ्यः पूर्वमपि श्रीगौडपादादिभिः प्रचार्यमाणः एकतः बौद्धसकाशात् जगन्मिथ्यावादं स्वीकृत्य, अपरतश्च वेदप्रामाण्यपुरस्कारच्छद्मना कृतो जीवब्रह्माद्वैतवादः प्रवृत्त एवासीत्। ते च जरदद्वैतिनः *अत्र अस्मदीयाश्च केचित्* इत्यादिना तत्र तत्र भगवत्पादभाष्येऽपि परामृष्टा एव। स्थलविशेषेषु तत्तन्मतं परास्यद्भिः भगवत्पादैः अभिनवाश्च परिष्काराः अद्वैतमते प्रादर्शिषत। श्रीगौडपादादारभ्यैव वैदिकेष्वपि अद्वैतिषु बौद्धमतश्रद्धया मिथ्यावादोऽपि स्वीकृत इति गौडपादकारिकाभिरेव सुग्रहम्। यस्याः माण्डूक्योपनिषदः विवरणत्वेन इमाः कारिकाः प्रवृत्ताः, तत्रोपनिषदि प्रपंचमिथ्यात्वबोधकं पदं न किंचिदपि पाठकानां सुग्रहं भवति। केवलं प्रणवे चतुष्पात्वेन प्रथिते चातुर्विध्यविशिष्ट ब्रह्मदृष्टिनिवेशेन उपासनं सपरिकरं फलनिर्देशेन विवृतम् अल्पग्रन्थे अस्यामुपनिषदि। उपनिषदन्तरेष्वपि सर्वथा मिथ्यावादोऽयं दुर्भिक्षः। एवं तत्त्वपरेषु गीतादिष्वपि न मिथ्यात्वदृष्टिः। सृष्ट्युपक्रममेव प्रायः प्रवृत्तेषु सर्ववेदान्तेषु तां ब्रह्मपरिणामरूपां सविस्तरं प्रतिपादयत्सु कथन्नु स्पष्टप्रमाणं एकमपि विना सर्वसृष्टिमिथ्यात्वं एष्टव्यम्। ब्रह्मभिन्नं सर्वं मिथ्येति वदद्भिः तत्र प्रमाणतयेष्टं वेदशास्त्रमपि मिथ्या, शिष्याचार्योपदेशपरम्परापि मिथ्या, उपदिष्टमोक्षोपायः तत्साध्यंच मिथ्यैवेति निरूपयितुं न खलु सङ्कुचितैर्भूयते। एवमप्यामी स्वसिद्धान्तप्रचारापदेशेन भेदैकावलम्बनां सततप्रवृत्तिमेव भजन्तः न निवृत्तिपथावलम्बिनः इति, मिथस्स्पष्टमनैक्यं तदीयवचनप्रवृत्त्योः दृष्टम्। अमूलस्तम्भं भवननिर्माणमिव आकाशताण्डवमिव च अन्ते परिहासैकफलकमिदं मतं संवृत्तम्। सयूथ्यैरेव यादवप्रकाशाद्यैः –

वेदोऽनृतो बुद्धकृतागमोऽनृतः प्रामाण्यमेतस्य च तस्यचानृतम्।
बोद्धाऽनृतो बुद्धिफले तथानृते यूयं च बौद्धाश्च समानसंसदः॥

इत्याक्षिप्तंच। एवं सर्वानुभवविरुद्धोऽयं वेदान्तसरणौ मिथ्यावादप्रसरः गौडपादोपज्ञमिति अचकथाम।

तत्तथ्यम्। तथा हि - ओङ्कारे प्रणवे आत्मदृष्ट्योपासनं प्रणववत् तच्चातुर्विध्यकथन-पूर्वकं तत्र पृथगेव तदुपासकानां फलविशेषं च ब्रुवती माण्डूक्यश्रुतिः आत्मनः जागरितस्वप्नाद्यवस्थाभेदं विवृण्वती न तदवस्थाविशेषाणां एकेनाप्यक्षरेण मिथ्यात्वमाविष्करोति। प्रत्युत फलविशेषं चाहेति स्थिते सर्वतन्मिथ्यात्वं कथं सा श्रुतिः सहते? जागरितस्थान, स्वप्नस्थान,

सुषुप्तिस्थानादिभेदमात्मनो निर्दिशन्ती इयं माण्डूक्यश्रुतिरिव कठवल्ली च द्वितीयाध्याये *स्वप्नान्तं जागरितान्तं च उभौ येनानुपश्यति* इत्यादिना आत्मस्वरूपं सुविपुलं विवृत्य बहुवारं *एतद्वैतत्* इति अन्ते सर्वस्यापि ब्रह्मतादात्म्यं आम्रेडयन्ती न कस्यचित् मिथ्यात्वमाह। किं बहुना? मुण्डकश्रुतिः मध्ये मध्ये *तदेतत्सत्यम्* इति बहुवारमुपक्रममाणा मन्त्रेषु *कर्माणि कवयो - यान्यपश्यन्, यथा सुविक्तात् पावकात्* इत्यादिना सृष्ट्यादिविशेषान् विविधान् अपूर्वान् विशदयन्ती तत्सर्वं सत्यमित्येवमाह न पुनर्मिथ्येति क्वचिदपि ।

श्रुत्युक्तमपि सत्यत्वं नैव चेत् पारमार्थिकम् ।
तस्यैव मुहुरावृत्तिः किमर्थेति विचार्यताम् ॥

श्रुतौ न क्वापि ब्रह्मेतरस्य मिथ्यात्वं प्रोक्तमिति, प्रत्युत *तदेतत्सत्यम्* इति सृष्टेः सत्यत्वमेव उक्तमिति च अब्रूम। तदुपरि परेषां आक्षेपो यथा – कथं नोक्तमिति? अस्ति हि *मृत्तिकेत्येव सत्यम्* इति वाक्यम्। तद्धि कार्यमिथ्यात्वं प्रसाध्य कारणैकसत्यत्वप्रसाधकम्। तच्च निदर्शनविधया उक्तं कारणब्रह्मैकसत्यतापर्यवसायि कार्यमिथ्यात्वसमर्थकमेवेति । तर्हि कारणब्रह्मणः इव दृष्टान्त-वाक्यत्रयनिर्दिष्टानां मृत्तिका-लोहमणि-कार्ष्णायसानामपि कारणीभूतानां श्रुत्यैव सत्यत्वकथनात् कथं ब्रह्मैकमेव सत्यमिति पृष्टे, तेषु व्यावहारिकं सत्यत्वमिति यत् समाधीयते, स हि तेषां वक्रःपन्थाः। एवं *तदेतत् सत्यम्* इति श्रुत्या बहुवारमुक्तमपि सत्यत्वं व्यावहारिकमेवेति वादो न श्रद्धेयः। श्रुतौ क्वापि सत्यत्वस्य एवं पारमार्थिकं, व्यावहारिकं, प्रातिभासिकं चेति विभागादर्शनात्। भवद्भिरेव तु बौद्धसकाशादेव मिथ्यात्वमिव तैः सांवृतिकमिति नामान्तरेणोक्तम् व्यावहारिकस-त्यत्वमपि भिक्षितमिति दर्शनात्। लोके शास्त्रान्तरेषु वा ईदृशसत्यत्रैविध्यविभागादर्शनात्। तथा च सूत्रकारेण *जन्माद्यस्य यतः* इति लक्षणतयैवोक्तम् जगत्कारणत्वमपि ब्रह्मणि अन्ततः मिथ्यैवेति प्रतिपादनं, *कारणन्तु ध्येयः* इत्युक्तं मुक्तिसाधनीभूतकारणध्यानं च असकृदावृत्तिरूपं मिथ्यैवेति कथनम् , एवं सर्ववेदान्तवाक्यानां व्यावहारिकपरत्वेन आन्पर्यनिर्धारणं च, हठवादरूपमेवेति न प्रमाणपरतन्त्रैः परिग्राह्यम् –

सत्येवं बौद्धसिद्धान्तं आरोप्य श्रुतिमूर्धनि ।
यदाह गौडपादार्यः कारिकासु तदीक्ष्यताम् ॥

तथाहि - माण्डूक्ये प्रथममन्त्रेण *ओमित्येतदक्षरम्, इदं सर्वम्* इत्यादिकेन त्रिकालवशवर्ति कालातीतं च वस्तुजातं सर्वं प्रणवाभिन्नमेवेति प्रतिपाद्य, तद्विवरणाय द्वितीयेन *सर्वं ह्येतत् ब्रह्म , अयमात्मा ब्रह्म* इत्यादिना शब्दात्मकप्रणववाच्यब्रह्माभिन्नत्वं विशिष्य एतच्छब्दितदृश्यजडप्रपंचे आत्मशब्दितजीवराशौ च निरूप्य, प्रणववत् चतुष्पाद्वैशिष्ट्यं च आत्मन उक्त्वा, तृतीय-चतुर्थ-पंचममन्त्रैः वैश्वानर-तैजस-प्राज्ञभेदेन आत्मनः पादत्रयम् उपवर्ण्य, षष्ठेन पूर्वोक्ततृतीय-

पादभूतप्राज्ञस्यैव *एष सर्वेश्वरः एष सर्वज्ञः* इत्यादिना सर्वेश्वरत्व, सर्वज्ञत्व, सर्वान्तर्यामित्व, सर्वसृष्टिलयादिकारणत्वानि स्पष्टीकृतानि। नैतेषु मन्त्रेषु एकमपि पदं प्रपंचस्य मायाकल्पितत्वं तथा मिथ्यात्वं वा निरूपयति। अथापि एतद्विवरणार्थं प्रवृत्तासु कारिकासु सप्तमश्लोकमारभ्य –

विभूतिं प्रसवन्त्वन्ये मन्यन्ते सृष्टिचिन्तकाः।
स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ॥

इत्यादिना कतिपयपक्षानुपक्षिप्य, *देवस्यैव स्वभावोऽयं आप्तकामस्य का स्पृहा* इति निगमितम्। अत्र भगवत्पादैश्च *सर्वेप्यमी पक्षाः सृष्टिचिन्तकानामेव, न तु परमार्थचिन्तकानाम्* इत्युक्त्वा, स्वयं सृष्टेः मायावीश्वरनिर्मितत्वेन मिथ्यात्वात् तद्विचारस्य निष्प्रयोजनतां च प्रतिपाद्य, तुरीयनिर्विशेषाद्वैतचिन्तनमेव मुमुक्षूणाम् आदरणीयमिति निर्धार्य च, मिथ्याभूतसृष्टेः परमार्थकारणान्तराभावात् , निर्विकारस्य ब्रह्मणः स्वभावशब्दवाच्यो नैसर्गिको मायापदार्थ एव सृष्टिप्रतिभासहेतुरिति विवृतम्। अत्र तैः ऐन्द्रजालिकमायाविदृष्टान्तो निदर्शितः। तथा सप्तमकारिका व्याख्यानान्ते च न *हि रज्ज्वादीनां अविद्यास्वभावव्यतिरेकेण सर्पाद्याभासत्वे कारणं शक्यं वक्तुम्* इति कथयद्भिः तैः सर्पाभासे अविद्यामन्तरेण यथा न स्वतो रज्जोः कारणता, तथा न ब्रह्मणोऽपि सृष्टिं प्रति वास्तविकं कारणत्वमिति मायाकल्पितमेव सर्वमिति च व्यंजितम्। हन्त ! किमेष एव उक्तमाण्डूक्यमन्त्राणां षण्णामर्थः? तत्र हि मायामिथ्या प्रसङ्गलेशोऽपि न दृश्यते। नापि मायाविरज्जुसर्पादिदृष्टान्ताः। अस्त्वेतत्।

षष्ठमन्त्रे एष सर्वेश्वरः, *एष सर्वज्ञः, एषोऽन्तर्यामी, एष योनिः सर्वस्य, प्रभवाप्ययौ हि भूतानाम्* इति वर्णितो यः तृतीयपादभूतः प्राज्ञशब्दवाच्यः, तस्मिन् मायाविसादृश्यं आरोप्य सर्वतन्मिथ्यात्वम् एतैः यदावेद्यते, अत्यन्तानुचितं ह्येतत्। तथा *अविद्याशबलोऽयं तृतीयः प्राज्ञः* इत्युक्त्वा तस्य स्पष्टोक्तं सर्वज्ञत्वं निह्नूयते। श्रुत्यन्तरोक्तं अक्षरपरब्रह्मणः *यद्भूतयोनिं परिपश्यन्ति धीराः* इति इदं भूतयोनित्वं मिथ्याक्रियते। सर्वज्ञत्वस्फोरकः प्राज्ञशब्दोऽपि द्वादश कारिकायां *नात्मानं न परांश्चैव न सत्यं नापि चानृतं प्राज्ञः किंचन संवेत्ति* इति *प्रकर्षेण अज्ञः प्राज्ञः* इतिरीत्या अज्ञत्वे पर्यवसानं गमितः। प्रकर्षेण जानातीति प्रज्ञः। प्रज्ञ एव प्राज्ञः इति स्वार्थे अण् प्रत्ययान्ततया *प्रज्ञादिभ्यश्च* इति सूत्रेण पाणिनिकृतं व्युत्पादनं समुद्रे खलु विक्षिप्तम्।

अथ सृष्टिकारणीभूतप्राज्ञचिन्तेयं यदि निष्प्रयोजना, तर्हि व्यासकर्तृका ब्रह्ममीमांसा किमर्थेति विचार्यम्। *यतो वा इमानि भूतानि जायन्ते* इत्यादिना मुक्तकण्ठं कारणत्वेन ब्रह्म लक्षयन्ती श्रुतिः *जन्माद्यस्य यतः* इत्येवं आदौ कारणतामेव लक्षयन् आद्येन अध्यायेन कृत्स्नेन कारणचर्चामेव च कुर्वन् सूत्रकृत् , *कश्चध्येयः कारणं तु ध्येयः* इति कारणव्यक्ति ध्यानस्यैव मोक्षसाधनतां सङ्गिरमाणानि श्रुत्यन्तराणि च किं उन्मत्तप्रलापित्वेन बहिष्कार्याणि ?

अथोपरिष्टात् व्रजेम। सप्तमो मन्त्रः *नान्तः प्रज्ञं, न बहिः प्रज्ञम्* इत्यादिना परमात्मनः तुरीयं पादं विशदयति। *तत्र प्रपंचोपशमं शान्तं शिवमद्वैतम् चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः* इति च निगमितम्। प्राधान्येन अत्रैव मन्त्रे निर्विशेषाद्वैतपरत्वमिति परेषां भ्रान्तिः। ननु *अदृष्टम् अव्यवहार्यम्, अग्राह्यम्, अलक्षणम्, अचिन्त्यम्, अव्यपदेश्यम्, एकात्मप्रत्ययसारम्* इति इमानि पदानि अद्वैतस्य विशेषणानि तत्तन्निषेधमुखेन निर्विशेषपराण्येव। क्रमेण च, ज्ञानेन्द्रियाग्राह्यं हानोपानादिव्यवहारानर्हं कर्मेन्द्रियैरग्राह्यम् न लिङ्गानुमेयं न मनसापि चिन्त्यम्, प्रवृत्ति-निवृत्तिरूपधर्माभावात् न च शब्दाभिधेयम् आत्मैक एव परमार्थ इति साररूपमद्वैतम् इति हि वाक्यार्थो निष्पद्यते। कथमत्र भ्रान्तिः नः ? इति चेत् ब्रूमः। प्रवृत्तिनिमित्तभूतजातिगुणादिधर्मविरहात् निर्विशेषं ब्रह्म न अन्वयमुखेन शब्दप्रतिपाद्यं ज्ञेयं वा भवतीति, निषेधमुखेन तत्प्रतिपादनं श्रुत्या क्रियते इति हि भवदाशयः। तर्हि अन्ते *स आत्मा स विज्ञेयः* इति किमुच्यते इति पृच्छामः। अयमात्मशब्दः किं प्रवृत्तिनिमित्तपुरस्कृतो वाचकः, उत न ? आद्ये तेनैव सविशेषता, अत्रैवोक्तेन *अव्यपदेश्यम्* इत्यनेन व्याघातश्च। द्वितीये आत्मशब्देनैवेति किं ? जडशब्देनापि ब्रह्मोच्यताम्। अविशेषात्। अथ अचिन्त्यत्वे *स विज्ञेयः* इत्यपि कथम्? कथंच *जन्माद्यस्य यतः* इति लक्षणकरणं सङ्गच्छते। शास्त्रयोनित्वं वा कथन्तराम्? अतश्च मिथ्यात्वकथने सर्वमूलोच्छेदनं अकृत्वा प्रमाणपरतन्त्रैः श्रुत्यर्थसमन्वयः कार्यः। न तु न्यायानुग्रहेण औपनिषदार्थतत्त्वनिर्णेतुः सूत्रकारस्य मतं तदनुसारिणां वृत्तिकार-वाक्यकार-द्रमिडभाष्यकारादीनांच मतं विरुद्ध्य स्वैरमन्यथा योज्यम्।

नन्वत्र तुरीयात्मतत्त्वनिरूपणपरे प्रकृतमन्त्रे स्थितमद्वैतपदं स्पष्टं द्वैतप्रपंचनिषेधपरमेव। एवं द्वैते निषिद्धे यदेकं तत्त्वं श्रुत्यैव एकमेवेति निर्धारितं, यच्च तयैव *द्वितीयाद्वै भयं भवति* इति ब्रुवत्या *अभयं प्रतिष्ठां विन्दते* इति अभयरूपमोक्षस्थानतया ऐक्यमेव परमार्थ इति दृढीकृतं, तदनुसारेणैव व्याचक्षाणानां नः कोऽपराध इति। अत्रोच्यते - अद्वितीयश्रुतिः भेदानुपमर्देनैव व्याख्येया। भेदस्य भयहेतुत्वमिति येयं आपाततो दर्शिता बिभीषिका, सापि श्रुत्यैव परास्यत इति, न तादृशमद्वैतं श्रद्धेयम्। सृष्ट्युन्मुखतां ब्रह्मणः श्रावयन्ती सैव हि श्रुतिः *स एकाकी न रमेत* इत्याह। एवम् अरतिहेतुत्वमेव ब्रह्मणोपि एकाकित्वस्य इति सिद्धेः, तादृशं एकाकित्वं निर्धूय कथं न ब्रह्मवदेव सर्वैः द्वैतप्रियैः भाव्यम्? द्वैतं भयहेतुरिति चेत् - सर्वज्ञं ब्रह्म *द्वैतं भयहेतुः* इति अभिजानदेव कथं द्वैतसृष्टौ द्विपराध्द्धावसान-काले बहुवारं सज्जतीति पृच्छामः। तदपि ब्रह्म अज्ञानावलीढमेवेति चेत् - कृतं तर्हि साङ्गोपाङ्गैः अज्ञब्रह्मप्रतिपादकैः वेदान्तैरिति सर्वैरपि तद्विचारात् विरन्तव्यं भवति। अतो ब्रूमः - सृष्टिकृतभेदानुपमर्देनैव अद्वैतश्रुतिः व्याख्येयेति। सति श्रुतेः सर्वस्या अपि निर्दोषतया समप्रामाण्ये, कथं तदेकदेशस्य मिथ्यार्थकत्वम्? न च सा स्वोक्तार्थैकदेशस्य मिथ्यात्वं ब्रूयात्। उन्मत्तप्रलापित्वापातात्। अतो नात्र मन्त्रे अद्वैतपदेन द्वैतमिथ्यात्वसाधनप्रत्याशा।

सत्येवं गौडपादकारिकासु एतन्मन्त्रविवरणप्रवृत्तासु -*प्रपंचो यदि विद्येत निवर्तेत न संशयः । मायामात्रमिदं द्वैतं अद्वैतं परमार्थतः - - - ज्ञातेद्वैतं न विद्यत आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा* इत्यादिना यन्मिथ्यात्वप्रसाधनं विपुलम् - न तन्मन्त्रारूढं, किन्तु आरोपितम्। अथैतदुपरिष्टादपि मन्त्रेषु न मिथ्यात्वकथा। तत्र हि *ओमित्येकाक्षरम्* इति श्रुत्यन्तरे एकाक्षरतया प्रतिपादितप्रणवे मात्रात्रय वैशिष्ट्यं अमात्रता चेति अंशचतुष्टय-कल्पनेन तत्प्रतिपाद्यब्रह्मणि च पादचतुष्टयनिरूपणपूर्वकं शब्दार्थयोः तादात्म्यविधया क्रियमाणं प्रत्येकं तत्र तत्रोपासनं चतुर्विधमपि भिन्नभिन्नफलप्रदमिति निगमितम्। न हि तत्फलानामसत्यत्वे अनन्तरं तदुपासनतत्फलानां पुनः-प्रतिपादनम् आवश्यकम् । एवं समग्रेयं माण्डूक्यश्रुतिः न जगन्मिथ्यात्वे लेशतोऽपि प्रमाणमिति स्पष्टम्।

सत्येवं वस्तुतत्त्वे, श्रुतिभिरीदृशं मिथ्यात्वं लब्धप्रतिष्ठं न भवेदिति भावनयैव युक्त्या तत्साधनाय पृथक् वैतथ्यप्रकरणनिर्माणे प्रवृत्तं कारिकाकृता । तदुक्तम् — उपरिभाष्यकर्तृभिः भगवत्पादैरेव वैतथ्यप्रकरणावतारिकायाम् यथा - *ज्ञाते द्वैतं न विद्यते* इत्युक्तम्। *एकमेवाद्वितीयम्* इत्यादि श्रुतिभ्यः। *आगममात्रं तत्। तत्रोपपत्त्यापि द्वैतस्य वैतथ्यं शक्यते अवधारयितुमिति द्वितीयं प्रकरणमारभ्यते वैतथ्यं सर्वभावानाम्* इत्यादिना इति। श्रुत्यैव जगन्मिथ्यात्वं विस्पष्टमुक्तं चेत् न तत्र पुनरुपपादनापेक्षा। तत्र तस्य अस्फुटत्वादेव समर्थनापेक्षा लब्धावकाशेति ज्ञापितं भवति। भगवत्पादीयमिदमवतारिकावाक्यं गाढं परिशीलनमर्हतीति। *ज्ञाते द्वैतं न विद्यते* इति केनोक्तम्? न माण्डूक्यश्रुत्या, किन्तु कारिकाकृतैव । तेनोक्तंचेत् कथं प्रमाणम्? इत्याशङ्कायाम् *एकमेवाद्वितीयमित्यादि* श्रुतिभ्यः इति समाधानम् । माण्डूक्ये एकमेव तत्त्वमिति अनुक्तावपि अत्रोक्तमद्वैतपदं भेदमिथ्यात्वेन ऐक्यपरमेवेति स्पष्टयति अद्वितीयपदं प्रयुज्य ऐक्यंच ब्रुवत् श्रुत्यन्तरमिति भावः। वस्तुतः तदपिश्रुत्यन्तरं न मिथ्यात्वपरम्। *सदेव सोम्येदमग्र आसीत् - एकमेवाद्वितीयम्* इति अग्रे - प्रलयकाले तथात्वमिति श्रवणात्। नहि इदानीमपि द्वितीयाभाव इति तत्रोक्तम् *तुष्यतु सज्जनन्यायेन* अद्वितीयपदमपि सृष्टिप्राप्तजगदभावं ब्रूयात्। न तु तादात्विकं प्रलयाधिकरणं कालमपि नास्तीति। अग्रे इति कालसत्त्वोक्तेः। तेन सद्वितीयत्वमेव एकस्य ब्रह्मणः इति कथं सर्वमिथ्यात्वं सिद्ध्येत्? तां छान्दोग्यश्रुतिं अत्र प्रमाणयद्भिः भगवत्पादैः तत्र भाष्ये अद्वैतपदं निमित्तकारणान्तराभाव परतयैव व्याख्यातम्। न तु प्रपंचाभावपरतयैवेति विचित्रम्। *नेह नानास्ति किंचन* इति स्पष्टं द्वैतनिषेधपराः श्रुतयः आदिशब्दगृहीताः इति चेत्, नैतदपि सांप्रतम् । इहेति तत्र वाक्ये किमर्थकमितिविचार्यम्। इह ब्रह्मणि नानारूपं जगन्नास्तीति न तदर्थः। कठोपनिषदि नचिकेतसे हि यमेनैवं ब्रह्मतत्त्वम् उपदिश्यते। एतत्पूर्वोत्तरवाक्येषु त्रिवार *ईशानो भूतभव्यस्य* इति तद्वैभवं प्रत्यपादि। अस्मिन् भूलोके कश्चिदीश्वरः लोकान्तरे च अन्यः,

कालान्तरे च अन्यः इत्येवम् आशङ्कां परासितुमेव *यदेवेह तदमुत्र यदमुत्र तदन्विह* इत्यादिना सर्वदेशकालेषु एकएवेश्वर इति प्रतिपाद्य देशकालभेदेन ईश्वरनानात्वं न सम्भाव्यं इत्येव *य इह नानेव पश्यति, नेह नानास्ति किंचन* इत्यादिवाक्येन निरूप्यत इति प्रकरणात् सुग्रहम्। यदि सर्वमिथ्यात्वबोधनमेव तदर्थः, तर्हि समनन्तरमेव *अङ्गुष्ठमात्रः पुरुषः ज्योतिरिव अधूमकः* इत्यादि विषयिणी उपदेशपरम्परा किमर्थेति विमृश्यताम्। एवं श्रुतिभिः मिथ्यात्वबोधनं दुश्शकमिति सम्भाव्यैव आगममात्रं तत् इति तत्र अनाश्वासं प्रदर्श्य युक्तिभिः सर्वभावानां वैतथ्यं साधयितुं कारिकाकृत् उपाक्रमत इति शाङ्करीयस्य उक्तावतारिकावाक्यस्य आशयः।

अत्र हि वैतथ्यप्रकरणे प्रथमं वैतथ्यं सर्वभावानाम् - *स्वप्न आहुर्मनीषिणः* इत्यादिना स्वाप्नार्थमिथ्यात्वं प्रसाध्य *अन्तस्स्थानात्तु भेदानां तस्माज्जागरिते स्मृतम्, स्वाप्नजागरितस्थाने ह्येकमाहुर्मनीषिणः* इत्यादिना च स्वाप्नवत् जागरितार्थानां मिथ्यात्वं प्रासाधि। *आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा, तस्मादाद्यन्तवत्त्वेन मिथ्यैव खलु ते स्मृताः* इति च विवृतमिदं मिथ्यात्वम्। मायावि, स्वप्न, रज्जुसर्पादिदृष्टान्तैश्च बहुशः वैतथ्यं सृष्टेरुपपाद्य उपरिभूयसा तत्तद्वादिनां मतानि अनूद्य —

स्वप्नमाये यथादृष्टे गन्धर्वनगरं तथा।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः॥

इति स्ववादस्य वेदान्तसिद्धत्वं च भाषितम्।

न निरोधो नचोत्पत्तिः न बद्धो न च साधकः।
न मुमुक्षुर्नवा मुक्तः इत्येपा परमार्थता॥

इति स्वमतसारांशः निरूपितः। अन्ते च अद्वैतभावः प्रशंसितः।

अथ अत्र प्रकरणे भगवत्पादैरपि व्याख्यातृभिः चतुर्थश्लोके *जाग्रद्दृश्यानां भावानां वैतथ्यम् इति प्रतिज्ञा, दृश्यत्वादिति हेतुः, स्वप्नदृश्यभाववत् इति दृष्टान्तः* इत्यादिना विपुलमेव मिथ्यात्वमुपपादितम्। *उपरि न निरोधो नचोत्पत्तिः* इत्येतस्य विवरणे च, सृष्ट्यादिबोधकस्यापि समस्तवेदान्तशास्त्रस्य अन्ततः यदि तन्निषेधमात्रे एव तात्पर्यम्, तर्हि वेदान्तेऽपि शून्यवाद-प्रसङ्गः इत्याशङ्कामुद्भाव्य, न *रज्जुसर्पादि विकल्पनायाः निरास्पदत्वानुपपत्तिः इति प्रत्युक्तमेतत्* इति समाहितम्। सर्वभ्रमाधिष्ठानतया रज्जुवत् ब्रह्माङ्गीकृतमेकम् इति तदाशयः। तथा कारिकाकृता तृतीयप्रकरणे अद्वैतं शिवमिति विवृत्य, चतुर्थे च अलातशान्तिप्रकरणे भेदवादिमतानां दौस्स्थ्यं प्रख्याप्य, एवं मिथ्यावादे, ज्ञानात्मवादे च त्वयोक्ते कस्ते बौद्धमताद्विशेषः? इति स्वयमेव आशङ्कां उद्भाव्य, अन्ते *नैतद्बुद्धेन भाषितम्* इति समाहितम्। तत्रेदं भगवत्पादीयम् विवरणवाक्यम् - *यद्यपि बाह्यार्थनिराकरणं ज्ञानमात्रकल्पना च*

अद्वयवस्तुसामीप्यमुक्तम् इदं तु परमार्थतत्त्वं अद्वैतं वेदान्तेष्वेव विज्ञेयमित्यर्थः इत्यादि। एवं स्वीयस्य अद्वैतमतस्य बाह्यमिथ्यात्वज्ञानात्मत्वविषये बौद्धसामीप्यं स्वयमेव इष्टमिति निरूपितम्। ज्ञानरूपब्रह्मैकाधिष्ठानता कथनन्तु वेदान्तं पुरस्कुर्वतां अस्माकं विशेष इति स्वस्मिन् नास्तिकत्वभ्रमनिरासाय वैदिकत्वं कंचुकित्वं इति परमार्थः। अत्रैव अलातशान्तिप्रकरणे २८ श्लोकव्याख्याने भगवत्पादैः *यस्मादसत्येव घटादौ घटाद्याभासता चित्तस्य विज्ञानवादिना अभ्युपगता, तदनुमोदितमेव अस्माभिरपि* इति ब्रुवद्भिः बौद्धसाम्यं स्वस्मिन् स्वयमेव अङ्गीकृतम्। गौडपादीयाः इमाः कारिकाः बौद्धतत्त्वप्रतिपादकलङ्कावताराख्यग्रन्थगतश्लोकैः शब्दतः अर्थतश्च सादृश्यं भजन्तीति तत्संवादमपि अत्र किंचित् निदर्शयामः। लङ्कावतारगतैः *न वक्ता न च वाच्योऽस्ति, न मोक्षो न च बन्धनम्* इत्यादि श्लोकैः वैतथ्यप्रकरणगत ३२ *न निरोधो न चोत्पत्तिः* इत्यादि पूर्वश्लोकस्य संवादः स्पष्टः। *गन्धर्वनगरस्वप्नमायानिर्माणसादृशाः* इत्यादिलङ्कावतारश्लोकेन वैतथ्यप्रकरणस्थः ३१ *स्वप्नमाये यथा* इत्यादिश्लोकः दृष्टसंवादः। किं बहुना? स्वयमेव वौद्धमतसादृश्यस्य स्वसिद्धान्तेऽङ्गीकाराज् संवादप्रदर्शनमपि वृथाविस्तरत्वात् नात्र चिकीर्षामः।

एवं सति अपरमिदमाश्चर्यं पाठकेभ्यो निवेदयामः। स्वपरमाचार्यभूत गौडपादोक्तकारिकाः व्याकुर्वद्भिरपि भगवत्पादैः ब्रह्मसूत्रगत द्वितीयाध्याय द्वितीयपादे बौद्धनिरासविषयक सूत्रविवरण-सन्दर्भे उक्तकारिका दर्शितं स्वप्नदृष्टान्तपूर्वकजाग्रत्प्रपंचमिथ्यात्वं *वैधर्म्याच्च न स्वप्नादिवत्* इति सूत्रे यथा स्वयमेव प्रत्याख्यातम्, तदेवम् — *वैधर्म्यं हि भवति स्वप्नजागरितयोः। किं पुनः वैधर्म्यम्? बाधाबाधाविति ब्रूमः। बाध्यते हि स्वप्नोपलब्धं वस्तुप्रतिबुद्धस्य — न चैवं जागरितोपलब्धं वस्तु स्तम्भादिकं कस्यांचिदवस्थायां बाध्यते* इत्यादिना। एवं बौद्धवादसगन्धितया कारिकासु प्रोक्तां बाह्यार्थनिराकरणेन ज्ञानमात्रकल्पनां व्याकृतवद्भिः तैरेव सूत्रभाष्ये बौद्धनिराकरणप्रस्तावे *नाभाव उपलब्धेः* इत्यत्र ज्ञानातिरेकेण अर्थानां सद्भावः प्रसाधितः। यथा *न खलु अभावो बाह्यस्यार्थस्य अध्यवसातुं शक्यते। कस्मात् उपलब्धेः? उपलभ्यते हि प्रति प्रत्ययं बाह्यार्थः स्तम्भः कुड्यः घटः पटः इति। न चोपलभ्यमानस्यैव अभावो भवितुमर्हति। ननु नाहमेवं ब्रवीमि, न कंचिदर्थमुपलभं इति। किन्तु उपलब्धिव्यतिरिक्तं नोपलभे इति ब्रवीमि। बाढं एवं ब्रवीषि। निरङ्कुशत्वात्ते तुण्डस्य। न तु युक्त्युपेतं ब्रवीषि। यतः उपलब्धिव्यतिरेकोऽपि बलादर्थस्य अभ्युपगन्तव्यः। उपलब्धेरेव। न हि कश्चित् उपलब्धिमेव स्तम्भः कुड्यंचेति उपलभते। उपलब्धिविषयत्वेनैव तु स्तम्भकुड्यादीन् सर्वे लौकिका उपलभन्त* इत्यादिना। तथा *न निरोधो न चोत्पत्तिः* इत्यादि कारिकोक्तं सृष्ट्यादि सर्वव्यवहारमिथ्यात्वं तत्र प्रतिपादितवद्भिरेव भगवत्पादैः, सूत्रभाष्ये तु कार्यकारणयोः अनन्यत्वं प्रसाधयद्भिः त्रिकालाबाध्यत्वं कार्यस्यापि प्रतिज्ञाय, सृष्टेः सृष्टानांच

तथ्यत्वं प्रतिष्ठापितम्। यथा *सत्वाच्चापरस्य* इति सूत्रे — *यथा च कारणं ब्रह्म त्रिषु कालेषु सत्वं न व्यभिचरति — एवं कार्यमपि जगत् त्रिषु कालेषु सत्वं न व्यभिचरति। एकंच पुनस्सत्त्वम्* इति। अनेन दृष्टान्तदार्ष्टान्तिकपरवाक्यद्वयेन ब्रह्मवत् त्रिकालाबाध्यत्वरूपं पारमार्थ्यं जगतः स्वीकृतं वा, न वा, इति विमृश्यम्। सदात्मना जगतः सत्यत्वं न घटाद्यात्मना इत्येव भाष्यार्थः इति तु , न शङ्क्यम्। सद्ब्रह्म निदर्शनीकृत्यैव कार्यस्य जगतोऽपि त्रिकालाबाध्यत्वनिरूपणात् । किंच *रज्ज्वात्मना सत्यः सर्पः* इति वचनं यथा असम्भवदुक्तिकं तथा सदात्मना जगत्सत्यमिति कथनमपि। अतः उभयपारमार्थ्यवचनमेव उक्तभाष्यसिद्धमिति स्वीकार्यम्। तथा सति सेयं उभयतःपाशा रज्जुः। एकतोऽपसिद्धान्तः। अन्यतो व्याघातः। इति।

एवं *मायामात्रमिदं द्वैतम् उपदेशादयं वादः। ज्ञाते द्वैतं न विद्यते* इत्यादि कारिकाखण्ड-व्याख्याने *शास्त्रं शास्ता शिष्यः* इत्यादि विकल्पस्यापि मिथ्यात्वमातिष्ठमानैः , तथा *स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढं — परस्परं विरुद्ध्यन्ते तैरयं न विरुद्ध्यते* इत्येतत्कारिकाखण्डविवरणे च, *भ्रान्तिमूलकद्वैतमतानां परस्परं विरोध एव। नैवं अस्मदीयो वैदिकोऽद्वैतपक्षः परैः विरुद्ध्यते* इति च विलिखद्भिरेव भगवत्पादैः सूत्रभाष्ये सर्वमिथ्यावादिनं प्रति लौकिकपदार्थानङ्गीकारे कथं वादप्रतिवादव्यवस्थापि परीक्षकाणां सिद्ध्यतीति क्षिपद्भिः *अनुस्मृतेश्च* इति सूत्रे यदुच्यते - तदेवम्। *यदा हि लोके प्रसिद्धः पदार्थः परीक्षकैः न परिगृह्यते, तदा स्वपक्षसिद्धिः परपक्षदोषो वा, उभयमपि उच्यमानं परीक्षकाणाम् आत्मनश्च यथार्थत्वेन न बुद्धिसन्तानमारोहति* इत्यादि। एवं इयता ग्रन्थेन वेदान्तशास्त्रे मिथ्यावादप्रवेशः गौडपादोपज्ञमिति, श्रुतिमूर्धनि वादोऽयं बलादारोपित इति, ईदृशतात्पर्येणैव कारिकाः व्याकुर्वद्भिरपि भगवत्पादैः सूत्रभाष्ये तु तद्विरुद्धमिवभाषमाणैः स्वमतस्य बौद्धातिरेकेण वैदिकत्वप्रत्यायनार्थं बहुप्रयस्तमिति च सुविपुलम् उपपादितम्। निर्मत्सराः सहृदयविमर्शका एव अत्र प्रमाणम्।

मांडूक्योक्तं अर्थतत्त्वम्

अत्रेदं बोध्यम्। यदि गौडपादकारिकातद्भाष्याद्युक्तरीत्या अस्या उपनिषदः प्रपंचमिथ्यात्वसाधनपूर्वकं निर्विशेषाद्वैतबोधनपरत्वेन समन्वयो नेष्यते — कथं तर्हि अन्यथा समन्वयो निरूप्यः? इति चेत् ब्रूमः — न वयं दुर्बोध श्रुत्यत्र निरुपणे स्वातन्त्र्यं बिभृमः। किन्तु स्मृतीतिहासपुराणादीनि यदि एतच्छायानुसारीणि उपबृंह्मणानि सन्ति, यदि वा आर्षव्याख्यानानि कानिचित् सन्ति, तदनुसारेणैव श्रुत्यर्थ निर्णये व्यवस्यामः।

श्रीमहाभागवते १२ स्कन्धे ११ अध्याये इमे श्लोका अनुसन्धीयन्ते —

वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयं।
अनिरुद्ध इति ब्रह्मन् मूर्तिव्यूहोऽभिधीयते॥

स विश्वः तैजसः प्राज्ञः तुरीय इति वृत्तिभिः ।
अथेन्द्रियाशयज्ञानैः भगवान् परिभाष्यते ॥
अङ्गोपाङ्गायुधा तुल्यैः भगवान् तच्चतुष्टयम् ।
बिभर्ति स चतुर्मूर्तिः भगवान् हरिरीश्वरः ॥ इत्यादिकाः।

अत्र हि भगवतो हरेः एकस्यैव वासुदेव-संकर्षण-प्रध्युम्नानिरुद्धभेदेन मूर्तिव्यूहचतुष्टयशालित्वं, तच्चतुष्टयस्य च विश्व-तैजस-प्राज्ञ-तुरीयशब्दवाच्यत्वं, व्यूहानां च वृत्तिभेदाः, अङ्गोपाङ्गायुधाकल्पादि भेदाश्च कथ्यन्ते। एतद्व्यूहभेद एव परब्रह्मणस्तस्य हरेः चतुष्पात्वं उपनिषदुक्तं प्रत्यभिज्ञापयति। विश्व-तैजस-प्राज्ञ-तुरीयशब्दाश्च ते एव – येऽवश्यं मांडूक्यगतं चतुष्पादात्मस्वरूपं इदमेवेति ग्राहयन्ति। भगवतः प्रणवाभिधेयत्वं, प्रणवस्य अ-उ-म इत्येतद्वर्णत्रयेण अन्तिमेन नाद विशेषेन च चातुर्विध्यं, चतुर्णांच भागानां ब्रह्मगतपादचतुष्टयवाचकत्वं, तत्तद्वर्णेषु तद्वाच्यव्यूहात्मतत्त्वारोपेण उपासने प्रत्येकं क्रियमाणे फलं चोच्यमानं उक्तभागवतश्लोकानुसारितया व्याख्याने सुष्ठु सङ्गच्छतेतराम्। अद्वैतत्वं च एकस्यैव नानाव्यूहस्वीकारेण उपपन्नम्। किंच भगवतः चतुर्व्यूहत्वमिव त्रिव्यूहत्वमपि क्वचित् कथितम्। त्रिव्यूहस्य समष्टिमूलकन्दतया वासुदेवस्य न व्यूहान्तर्भाव इति तदाशयः। अत इदं पक्षान्तरम्। अ-उ-म इति त्रिवर्णात्मकः प्रणवः पृथक् वर्णैः त्रिव्यूहवाचक इति पांचरात्रे स्पष्टं उक्तमेव अधोनिर्दिष्टश्लोकेन यथा –

त्रिरात्मा त्रिस्वभावश्च तथा त्रिव्यूह एव च ।
पांचरात्रे तथाह्येषः भगवद्वाचकः स्मृतः ॥ इति ।

स चायं श्लोकः गीताभाष्यतात्पर्यचन्द्रिकायां अष्टमाध्याये १३ श्लोकव्याख्याने निर्दिष्टः। एवं भागवत-पांचरात्रादिषु स्पष्ट प्रतिपन्नमेव प्रणवाक्षरैः भगवन्मूर्तिभेदवाचकत्वं तन्मूर्तिभेदानां च जाग्रत्स्वप्नसुषुप्तानि तत्तदवस्था निर्वाहकत्वं च अनादृत्य अन्यथा बौद्धमतसादेश्येन यत् गौडपादैः अर्थान्तरमारोप्यते – तत् कथं संगच्छते भागवतप्रवक्तृ श्री शुकशिष्यत्वेन स्वगुरुपरम्परायां अद्वैतिभिः उपश्लोकितानां श्री गौडपादानां इति चिन्त्रीयामहे। अतो वेदान्तेषु बौद्धवादप्रवेशः एतदुपज्ञमेवेति विमर्शकसरणिः॥

भास्करीयमद्वैतम्

इत्थं स्वकृतचौर्यं निह्नुवतः पश्यतोहरस्येव बौद्धसोदरत्वेन प्रस्फुटार्थमपि अनेवन्त्वेन निह्नूयमानं वैदिकत्वेन कंचुकितं च मायावादिनोऽद्वैतिनः मतमिदं स्पष्टमेव श्रुतिस्मृतिसूत्रैः पराहतमिति भावयद्भिः, जगतस्सत्यतां ब्रह्मणि सगुणतां च आतिष्ठमानैः, जीवेश्वरयोऽस्तु स्वाभाविकमद्वैतं अभिप्रयद्भिः भास्कराचार्यैरपि, शाङ्करमद्वैतं सर्वात्मना बौद्धसोदरमेवेति स्पष्टं

प्रख्यापितम्। तथा हि *विगीतं विच्छिन्नमूलं माहायानिकबौद्धगाथायुतं मायावादं व्यावर्णयन्तो लोकान् व्यामोहयन्ति* इति। *ये तु बौद्धमतावलम्बिनः मायावादिनः, तेऽप्यनेन न्यायेन सूत्रकारेणैव निरस्ताः* इति च; एवंविधाः भास्करीयसूत्रभाष्योक्तयः बहवोऽत्र प्रमाणम्।

श्रुत्यादिप्रमाणविरुद्धे तथा लोकानुभवविरुद्धे व्याघातबहुले च शाङ्करा‌द्वैते स्थिता अनुपपत्तयः यद्यपि न भास्करीया‌द्वैते कृतपदाः; जगति सत्यतायाः ब्रह्मणि सगुणतायाश्च प्रतिष्ठापनात्। कर्मकाण्डस्यापि मोक्षोपयोगित्वनिरूपणाच्च। एवं शाङ्करभाष्यकृतः सर्वश्रुति विप्लवः अत्र प्रशमितः। पूर्वव्याख्यानसम्प्रदायानुसारित्वं च प्रतिपन्नम्। परिणामवादस्वीकारात् वृत्तिकार, वाक्यकारादि वाक्यानां प्रमाणीकरणाच्च। तथापि जीवेश्वरयोः स्वाभाविकाभेदसम्मत्या तद्भेदस्य औपाधिकतायाः ब्रह्मण एव उपाधिग्रस्ततायाः संसारित्वेन सर्वदोषास्पदत्वस्य च निर्धारणात् निर्दोषश्रुतीनां भेदश्रुतीनां च प्रामाण्यं न रक्षितम् - इति तन्मतेऽपि अंशतः दोषतादवस्थ्यम्। एवं शाङ्करमायातिरेकेण अत्र उपाधि पारमार्थ्यस्वीकरणेऽपि तत्संसर्गस्य निरवयवे अत एव अच्छेद्ये ब्रह्मण्येव स्वीकरणीयतया ब्रह्मणि तत्कृतदोषानिर्मोक्षः इति स्थितम्। अमी औपाधिकं जीवेश्वरभेदं अभेदन्तु स्वाभाविकं सङ्गिरमाणाः अपि भेदाभेदवादिनः। बन्धमोक्षव्यवस्थासिद्ध्यर्था महाकाशघटाकाशवत् उपाधिकृतभेदकल्पनाऽपि एतदीया दुरुद्धर-दोषावलीढेति भाव्यम्।

यादवप्रकाशीयमद्वैतम्

एते च यादवप्रकाशार्याः भास्कराचार्यवत् मिथ्यावादपरिपन्थिनोपि साक्षाद्ब्रह्मस्वरूपस्यैव सदात्मकस्य चिदचिद्रूपजगदात्मना परिणाममिच्छन्ति। जीवेश्वरयोः स्वरूपैक्यं आद्रियमाणाः एतेपि ब्रह्मण्येव सर्वदोषापत्तिरूपानुपपत्ति निर्दोषश्रुतिविरोधात् न निस्तरन्तीति, नैतन्मतमपि निरवद्यम् इति तत्त्वविदामुद्घोषः। अभेदं परिरक्षद्भिरेव जीवानां ब्रह्मांशत्वाभ्युपगमेन दोषाणां तन्मात्रव्यवस्थितत्त्वं प्रतिपाद्य अपहतपाप्मत्वादि श्रुतिविरोधपरिहारे धृतः प्रयासोऽपि, पादेमुद्गराघातित्वेन दुःखित्वम्, शिरसि चन्दनलेपनात् सुखित्वम् इति कथनवत् परिहसनीयमिति, शाङ्करमतवत् मिथ्यात्वानभ्युपगमेन सर्वदुःखानामपि परमार्थानामेव स्वांशभूतनानाजीवगतानां अनन्तानां तदभिन्नांशिभूत ब्रह्म-गतत्वस्य दुरपलपत्वात्, भेदाभेदपक्षोऽयं शाङ्करा‌द्वैतापेक्षयापि पापीयान् इति प्रत्यक्षोऽपि। एवं निर्विशेषा‌द्वैतवादस्य शाङ्करस्य, जीवब्रह्मणोः अंशांशित्वभावनया स्वरूपैक्य भावनया च ईषद्भेदेन प्रवृत्तस्य भास्करयादवप्रकाशयोः भेदाभेदवादस्य च, न सर्वोपनिषत्समन्वयरूपत्वमिति, प्रत्युत स्वैरमेव व्याहतार्थकल्पनया श्रुतिपथे कण्टकप्रक्षेपेण महती वैयाकुली मुमुक्षूणां तत्त्वदुर्बोधतां आपाद्य तैर्विहिता इति च, अद्यावधि निरूपितम्। प्रबलयुक्तिभिः वेदार्थसङ्ग्रहेऽस्मिन् आदौमतत्रयमिदं यथावदनूद्य सुविपुलं प्रत्याख्यातं च॥

विशिष्टाद्वैतेसर्वश्रुतिसमन्वयः - साम्प्रदायिकता च

श्रीमद्रामानुजार्यैस्तु यथा भेदाभेदादिश्रुतिषु नैकस्याऽपि बाध्यार्थता, तथा सप्रमाणसमन्वयं विदधानैः प्राचीसरणिरेव परिष्कृता। प्रमाणिताश्च स्वोक्तार्थे निरवद्यतास्थेम्ने प्रांचो वाक्यकार-द्रमिडभाष्यकारादयः क्रियासमभिहारेण। एवं स्वोक्तश्रुत्यर्थविवरणस्य सांप्रदायिकता न्यरूपि ग्रन्थेऽस्मिन् दशाधिकेषु स्थलेषु सनामनिर्देशं तदुक्तीः प्रमाणयद्भिः।

समग्रोवेदः परमं प्रमाणम्। आस्तिकः कोऽपि एकदेशतोऽपि न तदप्रामाण्यम् अनुमन्येत। जैमिनिरपि स्वशास्त्रे तत्प्रामाण्यं प्रसाधयन् न वेदान्तानां अप्रामाण्यमाचष्ट। नापि व्यासः स्वसूत्रेषु वेदपूर्वभागस्य तथात्वमुद्गिरति। जैमिनिव्यासकर्तृकमीमांसाशास्त्रस्य समग्रवेदव्याख्यानरूपस्य सम्पूर्णां वृत्तिम् आरचयन्तः उपवर्षाद्या अपि नैवं सम्मेनिरे। शबरस्वामी वा शङ्कराचार्यो वा अन्यो वा स्वव्याख्येयकर्मब्रह्मान्यतरभागप्रामाण्यवादी, सन् यदि तदितरत् नेच्छेत् प्रमाणमिति अन्वारुह्यवादत्वेन अभिनिवेशवशीकृतत्वेन वा तैः तथोक्तमिति अनार्षोक्तित्वात्, न तदास्तिकैः श्रद्धेयम्। किमहो स्मृतिकर्ता कश्चिदपि क्वचिदपि स्वग्रन्थे वेदैकदेशस्य अप्रामाण्यमसूचयत्। अत्र हि ऋषयस्सर्वे समकण्ठाः। तत्सम्प्रदायान्तःपती, न कश्चित् श्रुतिस्मृतिसूत्राणां मात्रयापि अप्रमाणताम् उररीकरिष्यति। असत्यपि विरोधे आभासमाने ऋषिभिरेव तत्र तत्र परिहारपद्धतिरपि प्रोक्ता अंजसा समन्वयं आतितांसद्भिः। अत एव हि खण्डदेवेन जैमिनीयं सूत्रजातं विवृण्वता देवताधिकरणे देवतानां स्वरूपं निराकुर्वतः शबरस्वामिनः मतमुपक्षिपता अन्ते *त्वमत्येवं वदतोऽपि वाणी दुष्यतीति श्रीहरिःस्मरणमेव शरणम्* इति स्वान्तस्तापः सप्रायश्चित्तं प्रकटीकृतः।

एवं तैः क्षुण्णामेव सरणिमाद्रियमाणाः रेखामात्रमपि तत्र व्यत्ययं असहमानाः प्रमाणैकशरणाः श्रीभाष्यकाराः निश्श्रेयसापेक्षया दुर्गं वेदपथं प्रविविक्षतां दिग्दर्शनमिह प्रबन्धे प्रदिशन्ति निर्बाधं परिष्करणं प्रतिपादयन्तः।

अशेषजगद्धितानुशासनश्रुतिनिकरशिरसिसमधिगतोऽयमर्थः इति, तत्साक्षात्कारक्षम-भगवद्द्वैपायन-पराशर-वाल्मीकि-मनु-याज्ञवल्क्य-गौतम-आपस्तम्बप्रभृतिमुनिगणप्रणीत-विध्यर्थवादमन्त्ररूपवेदमूल-इतिहास-पुराण-धर्मशास्त्रोपगृहीत-परमार्थभूत-अनादिनिधनाविच्छिन्न-सम्प्रदाय-ऋग्यजुस्सामाथर्वरूपं अनन्तशाखं वेदंच अभ्युपगच्छतामस्माकं किं न सेत्स्यति इति, तदेतत् *नानाविधानन्तश्रुतिनिकरशिष्टपरिगृहीततद्व्याख्यानपरिश्रमात् अवधारितम्* इति, एवं च सति *अभेदो वा भेदो वा द्व्यात्मकता वा वेदान्तवेद्यः कोऽयमर्थः समर्थितो भवति? सर्वस्य वेदवेद्यत्वात् सर्वं समर्थितम्* इति च, प्रतिवारं अत्र ग्रन्थे प्रबोधयद्भिः एतैः तत्तन्महर्षीणां सूक्तीः वाक्यकार-वृत्तिकारादि-सूक्तीरपि प्रमाणीकृत्य समन्वयः प्रादर्शि।

नन्वस्तु प्राचां वृत्तिकारादीनां मतमपि समंजसम्। तावता अन्यादृशमपि योजनान्तरम् अर्वाचीनैः कृतम् उचितत्वे अविरुद्धत्वे च कथं न ग्राह्यम्? इति इमामाशङ्कां प्रतिक्षेप्तुमेव

ग्रन्थेऽस्मिन् आदौ मध्ये च तत्र तत्र तत्तन्मतखण्डनप्रयासो भगवद्रामानुजाचार्यणाम् - *एवमेवं अनुपपत्तिसङ्कुलत्वात् बहुप्रमाणविरोधाच्च तत्सर्वमनुपादेयम्* इति ॥

एतत्कृत समन्वयसामंजस्ये एकमुदाहरणम् गृह्णीमः । यथा –

सदेवसोम्येदमग्र आसीत् एकमेवाद्वितीयम्

अनया हि श्रुत्या सजातीय-विजातीय-स्वगतभेदरहितं सन्मात्रं प्रतिपाद्यत इति परेषां मतम्। तत्प्रत्याख्यानेन यथाऽत्रग्रन्थे समंजसोऽर्थः प्रदर्शितः, तदिह संक्षिपामः। अत्रैवं परकीययोजना। *सदेव* इति विधेयपरं एकं वाक्यम्। इदमिति च सत्सामानाधिकरण्यात्, *इदमभिन्नम्, अग्रे यदासीत्* इति यच्छब्दाऽध्याहारेण उद्देश्यसमर्पकमपरं वाक्यम्। एवमुद्देश्योपादेयविभागो दर्शितः। तथा च अग्रे विद्यामानमनूद्य तत्सदेवेति तस्य अखण्डसदद्वितीयत्वं विहितं भवति । तदानन्तरिकं *एकम्, एव, अद्वितीयम्* इति पदत्रयं त्रिविधभेदनिरासेन अखण्डार्थत्वस्थापकम्। *आत्मा वा इदमेक एवाग्र आसीत्* इत्यनेनैकार्थ्यात् इति लघुचन्द्रिकोक्तः वाक्यार्थः।

तत्रेदं विमृश्यम्, सन्मात्रे उच्यमानं इदमर्थाभेदरूपं सामानाधिकरण्यं कीदृशमिति। स्वमते प्रपंचस्य मिथ्यात्वेन *त्वया दृष्टः सर्पो रज्जुरेव* इत्यादाविव बाधितार्थेन सत्पदार्थस्य अभेदरूपमिति वाच्यम्।तदेवासिद्धम्। न हि तत्र रज्जुसर्पयोः ऐक्यं स्थितम्। सर्पत्वेनाभिमतो यः, स रज्जुरिति तदर्थ इति चेत्, तर्हि सर्पशब्दस्य मुख्यार्थत्यागेन लक्षणा स्यात्। तथात्वेनाभिमतवस्तुपरत्वबोधनात्। न चैवमर्थस्वीकारे बाधितार्थसामानाधिकरण्यम्। किन्तु सामान्यविशेषयोः अभेदोक्तिरूपमेव तत्। न च पूर्वम् इदमर्थस्य प्रपंचस्य मिथ्यात्वं ग्राहितम्, येन तदर्थकत्वस्वीकारः। एवं सदेवेत्यवधारणेन विजातीय भेदराहित्यं बोध्यते इति च असङ्गतम् । अत्रैव *अग्रे* इति पदेन वक्ष्यमाण-सृष्टिपूर्वकालसद्भावज्ञापनात्। *अग्रे नैव किंचिदासीत्* इति दृश्यं सर्वं निषेधन्ती श्रुतिरपि अग्रे इति कालसद्भावं दर्शयत्येव। इदमेवपदं निर्विशेषत्वपरिपन्थि च। न हि भवन्मते ब्रह्म कदाचित् निर्विशेषं, कदाचिच्च सविशेषम्। न चेदं अग्रे इति पदं अविवक्षितार्थम्। वक्ष्यमाणसृष्ट्यपेक्षया ब्रह्मणः पूर्वकालीनत्व ख्यापनेन कारणत्वनिरूपणैदम्पर्यात्। कार्यनियतपूर्ववृत्ति हि कारणम्। तथा अग्रशब्दबोधिते तस्मिन् प्रळयकाले *वैषम्यनैर्घृण्ये - - न कर्माविभागात्* - - इत्यादि सूत्रोक्तदिशा जीवानां तत्कर्मप्रवाहानां च सद्भावः प्रमाणसिद्ध एव *यउस्माकमनादयः* इति ब्रुवद्भिः अङ्गीकृतं च भवद्भिः । अग्रपदसिद्धं कारणत्वं च *बहुस्याम्* इत्यादि वक्ष्यमाणकारणत्वोपयोगि सत्यसङ्कल्पत्वसर्वज्ञत्वादिघटितमेवेति सुग्रहम् । एवमनेनैव वाक्येन निर्विशेषं सिषाधयिषतां शान्तिकर्मणि वेताळोदयः इतिरीत्या अग्रपदमेव त्रिविधभेदसाधकं संवृत्तम्।

इत्थं विमर्शात् अखण्डार्थत्वदौर्घट्ये, इदमर्थेन सत्पदार्थ सामानाधिकरण्यं किं स्वरूपैक्य निबन्धनम्? उत न? इति विमर्शान्तरं प्राप्तम्। *बहुस्याम्* इति स्पष्टोक्त्या मृदादिदृष्टान्तत्रयबलाच्च

इदमर्थप्रपंचस्य ब्रह्मपरिणामत्वदर्शनात् स्वरूपैक्यपक्षः भास्करयादवप्रकाशाचार्ययोः इष्टः। जगतोऽपि सत्यत्वस्वीकरणात्, *सुवर्णं कुण्डले भवतः* इतिवत् सामानाधिकरण्य सम्भवात्, नात्र यद्यपि क्लेशः। अथापि परिणामस्य साक्षाद्द्वारकत्वस्वीकारे निर्विकारत्व निर्दोषत्ववादिनीनां *यस्य पृथिवीशरीरम्* इत्यादि सर्वशरीरत्वबोधिनीनां अन्तःप्रवेशनियमनादिनिरूपिकाणां च श्रुतीनां विरोधः तदवस्थः। मृदादिदृष्टान्तत्रयं अद्वारकपरिणामोपष्टम्भकम् इति तु न मन्तव्यम्। तस्य केवलं ब्रह्मणि उपादानकारणत्वनिरूपणद्वारा एकविज्ञानेन सर्वविज्ञानसमर्थनपर्यवसायित्वात्। अतो नात्र स्वरूपपरिणामसाम्यविवक्षा। एवं सामानाधिकरण्यं न स्वरूपैक्यपरमिति सिद्धे, सृष्टिवादिभिरेव स्पष्टतरश्रुत्यन्तरैः *यथोर्णनाभिः सृजते - - - यथा सतः पुरुषात् केशलोमानि* इत्यादिभिः शरीरद्वारकपरिणामनिर्धारणात् शरीरश्रुतीनां च अत्रोपष्टम्भकत्वात् इदं सदेवेति सामानाधिकरण्यं सदात्मकत्व निबन्धनम्, अपृथक्सिद्धिलक्षणतादात्म्यरूपविशिष्टैक्यपरमिति वेद्यम्। *सर्वं समाप्नोषि ततोऽसि सर्वः* इति इदं गीतावचनमपि ईदृशमेव हि सहेतुकं सामानाधिकरण्यं निर्दिशति *आप्नोतीत्यात्मा* इति हि व्युत्पत्तिः। यस्मात्सर्वं समाप्नोषि — अन्तःप्रविश्य नियामकतया व्याप्नोषि, तेनैव तदात्मत्वेन हेतुना सर्वाभिन्नतया व्यवह्रियसे इति तदर्थः। ननु सदेव इत्येवकारस्य किं व्यावर्त्यमिति चेत्, न भवदभिमतरीत्या विजातीयाभावबोधनरूपव्यावृत्तिविवक्षा। अग्रशब्द-विरोधात्। किन्तु एवकारस्य स्वतः व्यावर्त्यविशेषोपस्थापनासमर्थस्य स्वसमभिव्याहृतपदवाच्य-विरोधिव्यावर्तकत्वस्वाभाव्यात् सद्भिन्नासत्त्वव्यावर्तनमुखेन पूर्वमपि जगतः सदभिन्नतया सद्भावसाधनपरत्वात् असत्कार्यवादस्यवैशेषिकादिसम्मतस्य प्रत्याख्यानेन सत्कार्यवादसमर्थने पर्यवसानं बोध्यम्। तथा च कार्यकारणयोः एकद्रव्यता सिद्ध्यति। अत एव हि पूर्वोक्तस्य एकविज्ञानेन सर्वविज्ञानस्य दृष्टान्तत्रयस्य च सामंजस्यम्। सर्वमिथ्यात्वे तदनुपपत्तेः। दृष्टान्तत्रयस्य न कार्यमिथ्यात्वपरत्वमिति पूर्वमेवोक्तम्। एवमनेन दार्ढ्येन सृष्टेः पूर्वमपि जगतोऽस्य चिदचिन्मिश्रस्य सदात्मकत्वे निर्धारिते अथ *एकमेवाद्वितीयम्* इत्यस्यार्थोऽवधार्यः।

अथैवं चिदचितोरपि ब्रह्मणा सह पूर्वमेवसत्त्वे कथं *एकमेवाद्वितीयम्* इति पदत्रयमिति चेत्, नेह निर्दिष्टम् निर्विशेषैक्यम्। किन्तु चिदचिद्विशिष्टब्रह्मैक्यम्। सृष्टिप्राक्कालिकं इदमेकत्वं नामरूपविभागानर्हसूक्ष्मदशापत्तिरूपमेव। *बहुस्याम्* इति वक्ष्यमाणबहुत्वस्य नामरूपविभाग-विशिष्टतारूपत्वेन तत्प्रतिकोटिभूतं एकत्वं तदभावेन सूक्ष्मतया ब्रह्मणिप्रलीनप्रायत्वमेव। लयो हि संश्लेषः। *लीङ् श्लेषणे* इति हि धातुः। तत्र प्रकर्षश्च नामरूपकृतविभागाभावात्मकः। सूत्रकृच्च *न कर्म अविभागात्* - - - इति निर्दिशन् ईदृशाविभागमेव प्रलयकालिकम् अभिप्रैतीति स्पष्टम्। एवं च *एकम्*, *एव* इतिपदद्वयं न सजातीयभेदाभावपरम्, किंतु प्रकृतिपुरुषादीनां सूक्ष्मत्वेन विभागाभावरूपेण एकतया अवस्थितिपरम्। अवशिष्टम् अद्वितीयपदं निमित्तान्तरनिषेधपरमिति

भाव्यम् । एवम् इदं कारणवाक्यमिव उपनिषदन्तरेष्वपि समानप्रकरणस्थानि *आत्मा वा इदमग्र आसीत्, ब्रह्म वा इदमग्र आसीत्* इत्यादिवाक्यानि उक्तविधया विशिष्टैकतत्त्वप्रतिपादकान्येव । न निर्विशेषबोधकानीति सुग्रहम् ॥

सर्वमिदं वेदार्थसङ्ग्रहे अत्र – *अत्रेदमिति जगन्निर्दिष्टम् । अग्रे इति च सृष्टेः पूर्वकालः। तस्मिन्काले जगतः सदात्मकतां सदेवेति प्रतिपाद्य, तत्सृष्टिकालेऽपि अविशिष्टमिति कृत्वा, एकमेवेति सदापन्नस्य जगतः तदानीम् अविभक्तनामरूपतां प्रतिपाद्य, तत्प्रतिपादनेनैव सतः जगदुपादानत्वं प्रतिपादितमिति स्वव्यतिरिक्तनिमित्तकारणम् अद्वितीयपदेन प्रतिषिद्धम्* इत्यनया सूक्त्या भगवद्रामानुजार्यैः स्पष्टीकृतम् । उपर्यपि बहुमुखं सोपपत्तिकं च परमतप्रतिक्षेपेण तैः इदमुपपादितम् इति सङ्क्षेपः ॥

नन्वस्तु जडप्रपंचेन परमचेतनस्य ब्रह्मणः स्वरूपैक्यासम्भवात् शरीरात्मभावनिबन्धनं तादात्म्यमेव तत्रैक्यमिति । चैतन्यरूपेण अविशिष्टत्वात् जीवेश्वरयोऽस्तु कथं न स्वरूपैक्यमिति? अत्रापि आचार्यैः *तत्त्वमसि* वाक्यार्थनिरूपणावसरे, *एतदुक्तं भवति* इति द्विवारं कृते विपुलोपपादने *अन्तःप्रविष्टः शास्ता जनानाम्, य आत्मनि तिष्ठन् ----- यस्यात्मा शरीरम्* इत्यादि श्रुतीरुदाहृत्य जीवेऽपि परब्रह्मणः अन्तःप्रवेशनिदर्शनेन तस्यापि तदात्मकत्व- निबन्धनमेवैक्यं, न स्वरूपैक्यमिति स्पष्टं समाहितम्। स्वरूपैक्ये सति न हि स्वस्मिन् स्वप्रवेशसम्भवः इति भावः । *ऐतदात्म्यमिदं सर्वम्* इति सर्वशब्दप्रयोगोऽपि असंकोचेन चिदचिन्मिश्रजगत्साधारण इति ग्राह्यम् । अचिन्मात्रपरतया *सङ्कोचे मानाभावात्* । *अन्तःप्रविष्टः शास्ता जनानाम्* इत्यादि विरोधाच्च । स्वरूपैक्यपक्षे दोषान्तराणि च पूर्वोक्तानि स्मर्तव्यानि । एवमेतत्सिद्धान्ते स्वरूपतो निर्विकारत्वात् विशिष्टविधया बहुभवनरूपपरिणामवादिश्रुतिः समन्विता । जगद्ब्रह्मणोः जीवब्रह्मणोर्वा स्वरूपैक्याप्रतिपादनात् निर्दोषश्रुतिरपि रक्षिता । शरीरात्मभावकृत विशिष्टैक्यनिरूपणात् भेदाभेदश्रुतयः व्यवस्थितार्थतया अविरोधात् मुख्यार्था एव सम्भाविताः । एष्वर्थेषु स्पष्टप्रमाणानि च प्रादर्शिषत पराशर-द्वैपायन-मनु-याज्ञवल्क्य-आपस्तम्बादीनां महर्षीणां वचनानि। तथा *युक्तं तद्गुणकोपासनात्* इति वाक्यकारोक्तिं तद्विवरणपरां द्रमिडभाष्यकारोक्तिं च प्रदर्श्य सद्विद्या सर्वा सगुणपरैवेति पूर्वाचार्यसम्प्रदायः प्रतिपादितः ।

एवम् उपनिषद्भागे अर्वाचीनैः कृतं उपप्लवं प्रशमय्य, पूर्वकाण्डेऽपि जैमिनिसूत्र-व्याख्यानापदेशेन शबरस्वामिप्रभृतिभिः कृतः देवतास्वरूपनिराकरणेन यागादिजन्यापूर्वस्यैव फलप्रदत्ववादोऽपि *इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः* इत्यादिश्रुतीः गीतोक्तीः द्रमिडभाष्यकारादिसूक्तीश्च प्रमाणीकृत्य श्रीमदाचार्यैः प्रतिविहितः । रुद्रादि देवतान्तरेषु परत्वशङ्कानिर्धूननेन अनन्यपरनारायणानुवाकादिप्रामाण्यमुपपाद्य श्रीमन्नारायणपरत्वं तत्प्राप्ति-साधनं च भक्तियोगाख्यं विहितकर्मज्ञानाङ्गकं प्रतिष्ठापितम् ।

इत्थमयं प्रबन्धः वेद तदन्त तदङ्ग तदुपबृम्हणरूपस्मृतीतिहासपुराणादिसर्वशास्त्र-सारोद्धरणरूपः मुमुक्षुजनभागधेयरूपतया भावितावतरणेन भगवता परमोदारेण श्रीमद्रामानुजाचार्येण प्रसादितः प्रमाणपदतन्त्राणां निर्मत्सराणां परमवैदिकानाम् आमोदभाजनं भवति । एवम् ईदृशैतत्प्रबन्ध निर्माणपूर्वकं सकलश्रुत्यर्थसमन्वयदिग्दर्शनेन, श्रीभाष्ये च विशिष्य तत्तदधिकरणेषु उपयुक्तविविधोपनिषद्व्याख्यानां पूर्वापरसन्दर्भ विमर्शनपूर्वकं स्पष्टमर्थनिर्धारणेन च, प्रतिपदं अर्थावमर्शने नात्यन्ताय विवदितव्यवस्तीति भावयद्भिः, उक्तग्रन्थद्वयदर्शितगमनिकयैव सर्वोपनिषद्व्याख्यार्थः सुनिर्वह इति मन्यमानैश्च भगवद्रामानुजाचार्यैः पृथक् आनुपूर्व्या नोपनिषदः व्याख्याता इति सम्प्रदायविदाम् वृद्धानां प्रवादः ॥

प्रबन्धेऽस्मिन् अन्यत्र श्रीभाष्यादिषु वा परपक्षप्रतिक्षेपावसरे श्रीरामानुजाचार्याः *नैतदेवम् तदयुक्तम् तत्त्वविद्भिः अनादरणीयम्* इत्यादिना सभ्यसम्भाव्यपदजालेनैव व्यवहरन्ति । न पुनः असभ्यजनप्रयोज्यैः पदैः तान् विनिन्दन्ति द्वेषेन मात्सर्येण वा । क्वचित् तैः शाङ्कराद्वैतिनः प्रति *वेदवादच्छद्म प्रच्छन्नबौद्ध* इत्यादि प्रयोगोपि तदीयमतवस्तुतत्त्वनिर्धारणे पर्यवस्यतीति नेदं परुष-दूषणम् ।

श्रीभाष्ये अत्त्रधिकरणे अन्ते मोक्षविषये बौद्धादीनां तत्तद्वादिनां विप्रतिपत्तीः प्रदर्श्य - *त्रय्यन्त-निष्णातास्तु - - - मोक्षमाहुः* इति उपसमाहार्षुः । सत्येवं केचित् इदमाक्षिपन्तो यल्लिखन्ति - *अस्मिन् सन्दर्भे स्वस्य त्रय्यन्तनिष्णातत्त्वं स्वयमेव वदन् अयं रामानुजार्यः इतरान् तृणीकरोति* इति गम्यते । भगवत्पादास्तु स्वमतं इतरमतवदेव(?) निर्दिशन्तः विनयं सूचयन्ति । *अस्मदीयाश्च केचित्* इति द्वैतिनं अस्मदीयत्वेन निर्दिशन्तः तस्मिन् अभिमानं दर्शयन्ति । रामानुजार्यास्तु तदिदम् *औपनिषदपरमपुरुषवरणीयताहेतुगुणविरहिणां अनादिपापवासनादूषिताऽशेषशेमुषीकाणाम्* इति वदन्तः केवलम् अचिकित्स्यं मात्सर्याख्यं पित्तं प्रदर्शयन्ति । *एतादृशानि परदूषणप्रकाराणि(?) श्रीशाङ्करग्रन्थेषु दुर्लभानि* इत्यादिकम् । तद्धि श्रीरामानुजार्येषु स्वमात्सर्यप्रकटनप्रावण्यमात्रम्, स्वाचार्यप्रशंसापारम्यमेव वा भवति । वस्तुतः, *बहुपराक्रान्तम् अपुच्छश्रृङ्गैः तार्किकबलीवर्दैः* इति क्वचित्, *कुतर्कदूषितान्तःकरणाः ब्राह्मणादिवर्णापसदाः* इति च अन्यत्र, बहुधा वैशेषिकादीन् अतिपरुषं तृणीकृत्य गृणन्तो भगवत्पादाः किं तत्तन्मतप्रवर्तकेषु विनयम् वा, अभिमानं वा प्रदर्शयन्तीति पृच्छामः । उदाहृत श्रीभाष्यगतः *त्रय्यन्तनिष्णातास्तु* इति निर्देशोऽयं न स्वस्यैव त्रय्यन्तनिष्णातत्त्वरूपावलेपसूचकः । किन्तु श्रीभाष्यारम्भप्रतिज्ञावाक्यरीत्या बोधायनाद्या एव तत्र तत्पदेन प्रतिपाद्या भवन्तीति विवेकिनो गृण्हीयुः ॥

श्रीमद्रामानुजार्याणां चारित्र्यवैभवं अवतारसमयादिकं तदनुगृहीतप्रबन्धपौर्वापर्यादिविशेषं वा अधिकृत्य एतत्संसदा प्रकटितपूर्वश्रीभाष्यभूमिकायाम् अन्यत्र च विवृतं सुप्रसिद्धंचेति न तन्निरूपणार्थम् अत्र प्रयत्यते ।

सुवर्णमंजूषेव महार्घरत्नस्य, प्रबन्धरत्नस्यास्य व्याख्या श्रीमत्सुदर्शनभट्टारक प्रणीता विविधगंभीरार्थसन्दर्शिनी तात्पर्यदीपिकाभिख्या समुल्लसति अन्यूनानतिरिक्तशब्दसन्दर्भा। प्रायः सैवेह मूलार्थग्रहणोपयोगितया सङ्गृह्य निवेशिता टिप्पणीत्वेन विशेषवाक्यार्थवर्ज्यम्।

एवं लघ्वीं टिप्पणीमिव पाठभेदनिर्देशं-विषयविभागद्योतकशीर्षकविन्यासं-अनुबन्धविशेषं च संयोज्य ग्रन्थसज्जीकरणे महतीं धुरं उदूढवन्तः विपश्चिद्वराः श्रीरामभद्राचार्याः विशिष्य धन्यवादार्हाः।

अभिनवसंस्करणेऽस्मिन् यथोचितसूचनाप्रदानेन सावधानं प्रत्यक्षरपरिशीलनेन च निरवद्यगन्थम् एतत्प्रकाशनकृत्ये सर्वात्मना सहकृतवन्तः संपादकमहाभागाः संस्कृत संशोधन संसदः कुलपतयः श्री. एम्. ए. लक्ष्मीताताचार्याश्च प्राधान्येन विद्वत्प्रशंसापात्रं भवन्ति।

किं बहुना? भवनस्य मूलस्तम्भवत् ईदृशमहाग्रन्थानां सम्पादने व्यग्रायाः संस्कृत-संशोधन-संसदीय-व्यवस्थायाः सर्वस्या अपि निर्वहण धौरन्धर्यम् आध्यक्ष्यरूपं अधिवहन्तः श्री. एम्. ए. श्रीरङ्गराजन् महाभागाः कृतज्ञताबद्धेनांजलिना सर्वथा सादरं सम्भावनीया भवन्ति।

इति विदुषामनुचरः
परिष्कर्ता
श्री. न. च. रघुनाथाचार्यः

विषयसूचनी

श्रीः

श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजमुनिविरचितः

वेदार्थसंग्रहः

[मंगलाचरणम्]

अशेषचिदचिद्वस्तुशेषिणे शेषशायिने ।
निर्मलानन्तकल्याणनिधये विष्णवे नमः ।।

[वेदार्थसंग्रहसुधा वेदान्ताब्धेर्य आहरत् । रामानुजाय मुनये तस्मै भगवते नमः ।।
तात्पर्यदीपिकातः संगृह्यार्थानपेक्षितान् स्पष्टान् । अध्येतृसुकरतायै प्रकाश्यते टिप्पणी लघ्वी ।।]

श्रीभाष्यकृदुपन्यस्तो यश्श्रीशैलपतेः पुरः । वेदार्थसंग्रहस्यास्य कुर्मस्तात्पर्यदीपिकाम् ।।

अशेषेत्यादि प्रथमश्लोकेन, इष्टदेवतोपासनरूपमंगलाचारः, स्वपक्षस्थापनरूप-प्रतिपाद्यसंक्षेपश्च क्रियते । चतुर्थ्यन्तैः पदैः सिद्धस्वरूपम् उपेयम्, 'नमः' शब्देन उपायश्च सूच्यते। पूर्वार्धेन उभयविभूतिविशिष्टत्वम्, **निर्मलेत्यादिना** उभयलिंगत्वम् (अखिलहेयप्रत्यनीकत्व कल्याणगुणाकरत्वं च) उच्यते। **अशेषेति** चेतनबहुत्वम्, **वस्तुशब्देन** परमार्थत्वम् च दर्शितम्। **शेषिणे** - इत्यनेन चिदचिद्वस्तूनां ईश्वरं प्रति अनन्यार्हशेषत्वरूपं शरीरत्वं, भगवतः तत्प्रतिसम्बन्धित्वरूपं आत्मत्वं चेति सिद्धान्तार्थः गर्भितः । **शेषशायिने** इति, नित्यविभूतियोग चाह। निर्मलत्वं हेयप्रत्यनीकत्वं। कल्याणत्वं अनुकूलत्वं। तदुभयं परिच्छिन्नेष्वपि केषुचित्प्राकृतवस्तुषु अस्तीति तद्व्यावृत्त्यर्थं अनन्तपदम्। त्रिविधपरिच्छेदराहित्यं तदर्थः । **निर्मलश्च, अनन्तश्च, कल्याणनिधिश्च,** निर्मलानन्तकल्याणनिधिः। **कल्याणशब्दः** मंगळगुणवाची आनन्दाभिधायी वा । **निधिशब्देन** गुणगुणिभावो विवक्षितः । **विष्णुशब्दः** धर्मिनिर्देशकः, रूढ्या देवताविशेषनिर्णयश्च ।।

परं ब्रह्मैवाज्ञं भ्रमपरिगतं संसरति, तत्
परोपाध्यालीढं विवशमशुभस्यास्पदमिति ।
श्रुतिन्यायापेतं जगति विततं मोहनमिदं
तमो येनाऽपास्तं स हि विजयते यामुनमुनिः ।।

परमित्यादि । अथ द्वितीयेन गुॅरूपासनरूपमंगलाचारः , परपक्षनिराससङ्क्षेपश्च क्रियते । **परम्** - हेयप्रत्यनीकत्वकल्याणगुणाकरत्वाभ्यां सर्वविलक्षणम् । **एवकारः** विरोधं स्फोरयति । संश्रितदुरितापहत्वेन, तदिष्टफलप्रदत्वेन च यत् आश्रयणीयं, तदेव अज्ञानपरवशं चेत् ! कोऽन्यो रक्षकः इति भावः । **अज्ञम्** - अविद्यातिरोहितस्वरूपम् । **भ्रमपरिगतम्**- विविधभेददर्शनशालि । **संसरति**- भेददर्शनकृतजन्मजरामरणादिसांसारिकदुःखभागीत्यर्थः । एवं शांकरमतम् उपन्यस्तम् ।

अथ भास्करमतम् उपन्यस्यते । **तत् परोपाधीति** । परशब्देन उपाध्यन्तरनिरपेक्षं स्वत एव प्रस्तुतब्रह्मव्यतिरिक्तत्वमुच्यते । पराभ्युपगतमिथ्याभूताविद्यान्यत्वं (सत्यत्वं) च विवक्षितम् । **आलीढम्** - सम्बद्धम् । **विवशम्** - कर्मपरवशम् ।

अथ यादवप्रकाशमतम् । **अशुभस्यास्पदमिति** । अचिद्गतपरिणामार्हतारूपाशुभस्य, चिद्गतापुरुषार्थयोग्यतारूपाशुभस्य च आस्पदमित्यर्थः । जीवब्रह्मणोःभेदस्य स्वाभाविकत्वाभ्युपगमात् न ब्रह्मण्यपुरुषार्थान्वय इति वैषम्यं दुर्वचम् ; अभेदस्यापि स्वाभाविकत्वोपगमेन अपुरुषार्थान्वयादिति भावः ।

'अचिद्ब्रह्मणोः भेदाभेदौ स्वाभाविकौ, चिद्ब्रह्मणोस्तु अभेदः स्वाभाविकः, भेदस्तु औपाधिकः' इति भास्करमतम् । 'चिद्ब्रह्मणोरपि भेदाभेदौ स्वाभाविकौ, मुक्तौ भेदस्यापि निर्देशात्' इति यादवप्रकाशमतम् ।

इतिशब्दः पक्षत्रयस्वरूपपरः । **श्रुतिन्यायापेतमिति** तन्निरासंक्षेपः । **श्रुतिः**- प्रमाणम् । **न्यायः** - तदनुग्राहकस्तर्कः । तन्मतसाधकतर्कानुगृहीतं प्रमाणं नास्तीत्यर्थः । **तमः** यथार्थज्ञानावरणम् । **मोहनम्** - अपरमार्थे सम्यक्त्वधीहेतुः । **अपास्तम्** - दूरत उत्सारितम् । **स हि** इत्यादिना गुरूपासनमुक्तम् ; *'जयत्यतिबलो रामः'* (वा.रा.सु.59-19) इतिवत् । **यामुनमुनिः** इत्यनेन प्राकरणिकार्थस्य साम्प्रदायिकत्वमुक्तं भवति ।

[स्वसिद्धान्तार्थसारः]

अशेषजगद्धितानुशासनश्रुतिनिकरशिरसि समधिगतोऽयमर्थः ।

जीव-पर¹ - याथात्म्यज्ञानपूर्वक-वर्णाश्रमधर्मेतिकर्तव्यताक-परमपुरुष-चरण-युगलध्यानार्चनप्रणामादिः अत्यर्थप्रियः, तत्प्राप्तिफलः ।

अस्य जीवात्मनः, अनाद्यविद्यासंचितपुण्यपापरूपकर्मप्रवाह-हेतुक-ब्रह्मादि-सुर-नर-तिर्यक्-स्थावरात्मक - चतुर्विध-देहप्रवेशकृत-तत्तदात्माभिमानजनिता-वर्जनीयभवभयविध्वंसनाय, देहातिरिक्तात्मस्वरूपतत्स्वभावतदन्तर्यामि-

---

अशेषेत्यादिना - प्रथमश्लोकार्थम् ईषद्विस्तरेण वदन्, प्राकरणिकमर्थं सप्रमाणं प्रतिजानीते **जगद्धितेति**। **हितम्** - उपायोपेयात्मकम् । **अनुशासनम्** - विविच्यज्ञापनम् । 'अनुपूर्वः शासिः विविच्यज्ञापनार्थो दृष्टः' इति हि शाब्दाः । **अशेषजगच्छब्देन** सर्वाधिकारिण उच्यन्ते । 'श्रूयते नित्यम्' इति व्युत्पत्तिसिद्धेन '**श्रुति**' शब्देन, वेदस्य अपौरुषेयत्वा-न्निर्दोषत्वमभिप्रेतम् । '**निकर**' शब्देन, अधीयमानकृत्स्नशाखार्थपर्यालोचनं विवक्षितम् । शिरश्शब्दः 'तत्रापि अनन्यपरपरभागसिद्धः' इति दर्शयितुम् । **समधिगतः** - सम्यगधिगतः अनधीतशाखान्तरार्थ- प्रतिपादकेतिहासपुराणादिभिः सहाधिगतः इत्यर्थः ।

प्रथमश्लोके उपायस्य अतिसङ्क्षेपेण सूचितत्वात्, तं विस्तरेण वदन्, प्रतिज्ञातस्याऽर्थस्य शरीरमाह **जीवपरेति** । **'याथात्म्य'** शब्देन 'तत्त्वमसि' इति वाक्ये 'त्वं' पदस्य चेतनद्वयगर्भत्वं सूचितम्। '**ज्ञानपूर्वक**शब्देन वाक्यार्थज्ञानमात्रस्य अनुपायत्वं सूचितम्। **वर्णाश्रमेत्यादिना** कर्मणो विविदिषासाधनत्वं, समुच्चयवादश्च व्यावर्तितौ । '**परमपुरुष**शब्देन ध्येयस्य हेयप्रत्यनीकत्वकल्याणगुणाकरत्वाभ्यां सर्वविलक्षणत्वं, देवताविशेषत्वं चोक्तम्। '**चरणयुगल**शब्देन, स्वामिनि दासस्यानुगुणा स्थितिर्दर्शिता।**अत्यर्थेति** । ध्यानार्चनप्रणामादिः सर्वोऽपि अत्यर्थप्रीतिपूर्वकः कार्यः ; 'मन्मनाभव' इत्यादिवचने प्रतिपदं मद्भक्तपदान्वयात् इति भावः । एवमुपायस्वरूपं विस्तृतम्। **तत्प्राप्तीति** उपेयस्वरूपमाह ।

अस्येतिपदेन (जीवस्य) परमात्मैक्यानुपपत्तये, तद्विरुद्धस्वभावतया प्रत्यक्षसिद्धत्वमुच्यते । **अनादि**शब्देन, अन्योन्याश्रयः परिहृतः । **अविद्या** - *'अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः'* (वि.पु.6-7-10) इत्युक्तप्रकारा । तया **संचितम्** ; *'अविद्यासंचित कर्म'* (वि.पु. 2-13-66)

---

1. परमात्म - क, ग.

परमात्मस्वरूप-तत्स्वभाव-तदुपासन-तत्फलभूतात्मस्वरूपाविर्भावपूर्वका-नवधिकातिशयानन्दब्रह्मानुभवज्ञापने प्रवृत्तं हि वेदान्तवाक्यजातम् - *'तत्त्वमसि'* (छा.उ.6-8-4) *'अयमात्मा ब्रह्म'* (बृ.उ.6-4-5) *'य आत्मनि तिष्ठन् आत्मनोऽन्तरः यमात्मा न वेद, यस्यात्मा शरीरम्, य आत्मानमन्तरो यमयति ; स त आत्माऽन्तर्याम्यमृतः'* (बृ.उ.मा.पा.5-7-26) *' एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः'* (सुबा.उ.7) *'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन'* (बृ.उ.6-4-22) *'ब्रह्मविदाप्नोति परम्'* (तै.उ.आन. 1 - 1) *'तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते'* (तै.आर.पु.3.12.17) इत्यादिकम् ।

इति हि स्मृतिः **पुण्यपाप शब्दः**, उत्क्षेपणादिव्यावृत्त्यर्थम् । देहाभिमानिभिः अजडत्वादिधर्मके आत्मनि, जडत्वाद्यारोपवत्, भगवदात्मके आत्मनि स्वनिष्ठत्वारोपणं भ्रान्तिरेवेति अविद्यैव हि सा । तन्मूलं स्वर्गादिफलदकर्मानुष्ठानमिति पुण्यस्य अविद्यासंचितत्वोपपत्तिरिति । एवंविध**कर्मप्रवाहहेतुकः चतुर्विधदेहप्रवेशः** । तत्कृतः तत्तद्देहेषु **आत्माभिमानः** , अनात्मनि अस्वे च आत्मात्मीयधिया कर्म, कर्मणा शरीरप्रवेशः, तच्छरीरसम्बन्धेन अविद्या इति प्रवाहानादिता । तेन **अवर्जनीयं भवभयम्** । 'जन्मजरामरणादिभयं मिथ्या' इति सहस्रकृत्वः उद्घोषणेऽपि, निवर्तयितुमशक्यमित्यभिप्रायः ।**आत्मस्वरूपम्** - ज्ञानानन्दैकलक्षणम् । **स्वभावः** - भगवच्छेषत्वम् । उपासकत्वानुगुणौ स्वरूपस्वभावौ जीवस्योक्तौ । **तदन्तर्यामिशब्देन** जीवस्य परमात्मशरीरत्वे तद्वाचिनः शब्दस्य परमात्मपर्यन्तत्वं सिद्धम् । **परमात्मस्वरूपम्** ईशितृत्वम् । स्वभावः प्रणतसौलभ्यम् । उपास्यत्वानुगुणौ स्वरूपस्वभावौ ईश्वरस्योक्तौ । एवं सिद्धरूपम् उपेयमुक्तम् । **तदुपासनशब्देन** उपाय उक्तः ।

तत्त्वमसि इति । षड्विधतात्पर्यलिंगोपेतत्वात् तत् प्रथममुक्तम् । **अयमात्मेति** जीवमात्रस्य ब्रह्मात्मकत्वपरं वाक्यम् । **'य आत्मनि' इति** घटकश्रुतिः । **एष सर्वेति**, देवताविशेषनिर्णयार्थम् । **तमेतमिति**, उपासनस्य वर्णाश्रमधर्मेतिकर्तव्यताकत्वे प्रमाणम् । **ब्रह्मविदिति**, 'उपासनमेव उपायः' इत्यत्र प्रमाणम् । **ब्रह्मवित्** - परमपुरुषोपासकः । **तमेवमिति**, उपायान्तरनिषेधः ।

[जीवात्मनः स्वरूपम्]

[1]जीवात्मनः [1]स्वरूपम् देवमनुष्यादिप्रकृतिपरिणामविशेषरूपनानाविध-भेदरहितम्, ज्ञानानन्दैकगुणम् ।

तस्यैतस्य कर्मकृतदेवादिभेदे[2]अपध्वस्ते[2] स्वरूपभेदः वाचामगोचरः, स्वसंवेद्यः,'ज्ञानस्वरूपम्' इत्येतावदेव निर्देश्यम् । तच्च सर्वेषामात्मना समानम् ।

[परमात्मनः स्वरूपम्]

एवंविधचिदचिदात्मकप्रपंचस्य उद्भवस्थितिप्रलयसंसारनिवर्तनैकहेतुभूतः, समस्तहेयप्रत्यनीकतया [3]कल्याणैक [3]तानतया च, स्वेतरसमस्तवस्तुविलक्षण-स्वरूपः, अनवधिकातिशयासङ्.ख्येयकल्याणगुणः, 'सर्वात्म [4]परब्रह्म-परज्योतिः [4]' 'परतत्त्व'- 'परमात्मसदादिशब्दभेदैः निखिलवेदान्तवेद्यः, भगवान्, नारायणः, पुरुषोत्तमः- इति अन्तर्यामिस्वरूपम् ।

जीवात्मेत्यादि । *पुमान् न देवो न नरो न पशुर्न च पादपः । शरीराकृतिभेदास्तु भूपैते कर्मयोनयः' ॥* (वि.पु.2-13-14) । *'तथाऽऽत्मा प्रकृतौ संगादहम्मानादिदूषितः । भजते प्राकृतान् धर्मान्'* (वि.पु.6-7-24) (इति वचने अनुसन्धेये) । **प्रकृतिपरिणामविशेषः** - प्रकृति-परिणामनिबन्धनो विशेषः । **तद्रूपः नानाविधो भेदः** - बाह्यः देवमनुष्यादिषु अवान्तरभेदः, आन्तरः सुखित्वदुःखित्वाद्यवान्तरभेदश्च, तद्रहितम् । **ज्ञानानन्दैकगुणमिति**, *'निर्वाणमय एवाऽयमात्मा ज्ञानमयोऽमलः । दुःखाज्ञानमला धर्माः प्रकृतेस्ते न चाऽऽत्मनः ॥'* (वि.पु.6-7-22) इत्यस्याऽर्थोऽभिप्रेतः । (अस्य) ज्ञानानन्दविशेषगुणकम् ज्ञानत्वानन्दत्वगुणकम् वा अर्थः ।

तस्येति, ज्ञानानन्दैकस्वरूपत्वं विवक्षितम् । **एतस्येति**, शरीरसम्बन्धोऽभिप्रेतः। **कर्मकृतेत्यादिना**, *'एकस्वरूपभेदो हि बाह्यकर्मावृतिप्रजः । देवादिभेदेऽपध्वस्ते नास्त्येवाऽवरणो हि सः॥'* (वि.पु.2-14-33) इत्यस्याऽर्थो विवृतो भवति । **स्वरूपभेदेत्यादिना** *'प्रत्यस्तमितभेदम्'* (वि.पु.6-7-53) इत्यादिवचनं व्याख्यातं भवति । **निर्देश्यमिति** । सर्वशब्दागोचरं चेत् *'वचसामगोचरम्'* इत्यपि न शक्यते वक्तुम् इति भावः । 'समानम्' इत्यनेन 'पुमानेको व्यवस्थितः' इत्यादिषु 'एक'शब्दः व्याख्यातो भवति । *'तन्मनः समतालम्बि कार्यं साम्यं हि मुक्तये' 'निर्दोषं हि समं ब्रह्म'* (भ.गी.5-19) इत्यादिवचनात् ।

एवंविधेति जीवस्वरूपस्य देवादिशरीरस्य च प्रस्तुतत्वात्, प्रत्यक्षादि प्रमाणसिद्धतया वा उक्तम् । **उद्भवेत्यादिना** जगत्कारणत्वमोक्षप्रदत्वे उक्ते, स्वेतरवैलक्षण्यं तृणादेरप्यस्तीति, तद्व्यावृत्त्यर्थं **समस्तेति**, शोधकवाक्योक्तोभयलिंगत्वेन वैलक्षण्यमुच्यते । **कल्याण शब्दः**

---

1. जीवात्म-ग. 2. विध्वस्ते - ग. 3. अनन्तकल्याणैक - ग. 4. परं ब्रह्म-परंज्योतिः - ख.

[परमात्मनो वैभवम्]

तस्य[1] च वैभवप्रतिपादनपराः श्रुतयः स्वेतरसमस्तचिदचिद्वस्तुजातान्तरात्मतया निखिलनियमनम्, तच्छक्ति-तदंश-तद्विभूति-तद्रूप-तच्छरीर-तत्तनुप्रभृतिभिः शब्दैः, तत्सामानाधिकरण्येन च प्रतिपादयन्ति ।

[निरसनीयाना मताना संक्षिप्तानुवादः, तत्र शाकरमतसंग्रहः]

तस्य वैभवप्रतिपादनपराणाम् एषा सामानाधिकरण्यादीना विवरणे प्रवृत्ताः केचन-निर्विशेषज्ञानमात्रमेव ब्रह्म । तच्च नित्यमुक्तस्वप्रकाश [2]मपि[2]

आनन्दवाची । **स्वरूप**शब्देन विशेष्यांशोऽभिप्रेतः । **अनवधिके**त्यादि उपास्यत्व-प्राप्यत्वोपयोगिगुणजाताभिप्रायेण । **भगवच्छब्देन** हेयप्रत्यनीकत्वं, कल्याणगुणास्पदत्वं च विवक्षितम्। **नारायण** शब्देन उभयविभूतिमत्त्वम्। **पुरुषोत्तम** शब्देन विभूतिभूतचिदचिद्वैलक्षण्यम्।

तस्य चेत्यादिना, भेदश्रुत्यैकार्थ्यमुच्यते अभेदश्रुतीनाम् । **तस्य**- भेदश्रुतिप्रतिपन्नस्य । **वैभव---श्रुतयः** इति भेदश्रुत्यानुगुण्यात्, घटकश्रुत्यैकार्थ्यात्, सामानाधिकरण्यस्वाभाव्याच्च अभेदश्रुतयोऽपि तद्वैभवप्रतिपादनपराः - इत्यभिप्रायः। **स्वेतरेत्यादि** । कृत्स्नस्य (जगतः) तदेकनियाम्यत्वेन अन्तर्यामिणः परमात्मनः शरीरत्वात्, तद्वाचिनः शब्दाः शरीरिपर्यन्तम् अभिदधतीति, समानाधिकरणवाक्यैः भिन्नप्रवृत्तिनिमित्तपदैः, व्यधिकरणवाक्यैश्च तद्वैभव प्रतिपाद्यमिति सर्वश्रुतीनाम् ऐकार्थ्यम् इत्यर्थः। **तन्नियमनं प्रतिपादयन्ति** इत्यन्वयः। **तच्छक्तीत्यादि** । *'परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्' 'विष्णोरंशा द्विजोत्तम'* (वि.पु.1-22-17) *'विष्णोरेता विभूतयः'* (वि.पु.1-22-32) *'परस्य ब्रह्मणो रूपम्'* (वि.पु.1-217) *'जगत्सर्वं शरीरं ते'* (वा.रा.यु.117-25) *'तत्सर्वं वै हरेस्तनुः'* (वि.पु.1-22-38) *'तानि सर्वाणि तद्वपुः'* (वि.पु.1-22-86) इत्यादिषु शक्त्यंशादिशब्दानां प्रयोगो दृष्टव्यः । प्रतिपदं तच्छब्दप्रयोगावृत्तिः एकैकस्य निरपेक्षहेतुत्वाभिप्रायेण । कार्योपयोगिविशेषणत्वात् **शक्तिः** । विशिष्टे ब्रह्मणि विशेषणतया एकदेशत्वात् **अंशः**। नियाम्यतया, **विभूतिः** । व्याप्यत्वे सति नियाम्यत्वात् **शरीरम्** । अतः सर्वेषाम् ऐकार्थ्यम् इत्यभिप्रायः । **शरीरतनु**शब्दयोरिव शक्त्यादिशब्दानाम् अविरोधो वर्णनीयः इति भावः। एवं प्रथमश्लोकार्थः ईषद्विवृतः ।

तस्य भेदश्रुतिभिः समस्तचिदचिद्वस्तुविलक्षणतया प्रतिपन्नस्य ब्रह्मणः । **एषाम्** - भेदश्रुत्यानुगुण्यात्, सामानाधिकरण्यस्वाभाव्यात्, घटकश्रुत्यैकार्थ्याच्च तद्वैभवप्रतिपादनपराणाम्, इति भावः । **आदि**शब्देन घटकश्रुतयः, भेदनिषेधश्रुतयो वा विवक्षिताः । **केचन वर्णयन्ति** इत्यन्वयः । **ज्ञानमात्रमिति** । **मात्र**शब्देन क्वचिदंशे जडत्वव्यावृत्तिः । कार्त्स्न्येन ज्ञानमात्रम्

---

1. अस्यैव - ग. 2.स्वभावमपि

तत्त्वमस्यादिसामानाधिकरण्यावगतजीवैक्यम्, ब्रह्मैवाज्ञं बध्यते मुच्यते च।

निर्विशेषचिन्मात्रातिरेकि [1]ईश्वरेशि[1]तव्याद्यनन्तविकल्पस्वरूपं कृत्स्नं जगत् मिथ्या। 'कश्चित् बद्धः, कश्चित् मुक्तः' इतीयं व्यवस्था न विद्यते। 'इतः पूर्वं केचन मुक्ताः' इत्ययमर्थः मिथ्या।

एकमेव शरीरं जीववत्, निर्जीवानि इतराणि शरीराणि। तच्च शरीरं किम्? - इति न व्यवस्थितम्। आचार्यो [2]ज्ञानस्योऽपदेष्टा मिथ्या। [3]प्रमाता[3] मिथ्या। शास्त्रं च मिथ्या। शास्त्र[4]जन्य[4]ज्ञानं च मिथ्या। एतत्सर्वं मिथ्या[5]भूतेन शास्त्रेणैव[5] अव[6]गतम्[6] - इति वर्णयन्ति।

[भास्करमतसंक्षिप्तानुवादः]

[7]अपरे तु[7] - अपहतपाप्मत्वादिसमस्तकल्याणगुणोपेतमपि ब्रह्म [8]तेनैव[8] ऐक्यावबोधेन केनचिदुपाधिविशेषेण सम्बद्धं बध्यते मुच्यते च,

---

इत्यर्थः। एवकारेण सविशेषत्वपरवाक्यानाम् अतत्त्वावेदकत्वम् अभिप्रेतम्। नित्येति। जीवैक्यस्य समानाधिकरणवाक्यावगतत्वात् ब्रह्मैव अविद्यातिरोहितं भेदभ्रममनुभवतीति कल्प्यम्। अत एव बन्धः, मोक्षश्च उपपन्नः इत्यर्थः। (तेन) स्वयाथात्म्याज्ञानपूर्वको बन्धः, स्वप्रकाशे वस्तुनि न सम्भवतीति (नाशंका)। ईश्वरेत्यादि। अद्वैतवाक्यबलेन (ईश्वरेशितव्यादिभेदबोधकानां) वाक्यानां मिथ्याविषयत्वम् आश्रयणीयमित्यर्थः।

एकमेवेति। चेष्टादिभिः सर्वशरीराणाम् आत्मवत्त्वं सिद्धम्। तथा सति सुखदुःखव्यवस्थायां च, आत्मनि भेदेन, बन्धमोक्षव्यवस्था स्यादित्यत्र (उत्तरमिदम्) जीवैक्ये सर्वशरीराणां सजीवत्वाभावात् सुखादिप्रतिसन्धानाभावः इत्यर्थः। न व्यवस्थितमिति। एकस्य सजीवत्वं च, ऐक्योपदेशबलात् स्वीकृतम्। (अतः) एकमेव शरीरं सजीवं चेत्, तच्छरीरको जीवः श्रवणमननादिभिः लब्धाद्वैतज्ञानः स्यात् इति, बन्धो न स्यात् इति (नाऽऽशंका)। 'इदं शरीरं सजीवम्, एतच्छरीरको जीवः ज्ञानवान्' इति निश्चेतुमशक्यम् इत्यर्थः। आचार्य इति। शिष्याचार्यव्यवस्थायाम् आत्मबहुत्वं स्यात्। शास्त्रस्य च प्रामाण्यात्, ब्रह्मव्यतिरिक्तं सत्यं स्यात् इत्यत्र (उत्तरमिदम्)। प्रमाता श्रोता विवक्षितः। एकैकमेव निरपेक्षं दूषणमिति ज्ञापनाय मिथ्या शब्दावृत्तिः। इति वर्णयन्ति इति वर्णनशब्देन, ग्रन्थप्रपंचः अर्थदौःस्थ्यं च विवक्षितम्।

अपरे इत्यादिना, द्वितीयश्लोकपूर्वार्धस्थं भास्करमतोपन्याससंग्रहं विवृणोति। विवरणे प्रवृत्ताः इत्यनुवर्तते। अपरे ---- व्यवस्थिताः इत्यन्वयः। गुणोपेतमिति। प्रमाणसिद्धस्य बाधायोगात्, सगुणत्वं तैरभ्युपगतम् (इत्याशयः)। ऐक्यावबोधेन - ऐक्योपदेशान्यथानुपपत्त्या।

---

1. ईशेशि - क. ग. 2. ज्ञानो - क, ग. 3.शास्त्रप्रमाता - क, ग. 4. जन्यं - क. ग. 5. भूतेनैव शास्त्रेण - क,ग. 6. अवगम्यते - पा. 7. अपरे - ग. 8.एतेनैव - ग.

नानाविधमलरूपपरिणामास्पदं च - इति व्यवस्थिताः ।

[यादवप्रकाशमतसंक्षिप्तानुवादः]

अन्ये पुनः ऐक्यावबोधयाथात्म्यं वर्णयन्तः - स्वाभाविका[1]परिमितोदार-गुणसागरं ब्रह्मैव, सुर-नर-तिर्यक्-स्थावर-नारकि-स्वर्ग्यपवर्गिचेतनैकस्वभावं स्वभावतो[2]विलक्षणम्[2]अविलक्षणं च ; वियदादिनाना[3]विधमलरूप[3]-परिणामास्पदं च - इति प्रत्यवतिष्ठन्ते ।

[शांकरमते औचित्यराहित्यम्]

तत्र[4]प्रथमपक्षे[4] - श्रुत्यर्थपर्यालोचनपरा दुष्परिहरान् दोषान् उदाहरन्ति । तथाहि प्रकृतपरामर्शितच्छब्दावगतस्य ब्रह्मणः स्वसंकल्पकृत-जगदुदय-विभव[5]लयादयः[5], *'तदैक्षत बहु स्यां, प्रजायेय'* (छा.उ.6-2-3) इत्यारभ्य, *'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः'* (छा.उ.6-8-4) इत्यादिभिः पदैः प्रतिपादिताः, तत्सम्बन्धितया प्रकरणान्तरनिर्दिष्टाः, सर्वज्ञता सर्वशक्तित्व-

---

केनचित् - देवमनुष्याद्युपाधिषु अन्यतमेन । **बध्यते** - संसरति । मुच्यते चेति । तथासति बन्ध-मोक्षव्यवस्थाऽपि, उपपद्यते (इत्याशयः) । एवं ब्रह्मणः जीवत्वमुक्तम् । **नानाविधेति** अचिद्रूपपरिणाममाह । **मलरूप**शब्दः दोषरूपत्वपरः ।

अथ यादवप्रकाशमतं विवृणोति " अन्ये पुनः " इत्यादिना । **वर्णयन्तः** इति उपालम्भः । 'यथा अचिद्ब्रह्मणोः जीवब्रह्मणोश्च ऐक्यम्, एकरूपं प्रतिपन्नम् ; तथा भेदोऽपि एकरूपः प्रतिपन्न इति, अचिद्ब्रह्मणोः भेदस्य स्वाभाविकत्वम्, जीवब्रह्मणोः भेदस्य औपाधिकत्वं च न वाच्यम् ; उभयत्र भेदः स्वाभाविकः इति 'वर्णयन्तः' - इत्यस्याभिप्रायः । **अपरिमितत्वम्** - असंख्येयत्वम् । **उदारः** - उत्कृष्टः प्रशस्यः । तादृशः **गुणसागरः** - गुणगणः यस्य - इति बहुव्रीहिः । **सुरेति** जीवगताचिद्गताशुभास्पदत्वमाह ।

पर्यालोचनम् - परितः आलोचनम् - अभेदभेदघटकसमानाधिकरणश्रुति-तत्पौर्वापर्याद्यालोचनम् ; न तु एकवाक्यमात्रतृप्ताः इत्यर्थः । **उदाहरन्ति** भगवद्यामुनाचार्याः इति शेषः । **प्रकृतपरामर्शि** इति हेतुगर्भम् । **तच्छाब्दः** गुणविशिष्टवाची; प्रकृतपरामर्शित्वादित्यर्थः । **लयादयः** इति आदिशब्देन, अनुप्रवेशनामरूपव्याकरणादयो गृह्यन्ते । जगदुदयविभवविलयादय एव तत्तद्वाक्यप्रतिपन्नतया विशेष्यन्ते ।

तदैक्षतेत्यादिना प्रतिपादिताः इत्यन्तेन, तत्तत्प्रकरणाधीतगुणाः उक्ताः । **तत्सम्बन्धितया** - कारणवस्तुसम्बन्धितया । **प्रकरणान्तरनिर्दिष्टाः** - प्रकरणान्तरोक्ताः सर्वशाखाप्रत्ययन्यायेन प्रकरणान्तरादाकृष्टाः । *'यः सर्वज्ञः'* (मुण्ड.उ.1-1-10) , *'पराऽस्य शक्तिः'*

---

1. स्वाभाविकनिरतिशया - क, ग. 2. विलक्षणं च - क, ग. 3. विध - ख. 4. प्रथमे पक्षे - क. प्रथमपक्षस्य - ग. 5. विलयादयः - ग.

सर्वेश्वरत्वसर्वप्रकारत्व[1] समाभ्यधिकनिवृत्ति-सत्यकामत्वसत्यसंकल्पत्वसर्वावभास-कत्वाद्यनवधिकातिशयासंख्येयकल्याणगुणगणाः *'अपहतपाप्मा'* (छां.उ.8-7-1) इत्याद्यनेकवाक्यावगत-निरस्तनिखिलदोषता च सर्वे, तस्मिन् पक्षे विहन्यन्ते ।

[ब्रह्मणो निर्विशेषतायाः श्रौतत्वशंका - परिहारौ]

अथ स्यात् - उपक्रमेऽपि एकविज्ञानेन सर्वविज्ञानमुखेन कारणस्यैव सत्यता प्रतिज्ञाय, तस्य कारणभूतस्यैव सत्यता [2]विकारजातस्य[2] च असत्यता मृद्दृष्टान्तेन दर्शयित्वा, सत्यभूतस्यैव ब्रह्मणः,

***'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'* (छां.उ.6-2-1) इति सजातीयविजातीयनिखिलभेदनिरसनेन निर्विशेषतैव प्रतिपादिता ।**

एतच्छोधकानि [3]प्रकरणान्तर[3]वाक्यान्यपि - *'सत्यं ज्ञानमनन्तं ब्रह्म'* (तै.उ.आन.1-1) [4]*'निष्कलम्' 'निष्क्रियम्'*[4] (श्वे.उ.6-19) *'निर्गुणः'* (श्वे.उ.6-1)

विविधैव श्रूयते (श्वे.उ.6-8) , *'स ईशोऽस्य'* (श्वे.उ.6-17), *'न तत्समश्चाभ्यधिकश्च'* (श्वे.उ.6-8), *'सत्यकामः, सत्यसंकल्पः'* (छां.उ.8-7-1), *'तस्य भासा सर्वमिदं विभाति'* (कठ.उ. 2-15), इत्यादिवाक्येषु अमी सर्वज्ञत्यादिगुणाः द्रष्टव्याः ।

अपहतपाप्मा इति हेयप्रत्यनीकत्वमाह । अमी गुणाः सर्वे सृष्ट्युपयोगित्वेन प्रकरणान्तरोक्ताः आकृष्टाः भवन्ति। समाभ्यधिकनिवृत्तौ सत्यां तदेककारणत्वसिद्धिः। सर्वावभासकत्वं च सृष्टजगत्स्थित्युपयोगित्वेन कारणत्वापेक्षितम् । हेयप्रत्यनीकत्वं च सर्गाद्युपयोगि; हेयास्पदत्वे कर्मवश्यत्वेन, स्वातन्त्र्यादिभंगप्रसंगात् । ते सर्वे तच्छब्दावगताः विहन्यन्ते, इत्यर्थः ।

उपक्रमशब्देन उपक्रमोपक्रमो विवक्षितः। *'तत्त्वमसि'* (छां.उ.6-13-2) इति वाक्यापेक्षया *'तदैक्षत'* (छां.उ.6-2-3) इत्यादिवाक्यस्य उपक्रमत्वेऽपि एकविज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यं तस्याप्युपक्रमभूतम् इत्यभिप्रायः । **एकविज्ञानेनेत्यादि** । एकविज्ञानेन सर्वविज्ञानद्वारा एकविज्ञानप्रतिज्ञया, कारणस्यैव सत्यत्वं फलितम् इत्यर्थः । ***तस्येति*** । कारणस्यैव सत्यत्वं दृष्टान्त-वाक्ये कण्ठोक्तम् इत्याशयः। **सत्येति** । दार्ष्टान्तिकवाक्येऽपि निर्विशेषपरत्वमुक्तम् इत्याशयः। **निखिलभेद**शब्देन स्वगतभेदो विवक्षितः ; विजातीयभेदान्तर्गतत्वात् स्वगतभेदस्य ।

एतच्छोधकानीति । कारणवाक्यावगतस्य शोधकत्वात्, तदैकार्थ्येन निर्विशेषपराणि इत्यर्थः । **सत्यं ज्ञानमिति** । सामानाधिकरण्यस्वाभाव्यात्, *'निर्गुणम्'* इत्यादिशोधक-वाक्यान्तरैकार्थ्याच्च, 'सत्यं ज्ञानम्' इत्यादीनि शोधकवाक्यानि निर्विशेषपराणि इत्यभिप्रायः।

---

1. सर्वप्रकार - ख 2. जातस्य क 3. प्रकरणान्तरगत - क,ग. 4. निष्कलम् - ख

[1]*'विज्ञानम्'*[1] (तै.उ.भृ.5-1) *'आनन्दम्'* (तै.उ.आन.9-1) इत्यादीनि सर्वविशेष-[2]प्रत्यनीकैका[3]कारता बोधयन्ति ।

न च, एका[3]कारताबोधनेऽपि[3] पदाना पर्यायता ; एकत्वेऽपि वस्तुनः [4]सर्वविशेष[4]प्रत्यनीकाकारत्वोपस्थापनेन, सर्वपदानाम् अर्थवत्त्वात् - इति ।।

नैतदेवम्; एकविज्ञानेन [5]सर्वविज्ञानप्रतिज्ञान[5] सर्वस्य मिथ्यात्वे, सर्वस्य ज्ञातव्यस्य अभावात्, न सेत्स्यति । सत्य-मिथ्यात्वयोः एकताप्रसक्तिर्वा । अपि तु एकविज्ञानेन [6]सर्वविज्ञान[6], सर्वस्य [7]तदात्मकत्वेनैव[7] सत्यत्वे, सिध्यति ।

[श्वेतकेतुं प्रति उद्दालकप्रश्नस्याशयः तत्र आदेशशब्दार्थविचारः]

अयमर्थः; श्वेतकेतु प्रत्याह -

'स्तब्धोऽसि, उत तमादेशमप्राक्ष्यः' (छा.उ.6-1-3) इति । परिपूर्ण इव लक्ष्यसे; तान् आचार्यान् प्रति तमपि आदेश पृष्टवानसि ? इति । 'आदिश्यते अनेन' इति आदेशः । आदेशः - प्रशासनम् ;

'एतस्य वा अक्षरस्य प्रशासने गार्गि ! सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (बृ.उ.5-8-9) इत्यादिभिः ऐकार्थ्यात् । तथा च मानव वचः -

---

सर्वविशेषेति । सत्यादिपदानां निर्विशेषपरत्वे प्रवृत्तिनिमित्तभेदाभावात् सामानाधिकरण्यलक्षणहानिः इत्यत्र (उत्तरमिदम्) । प्रतियोगिभेदाः प्रवृत्तिनिमित्तानि इत्यर्थः । आकारशब्दः स्वरूपवाची । स्वरूपमेव व्यावृत्तिः इति भावः ।

अर्थवत्त्वात् - प्रयोजनवत्त्वात् । न सेत्स्यतीति । 'सर्व' शब्दस्य सर्वाभाववाचित्वाभावात् इति भावः । एकतेति । जगतः सत्यत्वं, ब्रह्मणो मिथ्यात्वं वा इत्यर्थः। तदात्मकत्वेनैव - ब्रह्मात्मकत्वेनैव ।

श्वेतकेतुं प्रति इति, 'स्तब्धोऽसि' इति श्रूयमाणमध्यमपुरुषार्थस्पाष्टयार्थम् । 'अप्राक्ष्यः' इति । पृच्छतिधातुः द्विकर्मकः, वक्तृकर्मकः वाच्यकर्मकश्चेति । तत्र 'आदेश' शब्दाभिहितं वाच्यकर्म इति दर्शयितुं, 'तान् आचार्यान् प्रति' इति वक्तृकर्म व्याहृतम् । *' न वै नूनं भगवन्तस्त एतदवेदिषुः* (छा.उ. 6-1-7)' इति तच्छब्दनिर्दिष्टाः आचार्याः अत्र स्मारिताः । तान् इति बहुवचनेन, तमादेशम् इति तच्छब्दस्य आचार्यविषयत्वशंकाव्युदासः । तमपीति । श्रोतुर्दुर्लभम् इति अपिशब्दाभिप्रायः । इति (इत्यस्य) श्वेतकेतुं प्रति आह इत्यनेनाऽन्वयः। आदिश्यते अनेन

---

1. निरंजनं, विज्ञानम् - ग. 2. प्रत्यनीका - ग. 3.कारतावबोधनेऽपि - क. कारतावबोधे- ग. कार-बोधनेऽपि - ख. 4. सर्व.- ख. 5. सर्वविज्ञानं -ग 6. सर्वविज्ञानप्रतिज्ञा - क, ग. 7. तदात्मनैव -ख

'प्रशासितारं 'सर्वेषाम्'[1] (म.स्मृ.12-122) इत्यादि । अत्राऽपि, 'एकमेव' इति, जगदुपादानतां प्रतिपाद्य, 'अद्वितीय'पदेन, अधिष्ठात्रन्तर [2]निवारणात्[2], अस्यैव अधिष्ठातृत्वमपि प्रतिपाद्यते ।

[एकविज्ञानेन सर्वविज्ञानश्रुत्याशयः]

अतः तं प्रशासितारम् - जगदुपादानभूतमपि पृष्टवानसि? [3]येन[3] श्रुतेन मतेन विज्ञातेन, अश्रुतम् अमतम् अविज्ञातम्, श्रुतं मतं विज्ञातं भवति इत्युक्तं स्यात् । 'निखिलजगदुदय-विभव-विलयादिकारणभूतं, [4]सर्वज्ञत्व[4]-सत्यकामत्व-सत्यसंकल्पत्वाद्यपरिमितोदारगुणसागरं किं [5]ब्रह्माऽपि[5] त्वया श्रुतम्? इति हार्दो भावः ।

तस्य निखिलकारणतया, कारणमेव नानासंस्थानविशेषसंस्थितं कार्यमित्युच्यत इति, कारणभूतसूक्ष्मचिदचिद्वस्तुशरीरकब्रह्मविज्ञानेन, कार्यभूतम् अखिलं जगत् विज्ञातं भवति - इति हृदि निधाय, *'येनाऽश्रुतं श्रुतं भवति, अमतं मतमविज्ञातं विज्ञातम् स्यात्'* (छा.उ.6-1-3) इति पुत्रं प्रति पृष्टवान् पिता ।

इति प्रत्ययार्थव्याख्यानम् । **आदेशः** - प्रशासनम् इति प्रकृत्यर्थव्याख्यानम् ।

एतस्य वा इति ब्रह्मणः कृत्स्नप्रशासितृत्वे प्रमाणम् । **अत्रापि** - अस्मिन् प्रकरणेऽपि; न केवलं श्रुत्यन्तरेष्वेव । **अधिष्ठातृत्वं** हि प्रेरकत्वम् । तच्च प्रशासितृत्वमिति फलितम् एवम् **आदेश** शब्दार्थ उक्तः ।

अतः - इति, तच्छब्दं विवृण्वन् वाक्यार्थं योजयति । **येन----विज्ञातं भवति, तं** पृष्टवानसि इत्यन्वयः । न हि ब्रह्मणः सत्तया कृत्स्नं ज्ञातं भवति ; अपितु तज्ज्ञानेनैव, वस्तुसामर्थ्यात्। येन श्रुतेनेत्यस्याध्याहारेण योजना । एवं दृष्टान्तसामर्थ्यात्, दार्ष्टान्तिकसामार्थ्यात्, श्रुत्यन्तरकण्ठोक्त्या च एवं व्याख्यातम् । **निखिलेति** । 'यतो वा इमानि' इत्यादिश्रुत्यन्तरवाक्येषु जगत्कारणत्वलक्षणकं ब्रह्म अवगतम् । तस्मात्, अत्र जगत्कारणत्वगर्भं वदतः पितुः, 'त्वया किं ब्रह्म श्रुतम्' ? इत्यभिप्रायः इत्यर्थः । **सर्वज्ञत्वादिगुणाः** कारणत्वोपयोगितया उक्ताः । सृष्ट्यादयः परिपूर्णस्य लीलाः । अतः सत्यकामत्वस्य कारणत्वोपयोगः । **हार्दो भावः** - हृदि निहितं तात्पर्यम् ।

तस्य -----कारणतया कार्यभूतमखिलं जगत् विज्ञातं भवति इत्यन्वयः ।

---

1. सर्वेषामणीयांसमणीयसाम् - घ . 2. निराकरणात् - घ 3. श्रुत्यन्तरे येन - घ.4. सार्वज्ञ्य - ख . 5. ब्रह्म - क,ग.

[एकविज्ञानेन सर्वविज्ञानानुपपत्तिचिन्तया पुत्रस्य चोदना]

तदेतत् सकलस्य वस्तुजातस्य एककारणत्वं पितृहृदि निहितम् अजानन् पुत्रः, परस्परविलक्षणेषु, अन्यस्य ज्ञानेन[1] तदन्यज्ञानस्या[2]घटमानतां बुध्वा, परिचोदयति- *कथं नु भगवः स आदेशः* (छा.उ.6-1-3) इति। परिचोदितः पुनः, तदेव हृदि निहितं ज्ञानानन्दामलत्वैकस्वरूपम्, अपरिच्छेद्यमाहात्म्यम्, सत्यसंकल्पत्वमिश्रैः अनवधिकातिशयासंख्येय-कल्याणगुणगणैःजुष्टम् अविकारस्वरूपम्, परं ब्रह्मैव, नामरूपविभागानर्ह-सूक्ष्मचिदचिद्वस्तुशरीरम्, स्वलीलायै स्वसंकल्पेन, अनन्तविचित्रस्थिरत्रस- [3]रूप[3]जगत्संस्थानं स्वांशेनाऽवस्थितमिति, तज्ज्ञानेन अन्यस्य निखिलस्य ज्ञाततां ब्रुवन्, लोकदृष्टं कार्यकारणयोः अनन्यत्वं दर्शयितुं दृष्टान्तमाह -

---

संस्थितम् - विशिष्टम्। **सूक्ष्म----शरीर**शब्देन ब्रह्मणः हेयास्पदत्वप्रसंगः परिहृतः। **पुत्रं प्रतीत्यादि**। (शास्त्रतत्त्वार्थे वक्तव्ये) पुत्रव्यतिरिक्तानां शुश्रूषाद्यपेक्षाः पुत्रस्य तु पुत्रत्वमेव ब्रह्मोपदेशहेतुः इति शास्त्रार्थः सूचितः। **पुत्रपितृ**शब्दाभ्यां, 'उद्दालकः--- पुत्रमुवाच' 'तं ह पितोवाच' इति श्रुतिवाक्यं स्मारितम्।

'कथं तु भगवः स आदेशः' इतीदं वाक्यम्। किं प्रश्नरूपम् ? उत चोद्यरूपम् ? इति संशये - चोद्यरूपमिति व्याचष्टे तदेतदित्यादिना। प्रतिवचनप्रकारेण प्रश्नार्थो विज्ञायते। प्रतिवचने, 'यथा सोम्यैकेन' इत्यादिना दृष्टान्तैः उपपादनात्, इदं चोद्यरूपम् इत्यभिप्रायः। **परिचोदयतीति**। विवक्षितविशेषकण्ठोक्तिमकुर्वन्, सामान्येन चोदयतीत्यर्थः। अथ पिता ब्रह्मणो जगत्कारणत्वम्, तदुपयोगिगुणजातम्, उपादानत्वनिमित्तत्वप्रयुक्त-दोषशंकापरिहारं च विवक्षन्, कारणज्ञानेन कार्यज्ञानं लोकसिद्धं दर्शयतीत्याह - परिचोदितः पुनः - इत्यादिना। **ज्ञानानन्देति**, 'विज्ञानमानन्दं ब्रह्म' इत्यादिशोधकवाक्यार्थो विवक्षितः। **स्वरूपशब्दः** धर्मिस्वरूपनिरूपकधर्मवाची। **अपरिच्छेद्येति**, अनन्तशब्दार्थो विवक्षितः। स्वरूपम् अपरिच्छिन्नम् इत्यर्थः। **सत्येति**, गुणतोप्यानन्त्यम्। **अविकारेति**, सत्यशब्दार्थः। स्वरूपशब्दः विशेष्यांशपरः। **नामरूपविभागानर्ह** शब्देन सूक्ष्मशब्दो व्याख्यातः। **स्वलीलायै** इति। अवाप्तसमस्तकामस्याऽपि लीलार्थं जगद्व्यापारः उपपद्यते इत्यर्थः। **स्वसंकल्पेति**। संकल्पमात्रसाध्यत्वात् नाऽयम् आयासः इत्यर्थः। **स्वांशेन** - विशिष्टस्य स्वस्य अंशेन। **लोक दृष्टमित्यादि**। कार्यकारणयोः अनन्यत्वे दृष्टान्तमाहेत्यर्थः। अन्यत्वनिबन्धनचोद्यस्य अनन्यत्वज्ञापनेन हि परिहारः इति भावः।

---

1. विज्ञानेन - क, ग. 2. विज्ञानस्य - क. ग. 3. चराचरस्वरूप - ग

'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् ।
वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छा.उ.6-1-4)

इति । एकमेव मृद्द्रव्यं स्वैकदेशेन नानाव्यवहारास्पदत्वाय, घटशरावादि नाना-संस्थानावस्थारूपविकारा[1]पन्नं नाना [1]नामधेयमपि, मृत्तिकासंस्थानविशेष [2]त्वात्[2] मृद्द्रव्यमेवेत्थमवस्थितं[3], न वस्त्वन्तरमिति, [4]यथा[4] - मृत्पिण्ड-विज्ञानेन तत्संस्थान-विशेष[5]रूपं घटशरावादि[5]सर्वं [6]विज्ञातमेव[6] भवति - इत्यर्थः ।

[श्वेतकेतुप्रश्नमनुरुध्य, सतः जगदुपादानतानिमित्तत्वयोः प्रतिपादनम्]

ततः कृत्स्नस्य जगतः, ब्रह्मैककारणताम् अजानन् पुत्रः पृच्छति -
'भगवांस्त्वेव मे तद्ब्रवीतु' (छा.उ.6-1-7)

इति । ततः 'सर्वज्ञं सर्वशक्ति ब्रह्मैव सर्वकारणम्' इत्युपदिशन् स होवाच -
***'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'* (छा.उ.6-2-1) इति ।**

अत्र 'इदम्' इति, जगत् निर्दिष्टम् । 'अग्रे' इति च, सृष्टेः पूर्वकालः । तस्मिन्

तत्र कारणज्ञानेन कार्यविज्ञानस्य सिद्धये तयोः ऐक्योपपादकः उत्तरो वाक्यखण्डः प्रथमं व्याख्यायते **एकमेवेति** ।। वाचा इति पदं व्याचष्टे **नानेत्यादि** । वाक् शब्दः अजहल्लक्षणया वाक् पूर्वकव्यवहारे वर्तते । वाक्पूर्वकव्यवहारश्च प्रयोजनतया हेतुः इत्यर्थः । **संस्थानमेव अवस्था, सैव विकारः ।** 'षोडशकश्च विकारः' (सां.का.3) इत्यादिषु विकारशब्दस्य अवस्थावद्द्रव्यपरत्वेन प्रयोगदर्शनात्, तद्व्यावृत्त्यर्थमवस्थारूपविकारेत्युक्तम् । एवकारव्यावर्त्यमाह - **न वस्त्वन्तरमिति ।**

विजातीयानामपि सर्वकार्याणां ब्रह्मैवोपादानं, तदेव च निमित्तम्, इत्युपदिदेशेत्याह - **ततस्सर्वज्ञमिति** ।

जगन्निर्दिष्टमिति । प्रकृतमस्ति चेत्, तत्परत्वम्, अन्यथा प्रत्यक्षादि प्रसिद्धजगत्परत्वमेव इदंशब्दस्य उचितमिति भावः । अग्रशब्दस्य प्रलयकालपरत्वमवगम्यते ; अनन्तरं सृष्टेः वक्ष्यमाणत्वात् इति भावः । **सदात्मकताम्** - कारणात्मकताम् । सदेव इत्यनेन, वैशेषिकोक्तं कदाचित्सत्त्वं, कदाचिदसत्त्वं च व्यावृत्तम् । तेन प्रलयकालेऽपि सत्त्वं फलितमिति एवमुक्तम् ; न तु वाचनिकोऽयम् अर्थः । **सदेव इदम् अग्रे एकमेव आसीत्** इति हि अन्वयः । **सच्छब्दः** प्रमाणसम्बन्धार्हत्वोपाधिना प्रकृतिपुरुष कालविशिष्टं ब्रह्म आह। 'कारणात्कार्यस्यान्यत्वेन, जगतः कदाचित्सत्त्वं परैरुक्तम् ।

---

1. पन्ननाना - ख. 2.वत्त्वात् - ख. 3.मेवेति व्यव - ग. 4.तथा - ग. 5.घटशरावादिरूपं - ख
6.ज्ञातमेव - क.ग

काले जगतः सदात्मकता 'सदेव' इति प्रतिपाद्य, तत् सृष्टिकालेऽपि अविशिष्टम् इति कृत्वा, 'एकमेव' इति सदापन्नस्य जगतः तदानीम् अविभक्तनामरूपता प्रतिपाद्य, तत्प्रति-पादनेनैव सतः जगदुपादानत्वं प्रतिपादितमिति स्वव्यतिरिक्तनिमित्तकारणम् अद्वितीयपदेन प्रतिषिद्धमिति[1]।

'*तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवति*' (छा.उ.6-1-3) इति आदावेव 'प्रशासितैव जगदुपादानम्' इति हृदि निहितम्, इदानीम् [2]अभिव्यक्तम्[2]।

(एतदेव उपपादयति) स्वयमेव जगदुपादानं जगन्निमित्तं च सत्, '*तदैक्षत बहु स्यां प्रजायेय*' (छा.उ.6-2-3) इति । तदेतत् सच्छब्दवाच्यं परं [3]ब्रह्म[3], सर्वज्ञं

'कारणभूत ब्रह्मानन्यत्वेन जगतः नित्यसत्वम्' इत्यर्थः । **एकमेवेति** । जगत् सदेव चेत्, प्रलये को विशेषः ? इत्यपेक्षायाम्, द्रव्यं नित्यमेव । तस्य अविभक्त नामरूपावस्थाप्रलयः । विभक्त-नामरूपावस्थाकार्यता इति वैषम्यं 'एकमेव' इति पदेनोक्तं भवतीत्यर्थः । **प्रतिपादनेनैवेति** । भाव्यवस्थाविशेषवतः प्रागवस्थायोगो हि उपादानत्वम् । तस्मात् वक्ष्यमाण बहुत्वावस्थायाः पूर्वावस्थाकथनेन उपादानत्वमुक्तं भवतीत्यर्थः । **स्वव्यतिरिक्तेति** । कुलालस्य विविधपरिणामशक्तिवैकल्येन अनुपादानत्वम्, मृत्पिण्डस्य ज्ञातृत्वविरहात् अनिमित्तत्वम् । अत्र तु उभयसद्भावात्, ब्रह्मैव उभयकारणम् इत्यर्थः । आदेशशब्देन प्रेरयितृत्वं कण्ठोक्तम् । **येनेत्यादि** प्रतिज्ञानेन उपादानत्वम् अभिप्रेतम् । तदुभयम् अत्र स्फुटम् - इत्यर्थः ।

स्वयमेवेत्यादीनि पूरकपदान्तराणि । 'सदेव' इत्यादिवाक्यम्, सजातीयविजातीयादि भेदनिषेधपरत्वेन परैः व्याख्यातम् ; तत् उत्तरवाक्याननुगणम् । (यतः) अस्मदुक्तार्थस्यैव उपपादकानि उत्तरवाक्यानि इत्यभिप्रायेण **जगदु-------निमित्तं च** इति पदद्वयोपादानम् । **सर्वज्ञम्** इत्यादिना, वक्ष्यमाणसृष्ट्युपपादकविशेषणान्याह । **लीलार्थम्** इति (पदेन,) अवाप्तसमस्तकामस्य प्रवृत्त्यनुपपत्तिपरिहारः । **सत्यसंकल्पम्** इति जगद्व्यापारः न आयासरूपः; संकल्पमात्रसाध्यत्वात् इत्यभिप्रायः । **जगद्रूपेणेति**, 'अजायमानो बहुधा विजायते' इत्युक्तावताररूपबहुत्वव्यावृत्त्यर्थमुक्तम् । **विचित्रानन्तेति**, तत्र बहुशब्दार्थोऽस्तीति दर्शयितुम् । **तदर्थं प्रजायेयेति** । 'जायते, अस्ति' इत्याद्यवस्थासु जायमानावस्था, जातावस्था चेति उत्पत्तावेव अवस्थाद्वयमस्ति । तत्र उत्पन्नावस्था 'अस्ति' शब्दवाच्या। उत्पाद्यमानावस्था 'जायते' इति शब्दवाच्या । **'स्याम्'** इति पदेन, उत्पन्नावस्था विवक्षिता । **प्रजायेयेति**, तत्पूर्वभाविनी

1.प्रतिषिद्धम् - ग. 2. सुव्यक्तम् कं - ग. 3.ब्रह्मैव- क.ग.

सर्वशक्तिसत्यसंकल्पम् अवाप्तसमस्तकाममपि, लीलार्थम् 'विचित्रानन्तचिदचिन्मिश्रजगद्रूपेण अहमेव बहु स्याम्, तदर्थं प्रजायेय' इति स्वयमेव संकल्प्य, स्वांशैकदेशादेव वियदादिभूतानि सृष्ट्वा, पुनरपि सैव सच्छब्दिता परादेवता एवम् ऐक्षत -

[नाम-रूपव्याकरणश्रुति-तदर्थविचारः]

हन्ताऽहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि (छा.उ. 6-3-2) इति

उत्पाद्यमानावस्था उक्ता इति विभागः । उत्पत्तौ साधनस्य पूर्वभावित्वम्, साध्यस्य पश्चाद्भावित्वम् संकल्पे तु साध्यं पूर्वभावि, साधनं पश्चाद्भावि । तस्मात् 'स्याम्' इति पूर्वमुक्तम् । **स्वयमेव** - उपादानभूतं तदेव । **स्वांशः** - प्रकृतिः । **पुनरपीति** । व्यष्टिसृष्ट्यर्थमित्यर्थः। **सैवेति**, 'सदेव' इति निर्विशेषं वस्तूक्तम्। 'सेयम्' इति सगुणम् इति भ्रमापनयनार्थमुक्तम्। **परा देवतेति**। अत्र पूर्वापरेषु च सगुणं ब्रह्मैवोच्यते इत्यर्थः ।

हन्ताहम् इति, व्यष्टिसृष्टिसंकल्पवाक्यम् । **अनुप्रविश्य** इत्यत्र अनुप्रवेशः न केवलं तत्तत्पदार्थमात्रपर्यन्तनामरूपव्याकरणार्थः ; अपि तु स्वपर्यन्तनामरूप- व्याकरणार्थः ; अनुप्रवेशश्रवणेन, मातापितृकुलालादिनिर्वर्त्यं देवदत्तघटादि नाम-रूपव्याकरणतः व्यावृत्तत्वावगमात् 'बहु स्याम्' इति,उपक्रम एव स्वपर्यन्तनामरूपभाक्त्वसंकल्पात् । अनुप्रवेशपूर्वकनामरूपव्याकरणोक्तिः आद्यसृष्टेरपि प्रदर्शनार्था 'यस्य बुद्धिः शरीरं यो बुद्धिमन्तरे स चरन् यं बुद्धिर्न न वेद ; यस्याहंकारःशरीरम् (सु.उ. 7) इत्यादि हि श्रूयते । 'अनेन जीवेन' इत्यादिश्रुतिः बहुस्याम्' इत्यक्तं नानानामरूपभाक्त्वम्, सद्वारकमाह । ब्रह्मणः समष्ठिनामरूपभाक्त्वम् अद्वारकम्; महदादेः जीवं प्रति शरीरत्वाभावात् । व्यष्टिनामरूपभाक्त्वम् अद्वारकं सद्वारकं च । तथा सति न द्विपर्यवसानहेतुता, गोशब्दादिवत् । **जीवेनाऽऽत्मना** - जीवशरीरकेण मया । 'सिंहेन भूत्वा बहवो मयात्ताः' इतिवत् । ' 'तदनुप्रविश्य । सच्चत्यच्चाऽभवत्' इति जीवेऽप्यनुप्रवेशेन तन्नामभाक्त्वश्रवणात् जीवेनात्मना' इति कर्तरि तृतीया । अनुप्रवेशस्य द्वारकता हि सः । व्याकरणकर्ता हि तिङाभिहितः । अनुप्रवेशकर्ता तु नाभिहितः इति, सः तृतीयाभिधेयः ।

अनुप्रविश्य इति 'क्त्वा' प्रत्ययश्च न कर्त्रभिधायी ; (किन्तु) शब्दान्तर प्रतिपन्नक्रियाद्वयकर्त्रैक्यमात्राभिधायी । पदार्थत्वम् -तत्तदवस्थाविशिष्टत्वम् देवमनुष्याद्याकार-

'अनेन जीवेनाऽऽत्मना' इति, जीवस्य ब्रह्मात्मकत्वं प्रतिपाद्य, ब्रह्मात्मक-जीवानुप्रवेशादेव कृत्स्नस्य अचिद्वस्तुनः पदार्थत्वम्, एवंभूतस्यैव [1]अचिद्वस्तुनः[1] नाम-रूपभाक्त्वम् - [2]इति च[2] दर्शयति ।

[नाम - रूपव्याकरणश्रुत्यर्थस्फुटीकरणम्]

एतदुक्तं भवति - जीवात्मा तु ब्रह्मणः शरीरतया प्रकारत्वात्, ब्रह्मात्मकः; *'यस्यात्मा शरीरम्' (बृ.उ.मा.पा.5-7-26)* इति श्रुत्यन्तरात् । एवम्भूतस्य जीवस्य शरीरतया प्रकारभूतानि देवमनुष्यादिसंस्थानानि वस्तूनि - इति, ब्रह्मात्मकानि तानि सर्वाणि । अतः 'देवः मनुष्यः यक्षः राक्षसः पशुः मृगः पक्षी वृक्षः लता काष्ठम् शिला तृणम् घटः पटः' इत्यादयः सर्वे प्रकृतिप्रत्यययोगेन अभिधायकतया प्रसिद्धाः शब्दाः, लोके तत्तद्वाच्यतया प्रतीयमानतत्तत्संस्थानवस्तुमुखेन, तदभिमानिजीव-तदन्तर्यामि-परमात्म [3]पर्यन्त[3]संघातस्यैव वाचकाः - इति ।

विशिष्टत्वम् । न हि निराकारः पदार्थः ; पृथिवीत्वाकारविशिष्टो हि पृथिवीपदार्थः - परमात्मपर्यन्तस्यैव वस्तुनः तत्तदवस्थाविशिष्टत्वम्, न स्वतन्त्रस्य इत्यर्थः । **एवं भूतस्यैव** - परमात्मपर्यन्तस्यैव ।

प्रकारत्वादिति शरीरत्वमस्तु । ततः किं ब्रह्मपर्यन्ताभिधानस्य ?। इत्यत्रोत्तरमिदम् **शरीरतयेति** प्रकारत्वं दण्डकुण्डलादेरप्यस्तीति तद्व्यावृत्त्यर्थम् । **यस्यात्मेति** । आत्मशब्दः स्वरूपैक्ये, शरीरशरीरिभावे च साधारण इति, अत्र शरीरशरीरिभावे (एवेति) किं नियामकम् ? इत्यत्रोत्तरमिदम् । **एवम्भूतस्येति** । देवत्वादिविशिष्टशरीराणि जीवद्वारा ब्रह्मात्मकानि इत्यर्थः । **यक्षराक्षसादयः**, देवाद्यवान्तरजातीयानामपि ब्रह्मपर्यन्तत्वं दर्शयितुमुपात्ताः । **काष्ठमित्यादि** । 'अप्राणिमत्सु स्वल्पा सा' (वि.पु.2-12-39) (अनभिव्यक्तप्राणयुक्तशरीरवत्सु इत्यर्थः) इत्यादिभिः, लोष्टकाष्ठादेः जीवाधिष्ठितत्वश्रवणात् इदमुक्तम् । छिन्नद्रुमो हि काष्ठम् । तत्र द्रुमावस्थाधिष्ठातृजीवापगमेऽपि, काष्ठावस्थाभिमानी जीवः विद्यत एव ; नामरूपभाक्त्वात्, इति भावः । (तृणम् - शुष्कतृणम् छिन्नतृणं वा ; अप्राणिवस्तूनां मध्ये उपात्तत्वात्)

तत्तत् ------ मुखेन इत्यनेन, देवत्वमनुष्यत्वद्वित्वाद्यनुपपत्तिः परिहृता भवति । देवत्वद्वित्वादीनां परमात्मस्वरूपे अव्यवधानेन अन्वयाभावेऽपि, देवत्वादीनां प्रकृत्यभिधेयानाम् प्रत्ययाभिधेयानां द्वित्वादीनां च, परमात्मनि सद्वारकान्वयः सम्भवति इत्यर्थः।

सदुपादानता-सन्निमित्तता शब्देन, 'सन्मूलाः' इत्यत्र मूलशब्दार्थ उक्तः । **सदाधारता**

---

1. सर्वस्य वस्तुनः - क, ग 2. इति - ख 3. पर्यन्तस्य - क,ग

['तत्त्वमसि' श्रुतेः अर्थोपपादनम्]

एव [1]समस्तस्य चिदचिदात्मकप्रपंचस्य, सदुपादानता-सन्निमित्तता-सदाधारता-सन्नियाम्यता-सच्छेषतादि सर्वं च, *'सन्मूलाः सोम्येमाः [2]सर्वाः प्रजाः [2] सदायतनाः सत्प्रतिष्ठाः' (छा.उ.6-8-4)* **इत्यादिना विस्तरेण प्रतिपाद्य, कार्यकारणभावादिमुखेन,** *'ऐतदात्म्यमिदं सर्वं तत्सत्यम्' (छा.उ.6-8-7)* **इति, 'कृत्स्नस्य जगतः ब्रह्मात्मकत्वमेव सत्यम्' इति प्रतिपाद्य, 'कृत्स्नस्य जगतः स एवाऽत्मा, कृत्स्नं च जगत् तस्य शरीरम् ; तस्मात् 'त्वंशब्दवाच्यमपि जीवप्रकारं ब्रह्मैव' इति, सर्वस्य ब्रह्मात्मकत्वं प्रतिज्ञातम्,** *'तत्त्वमसि' (छा.उ.6-9-4)* **इति, जीवविशेषे उपसंहृतम् ।**

[जगतः ब्रह्मात्मकत्वं, शरीरशरीरिभावनिबन्धनम्]

एतदुक्तं भवति - *'ऐतदात्म्यमिदं सर्वम्' (छा.उ.8-6-7)* **इति, चेतनाचेतनप्रपंचम् 'इदं सर्वम्' इति निर्दिश्य, तस्य प्रपंचस्य 'एषः आत्मा' इति प्रति-**

इति, सदायतनशब्दार्थः ; नियन्तृतया धारकत्वात् । **सन्नियाम्यता** इति धारकत्वाकृष्टोऽर्थः । **सच्छेषतादि** इति पूर्वोक्तया शरीरतया अर्थसिद्धम् । शरीरत्वं हि शेषत्वं धार्यत्वं नियाम्यत्वं च ।

आदिपदात्, अन्यत् अपेक्षितं गृह्यते ; 'अनुक्तम् अन्यतो ग्राह्यम्' इति न्यायात् । **कार्यकारणभावादि** इति 'आदि' शब्देन सदाधारत्वादिकं विवक्षितम् । **इति प्रतिपाद्येति** । धारकत्वादिभिस्तावत् शरीरात्मभावः सिद्धः, कार्यकारणभावश्च सिध्यति; स्वरूपमात्रस्य कारणत्वायोगेन विशिष्टस्यैव कारणत्वात् । **ऐतदात्म्यम्** - एतदात्मकम् । स्वार्थे ष्यञ्, सम्बन्धार्थे वा । एतदात्मसम्बन्धि इत्यर्थः । अस्याऽत्मनः शरीरतया सम्बन्धि इत्युक्तं भवति । **प्रतिज्ञातं ------ उपसंहृतमिति** । 'ऐतदात्म्यम्' इति सामान्येन वैयधिकरण्येन प्रतिज्ञातं ब्रह्मात्मकत्वम्, सामानाधिकरण्येन 'तत्त्वमसि' इति जीवविशेषे उपसंहृतम् इत्यर्थः । सामान्येनोक्तस्य विशेषे उपसंहारस्य अपेक्षिततत्वाच्च ।

ऐतदात्म्यमित्यत्र आत्मशब्दः 'मृदात्मको घटः' इतिवत्स्वरूपैक्यपरः किं न स्यात् । तेन 'तत्त्वमसि' इत्युपसंहारेपि स्वरूपैक्यमुक्तं भवति - इत्येका, ' ऐतदात्म्यमिदं सर्वं इत्यत्र अचिद्ब्रह्मणोरैक्यं 'तत्त्वमसि' इति जीवब्रह्मणोरैक्यं च उक्तमिति नात्रानुवादः - इत्यपरा च , शंका 'एतदुक्तं भवति' इत्यादिना निरस्यते ।

चेतनाचेतनेति । अनेन (ऐतदात्म्यमिति) 'अचिद्ब्रह्मणोरैक्यं प्रतिपादितम्' इत्येतत् प्रत्युक्तम् । 'सर्वं' शब्दो हि असंकोचेन प्रमाणान्तरगम्यं सर्वचेतनाचेतनात्मकं जगत् वदतीति, अचिन्मात्रपरत्वे सर्वशब्दस्यारस्यभंगात्, श्रुत्यन्तरे च 'इदं सर्वमसृजत' इत्यारभ्य, 'सच्चत्यच्चाभवत्

---

1. समस्त - ग. 2. सर्वाः - ग

पादितः । प्रपंचोद्देशेन ब्रह्मात्मकत्वं प्रतिपादितम् - इत्यर्थः । तदिदं ब्रह्मात्मकत्वं, किम् [1]आत्मशरीरभावेन[1]? उत स्वरूपेण? इति विवेचनीयम् ।

स्वरूपेण - इति चेत्, ब्रह्मणः सत्यसंकल्पत्वादयः, *'तदैक्षत बहु [2]स्याम्'*[2] (छा.उ.6-2-3) इति उपक्रमावगताः बाधिता भवन्ति ।

शरीरात्म[3]भावेन च[3] तदात्मकत्वं, श्रुत्यन्तरात् विशेषतोऽवगतम् ; *'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा'* (तै.आर.3-11-3) इति । प्रशासितृत्व-रूपात्मत्वेन सर्वेषां जनानाम् अन्तःप्रविष्टः । अतः सर्वात्मा -सर्वेषां जनानाम् आत्मा, सर्वं च अस्य शरीरम् - इति विशेषतो ज्ञायते ब्रह्मात्मकत्वम् ।

'य आत्मनि तिष्ठन् आत्मनोऽन्तरः, यमात्मा न वेद, यस्यात्मा शरीरम्, य आत्मानमन्तरो यमयति, स त आत्माऽन्तर्याम्यमृतः' (बृ.उ.मा.पा.5-7-26) इति

------- विज्ञानं चाविज्ञानं च' इति, 'इदं सर्वम्' इति निर्दिष्टस्य जगतः, चेतनाचेतनात्मकत्वेन विवृतत्वाच्च । 'ऐतदात्म्यम्' इत्यत्र किमुद्देश्यम्? किमुपादेयम् ? इत्यत्राह **प्रपंचोद्देशेनेति** । एवं एका शंका परिहृता भवति ।

तदिदमिति । अनेन 'आत्म' शब्दस्य स्वरूपैक्यपरत्वं व्युदस्यति ।

स्वरूपेणेति ----- भवन्तीति । एवं स्वरूपैक्यशंका च परिहृता भवति । अचिद्ब्रह्मणोः स्वरूपैक्ये, अचेतनत्वादेव सत्यसंकल्पतादिविरोधः । जीवब्रह्मणोरैक्ये, तस्य कर्मवश्यत्वादेव सत्यसंकल्पत्वादिविरोधः इत्यर्थः । एतद्विरोधपरिहाराय शरीरात्मभावः कल्प्यते इत्यभिप्रायः ।

श्रुत्यन्तरादिति । न केवलम् श्रुत्यर्थानुपपत्त्या शरीरात्मभावः कल्प्यः ; अपि तु ब्रह्मण आत्मत्वम्, जगतः तच्छरीरत्वं च कण्ठोक्तमित्याशयः । **प्रशासितृत्वेति**, विशेषतोऽवगतिं दर्शयति । 'सर्वात्मा' इत्युक्तम् आत्मत्वं, 'प्रशासितृत्वलक्षणम् इति दर्शितम् । **अन्तःप्रविष्ट शब्देन** राजादिव्यावृत्तिः । **शास्ता** इति पदेन गगनादिव्यावृत्तिः । **अतः** - अन्तःप्रविश्य प्रशासितृत्वात् । **विशेषत** इति । कथं विशेषतोऽवगतम् ? इत्यपेक्षायाम्, 'एवं विशेषतो ज्ञायते' इत्युक्तमिति, न पुनरुक्तिः । अस्मिन् वाक्ये प्रशासितृत्वविशेषितात्मत्वस्य कण्ठोक्तिः, शरीरत्वं गम्यम् ।

य आत्मनीति आत्मत्व-शरीरत्व कण्ठोक्त्यन्वितं वाक्यम् । **अत्रापीति** । यद्यपि शरीर-शरीरिभावः श्रुत्यन्तरसिद्धः स्यात् ; तथापि एतत्प्रकरणे स्वरूपैक्यं गम्यते इत्यत्रोत्तरमिदम् ।

1. शरीरात्मभावेन - घ 2. स्यां प्रजायेय - क, फ. 3.भावेन चेत् -घ, भावेन तु - घ.

च । अत्राऽपि, *'अनेन [1]जीवेनात्मना'* [1] (छा.उ.6-3-2) इतीदमेव ज्ञायते - इति पूर्वमेवोक्तम् ।

[तत्त्वमसीति श्रुत्यर्थनिगमनम्]

अतः - सर्वस्य चिदचिद्वस्तुनः ब्रह्मशरीरत्वात्, सर्वशरीरं सर्वप्रकारं सर्वैः शब्दैः [2]ब्रह्मैवाऽभिधीयते - इति, 'तत् त्वम्' इति सामानाधिकरण्येन, जीवशरीरतया जीवप्रकारं ब्रह्मैव अभिहितम् ।

एवमभिहिते सति, अयमर्थो ज्ञायते - 'त्वम्' इति यः पूर्वं देहस्या[3]ऽधिष्ठातृतया प्रतीतः, सः परमात्मशरीरतया परमात्मप्रकारभूतः परमात्म- [4]पर्यन्तः [4] । अतः 'त्वम्' इति शब्दः, तत्प्रकारविशिष्टं [5]तदऽन्तर्यामिणमेव आचष्टे - इति ।

[बुद्धिशब्दयोः परमात्मपर्यन्तत्वे हेतुः]

अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा.उ.6-3-2) इति, ब्रह्मात्मकतयैव जीवस्य [6]शरीरिणः [6] स्वनामभाक्त्वात्, 'तत् त्वम्' इति [7]समानाधिकरण [7]वृत्तयोः [8]द्वयोरपि पदयोः [8] ब्रह्मैव वाच्यम् । तत्र 'तत्'पदं जगत्कारणभूतं [9]सर्व[9]कल्याण [10]गुणाकरं [10] निरवद्यं निर्विकारम् आचष्टे । 'त्वम्' इति च, [11]तदेव ब्रह्म[11] जीवान्तर्यामि [12]रूपं[12] [13]सशरीरं[13] जीव[14]प्रकारविशिष्टं [14]माचष्टे ।

एवमभिहित इति । बुद्धिशब्दयोः तत्पर्यन्ततताज्ञापनं प्रयोजनमित्यर्थः । शरीरतयेत्यादि । शरीरतया प्रकारत्वेन पृथक्सिद्धिस्थितिप्रवृत्त्यनर्हः इत्यर्थः ।

समानाधिकरणवृत्तयोरिति । परं प्रति वक्ष्यमाणदूषणानां स्वपक्षास्पर्शित्वं दर्शयितुं, स्वपक्षे सामानाधिकरण्यसाद्गुण्यं विवक्षुः, तत्र एकार्थवृत्तित्वसिद्धिमाह । तत्र इत्यादिवाक्यद्वयेन 'तत्' 'त्वम्' इति पदद्वयस्य प्रवृत्तिनिमित्तभेदसिद्धिमाह ।

तदेवमिति । प्रवृत्तिनिमित्तभेदेन एकार्थवृत्तित्वरूपं सामानाधिकरण्यं सिद्धमित्यर्थः । ब्रह्मण इति । त्वन्मते (अद्वैति) सामानाधिकरण्यलक्षणासिद्धिः, वाक्यान्तरावगत-सर्वज्ञत्वादिगुणविरुद्धम् अविद्याश्रयत्वादि कल्पनीयं च इत्यभिप्रायः ।

1.जीवेन - ख.(पा). 2. सर्वशब्दैः - क, ग. 3. देहा- क,ग 4. पर्यन्तः पृथक्स्थितिप्रवृत्यनर्हः क,ग. 5. ब्रह्मशरीरिणः ख(पा) 6. सामानाधिकरण्यप्र - ग. 7. द्वयोः पदयोरपि -ख (पा). 8. सकल - क.ग. 9. गुणगणकरं -क.ग. गुणात्मकं -ख(पा) 10. तदेव - घ. 11. रूपेण - ग,रूपि - घ. 12. स्वशरीर - ग. 13. प्रकारं - घ. 14. प्रकारं - घ

तदेव प्रवृत्तिनिमित्तभेदेन एकस्मिन् ब्रह्मण्येव 'तत् त्वम्' इति [1]द्वयोः[1]-पदयोः [2]वृत्तिर्[2]रुक्ता, ब्रह्मणः [3]निरवद्यत्व निर्विकारत्व[3] सर्वकल्याण-[4]गुणाकरत्व[4] जगत्कारणत्व च अबाधितम् ।

[वेदान्ततत्वज्ञानिनः इतरवैलक्षण्यम्]

अश्रुतवेदान्ताः [5]पुरुषाः[5] 'सर्वे पदार्थाः सर्वे जीवात्मानश्च ब्रह्मात्मकाः' इति न पश्यन्ति । सर्वशब्दानां च केवलेषु तत्तत्पदार्थेषु [6]वाच्यैकदेशेषु वाच्य[6]पर्यवसानं मन्यन्ते । इदानीं वेदान्तवाक्यश्रवणेन, ब्रह्मकार्यतया तदन्तर्यामिक [7]तया च[7] सर्वस्य ब्रह्मात्मकत्वं, सर्वशब्दानां तत्तत्प्रकार संस्थितब्रह्मवाचित्वं च जानन्ति ।

[सर्वशब्दानां ब्रह्मवाचकत्वे लौकिकव्युत्पत्तिविरोध - परिहारौ]

नन्वेवम्-गवादिशब्दानां तत्तत्पदार्थ [8]वाचितया[8] व्युत्पत्तिः, बाधिता स्यात् !

न पश्यन्तीति । पदार्थानां ब्रह्मपर्यन्ततया ग्रहणाभावः, वेदान्तश्रवणरूप-सामग्रीवैकल्यात् ; न तदर्थाभावात् इत्यर्थः । **सर्वेति** । तस्मादेव सामग्रीवैकल्यात्, शब्दानां तत्पर्यन्तत्वव्युत्पत्त्यभावः इत्यर्थः ।

इदानीमिति । वेदान्तश्रवणरूपसामग्रीसम्भवे इत्यर्थः । न हि चक्षुषा गन्धग्रहणाभावे सति गन्धाभावः ; सामग्र्यां सत्यां तत्पर्यन्तग्रहणात् । पूर्वं तत्तत्पदार्थमात्रपर्यन्तत्वग्रहणं सामग्रीवैकल्यात् । घ्राणेन गन्धग्रहणे सति चक्षुषा गन्धग्रहणाभावः, सामग्र्यभावात् ; न तु गन्धाभावात् इत्यवगम्यते हि इत्याशयः ।

नन्वेव------स्यात् इति । वेदान्तवाक्यानि व्युत्पत्तिनिरपेक्षाणि चेत्, अव्युत्पन्नस्यापि बोधजनकानि स्युः । व्युत्पत्तिसापेक्षाणि चेत्, अन्यपर्यन्ततया व्युत्पन्नस्य शब्दस्य तदन्यपर्यन्तत्वं व्युत्पत्तिविरुद्धम् ; व्युत्पत्तेः प्रत्यक्षसापेक्षत्वात् प्रत्यक्षविरुद्धं चेति न बोधयन्ति । यथा 'आदित्यो यूपः' इत्यादिवाक्यं प्रत्यक्षविरुद्धं यूपादित्यतादात्म्यं न बोधयितुमलम्, तद्वत् इत्यर्थः ।

सर्वे शब्दा इत्यादि । शब्दानां परमात्मपर्यन्तत्वं युक्तम् ; बाधकस्य अन्यथासिद्धत्वात् इत्यभिप्रायः । तत्र लौकिका इति । यथा नैल्यपीतिमादीनां द्रव्यपर्यन्तत्वग्रहणे नीलपीतादिशब्दव्युत्पत्तौ

---

1. द्वयोरपि -घ. 2. प्रवृत्तिरुक्ता -घ. 3.द्यत्वनिर्विकारत्व -ख. 4. करत्वजग -ख. 5. सर्वे पुरुषाः - घ 6.वाच्यैकदेशे वाचक -घ, वाच्य -ख.7. कतया - क,ख. 8.वाचक - घ.

नैवम् ; 'सर्वे शब्दाः' [1]अचिज्जीवविशिष्टस्य परमात्मनो[1] वाचकाः' इत्युक्तम् ; *'नामरूपे व्याकरवाणि' (छा.उ.6-3-2)* इत्यत्र । [2]तत्र लौकिकास्तु[2] पुरुषाः, शब्द [3]व्याहरन्तः[3]. शब्दवाच्ये [4]प्रधानांशस्य परमात्मनः[4]प्रत्यक्षाद्यपरिच्छेद्यत्वात्, वाच्यैकदेशभूते वाच्यसमाप्तिं मन्यन्ते । वेदान्तश्रवणेन [5]च[5] व्युत्पत्तिः पूर्यते । एवमेव वैदिकाः [6]शब्दाः सर्वे[6] परमात्मपर्यन्तान् स्वार्थान् बोधयन्ति ।।

[लौकिकानां वैदिकानां च शब्दानामेकता]

वैदिका एव सर्वे शब्दाः,[7]वेदादेव[7] उद्धृत्योद्धृत्य[8]परेणैव[8] ब्रह्मणा, सर्वपदार्थान् पूर्ववत् सृष्ट्वा, तेषु परमात्मपर्यन्तेषु पूर्ववत् नामतया प्रयुक्ताः । तदाह मनुः -

'सर्वेषां तु स [9]नामानि [9]कर्माणि च पृथक् पृथक् ।

[10]वेदशब्देभ्य एवादौ पृथक्संस्थाश्च[10] निर्ममे ।। (म.स्मृ.1-21)

इति । संस्थाः - संस्थानानि, रूपाणीति यावत् । आह च भगवान् पराशरः -

---

च तत्तद्वस्तुग्रहणम् अपेक्षितम् ; तथा तत्तत्पदार्थानां ब्रह्मपर्यन्तत्वग्रहणे तत्पर्यन्तशब्दव्युत्पत्तौ च ब्रह्मस्वरूपग्रहणम् अपेक्षितम् । तस्य च प्रत्यक्षाद्यगोचरत्वात्, तत्तद्वस्तुमात्रपर्यन्तग्रहण तत्तत्पर्यन्तव्युत्पत्तिश्च उभयम् अन्यथासिद्धम् इत्यर्थः । वेदान्तेति । व्युत्पत्या वेदान्तश्रवणम्, वेदान्त श्रवणेन व्युत्पत्तिरिति अन्योन्याश्रयः इत्यस्योत्तरमिदम् । एकदेशव्युत्पत्त्या वेदान्तश्रवणमुपपद्यते । वेदान्तश्रवणेन व्युत्पत्तिपूर्तिः ; न तु कार्त्स्न्येन आदितः प्रभृति व्युत्पत्तिः इति नाऽन्योन्याश्रयः इत्यर्थः ।

वैदिका एवेति । लौकिकशब्दानामपि वेदशब्दादुद्धृत्य तत्तद्वस्तुषु प्रयुक्तत्वात् सर्वे शब्दाः वैदिका एवेति सर्वे परमात्मपर्यन्ता एव इत्यर्थः । **संस्थाः** संस्थानानि इति (विवरण) स्थित्यर्थताव्यावृत्त्यर्थम् । आह चेति मनुपराशरयोः ऐककण्ठ्यं दर्शितम् । **श्रुतिश्चेति** । 'सूर्या चन्द्रमसौ' इति निर्देशेन नामकल्पनं च अर्थसिद्धम् इत्यभिप्रायात्, पूर्वोक्तोपबृंहणवचनानुगुण्याच्च, 'नामानि च पूर्ववच्चकार' इति व्याख्यातम् । शब्दाः सर्वे वैदिका एव, आनुपूर्वीभेदमात्रात् लौकिकत्वम्, तत एव लक्षणभेदश्च । तस्मात् सर्वे शब्दाः ब्रह्मपर्यन्ताः इति ।

---

1. अचिज्जीवविशिष्टपरमात्मनः -ख , अपि जीवविशिष्टपरमात्मनः - घ 2. अत्र लौकिकाः - घ. 3.व्यवहरन्तः -ख . 4. प्रधानांशस्यैव परमात्मनः-ख. प्रधानांशपरमात्मनः -घ. 5.हि -ख. 6. सर्वे शब्दाः - क,ग. 7. आदौ -ख. 8. परेण -घ. 9. नामानि कर्माणि विविधानि च - ग, नामानि - ख. 10. पृथक्संस्थाश्च - ख.

'नाम रूपं च भूतानां कृत्यानां च प्रपंचनम् ।
वेदशब्देभ्य एवादौ देवादीनां चकारः सः।। (वि.पु.1-5-63)

इति । श्रुतिश्च - *'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्'* (तै.आ.उ.1-44)
इति । सूर्यादीन् पूर्वयत् परिकल्प्य, नामानि च पूर्ववत् चकार - इत्यर्थः ।

[प्रकान्तविचारोपसंहारः]

एवं जगद्ब्रह्मणोः अनन्यत्वं प्रपंचितम् । तेन, एकेन ज्ञातेन[1] सर्वस्य ज्ञातता उपपादिता भवति । सर्वस्य ब्रह्मकार्यता[2] प्रतिपादनेन, '[3]तदात्मक[3]तयैव सत्यत्वं, नान्यथा' इति, '[4]तत्सत्यम्[4] (छा.उ.6-8-6) इत्युक्तम् । यथा दृष्टान्ते [5]सर्वस्य मृद्वि[5]कारस्य [6]मृदात्मनैव[6] सत्यत्वम् ।

एवम् - ब्रह्मण एव उपादानत्वनिमित्तत्वोपपादनेन । प्रपंचितम् - (विस्तरेण) उक्तम् । तेन - जगतः सत्यत्वेन । **उपपादितेति** । सत्यमिथ्यार्थयोः एकताप्रसंगाद्यभावात् इत्याशयः। **सर्वस्य इत्यादि** । 'तत्सत्यम्' इति वाक्ये 'ब्रह्मात्मकतयैव जगत् सत्यम्, स्वनिष्ठत्वमेव असत्यम्' इति, जगतः ब्रह्मात्मकत्वेन सत्यत्वोपपादनात्, महावाक्यस्वारस्यमपि जगत्सत्यत्वानुगुणम् इत्यर्थः । **यथेत्यादि** । दृष्टान्तस्य लोकदृष्टप्रकारेण कथनीयत्वात्, दृष्टान्तस्य च लोके सत्यत्वेन सम्प्रतिपन्नत्वात्, दार्ष्टान्तिकस्य च दृष्टान्तानुगुणत्वात्, 'तत्सत्यम्' इत्यादि-वाक्यान्यपि जगतः सत्यत्वपराणीति, महावाक्यस्वारस्यं । जगतः सत्यत्वानुगुणम्- इत्याशयः । **मृदिति** । मृत्पिण्डादिदृष्टान्तत्रयम्, तथा दार्ष्टान्तिकब्रह्मकारणत्वपराणि 'तत्तेजोऽसृजत' 'तदात्मानं स्वयमकुरुत' इत्यादिवाक्यान्यपि, परिणामानुगुणान्येव । न हि रज्जुसर्पदृष्टान्तः श्रूयते । 'व्यवर्तत, अभ्रमत्' इत्यादिकमपि पदं न श्रूयते । सूत्रे च 'परिणामात्' (ब्र.सू.1-4-27) 'आत्मकृतेः' (ब्र.सू.1-4-26) 'पटवच्च' (ब्र.सू.2-1-19) इत्यादि श्रूयते । न तु 'विवर्तात्' 'रज्जुसर्पवत्' इत्यादि इति भावः । एवं सद्विद्यायाः सविशेषपरत्वमुक्तम् । **शोधकवाक्यानां सविशेषपरत्वमुच्यते शोधक इत्यादिना । निरवद्यमिति** । सामान्यनिषेधः, विशेषोपस्थापके सति तत्र पर्यवस्यति ; 'छागो वा मन्त्रवर्णात्' (पू.मी.6-8-39) इति न्यायात् । तस्मात् 'अपहतपाप्मा' (छा.उ. 8-7-1) इत्यादिभिः हेयगुणानां निषिध्यमानत्वात्, गुणसामान्यनिषेधः तत्पर्यवसायी इति निरवद्यम् इति

---

1. ज्ञानेन - क,ग 2. ब्रह्मकार्यत्व - क, ग. 3. तदात्म - क,ग. 4. तदेव सत्यम् -घ 5. सर्वमृद्वि-घ 6. मृदात्मकतैव -घ .

[शोधकवाक्यानां निर्विशेषपरत्वनिरासः]

शोधकवाक्यान्यपि - निरवद्यं सर्वकल्याणगुणाकरं [1]परंब्रह्म[1] [2]शोधयन्ति[2] । सर्वप्रत्यनीका[3]कार[3]बोधनेऽपि, तत्तत्प्रत्यनी[4]कता[4]भेदस्य अवर्जनीयत्वात्, न निर्विशेष[5]त्वसिद्धिः[5] ।

[6]ननु[6] - 'ज्ञानमात्रं ब्रह्म' इति प्रतिपादिते, 'निर्विशेषज्ञानमात्रं ब्रह्म' इति निश्चीयते ।

नैवम्; स्वरूपनिरूपणधर्मशब्दा हि ! धर्ममुखेन [7]स्वरूपमपि[7] प्रतिपादयन्ति, गवादिशब्दवत् । [8]तथाऽऽह[8] सूत्रकारः -

---

पदस्याभिप्रायः । विशेषविधाने सति सामान्यनिषेधः तद्व्यतिरिक्तविषय एव ; यथा 'न हिंस्यात् सर्वा भूतानि' इति (हिंसा) सामान्यनिषेधः अग्नीषोमीय हिंसाव्यतिरिक्तविषयः । तस्मात्, 'सत्यकामः सत्यसंकल्पः' (छां.उ.8-7-1) इत्यादिभिः मंगलगुणविधाने सति, गुण-निषेधः तद्व्यतिरिक्तविषयः इति सर्वकल्याणगुणाकरम् इति पदस्याऽभिप्रायः । इति श्रौतस्य गुणनिषेधस्य द्विधा परिहारः कृतः । (सर्वप्रत्यनीकाकारबोधनेऽपीति । शोधकवाक्येन 'सत्यंज्ञानमनन्त'मित्यनेन सत्यत्वादेः न बोधः; अपि तु असत्यत्वादिविरोध्याकारस्यैव, इत्यंगीकारेऽपि इत्यर्थः।) अत्र 'अन्वयरूपार्थाभिधायिनः शब्दस्य व्यतिरेकमुखेन अर्थपरिकल्पनमयुक्तम्' इति 'अपि' शब्दस्याऽभिप्रायः । **अवर्जनीयत्वादिति** । (शौक्ल्यादेः कार्ष्ण्यव्यावृत्तिस्थले) शौक्ल्यस्य, कस्यचित् धर्मभूतत्वात्, स्वरूपमेव तत्र व्यावृत्तिः, ब्रह्म तु न कस्यचित् धर्मभूतम्; तस्मात् स्वरूपातिरेकेण (असत्यादि) व्यावृत्तिः अभ्युपगन्तव्येति भावः ।

ननु ---- निश्चीयत इति । न हि ज्ञानं ज्ञानाश्रयो भवति तस्मात् ज्ञानस्वरूपत्वप्रतिपादनेन गुणनिषेधः सिद्धः इत्यर्थः ।

तथाहेति । धर्मवाचिशब्दस्य धर्मिपर्यन्तत्वे लक्षणा स्यात् इति शंकापरिहाराय यावदात्मेति सूत्रमुदाहृतम् ।

---

1. परं ब्रह्मेव -घ बह्म - घ 2.बोधयन्ति - घ. 3.कारता - क,ग. 4. काकारतायां - क,ग,ठ काकार -घ. 5. वस्तुसिद्धिः - क,ग. 6. ननु च - क. ग. 7. स्वरूपं - घ. 8. तदाह -ग.

तद्गुण [1]सारत्वात्त [1]तद्व्यपदेशः [2]प्राज्ञवत्[2] (ब्र .सू.2-3-29)

'यावदात्मभावित्वाच्च न दोषः' (ब्र.सू.2-3-30) इति ।

[ब्रह्मणि ज्ञानधर्मकत्वासिद्धिशंका-परिहारौ]

ज्ञानेन[3]धर्मेण स्वरूपमपि[3] निरूपितम् ; [4]न तु[4] ज्ञानमात्रं ब्रह्म - इति [5]कथमिदम्[5] अवगम्यते ? - इति चेत्,

'यः सर्वज्ञः सर्ववित्' (मुण्ड.उ.2-2-7) **[6]इत्यादि[6] ज्ञातृत्वश्रुतेः ।**

'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे.उ.6-6-17)

'विज्ञातारमरे! केन विजानीयात् ?' (बृ.उ.4-4-14)

[7]इत्यादि[7] श्रुतिशतसमधिगत [8]मिदम[8] ; ज्ञानस्य धर्ममात्रत्वात्, धर्ममात्रस्यैकस्य [9]वस्तुत्व[9]प्रतिपादनानुपपत्तेश्च । अतः 'सत्यज्ञानादि' पदानि [10]स्वार्थभूतज्ञानादि[10] विशिष्टमेव ब्रह्म प्रतिपादयन्ति ।

ज्ञानेन ----- इति चेदिति । जातिगुणयोः गुणिपर्यन्तत्वस्य लोके प्रत्यक्षसिद्धत्वात्, तद्वाचिशब्दानां तत्पर्यन्तत्वमाश्रितम् । अत्र तु ज्ञानस्य धर्म्यन्तरनिष्ठत्वं कथम् ? इति चेत् - इत्यर्थः। स्वरूपं धर्मिस्वरूपम् । इतीदं कथमवगम्यते - इत्यन्वयः ।

पराऽस्य --- समधिगतमिदम् । ज्ञातृत्वश्रुतीनां भूयस्त्वात्, बहुस्वारस्यानुगुणं कतिपयश्रुतिर्नेया इत्यर्थः । 'द्वैधे बहूनां वचनम्' इति हि स्मृतिः । 'भूयसां स्याद्बलीयस्त्वम्' इति मीमांसकाः । **स्वाभाविकी** इति, श्रुत्या, ज्ञातृत्वादेः आविद्यकत्वादि च परिहृतं भवति । 'ज्ञान' शब्दस्य ज्ञातृपर्यन्तत्वे तु न कस्यचिन्नैरर्थक्यम् । 'ज्ञातृ शब्दस्य ज्ञानपरत्वे 'तृच्' प्रत्ययः निरर्थकः स्यात् इत्ययमर्थः अर्थसिद्ध इति न कण्ठोक्तः। **एकस्येति** । एकस्य धर्मिरहितस्य इत्यर्थः । ज्ञानस्य ज्ञानान्तराश्रयत्वे तु न श्रुतिविरोधः ।

---

1. सारत्वात् - ग. 2. प्राज्ञवत् इति, ज्ञानगुणसारत्वात् आत्मनः, 'ज्ञानम्' इति व्यपदेशः । 'यथा प्राज्ञेन' 'ब्रह्मणा विपश्चिता' ' यः सर्वज्ञः सर्ववित् इति सर्वज्ञे एव ज्ञानगुणसारत्वात्, 'सत्यं ज्ञानम्' इति व्यपदिश्यते ग. 3. धर्मेण स्वरूपं - ख. धर्मिस्वरूपं - घ. 4. न -घ. 5. कथमव - घ. 6. इति - ख. 7. इति - घ. 8. मिति - घ. 9. वस्तु - घ. 10. ज्ञानादि -घ.

'तत् त्वम्' इति [1]द्वयोरपि पदयो[1] स्वार्थप्रहाणेन निर्विशेषवस्तु-स्वरूपोपस्थापनपरत्वे, मुखयार्थपरित्यागश्च ।

[क्वचित् लक्षणायाः अदोषत्वशंका-तत्परिहारश्च]

[2]ऐक्यतात्पर्य[2] निश्चयात् न लक्षणा दोषः ; 'सोऽयं देवदत्तः' इतिवत् । यथा [3]'सोऽयम्'[3] इत्यत्र, [4]'सः' इति शब्देन[4] देशान्तर-[5]कालान्तरसम्बन्धी[5] पुरुषः प्रतीयते ; 'अयम्' [6]इति च, सन्निहितदेशवर्तमानकाल [6]सम्बन्धी । तयोः सामानाधिकरण्येन ऐक्यं प्रतीयते । तत्र एकस्य युगपत् विरुद्धदेशकाल-सम्बन्धि[7]तया प्रतीतिः[7] न घटते इति, [8]द्वयोरपि[8] पदयोः [9]स्वरूपमात्रो[9]-पस्थपानप[10]रत्वं, स्वरूपस्य च ऐक्यं[10] प्रतिपाद्यते - इति चेत्,

नैतदेवम् ; 'सोऽयं देवदत्तः' इत्यत्राऽपि लक्षणागन्धो न विद्यते ; विरोधा-भावात् । एकस्य भूतवर्तमान[11]क्रियाद्वय[11]सम्बन्धो न विरुद्धः ; देशन्तरस्थितिः भूता, सन्निहितदेशस्थितिः वर्तते - अतः भूतवर्तमानक्रियाद्वयसम्बन्धितया ऐक्यप्रतिपादनम् अविरुद्धम् । देशद्वयविरोधश्च कालभेदेन परिहृतः ।

लक्षणायामपि, न द्वयोरपि पदयोः लक्षणासमाश्रयणम् ; [12]एकेनैव[12]लक्षितेन विरोधपरिहारात् । लक्षणाभाव एवोक्तः ; देशान्तरसम्बन्धितया भूतस्यैव, अन्यदेश[13]सम्बन्धितया वर्त[13]मानत्वाविरोधात् ।

मुख्यार्थपरित्याग इति । लक्षणा स्यात् इत्यर्थः ।

ऐक्येत्यादि । तात्पर्यविरुद्धमुख्यवृत्तेरपि तात्पर्यानुगुणलक्षणा प्रबला इति चोद्याभिप्रायः। (**देशान्तरेति** । 'तदिति परोक्षे विजानीयात्' इत्युक्तेः । **सन्निहितेति** । 'इदम् प्रत्यक्षगतम्' इत्युक्तेः इत्यर्थः । **सामानाधिकरण्यम्** - एकाधिकरणवृत्तित्वम् । **स्वरूपमात्रम्** - केवलं धर्मि ।)

लक्षणागन्ध इति । अन्यतरपदस्यापि न लक्षणा, इत्यभिप्रायेण गन्धशब्दः । एकस्येति, विरोधाभावं विवृणोति ।

भूता - अतीतकालसम्बन्धिनी । **देशद्वयेति** । कालद्वयसम्बन्धविरोधे क्षणिकत्व

1.द्वयोः पदयोरपि - घ. 2. ऐक्ये तात्पर्य - क,ग, ननु ऐक्यतात्पर्य - घ. 3. सोऽयम् देवदत्तः -घ. 4. तच्छब्देन - ग. 5. सम्बन्धी -घ. 6. वर्तमानकालदेशसन्निहित - घ. 7. ताप्रतीतिः -घ. 8. तयोरपि -घ. 9. स्वरूपापे -घ. 10. परत्वात् स्वरूपैक्यं -घ. 11. क्रिया - घ.12. एकेनैव पदेन - घ. 13. वर्त - ख.

[सामानाधिकरण्यस्वरूपं स्वाभिमतार्थसिद्धिश्च]

एवम् - अत्राऽपि जगत्कारणभूतस्यैव [1]परस्य ब्रह्मणः[1], जीवान्तर्यामितया जीवात्म[2]त्वम्[2] अविरुद्धम् - इति प्रतिपादितम् । यथाभूतयोरेव हि द्वयोः ऐक्यं, सामानाधिकरण्येन प्रतीयते, तत्परित्यागेन स्वरूपमात्रैक्यं, न सामानाधि-[3]करण्यस्यार्थः[3] - *'भिन्नप्रवृत्तिनिमित्तानां शब्दानाम् एकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम्* (कै.वृ.) [4]इति हि[4] तद्विदः । [5]तथा भूतयोरेव[5] ऐक्यम्, [6]उपपादित[6]मस्माभिः ।

[परपक्षे उपक्रमविरोधः]

उपक्रमविरोध्युपसंहारवाक्य[7]तात्पर्य[8]निश्चयश्च[8] न घटते; [9]उपक्रमे हि![9] *तदैक्षत [10]'बहु स्यां प्रजायेय'[10] (छा.उ.6-2-3)* इत्यादिना, सत्य[11]संकल्पत्व जगदेकका[11]रणत्वमपि उक्तम् । तद्विरोधि च अविद्याश्रयत्वादि ब्रह्मणः ।

[शब्दस्य निर्विशेषवस्त्वसाधकत्वम्]

अपि च - अर्थभेदतत्संसर्गविशेष[12]बोधनकृत[12]पद-वाक्य[13]स्वरूपता[13]लब्ध-

---

प्रसंगात्, देशद्वयसम्बन्धाविरोधः इत्यर्थः । देशद्वयसम्बन्धविरोधे तीर्थयात्रादि-विधानानुपपत्तिश्चाभिप्रेता ।

जीवान्तर्यामितया जीवात्मत्वमिति । **जीवात्मत्वं** - जीवतादात्म्यम् , स्वरूपैक्ये शरीर-शरीरिभावे च साधारणमिति, तत् जीवान्तर्यामितया इति विशेषितम् । **यथाभूतयोः** - यद्विशेषणविशिष्टयोः । **तत्परित्यागेन** -तद्विशेषणपरित्यागेन । शब्दप्रतिपन्नविशेषणपरित्यागस्य सामानाधिकरण्यप्रतिपाद्यत्वे सति हि तदनुगुणलक्षणाबलीयस्त्वम् । यद्विशेषणं प्रवृत्तिनिमित्ततया अपेक्षितम्, तद्विशेषणपरित्यागे सामानाधिकरण्यस्य तात्पर्यमेव नास्ति; प्रत्युत सामानाधिकरण्या-पेक्षित एव विशेषणस्वीकारः । अतः तात्पर्यानुगुण्याभावात् लक्षणा न बलीयसी इत्यर्थः ।

भिन्नेति । विशेषणान्वयापेक्षा कुतः ? इत्यत्र (उत्तरमिदम्) । तथाभूतयोरिति । विशेषणपरित्यागरूप; अनुपपत्तिः न अस्मत्पक्षे (इत्याशयः) ।

तद्विरोधि चेति । एवं प्रकृतपरामर्शितच्छब्दावगतगुणगणबाधः, पदद्वयलक्षणा, सामानाधिकरण्यलक्षणहानिः, उपक्रमविरोधश्चेति चत्वारि दूषणान्युक्तानि ।

---

1. ब्रह्मणः - ख. 2. कत्यम् - घ. 3. करण्यार्थः - क.ग. 4. इति - ख.(पा) 5. तथाभूतयोः - घ.
6. प्रतिपादित - घ. सम्पादित - क.ग. 7. पदेन वाक्य - घ. 8. निश्चयः - घ. 9. उपक्रमेऽपि घ.
10. बहु स्यां - क. ग. 11. संकल्पत्य - जगदेकका - ख. संकल्पत्य-जगत्का - घ. 12. बोधकम - घ.
13. रूपता -घ, स्वरूपतया- घ.

प्रमाण [1]भावस्य शब्दस्य[1], निर्विशेषवस्तु [2]बोधना [2]सामर्थ्यात्, न निर्विशेष-वस्तुनि शब्दः प्रमाणम् ।

[निर्विशेषशब्दस्य गतिकल्पनम्]

[3]'निर्विशेषः' इत्यादि [3]शब्दास्तु, केनचिद्विशेषेण विशिष्टतया अवगतस्य वस्तुनः वस्त्वन्त [4]रावगत [4]विशेषनिषेधपरतया बोधकाः । इतरथा, [5]तेषामपि अन[5]वबोधकत्वमेव ; प्रकृति-प्रत्ययरूपेण पदस्यैव अनेकविशेष [6]गर्भितत्वात् [6]; अनेकपदार्थ [7]संसर्गबोधक [7]त्वाच्च वाक्यस्य ।

अपि चेति । अथ निर्विशेषवस्तुनि **प्रमाणाभाव उच्यते । अर्थभेदेति** । प्रकृति प्रत्ययार्थभेदबोधनकृतं पदत्वम् ; अनेकपदार्थसंसर्गविशेषबोधनकृतं वाक्यत्वम् इत्यर्थः । स्वरूपेति । न केवलं प्राबल्य-दौर्बल्यनिरूपणेन सविशेष-निर्विशेषनिश्चयः । स्वरूपसिद्धिरेव सविशेषविषयत्वेन इति भावः । **प्रमाणभावः** - प्रमितिजनकत्वम् ।

निर्विशेष --------- शब्दास्तु इति । न हि ! निर्विशेषशब्दः निर्विभक्तिकः पदान्तरानन्वितः, प्रमितिजनकः । किन्तु सविभक्तिकः पदान्तरान्वित एव प्रमितिजनकः । तस्मात्, विभक्ति-पदान्तरावगतविशेषा अपि निर्विशेषशब्देन न निषेध्याः । तस्मात् कतिपय-निषेधपरतया बोधकाः निर्विशेषादिशब्दा ; न कृत्स्ननिषेधपराः । तथा सति 'माता मे वन्ध्या' इतिवत् व्याहतिः स्यात् । तस्मात् निर्विशेषशब्दो न निर्विशेषवस्तुनि प्रमितिजनकः इत्यर्थः । **बोधकत्वम्**- प्रमितिजनकत्वम् । **प्रकृति-प्रत्ययेत्यादि** । प्रमिताप्रमितविकल्पः अतिदुःस्थः। तथा सति सर्वदर्शनेषु पूर्वपक्ष तन्निरासानुपपत्तेः । पूर्वपक्षस्तु प्रतीत एव न तु प्रमितः । प्रतीति-सिद्धत्वाच्च दूषणमपि युक्तम् इति चेत् । तर्हि अंगुल्यग्रेत्यादि (अंगुल्यग्रे करिशतम्' 'ननर्त सूच्यां करिणीसहस्रम्') वाक्यवत्, निर्विशेषशब्देन प्रतीतिर्जायते ; न तु प्रमितिः। तस्मात् निर्विशेषवस्तु प्रतीतं दूष्यमेव इत्यभिप्रायेण, न निर्विशेषवस्तुनि शब्दः प्रमाणमित्युक्तम् । निर्विशेष-वस्तुप्रतीतिजनकत्वं, न अस्माभिर्निषिध्यते ; प्रमितिजनकत्वमेव निषिध्यते । तस्मात् न प्रमिताप्रमित- विकल्पावकाशः । अतः निर्विशेषादिशब्दाः कतिपयविशेषनिषेधपराः। **कृत्स्ननिषेधपरत्वे** व्याघातादेव, न प्रमितिजन काः इत्यर्थः ।

---

1. भावस्य -घ. 2. प्रतिबोधना -- घ. प्रतिपादना-घ. 3. निर्विशेषेत्यादि -पा. 4. वस्त्वन्तरागत -घ. 5. त्वेतेषामनव-घ. तेषामनव - घ. 6. गर्भत्वात्-ख. 7. संसर्गबोधि- घ, संसर्गबोधि - घ.

[स्वयंप्रकाशस्य निर्विशेषस्य प्रमाणानपेक्षा]

अथ स्यात् - न अस्माभिः 'निर्विशेषे स्वयं[1]प्रकाशे वस्तुनि[1] शब्दः प्रमाणम्' [2]इत्युच्यते[2]; स्वतस्सिद्धस्य प्रमाणानपेक्षत्वात् । सर्वैः शब्दैः तदुपरा [3]गविशेषाः ज्ञातृत्वादयः सर्वे[3] [4]निवर्त्यन्ते[4] । [5]सर्वेषु[5] विशेषेषु निवृत्तेषु, वस्तुमात्रम् अनवच्छिन्नं स्वयंप्रकाशं [6]स्वत एव अवतिष्ठते[6]- इति,

[तन्निरासः]

नैतदेवम्; केन शब्देन तद्वस्तु निर्दिश्य, [7]तद्गताः विशेषाः[7] निरस्यन्ते? 'ज्ञप्तिमात्र' शब्देन - इति चेत् ।

[8]न; सोऽपि[8] सविशेषमेव वस्तु अवलम्बते; प्रकृति - प्रत्ययरूपेण [9]विशेषगर्भ[9] [10]त्वादेव[10] । *ज्ञा - अवबोधने* (पा.धा.1508) इति, सकर्मकः सकर्तृकः क्रियाविशेषः, क्रियान्तर[11]व्यावर्तक[11]स्वभावविशेषश्च, प्रकृत्या अवगम्यते । [12]प्रत्ययेन च लिंग[12]संख्यादयः ।

अथ स्यादित्यादि । एवं निर्विशेषवस्तुनः निष्प्रमाणकत्वमुक्तम् । स्वयंप्रकाशस्य वस्तुनः प्रमाणानपेक्षत्वात्, शब्दः भेदनिषेधपर एव इति (शंकाशयः) सर्वैः शब्दैः - वेदान्तादिरूपैः। अतः प्रमाणानपेक्षत्वेऽपि, न वेदान्तवैयर्थ्यम् तदुपरागविशेषाः - तदारोपितविशेषाः । अनवच्छिन्नम् -अवच्छेदकज्ञातृज्ञेयादिनिवृत्त्या, अनवच्छिन्नम् इत्यर्थः । स्वत एव - प्रमाणान्तरनिरपेक्षम् ।

केन शब्देनेति । वेदान्तेषु श्रूयमाणानां ब्रह्मवाचिपदानां निर्वाहार्थं, केनचित्पदेन ब्रह्मणो निर्देश्यत्वम् अभ्युपगन्तव्यम् । (अपि च) केनचित्पदेन ब्रह्म निर्दिश्य, विशेषाः निरसनीयाः । अनिर्दिश्य विशेषनिरसने, ब्रह्मणोऽपि स्वेतरव्यावृत्तत्वेन विशेषत्वात्, विशेषनिषेधे ब्रह्मापि निषिद्धं स्यात् इत्यभिप्रायः ।

ज्ञा इति । 'ज्ञप्तिमात्र'शब्दस्य प्रस्तुतत्वात् 'ज्ञा अवबोधने' इति धातुरुक्तः । इदं ब्रह्मवाचिसर्वपदानां प्रकृतिप्रत्ययविभागस्य प्रदर्शनार्थम् । क्रियाविशेष इति, धात्वर्थत्वात्,

---

1. प्रकाशवस्तुनि - घ. 2. उच्यते -घ. 3. विशेषाः - घ. 4. निरस्यन्ते - क.ग. 5. सर्वेष्वेव - घ 6. स्वयमेव तिष्ठति - घ. 7. विशेषाः - घ 8. सोऽपि - घ. 9. गर्भितत्वात् - ग. गर्भत्वात्तस्य - क. 11. व्यावृत्त -घ. 12. प्रत्ययेन - क ,ग.

स्वतस्सिद्धावपि, एतत्स्वभावविशेषविरहे, सिद्धिरेव न स्यात् । [1]अन्य साधनस्वभावतया हि ज्ञप्तेः स्वतस्सिद्धिरुच्यते ।

[निर्विशेषत्वे अविद्यातिरोधानाद्यनुपपत्तिः]

ब्रह्मस्वरूपं कृत्स्नं सर्वदा स्वयमेव प्रकाशते चेत् ! न तस्मिन् अन्यधर्माध्यासः सम्भवति । न हि ! रज्जुस्वरूपे [2]अवभासमाने, सर्पत्वादिः [2] अध्यस्यते । अत एव हि! भवद्भिः आच्छादिकाऽविद्या अभ्युपगम्यते । ततश्च शास्त्रीयनिवर्तकज्ञानस्य ब्रह्मणि तिरोहितांशो [3]विषयः[3] । अन्यथा, तस्य निवर्तकत्वं [4]च न[4] स्यात् । अधिष्ठानातिरेकिरज्जुत्व[5]प्रकाशनेन[5] हि ! सर्पत्वं बाध्यते ।

धर्म्यन्तरनिष्ठत्वाच्चोक्तम्; न तु स्पन्दात्मकत्वात् । क्रिया --- विशेषश्चेति । व्यावर्तकस्वभावः - स्वयंप्रकाशत्वम् । क्रियान्तराणि हि जडरूपाणि । लिंगेति । ज्ञान-ज्ञप्त्यादिशब्दानां लिंगस्य शब्दसाधुत्वमात्रार्थत्वेऽपि, देवेश्वर-पुरुषोत्तमादिशब्दानां लिंगस्य, अर्थवत्त्वात् लिंगसङ्ख्यादयः इत्युक्तम् ।

एतत्स्वभावविशेषविरहे - सकर्मकत्व-सकर्तृकत्वविरहे । सिद्धिरेव न स्यात् - प्रमाणमेव न स्यादित्यर्थः । अन्यसाधनेति । ज्ञातुः विषयव्यवहारहेतुतया हि ! स्वयंप्रकाशत्वं साधितम् इत्यर्थः । स्वसम्बन्धादर्थान्तरे तद्व्यवहारहेतुत्वं हि स्वयंप्रकाशत्वानुमानहेतुः ।

कृत्स्नम् - ज्ञातव्यावशेषरहितम् । न हीति । कृत्स्नावभासे अध्यासायोगात्, अनवभासमानांशः स्वीकार्यः इत्यर्थः । अत एव - अज्ञातांशसम्भवादेव । न हि ! आच्छाद्याभावे आच्छादनमुपपद्यते । तस्मात् अज्ञातांशः अभ्युपगन्तव्यः इत्यर्थः । ततश्चेत्यादि । न हि पुरोवर्तिमात्रविषयम् 'इदम्' इति ज्ञानं भ्रमनिवर्तकम्; अपि तु अज्ञातशुक्त्यंशविषयज्ञानमेव । तस्मात् ब्रह्मणि पूर्वमज्ञाताकारसम्भवे एव निवर्तकज्ञानस्य निवर्तकत्वम् इत्यर्थः ।

ब्रह्मविशेषणमिति , उपलक्षणत्वव्यावृत्त्यर्थम् । ज्ञाप्यत्वसिद्धये, ब्रह्मगता-

---

1. अनन्य - क,ग. 2. भासमाने सर्पादिः - घ. 3. विशेषः - घ. 4. न - घ. 5. प्रकाशेन - घ.

एकश्चेद्विशेषः ज्ञानमात्रे वस्तुनि शब्देना[1]भिधीयते, स च ब्रह्मविशेषणं भवतीति, सर्वश्रुतिप्रतिपादित [2]सर्वविशेषण[2]विशिष्टं ब्रह्म [3]भवति[3] । अतः प्रामाणिकानां न केनापि [4]प्रमाणेन[4] निर्विशेषवस्तुसिद्धिः ।

[निर्विकल्पकस्य निर्विशेषग्राहितानिरासः]

निर्विकल्पकप्रत्यक्षेऽपि सविशेषणमेव वस्तु प्रतीयते । अन्यथा, सविकल्पके 'सोऽयम्' इति [5]पूर्वावगतप्रकार[5]विशिष्टप्रतीत्यनुपपत्तेः । वस्तुसंस्थान-विशेषरूपत्वात् गोत्वादेः, निर्विकल्पकदशायामपि [6]ससंस्थानमेव[6] वस्तु, [7]'इत्थम्' इति[7] प्रतीयते । द्वितीयादि प्रत्यये[8]षु[8]तस्यैव संस्थानविशेषस्य, अनेकवस्तु-निष्ठतामात्रं प्रतीयते । संस्थानरूपप्रकाराख्यस्य पदार्थस्य अनेकवस्तु निष्ठतया, [9]अनेकवस्तु[9]विशेषणत्वं द्वितीयादि [10]प्रत्ययावगम्य[10]मिति, द्वितीयादि- [11]प्रत्ययाः[11] सविकल्पका इत्युच्यन्ते ।

ध्यासनिवर्तकत्वसिद्धये च 'विशेषणं'मित्युक्तम् । न हि ! अन्यगतधर्मज्ञानेन अन्यविषयभ्रमनिवृत्तिः; पुरोवर्तिगतशुक्तित्वधर्मज्ञानेनैव हि तद्गतरूप्यत्व-भ्रमनिवृत्तिः इत्यभिप्रायः ।

निर्विकल्पकेऽपि -------- प्रतीयत इति । न हि अनुवृत्तिजातिः ; अपि तु अनुवृत्तैव जातिः । 'अनुवृत्ता जातिः ; न अनुवृत्तिः' इति हि पंचिकाकारः । तस्मात्, अनुवृत्त्यग्रहणेऽपि 'इदम् इत्थम्' इति ग्रहणे इत्थमंशो गोत्वादिः गृहीत एव । अनेकव्यक्तिसम्बन्धरूपानुवृत्त्यग्रहणम्, अनेकव्यक्तिग्रहणरूपसामग्र्यभावात् । तस्मात्, निर्विकल्पकं सविशेषविषयम् इत्यर्थः निर्विकल्प-केऽपि गोत्वादि गृह्यते चेत् ! निर्विकल्पक सविकल्पकयोः को विशेषः ? कतिपयविशेषग्रहणं कतिपयविशेषाग्रहणं च उभयत्र तुल्यं इत्यत्राह **द्वितीयादि इति** । संस्कारसचिवत्व-तद्रहितत्वरूपसामग्रीभेदेन, अनुवृत्तिधर्मविशिष्टत्व-तद्रहितत्वरूपग्राह्यभेदेन च सविकल्पक-निर्विकल्पकयोः वैषम्यं - इत्यभिप्रायः ।

1.वस्तुशब्देना - घ. 2. विशेषण - घ, विशेष - घ. 3. भवतीति - घ. 4. प्रकारेण - ग. 5. पूर्वानुभूत - घ. पूर्वमनुभूत - घ. 6. संस्थानमेव-घ. 7. इत्थम् - घ. 8. प्रत्यक्षेषु - घ. 9. अनेक-घ. 10. प्रत्यक्षावगम्य - घ, प्रत्यक्षावगत - घ. 11. प्रत्यक्षाः -घ.

[भेदाभेदवादनिरासः]

अत एव - एकस्य पदार्थस्य भिन्नाभिन्न रूपेण[1] [2]विरुद्धं द्वयात्मकत्वं प्रत्युक्तम् । संस्थानस्य संस्थानिनः प्रकरतया [3]पदार्थान्तरत्वम्[3] । प्रकारत्वादेव पृथक्सिद्ध्यनर्हत्वम्, पृथगनुपलम्भश्चेति न द्वयात्मकत्वसिद्धिः ।

[वेदान्तवाक्यानां भेदनिरासपरत्वानुपपत्तिः]

अपि च - निर्विशेषवस्तुवादिना 'स्वयंप्रकाशे वस्तुनि तदुपरागविशेषाः सर्वे सर्वैः शब्दैर्निषिध्यन्ते' इति वदता, के ते शब्दाः निषेधकाः इति वक्तव्यम् ।

'*वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्*' (छा.उ.6-1-4) **इति, 'विकार-नामधेययोः वाचारम्भणमात्रत्वात्, यत् तत्र कारणं [5]तया[5] उपलक्ष्यते वस्तुमात्रं, तदेव सत्यम् ; अन्यत् असत्यम्' इति इयं श्रुतिर्वदति - इति चेत्,**

अत एव ------ प्रत्युक्तम् इति । एकस्य द्वयात्मकत्वं चेत्, न विरुद्धम् ; अपि तु भिन्नाभिन्नरूपेण द्वयात्मकत्वं विरुद्धम् इत्यर्थः । **संस्थानस्येति** । भेदाभेदे चत्वारो हेतवः - सहोपलम्भनियमः,सामानाधिकरण्यप्रत्ययः,एकशब्दानुविद्धप्रत्ययः,प्रथमपिण्डग्रहणे भेदकाकाराग्रहणात् अभेदप्रतिपत्तिश्च इति । एते परिहियन्ते (अनेन) । **प्रकारत्वादेव** - नियतप्रकारत्वात् इत्यर्थः । अपृथक्सिद्धधर्मत्वात् पृथक्प्रतिपत्त्यनर्हत्वम् इति यावत् । तत्कृतः पृथगनुपलम्भः । अपृथक्सिद्धत्वे सति, एकसामग्रीवेद्यत्वात् सहोपलम्भनियमः ; न त्वभेदात् । मत्वर्थीय प्रत्ययनिरपेक्षसामानाधिकरण्यमपि, अपृथक्सिद्धप्रकारत्वादेव उपपद्यते । एकशब्दानुविद्धप्रत्ययोऽपि, धर्म्यैकत्वात् ; न तु धर्म-धर्मिणोरैक्यात्, इति हेतुत्रयपरिहारः 'प्रकारत्वादेव' इत्यादिना अभिप्रेतः । प्रथमपिण्डग्रहणे भेदाग्रहः 'संस्थानस्य' इत्यादिना परिहृतः । प्रथमपिण्डग्रहणेऽपि 'इदम् इत्थम्' इति विशेषण विशेष्यभावेनैव ग्रहणात्, भेदो गृहीत एवेति । तदुपरागविशेषाः तदारोपितविशेषाः । इति वक्तव्यम् - इति चोद्ये उत्तरं वक्तव्यम् ; तत्तु अशक्यम् इत्यर्थः ।

वाचारम्भणमात्रत्वात् -वागालम्बनमात्रत्वात् व्यावहारिकमात्रत्वात् अपारमार्थिकत्वात् इत्यर्थः । **यत् तत्र ---- तदेवेति** । कार्येषु अनुवर्तमानं कारणं सन्मात्रं यद्वस्तु तदेवेत्यर्थः ।

1.रूपत्वात् - घ. 2. द्वयात्मकत्वं विरुद्धरै - क,ग. द्वयात्मकत्वं - घ. 3. पदार्थत्वम् -घ. 4. सर्वैः शब्दैः निषिध्यन्ते -ख , सर्वे शब्दैः निषिध्यन्ते - घ. शब्दैः सर्वैः निरस्यन्ते - क.ग. 5. तयैव -घ.

नैतदुपपद्यते ; 'एकस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवति' इति प्रतिज्ञाते, अन्यज्ञानेन अन्य[1]ज्ञाना[1]सम्भवं मन्वानस्य, एकमेव वस्तु विकाराद्यवस्थाविशेषेण पारमार्थिकेनैव नानारूपमवस्थितं चेत् ! तत्र एकस्मिन् विज्ञाते, तस्माद्विलक्षणसंस्थाना [2]न्तरमपि[2] [3]तदेवेति,[3] तत्र दृष्टान्तोऽयं निदर्शितः ।

[वाचारम्भणश्रुत्यर्थः]

नात्र कस्यचिद्विशेषस्य निषेधकः कोऽपि शब्दो दृश्यते । [4]वाचारम्भणमिति । वाचा[4] - व्यवहारेण, आरभ्यत इति आरम्भणम् । पिण्ड[5]रूपसंस्थितायाः[5] मृत्तिकायाः नाम चान्यत्, व्यवहारश्चान्यः । घट-शरावादिरूपेणावस्थितायाः तस्या एव मृत्तिकायाः अन्यानि [6]नामानि,[6] [7]व्यवहाराश्चान्यादृशाः[7] । तथापि [8]सर्वत्र मृत्तिका[8]द्रव्य[9]मेकमेव,[9] नानासंस्थाननानानामधेयाभ्यां नाना [10]व्यवहारेण च[10] आरभ्यत इति, 'एतदेव सत्यम्' इत्यनेन, अन्यज्ञानेन अन्यज्ञानसम्भवः निदर्शितः ; नात्र किंचिद्वस्तु निषिध्यत इति, पूर्वमेवायमर्थः प्रपंचितः ।

नैतदुपपद्यत इति । 'वाचारम्भणम्' इत्यादिवाक्यस्यार्थः पूर्वापरसंगातो वाच्यः; तच्च त्वन्मते नोपपद्यते इत्यर्थः । विकारः - कार्यावस्था । आदिशब्देन कारणावस्था विवक्षिता । नानारूपम् - नानावस्थम् ।

व्यवहारेणेति। प्रयोजनतया हेतुत्वम् इत्यर्थः। आरभ्यत इति। कर्मणि ल्युट् इत्यर्थः। पिण्डरूपेति । नामभेदात् कार्यभेदाच्च वैशेषिकोक्तम् आशंक्य (परिह्रियते अनेन) । (व्यवहाराः - जलाहरणादयः) ।

नाना -------- धेयाभ्यामिति । अन्वितमित्यर्थः । इत्थम्भावे तृतीया । कर्तरि वा । तदा, ताभ्याम् आरभ्यते, सम्बध्यते इत्यर्थः । र-लयोः अविशेषः प्रसिद्धः इत्यर्थः। 'आलम्भः स्पर्शहिंसयोः' इति नैघण्टुकाः । 'व्यवहारेण च' इति पाठे, नानासंस्थान-नानानामधेयव्यवहारैः इत्थम्भूतमिति वा, तैः सम्बध्यते इति वा अर्थः ।

(साध्यविकलः -साध्यतावच्छेदकविशिष्टवेषेण साध्यस्वरूपस्याभावः) । प्रमाणान्तरेण

---

1. ज्ञानस्या - घ. 2. विशिष्टमपि - घ. 3. तदेव वस्त्वति - क,ग. 4. वाचा - ख. 5. रूपेणावस्थितायाः -क,ग. 6. नामधेयानि -क,ग. 7. अन्ये एव व्यवहाराः - घ. 8. सर्वं मृत्तिका -घ. सर्वमृत्तिका - घ. 9. मेव -- घ. 10. व्यवहारेण - क,ग.

[अद्वैतिना मते मृद्दृष्टान्तवैघट्यम्]

अपि च, *'येनाश्रुत श्रुतम्'* (छा.उ.6-1-3)

इत्यादिना, ब्रह्माव्यतिरिक्तस्य सर्वस्य मिथ्यात्व प्रतिज्ञात चेत्,

'यथा सोम्यैकेन मृत्पिण्डेन' (छा.उ.6-1-4)

'इत्यादि[1] दृष्टान्तः साध्यविकलः स्यात्; रज्जुसर्पादिवत् मृत्तिकाविकारस्य घटशरावादेः असत्यत्व, श्वेतकेतोः शुश्रूषोः, प्रमाणान्तरेण युक्त्या च असिद्धमिति ।

[दृष्टान्ते साध्यवैकल्य परिहाराशंकातदसिद्धी]

एतदपि सिषाधयिषितम् - इति चेत्, 'यथा' इति [3]दृष्टान्ततया उपादान[3] न [4]घटते[4]। *[5]'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'* (छा.उ.6-2-1)

इत्यत्र[5], 'सदेव' 'एकमेव' इत्यवधारणद्वयेन, 'अद्वितीयम्' इत्यनेन च सन्मात्रातिरेकिसजातीयविजातीयाः सर्वे विशेषाः [6]निषिध्यन्ते[6] - इति प्रतीयते इति चेत्,

नैतदेवम्; कार्य - कारणभावावस्था द्वयावस्थितस्य [7]'एकस्य'[7] वस्तुनः, एकाव[8]स्थावस्थितस्य[8] [9]'ज्ञानेन'[9], अवस्थान्तरा[10]वस्थितस्यापि[10] वस्त्वैक्येन ज्ञातता दृष्टान्तेन दर्शयित्वा, श्वेतकेतोः [11]अप्रज्ञात[11] [12]सर्वस्य ब्रह्म[12]कारणत्व [13]च वक्तुम्[13] 'सदेव [14]सोम्येदम्'[14] इत्यारब्धम् ।

युक्त्या चेति । प्रत्यक्षेण बाधादर्शनात्, मिथ्यात्वासिद्धिः व्यावर्तमानत्वादियुक्तेः आभासत्वाच्च न मिथ्यात्वसिद्धिः इति भावः ।

सदेवेति । (अनेन) 'सदेव' इत्यादिवाक्यस्य भेदनिरासपरत्वमाशंक्य दूषयति । सर्वे इत्यनेन, स्वगतभेदाः विवक्षिताः; तेषामपि विजातीयभेदान्तर्गतत्वात् ।

नैतदेवमिति । दृष्टान्तवाक्यानुगुण एव दार्ष्टान्तिकवाक्यस्य अर्थो वर्णनीयः इत्यभिप्रायेण कार्यकारणेत्यादिना दृष्टान्तवाक्यस्य अर्थमनुवदति ।

---

1. इति - घ. 2. सर्पत्वादिवत् - घ. 3. दृष्टान्तोपादानं, दृष्टान्तत्वोपादानं, दृष्टान्तत्वापपादन् - घ. 4. घटते इति - घ. 5. इत्यत्र - पा. 6. निषिद्धाः - क,ग. 7.एकस्यैव -घ. 8. स्थितस्य - घ, स्थस्य - ख. 9. ज्ञानेनैव - घ. 10. स्थितस्य - घ. 11. अप्रतिज्ञातं - घ. अपिज्ञातं - घ. 12. ब्रह्म - घ. 13. वक्तुम् -ख. 14. सोम्य - घ.

इदम्, अग्रे, सदेव, आसीत् इति, 'अग्रे' इति कालविशेषः, 'इदं' शब्दवाच्यस्य प्रपंचस्य सदापत्तिरूपा क्रिया, सद्द्रव्यता च वदति । 'एकमेव' इति च, अस्य नाना [1]नामरूप[1]विकारप्रहाणम् ।

[ब्रह्मणो जगदुपादाननिमित्तत्वसिद्धिः]

एतस्मिन् [2]प्रतिपादिते, [2] अस्य जगतः सदुपादानता प्रतिपादिता भवति । अन्यत्र उपादानकारणस्य स्वव्यतिरिक्ताधिष्ठात्रपेक्षादर्शनेऽपि, सर्वविलक्षणत्वात् अस्य सर्वज्ञस्य [3]ब्रह्मणः [3], सर्वशक्तियोगो न [4]विरुद्ध[4] इति, 'अद्वितीयपदं अधिष्ठात्रन्तरं [5]निवारयति[5] ।

सर्वशक्तियुक्तत्वादेव ब्रह्मणः, काश्चन श्रुतयः, प्रथमम् उपादानकारणत्वं प्रतिपाद्य, 'निमित्तकारणमपि तदेव' इति प्रतिपादयन्ति ; यथा इयं श्रुतिः ।

[6]अन्याश्च [6] श्रुतयः, ब्रह्मणः निमित्त[7]कारणताम्[7] अनुज्ञाय, [8]तस्य[8] उपादानतादि कथम्? इति परिचोद्य, 'सर्वशक्तियुक्तत्वात्, उपादानकारण

इदम् इत्यादिना, तत्तत्पदोपस्थापितानेकविशेषान् दर्शयितुं विशेषोपस्थापकानि पदान्युपादत्ते । न अयमन्वयक्रमः ; 'सदेव इदम् अग्रे एकमेव आसीत्' इति हि ! अन्वयः । तस्मात् फलितान् विशेषान् वक्तुं तदुपस्थापकानि पदान्युपात्तानि । अग्रे इति इत्यादिना, उपस्थापितान् विशेषानाह । 'सदापत्तिरूपा क्रियाम्' इत्यनेन, 'आसीत्' इति पदस्यार्थ उक्तः। सद्द्रव्यता च इति,'सत्' शब्दार्थमाह । एकमेवेति, सदेव चेत् को विशेषः? (इत्यत्रोत्तरमिदम् ।

एतस्मिन् प्रतिपादिते - विभक्तनामरूपत्वेन भविष्यतः, अविभक्तनामरूपत्वे प्रतिपादिते । 'भाव्यवस्थावतः प्रागवस्थायोगः उपादानत्वम्' इति लक्षणात् उपादानत्वम् उपपादितं भवति इत्यर्थः। अन्यत्रेत्यादिना अद्वितीयपदं व्याचष्टे । सर्वेति । विलक्षणधर्मित्वात् विलक्षणधर्मयोगः उपपन्नः ; यथा-जलादिविलक्षणधर्मित्वात् अग्नेः उष्णत्वधर्मयोगः इत्यर्थः।

सर्वशक्तियुक्तत्वादेव इत्यादिग्रन्थे, 'असद्वा इदमग्र आसीत्, ततो वै सदजायत, तदात्मानं स्वयमकुरुत' (तै.उ.आन. 7-1) इत्यादिवाक्यं हृदि निहितम् ।

'किं स्विद्वनम्' इत्यादिवाक्यकटाक्षेण अन्याश्च इति । निमित्तकारणतामनुज्ञाय इति,

---

1. रूप - घ. 2. उप -ग. 3. ब्रह्मण एव -घ. 4. विरुध्यते -घ. 5. वारयति - क,ग. 6. तथा अन्याश्च - घ. 7. कारणत्वम् - क,ग. 8. अस्यैव - क,ग.

तदितराशेषोपकरणं च ब्रह्मैव' इति परिहरन्ति ।

किंस्विद्वनं क उ स वृक्ष आसीत्, यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदुतत्, यदध्यतिष्टद्भुवनानि धारयन्'।।

(तै.ब्रा.2-8-9-15)

ब्रह्म वनं ब्रह्म स वृक्ष आसीत्, यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा विब्रवीमि वः, ब्रह्माध्यतिष्ठद्भुवनानि धारयन्' ।।

(तै.ब्रा.2-8-9-15) इति

सामान्यतःदृष्टेन विरोधमाशङ्क्य, ब्रह्मणः सर्वविलक्षणत्वेनपरिहारःउक्तः ।

[सदेवेति कारणवाक्यस्यापि सविशेषप्रतिपादिकता]

अतः,

'सदेव सोम्येदमग्र आसीत्' (छा. उ.6 -2-1)

इत्यत्रापि, 'अग्रे' इत्याद्यनेकविशेषाः[1] ब्रह्मणः प्रतिपादिताः[2] । भवदभिमत-विशेषनिषेधवाची कोऽपि[3] शब्दः न दृश्यते[4] ।

प्रत्युत जगद्ब्रह्मणोः कार्य - कारणभावज्ञापनाय, 'अग्रे' इति

'यदध्यधिष्ठद्भुवनानि धारयन्' इत्यस्यार्थोऽभिप्रेतः । अयमर्थः - जगदुपक्रमेण ब्रह्म प्रतिपादयन्त्यः श्रुतयः, उपादानत्वपूर्वकं, निमित्ततां वदन्ति । ब्रह्मोपक्रमेण तत्प्रतिपादयन्त्यः श्रुतयः, ब्रह्मणः चेतनत्वेन, निमित्तत्वपूर्वकम् उपादानतां वदन्ति इति ।

किंस्विदित्यादि । 'वनं' शब्देन, अधिकरणकारकं विवक्षितम् । 'वृक्ष' शब्देन, उपादानम् । निष्टतक्षुः इति बहुवचने न तात्पर्यम्; *'अदितिः पाशान्'* (पू.मी.9-3-4) इतिवत् । हे मनीषिणः ! किं यूयम् एवं पृच्छत ? इत्यर्थः । यदध्यतिष्ठत् इति, निमित्तत्वस्य सम्प्रतिपन्नत्वात्, तदनुवादः । अधिकरणम्, उपादानम्, व्यतिरिक्तसकलकारणवर्गश्च ब्रह्मैव, इत्युत्तरमाह 'ब्रह्म वनम्' इति । अधिकरणकारकं सकलकारकोपलक्षणार्थम् । सामान्यतः इत्यनेन, ब्रह्मण एव सर्वविधकारणत्वोपपादने प्रयोजनमाह ।

अत इति । तस्मात् 'सदेव' इत्यादिवाक्यस्य अस्मदुक्त एवार्थः (इत्याशयः) ।

प्रत्युतेति । (अनेन 'अग्र इत्यादि') इति आदिशब्दोक्तान् विशेषान् वदन्,

---

1. विशेषणाः - घ. 2. पादिता भवन्ति - घ. 3. विशेषनिषेधवाचकः कोऽपि - क, निर्विशेषवाचकः - घ. 4. विद्यते - घ. 5. कारणत्व - घ.

कालविशेषसद्भावः । 'आसीत्' [2]इति[1], क्रियाविशेषः, जगदुपा[2]दानता[2], जगन्निमित्तता, च । निमित्तोपादनयोर्भेद [3]निरसनेन, तस्यैव[3] ब्रह्मणः सर्वशक्तियोगश्चेति, अप्रज्ञाताः सहस्रशो [4]विशेषा एव[4] प्रतिपादिताः ।

यतः वास्तवकार्य - कारण[5]भावादिज्ञापने[5] [6]प्रवृत्तमिदम्[6], अत एव, *'असदेवेदमग्र आसीत्'* (छा.उ.6-2-1)

इत्यारभ्य, असत्कार्यवादनिषेधश्च क्रियते -

'कुतस्तु खलु सोम्यैव स्यात्' (छा.उ.6-2-2)

इति । *प्रागसत* उत्पत्तिः, अहेतुका इत्यर्थः । तदेवोपपादयति -

'कथमसतः सज्जायेत' (छा.उ.6-2-2)

'विशेषाणामनुवादः निषेधार्थं स्यात्' इति शंकां परिहरति । **अप्रज्ञाताः इत्यनेन**, 'निषेधार्थम् अनुवादः' इत्येतत्परिहृतम् ।

(कार्यकारणभावादि इति) आदिशब्दात्, अनुप्रवेशादयः । **इदम्** - सद्विद्या-प्रकरणम् । कार्यकारणभावस्य अपारमार्थ्ये, असत्कार्यवादनिषेधोऽनुपपन्नः ; सत्त्वं हि पारमार्थ्यम् । कार्यम् अपरमार्थभूत चेत्, तस्य सत्त्वप्रतिपादन विरुद्धम् । तस्मात्, असत्कार्यवादनिरासः सत्यत्वपक्षे एवोपपन्नः इत्यर्थः । 'असदेवेदम्' इति वाक्यं माध्यमिकप्रतिक्षेपपरमिति, क्षणिकवादनिरासपरमिति च यत् शंकर भास्कराभ्यां व्याख्यातम्, तदुभयमनुपपन्नम् ; अग्र शब्दाभिधेये कालविशेषे असत्त्वप्रतीतेः । **इत्यारभ्येति**, उपक्रमानुगुण्यमभिप्रेत्योक्तम् । कार्यासत्त्वपरपरमतोपन्यासवाक्य- स्वारस्यानुगुण्यात्, एकविज्ञानेन सर्वविज्ञानरूपप्रतिज्ञातार्थोपपादनस्य अन्तरंगत्वेनापेक्षितत्वाच्च, वैशेषिकमतमेवात्र निरसनीयम् । एतन्निरासे, शून्यवादादिनिरासश्च अर्थसिद्धः (इति) ।

अहेतुका इति, हेतुशब्दः आश्रये पर्यवस्यति ; आश्रयस्यापि हेतुत्वात् । 'उत्पत्तिर्नाम सतो द्रव्यस्य अवस्थान्तरयोगः' इति 'वाचारम्भणम्' इत्यादि वाक्येन हि उपपादितम् इति, तदुपजीव्य, 'कुतस्तु' इत्यादिवाक्येन असत्कार्यवादो निरस्यते । उत्पत्तिर्नाम अवस्थाविशेषः ; तदाश्रयभूतं द्रव्यं पूर्वम् असच्चेत्, उत्पत्त्याख्या अवस्था निराश्रया कथं भवति? इत्यर्थः । **कुतः** - (कस्मात्) आश्रयरूपात् हेतोः, **एव स्यात्** - उत्पत्त्यवस्था स्यात्, इति श्रुत्यक्षरार्थः । **तदेवोपपादयतीति**।

---

1. इति च - क,ग. 2. दानता च -घ. 3. निरासेन तस्य - घ. 4. विशेषाः - ख. 5. भावापादनेन 6.प्रवृत्त - ख. प्रवृत्तमिदं शास्त्रम् -घ.

इति । असत उत्पन्नम्, असदात्मकमेव भवति इत्यर्थः ; यथा मृद उत्पन्न घटादिकं मृदा[1]त्मकम्[1] । सत उत्पत्तिर्नाम-व्यवहारविशेषहेतुभूतः अवस्थाविशेषयोगः ।

[असत्कार्यवादे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा वैघट्यम्]

एतदुक्तं भवति - एकमेव कारणभूतं द्रव्यम्,[2] अवस्थान्तरयोगेन कार्यमित्युच्यत इति, एकविज्ञानेन सर्वविज्ञानं प्रतिपिपादयिषितम् । तत्, असत्कार्यवादे न सेत्स्यति । तथा हि ; निमित्तसमवाय्यसमवायिप्रभृतिभिः [3]कारणैः[3], अवयव्याख्यं कार्यं द्रव्यान्तरमेव[4]आरभ्यत[4] इति, कारणभूताद्वस्तुनः, कार्यस्य वस्त्वन्तरत्वात्, [5]न तज्ज्ञानेन[5] [6]अस्य[6] ज्ञातता कथमपि [7]सम्भवति[7] - इति ।

कथम् अवयवि द्रव्यान्तरं निरस्यते ? - इति चेत्,

निराश्रयावस्थास्वीकारे बाधकं दर्शयतीत्यर्थः । असत इति । असत् कथं सत् जायेत ? इत्यर्थः । 'मृदेव घटो जायते' इत्यर्थे सत्यपि, 'मृत्तिकायाः घटो जायते' इतिवत्, अयं निर्देशः । कार्यकारणयोः अनन्यत्वं प्रागुपपादितं मन्यानेन एवं निर्दिष्टम् । इह (सज्जायतेत्यत्र) सच्छब्दः जगदवस्थाविशिष्टपरः । विशेष्यं वस्तु पूर्वम् असच्चेत्, विशेषणभूतजगत्त्वावस्थाया अपि असत्त्वात्, विशिष्टमपि असत् स्यात् इत्यर्थः । सत चेत्, कथम् उत्पत्तिरुपपद्यते ? इत्यत्र ' सतः उत्पत्तिः नाम '...इत्यादिकं उत्तरम् ।

अत्र वैशेषिकमतनिरासः किमर्थं क्रियते ? क्षणिकवादनिरास एव स्यात् - इति शंकायां हेत्वन्तरमाह एददुक्तमिति । असत्कार्यवादः कीदृशः? तस्मिन् सति प्रतिज्ञातार्थासिद्धिः कथम् ? इत्यत्राह तथाहीति । । प्रभृतिशब्देन तद् व्यतिरिक्तकारणमुच्यते ; दण्डचक्रादेरपि निमित्तत्वेऽपि, निमित्तशब्दस्य अधिष्ठातरि प्रसिद्धिप्राचुर्यात् । अवयव्याख्यामिति । अवयवाः बहवः अल्पपरिमाणाः । अवयवि एकं बृहत्परिमाणमिति । अनेन संख्याभेदपरिमाणभेदादिद्रव्यान्तरत्वसाधकहेतवो विवक्षिताः । अस्य कार्यस्य । कथमपीति । अवस्थातः द्रव्यतश्च ज्ञातता न सम्भवतीत्यर्थः।

---

1. कमेव - घ. 2. भूतद्रव्यम् - क. 3. कारणैरेव - घ. 4. उत्पाद्यत -ग 5. न तज्ज्ञानेन , तज्ज्ञानेन 6. अन्यस्य - घ. अस्य- क,ग. 7. न सम्भवति - क.ग.

कारणगतावस्था न्तरयोगस्य द्रव्यान्तरोत्पत्तिवादिनस्सम्प्रति पन्नस्यैव[1], एकत्व-नामान्तरव्यव[2]हारान्तरा[3]देः उपपादकत्वात्, द्रव्यान्तरादर्शनाच्च इति, कारणमेव अवस्थान्तरापन्नं, कार्यमित्युच्यते - इत्युक्तम् ।

[प्रकरणस्य शून्यवादनिरासपरत्वासम्भवः]

ननु-निरधिष्ठानभ्रमासम्भवज्ञापनाय, असत्कार्यवादनिरासः क्रियते । तथा हि ; 'एकं चिद्रूपं सत्यमेव [4]अविद्याशबलितं,[4] जगद्रूपेण [5]विवर्तते[5] इति, अविद्याश्रयत्वाय, मूलकारणं सत्यमित्यभ्युपगन्तव्यम्'-इत्यसत्कार्यवादनिरासः।

सम्प्रतिपन्नस्यैवेति । असमवायिकारणत्वेन सम्प्रतिपन्नस्येत्यर्थः । द्रव्यान्तराभ्युपगतिः, न दर्शनात् । कल्पकाः बुद्धिशब्दकार्यान्तरादयस्तु 'आस्ते, शेते, गच्छति, तिष्टति, एकोऽयं समाजः' इत्यादिषु बुद्धिशब्दान्तरादेः अवस्थाविशेषहेतुकत्वदर्शनात् अवस्थाविशेषेणाऽन्यथासिद्धाः । (यथैव) 'आस्ते, शेते' इत्यादिषु एव मृद्घटादिष्वपि, द्रव्यप्रत्यभिज्ञया बुद्धिशब्दान्तरादेः अवस्थाभेदहेतुकत्वं ज्ञायते इत्यर्थः । द्रव्यान्तरादर्शनाच्च निरस्यते इत्यन्वयः । इतीति । तस्मात् इत्यर्थः।

निरधिष्ठानेति, निरधिष्ठानभ्रमवादोऽयं सर्वशून्यवादिनः बौद्धस्य । स्वप्नादिनिदर्शनेन मिथ्यात्वं जगतो वदन् सः जगद्भ्रमस्य अधिष्ठानतयापि न किंचित् सत्यं अनुमन्यते । निरधिष्ठानैव भ्रमपरंपरेति तद्वादः । रज्जुसर्पादिभ्रमस्थले आश्रयः रज्जुः अधिष्ठानमिति, तत्र कल्पितं सर्पभूदलनादिकं अध्यस्तमिति च व्यवहारः । कल्पिताध्यस्तसर्पादिवत् अधिष्ठानस्यापि मिथ्यात्वमेवेति तन्मतम् । अयमपि असत्कार्यवाद एव । कारणस्यापि मिथ्यात्वं अत्र विशेषः । तन्निरासाय अधिष्ठानब्रह्मपारमार्थ्यसाधनाय च प्रवृत्तमेतत् प्रकरणमिति शांकरव्याख्या । तदनूद्य नैतदेवमिति उपरि भाष्यकारैः प्रत्याख्यायते - इति प्रघट्टकस्य भावः । एकशब्देन सजातीयादिभेदनिषेधः । सत्यमेव इति, 'एव' कारेण, अधिष्ठानापारमार्थ्यव्यावृत्तिः । अधिष्ठानापारमार्थ्ये, तस्याप्यपरमार्थत्वात् अधिष्ठानान्तरापेक्षा इत्यनवस्था स्यात् । तस्मात् अधिष्ठानं सत्यम् इत्यभिप्रायः ।

1.पन्नस्य 2. नामा -घ. 3. रादेः -ख. 4. शबलं - ख. च्छादितं - क,ग, 5. वर्तत - घ.

नैतदेवम् ; एकविज्ञानेन सर्वविज्ञानप्रतिज्ञादृष्टान्त मुखेन सत्कार्यवादस्यैव [1]प्रसक्त[1]त्वात्-इत्युक्तम् ; भवत्पक्षे निरधिष्ठान[2]भ्रमासम्भवस्य[2] दुरुपपाद[3]त्वाच्च[3]।

यस्य हि चेतनगतो दोषः[4] पारमार्थिकः, दोषाश्रयत्वं च पारमार्थिकम् ; तस्य पारमार्थिकदोषेण युक्तस्य[5] अपारमार्थिकगन्धर्वनगरादिदर्शनम् उपपन्नम् । यस्य तु दोषश्च अपारमार्थिकः, दोषाश्रयत्वं च अपारमार्थिकम्, तस्य अपारमार्थिकेनाप्याश्रयेण तदुपपन्नमिति, भवत्पक्षे न निरधिष्ठानभ्रमासम्भवः ।

[शोधकवाक्यानां निर्विशेषपरत्वनिरासः]

[6]शोधक वाक्येष्वपि[6] -

'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ.आन.1-1)

[7]'आनन्दो ब्रह्म' (तै.उ.भृ. 6-1)

इत्यादिषु[7], सामानाधिकरण्यव्युत्पत्तिसिद्धानेकगुणविशिष्टैकार्था[8]भिधानम्[8] अविरुद्धमिति, 'सर्वगुणविशिष्टं ब्रह्म अभिधीयते' इति पूर्वमेवोक्तम् ।

प्रसक्तत्वादिति । प्रतिज्ञा-दृष्टान्ताभ्यां सत्कार्यवादस्य प्रस्तुतत्वात्, तदुपयोगित्वेन असत्कार्यवादनिरासः क्रियते ; न तु निरधिष्ठानभ्रमासम्भवज्ञापनाय इत्यर्थः । भवत्पक्षे इति, हेत्वन्तरम् ।

यस्य हि इति, तदेवोपपादयति । यस्य मते इत्यर्थः । **दोषाश्रयत्वम्** - दोषसम्बन्धः। **तस्य** - तस्य मते, इत्यर्थः । अधिष्ठानापारमार्थ्ये भ्रमासम्भवः, दर्शनाच्चेत् । दोष-दोषाश्रयत्वादेरपि अपारमार्थिकत्वे न क्वचित् भ्रमो दृष्ट इति, दोषादेरपि पारमार्थ्यमभ्युपगम्यं स्यात् । युक्त्या अधिष्ठानापारमार्थ्ये तस्यापि अधिष्ठानान्तरापत्तिरिति एवं अनवस्थाप्रसंगरूपतया अधिष्ठानस्य पारमार्थ्यं कल्प्यते चेत्, तर्हि दोषस्य अपारमार्थ्ये दोषान्तरापेक्षत्वेन अनवस्थाप्रसंगात्, तस्यापि पारमार्थ्यं स्यात् । ------- एवं भवत्पक्षे निरधिष्ठानभ्रमासम्भवस्य दुरुपपादत्वात्, तज्ज्ञापनाय असत्कार्यवादनिरासः अनुपपन्न इत्यर्थः ।

शोधकेष्वपीति । (अनेन) परैः निर्विशेषपरत्वेन यानि श्रुतिवाक्यान्युक्तानि, तेषां सर्वेषां भेदनिषेधपरत्वमपि निरसनीयम् । अतः सद्विद्यानन्तरम् शोधकवाक्यानां भेदनिषेधपरत्वं व्युदस्यते ।

---

1. प्रतिपन्न - घ. 2. भ्रमस्य - घ. 3. त्वात् - घ. 4. गतदोषः - क, ग. 5. दोषयुक्तस्य - घ. 6. एतच्छोधक - ग, शोधकेष्वपि -ख. 7. इत्यादिषु -घ. 8. र्थावबोधनम् - ग.

['नेति नेति' श्रुत्यर्थविचारः]

'अथात आदेशो नेति नेति' (बृ.उ.4-3-6)

इति बहुधा[1] निषेधो दृश्यते। इति चेत्,

किमत्र निषिध्येत? इति वक्तव्यम्।

'द्वे वाव ब्रह्मणो रूपे मूर्तं [2]चैवामूर्तं[2] च' (बृ.उ.4-3-1)

इति, मूर्तामूर्तात्मकः प्रपंचः [3]सर्वोऽपि[3] निषिध्यते - इति चेत्,

ब्रह्मणो रूपतया अप्रज्ञातं सर्वं रूपतया उपदिश्य, पुनस्तदेव निषेद्धुमयुक्तम्; 'प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं [4]वरम्' इति न्यायात्।

कस्तर्हि निषेध [5]वाक्यार्थः[5]?

सूत्रकारः स्वयमेव वदति -

'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः' (ब्र.सू.3-2-1) इति।

उत्तरत्र,

'अथ नामधेयं सत्यस्य सत्यमिति, प्राणा वै सत्यं, तेषामेष सत्यम्' (बृ.उ.4-3-6)

किमत्र इति। सद्विद्यादिषु भेदनिषेधपरत्वम् आक्षेपलभ्यमिति, निषेधकण्ठोक्तिमद्वाक्यमिदम्। किमत्र इति 'किं' शब्दः, क्षेपार्थः; प्रमाणान्तरागोचरस्य विहितस्य निषेधायोगात्। न किंचिदपि निषेद्धुं शक्यम् इति भावः।

अप्रज्ञातमिति। ('द्वे वाव' इत्यादि) निषेधार्थमनुवादः इतिवक्तुं न शक्यते; (तयोः) ब्रह्मणो रूपत्वेन अप्रज्ञातत्वात्। तस्माद्विधीयत एवेति, विहितस्य निषेधो नोपपद्यते। तथा सति वेदस्य विप्रलम्भकत्वेन, निषेधवाक्यमपि अप्रमाणं भवेत्, इत्यर्थः। एतदनुगुणन्यायप्रतिपादकं पुराणवचनं प्रक्षालनाद्धीति। यथा, पंकोपलेपन-तत्क्षालनादपि, तदस्पर्शो वरम्, तथा अपूर्व-भ्रमान्तरारोपण तन्निषेधादेरपि मौनमेव वरम्। (एतदर्थस्य) आयासस्य अप्रयोजनत्वात्, शास्त्रस्य प्रयोजनपर्यवसायित्वं न स्यादिति, बुभुत्सितग्राह्यं शास्त्रम् अनारम्भणीयं स्यात्, इति भावः।

उत्तरेत्यनेन शब्देन, सौत्रं 'ततः' इति पदं व्याख्यातम्। भूयः - बहुतरम् इत्यर्थः। तदभिप्रेत्य, गुणगणस्य इत्युक्तम्। सत्यस्य सत्यमिति। स्वरूपान्यथाभाव-रूपविकारास्पदाचिद्व्यावृत्त्या, 'सत्य' शब्दवाच्यः, जीवः। तस्य धर्मान्यथाभावरूपविकारोऽस्ति; स्वरूपतः धर्मतश्च अविकारः परमात्मेति, तदुभय (विकार) व्यावृत्त्या परमात्मा, 'सत्यस्य सत्यम्'

---

1. इति - ख. 2. चामूर्तमेव च - क,ग. 3. सर्वो - ख. 4. क्षमम् - ख. 5. वाक्यस्यार्थः - घ.

[1]इत्यादिना[1] गुणगणस्य प्रतिपादितत्वात्, पूर्वप्रकृतैतावन्मात्र न भवति ब्रह्म इति [2]ब्रह्मणः ताव [2]न्मात्रता प्रतिषिध्यते - इति [3]सूत्रस्यार्थः[3]।

[नेह नाना' इति श्रुत्यर्थः]

'नेह नानाऽस्ति किंचन' (बृ.उ.6-4-19)

इत्यादिना, नानात्वप्रतिषेध [4]एव दृश्यते[4] - इति चेत्,

अत्रापि, उत्तरत्र - *'सर्वस्य वशी सर्वस्येशानः'* (बृ. उ.6-4-22)

इति सत्यसंकल्पत्व-सर्वेश्वरत्वप्रतिपादनात्, चेतनाचेतन [5]वस्तु[5]शरीर-ईश्वर इति, सर्वप्रकारसंस्थितः सर्वेश्वरः स [6]एक एवेति,[6] [7]तत्प्रत्यनीकाब्रह्मा [7]त्मक-नानात्व प्रतिषिद्धम् ; न भवदभिमतम् ।

सर्वासु एवम्प्रकारासु श्रुतिषु इयमेव [8]स्थितिरिति,[8] न क्वचिदपि ब्रह्मणः सविशेषत्वनिषेधवाची कोऽपि शब्दो दृश्यते ।

इत्युच्यते इत्यर्थः । एताव -----ब्रह्मेतीति । गुणविशिष्टं ब्रह्म एतावन्न भवति , एतावद्गुणकं ब्रह्म न भवति इत्यर्थः ।

नेहेति । (अत्र) इयत्तानिषेधपरत्वं दुर्वचम् ; (किन्तु) कृत्स्नभेदनिषेधपरत्वमेव (इति शंकाशयः) ।

अत्रापीति, तत्परिहरति । वशित्वम्-गुणेन वशीकारः । ईशानः -नियन्ता । वशित्वादीनां सत्यसंकल्पत्वविशेषरूपत्वात् सत्यसंकल्पत्वमत्रोक्तम् ।

सर्वेश्वरत्वशब्देन, 'सर्वस्याधिपतिः' इति वाक्योक्तं स्वामित्वमुच्यते । अस्य प्रदर्शनार्थत्वात् प्रकरणोक्तस्य, 'सर्वमिदं प्रशास्ति' इत्युक्तं नियमनम्, 'एष सेतुर्विधरणः' इत्युक्तं धारकत्वं च उक्तं भवति । एवं पतित्व नियन्तृत्व-धारकत्वैरीश्वरस्य, तं प्रति शेष नियाम्य धार्यभूतस्य जगतः शरीरत्वात्, 'चेतनाचेतनवस्तुशरीरः' इत्युक्तम् । सर्वप्रकारसंस्थितः - सर्वप्रकारविशिष्टः। एवं प्रकार्येकत्वस्य विहितत्वात्, निषेधस्य विहितव्यतिरिक्तविषयत्वाच्च, प्रकारिनानात्वनिषेधपरमिदं वाक्यम् इत्यर्थः । न भवदभिमतम् - सजातीयविजातीय स्वगत-रूपकृत्स्ननानात्वं न प्रतिषिध्यते इत्यर्थः ।

सर्वास्विति, उक्तन्यायकलापेन सर्वाः श्रुतयो निर्वाह्याः इत्याह । न क्वचिदपि ----

1. इत्यादि -घ, इति सत्यादि -ग. 2. ब्रह्मणः एताव - ख, ब्रह्मैताव - घ. 3. सूत्रार्थः -क.ग. 4. दृश्यते - घ. 5. सर्ववस्तु - ग. 6. एवेति -घ. 7. तत्प्रत्यनीकमब्रह्मात्मक - घ. 8. रीतिरिति - ख.

[अद्वैतिसंमतस्य ब्रह्मण अविद्यया तिरोधानस्यानुपपत्तिः]

अपि च - 'निर्विशेषज्ञानमात्रं ब्रह्म, तच्च [1]आच्छादिका[1] विद्यातिरोहित -स्वरूपं[2] स्वगतनानात्वं पश्यति' - इत्ययमर्थः, न घटते ;

तिरोधानं नाम प्रकाशनिवारणं, स्वरूपातिरेकिप्रकाशधर्मानभ्युपगमेन प्रकाशस्यैव स्वरूपत्वात्, स्वरूपनाश एव स्यात् ।

प्रकाशपर्यायं ज्ञानं नित्यम् । स च प्रकाशः अविद्या [3]तिरोहितः[3] - इति बालिश [4]भाषितमिदम्[4];

'अविद्यया प्रकाशस्तिरोहितः' इति, प्रकाशोत्पत्ति [5]प्रतिबन्धो वा[5] ? विद्यमानस्य विनाशो वा ?

प्रकाशस्य अनुत्पाद्यत्वात्, [6]विनाश[6] एव स्यात् ।

प्रकाशः, नित्यो निर्विकारस्तिष्ठति - इति चेत्,

-- शब्दो दृश्यत इति । के ते शब्दाः ? इति हि प्रक्रान्तम् । अतः तदेवोपसंहृतम् ।

अपि चेति । (अस्य मतस्य) न केवलं श्रुत्यपेतत्वमेव ; अपि तु न्यायापेतत्वं चेत्यर्थः। **निर्विशेषेत्यादि** । तिरोहितस्वरूपस्य हि भेददर्शनम् । तत्र तिरोधानदूषणेन परमतं समुन्मूलितं भवतीति (भावः) ।

स्वरूपेति । स्वरूपातिरेकी-स्वरूपापेक्षया भिन्नः । **प्रकाशधर्मः** - प्रकाशाख्यो धर्मः ।

प्रकाशपर्यायमिति, वाद्यन्तरैरिव ज्ञानस्य जडत्वमंगीकृतं चेत्, प्रकाशस्य तद्व्यतिरिक्तत्वात्, तन्निवृत्तिः स्वरूपनाशो न स्यात् ; ज्ञानं च स्वयम्प्रकाशम् इत्येवाभ्युपगतम् इत्यभिप्रायेणोक्तम् । **बालिशेति** । तिरोधानं-प्रकाशनिवृत्तिः । तस्मात्, 'स्वयम्प्रकाशरूपज्ञानं नित्यम् । तच्च अविद्यातिरोहितम्' इति व्याहतमिति, इममर्थं श्रुतिर्न प्रतिपादयतीत्यर्थः ।

प्रकाशोत्पत्तिप्रतिबन्धः - प्रकाशस्य प्रागभावः । **विनाशः** - प्रध्वंसाभावः । **विनाश एव स्यादिति** । तिरोधानश्रुतिं श्रद्दधानेन, स्वयम्प्रकाशत्वश्रुतिः त्याज्या स्यात् ; स्वरूपनाशप्रसंगात् इत्युक्तं (भवति) ।

प्रकाशो नित्य इति । स्वप्रकाशत्वाभ्युपगमे तिरोधानश्रुतिः त्याज्या स्यात्, (इत्याशयः)।

---

1. दका - पा 2. स्वस्वरूपं - ख. 3. निवारितः - ग. 4. भाषितम् - घ. 5. बन्धः - घ.
6. स्वरूपनाश ख.

सत्यमप्यविद्यायां, ब्रह्मणि न किंचित्तिरोहितमिति, [1]नानात्वं [1]पश्यति' इति भवतामयं व्यवहारः सत्सु अनिर्वचनीय एव ।।

[सिद्धान्ते जीवस्य स्वरूपतिरोधानानुपपत्तिशंकापरिहारौ]

ननु च- भवतोऽपि, विज्ञान स्वरूप[2]आत्मा अभ्युपगन्तव्यः । स च स्वयंप्रकाशः । [3]तस्य च[3] देवादि[4]स्वरूपा[4]त्माभिमाने, स्वरूपप्रकाशतिरोधानम् अवश्याश्रयणीयम् ; स्वरूपप्रकाशेसति, स्वात्मनि [5]आकारान्तरा[5]ध्यासायोगात् । अतः भवतश्च [6]समानः अयं[6] दोषः ।

[7]किं च[7] - अस्माकम् [8]एकस्मिन्नेवात्मनि [8] भवदुदीरितं दुर्घटत्वम् । [9]भवताम्[9] [10]आत्मानन्त्या [10]भ्युपगमात्, सर्वेष्वयं दोषः परिहरणीयः - ।

सत्सु अनिर्वचनीय इति । व्याहतत्वात्, अयमर्थः विद्वत्सन्निधौ वक्तुमयोग्यः इति उपालम्भः ।

विज्ञानस्वरूप इति । 'सत्यं ज्ञानमनन्तं ब्रह्म' 'विज्ञानघन एव' 'प्रज्ञानघन एव' इत्यादिभिः। स्वयमिति । 'अत्राऽयं पुरुषः स्वयंज्योतिः' 'आत्मा ज्योतिः सम्राट्' इत्यादिभिः । स्वरूप ---- तिरोधानमिति । 'तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता' इत्यादिभिः । अवश्येति । देवत्वाध्याससिद्ध्यर्थम् इत्यर्थः ।

किं चेति । भेदवादिना सुखित्व-दुःखित्वशिष्याचार्यबद्धमुक्तादिव्यवस्थाः प्रामाणिकत्वेनाऽभ्युपगताः । तिरोधानेन सर्वात्मना स्वरूपनाशे सति, प्रामाणिकानेकव्यवस्थाभंगः स्यात् । अस्मत्पक्षे तु व्यवस्थानां काल्पनिकत्वात्, न तद्भंगो दोषः । त्वत्पक्षे तु, स्वरूपनाशप्रसंगात्, व्यवस्थाभंगप्रसंगाच्च दोषाधिक्यम् इति भावः । परिहरणीयः इत्यस्याऽयमभिप्रायः-सर्वत्र हि प्रतिबन्दीप्रयोगः, परिहारसाम्याभिप्रायेण । अन्यथा प्रतिबन्दी निष्प्रयोजना स्यात् ; न हि । 'त्वं चोरः' इत्यत्र, 'त्वमपि चोरः' इत्युक्ते दोषपरिहारः स्यात् । तस्मात् ---- अत्राऽपि यस्त्वया परिहार उच्यते, सः अस्मत्पक्षेऽपि समानः इति ।

---

1. तिरोहितं ब्रह्म स्वगतनानात्वं - घ. 2. स्वरूप एवाऽयम् - घ. 3. तस्य - ख. 4. रूपा - ख. 5. आकाश - घ. 6. अयं समानो - क, ग. 7. किंतु - घ. 8. एकस्मिन्नात्मनि - घ. 9. भवता - घ. 10. आनन्त्या - घ.

अत्रोच्यते - स्वभावतः मल[1]प्रत्यनीकानन्त ज्ञानानन्दैक [2]स्वरूपम्[2], स्वाभाविकानवधिकातिशय अपरिमितोदारगुणसागरं, निमेष-काष्ठा-कला - मुहूर्तादिपरार्धपर्यन्तापरिमित [3]व्यवच्छेद[3] स्वरूपसर्वोत्पत्ति-स्थिति-विनाशादि सर्वपरिणामनिमित्तभूतकालकृतपरिणामास्पृष्टानन्तमहाविभूति, स्वलीलापरिकरस्वांशभूतानन्तबद्ध-मुक्तनानाविध [4]चेतन[4]-तद्भोग्यभूतानन्तविचित्र-परिणामशक्तिचेतनेतरवस्तुजातान्तर्यामित्वकृतसर्वशरीरत्वसर्वप्रकारावस्थानावस्थित

अत्रोच्यत इत्यादि । ब्रह्मणः हेयप्रत्यनीकत्व कल्याणगुणाकरत्ववचनैः, जगतः तद्विभूतित्वविधायिवचनैश्च, ब्रह्मणो भ्रमाश्रयत्वादिकम्, जगतो भ्रमविषयत्वं च विरुद्धमिति, श्रुतिवचनेन ब्रह्मणस्तिरोधानादिकं न प्रतिपादयितुं शक्यम् । एवं वचनविरोधेन भवदभिमतार्थस्य व्याहतस्य श्रुत्या प्रतिपादयितुमशक्यत्वात्, अस्मदुक्तस्तर्कः त्वन्मते प्रवर्तत एवेति । अस्मत्पक्षे तु-जीवस्वरूपतिरोधानादेः वचनान्तरविरोधाभावात्, वचनं जीवस्वरूपतिरोधानादिकं प्रतिपादयत्येवेति, तद्विरोधे न तर्कः प्रवर्तत इति, न परिहारसाम्यम् इत्यभिप्रायः । **मल-प्रत्यनीकेति** । न केवलं मलरहितम् ; अपि तु मलविरोधि इत्यभिप्रायः । स्वभावत इति, पंचगव्यादिव्यावृत्तिः । **अनन्तम्** -अपरिच्छिन्नम् । **स्वरूपम्**-धर्मि । एकशब्दः, प्रदेशभेदेन जडत्याननुकूलत्व-शंका-व्यावृत्त्यर्थः । स्वाभाविकेति । 'स्वाभाविकी ज्ञानबलक्रिया च' इति श्रुतिरभिप्रेता । **अपरिमितः** -असंख्येयः । 'अपरिमितः उदारगुणसागरः यस्य' इति बहुव्रीहिः । एवम् उभय-लिंगत्ववचनविरोधो दर्शितः । अनेन 'भ्रमाश्रयत्वं दुर्वचनम्' इत्युक्तं भवति । निमेषेत्यादिना विभूतेर्भ्रमविषयत्वानुपपत्तिरुच्यते । **अपरिमितेति** । निमेषकाष्ठाद्यवच्छेदाः कालस्यासाधारणधर्माः इत्यर्थः । कालो हि स्वयं परिणामी, प्रकृतेः परिणामहेतुः ; निमेषादयः कालपरिणामविशेषाः । **'सर्वे** निमेषा जज्ञिरे' इति श्रुतेः । **सर्वोत्पत्तीत्यादिना** प्रकृतिपरिणामहेतुत्वमुच्यते । **निमित्तेति**, (कालस्य) उपादानत्वाधिष्ठातृत्वव्यावृत्तिः । यथा ब्रह्मण उपादानत्वं प्रकृतिद्वारकं ; तथा ब्रह्मण एवोपकरणत्वमपि कालद्वारकम् इत्यभिप्रायः । **कालकृतपरिणामास्पृष्टेत्यनेन** नित्यविभूतिः एवं विधकालापरिणाम्या, इत्याह । **महत्** शब्देन विशेषणम्, लीलाविभूत्यपेक्षया महत्त्वाभिप्रायम् । आनन्त्यं हि विभूतिद्वयसाधारणम् । **स्वलीलेत्यादिना**, लीलाविभूतिमत्यमुच्यते । मुक्तस्य लीलापरिकरत्वं मोचनलीलोपकरणत्वात् । **स्वांशभूतेति** विशेषणतया, अंशत्वं विवक्षितम् । **मुक्त-**

1.प्रत्यनीक -घ. 2. रसस्वरूपम् - घ. 3. व्यवच्छेद्य - घ. 4. चेतनाचेतन - घ.

परब्रह्म च वेद्यम्, तत्साक्षात्कारक्षमभगवद्द्वैपायन-पराश-वाल्मीकि-मनु-याज्ञवल्क्य-गौतमआपस्तम्बप्रभृति-मुनिगणप्रणीतविध्यर्थवादमन्त्र-[1]रूपवेदमूलेतिहासपुराणधर्मशास्त्रोपबृंहतपरमार्थभूतानादिनिधनाविच्छिन्न-[2]पाठसम्प्रदाय[2]-ऋग्यजुस्सामाथर्व-रूपानन्तशाख वेद च, अभ्युपगच्छताम् अस्माकम्, किं न सेत्स्यति ?

[सिद्धान्तिसंमतेऽर्थे प्रमाणनि]

यथोक्त [3]भगवता द्वैपायनेन[3] महाभारते -

'यो मामजमनादिं च वेत्ति लोकमहेश्वरम्' ।। *(भ.गी.10-3)*

'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।।' *(भ.गी.15-16)*

'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।

यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।। *(भ.गी.15-17)*

नानाविधत्वम् -'स एकधा भवति' इति श्रुत्युक्तं भगवल्लीलान्तर्गतस्वसंकल्पगृहीतदेहवैविध्यरूपम्। **वस्तुजात** शब्देन प्रधानाव्यक्तकालाः विवक्षिताः । **अन्तर्यामित्वेन कृतम्** - सर्वशरीरतया सर्वप्रकारत्वेनावस्थानम् । अवस्थानेन **अवस्थितम्** - विशिष्टम् इत्यर्थः । एवं शरीरशरीरिभावकथनेन 'भ्रान्तिदर्शनतः स्थितम्' इत्युक्तं भ्रान्तिदर्शनं ब्रह्मणः, शरीरभूतजीवद्वारकम् इत्युक्तं भवति । **सर्वप्रकारशब्देन** शरीरवाचिशब्दाना शरीरिपर्यन्तत्वे हेतुर्विवक्षितः । एवं ----- जगतः भ्रमविषयत्वमयुक्तमित्युक्तं भवति । **'परं ब्रह्म वेद्यम् अभ्युपगच्छताम्'** इत्यन्वयः । **तत्साक्षात्कारेति**, प्रमाणस्वरूपं दर्शयति । **विधिमूलम्**, धर्मशास्त्रम् । **मन्त्रार्थवादमूलम्**, इतिहासपुराणम् । प्राचुर्यदिवमुक्तम् । **उपबृंहणम्** - अनधीतशाखार्थैः सह अधीत शाखार्थविशदीकरणम् । **अनादिनिधनादि** शब्दैः, वेदप्रामाण्य विवक्षितम् । **अनन्त- शाखमिति** । यथा देवमनुष्यादिचतुष्कोटिनिविष्टाः प्राणिनः असंख्येयाः; तथा ऋग्यजुः सामादिचतुष्टकोटिनिविष्टाः वेदा अपि शाखाभेदेन अनन्ताः इत्यर्थः । **वेदं च अभ्युपगच्छतामिति** । प्रमाणं प्रमेयं च परमार्थत्वेन अभ्युपगच्छताम् इत्यर्थः ।

---

1. मन्त्र - ख. 2. सम्प्रदाय - ख. 3. भगवद्वैपायनेन - घ. 4. इत्यु - क.

'कालं स पचते तत्र न कालस्तत्र वै प्रभुः । (म.भा.शां.196-9)
एते वै निरयास्तात स्थानस्य परमात्मनः ।। (म.भा.शां.196-6)
अव्यक्तादिविशेषान्तं परिणामर्धि संयुतम् ।
क्रीडाहरेरिदं सर्वं क्षर[1]इत्यव[1]धार्यताम् ।। (म.भा. शां. 206 - 58)
कृष्ण एव हि लोकानामुत्पत्तिरपिचाव्ययः ।
कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम् ।' (म.भा. स. 38-23)

कृष्णस्यहि कृते[2] इति - कृष्णस्य [3]शेषभूत[3]मित्यर्थः।

भगवतापराशरेणा[4]प्येवमुक्तम्[4]-
शुद्धे महाविभूत्याख्ये परे ब्रहमणि शब्द्यते ।
मैत्रेय ! भगवच्छब्दः सर्वकारणकारणे' ।। (वि.पु.6-5-72)
'ज्ञानशक्तिबलैश्वर्यवीर्यतेजास्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ।।' (वि.पु.6-5-79)
'एवमेष महाशब्दो मैत्रेय ! भगवानिति ।
परमब्रहमभूतस्य वासुदेवस्य नान्यगः ।। ' (वि.पु.6-5-76)

यथोक्तम् इत्यादिना, उक्तार्थेषु ऋषिवचनानिपरिगणनाक्रमेणोपादत्ते । **यो मामिति।** 'अजम्' इति अचेतनबद्धव्यावृत्तिः, 'अनादिम् अजम्' इति, मुक्तव्यावृत्तिः, 'लोकमहेश्वरम्' इति नित्यसिद्धव्यावृत्तिः, 'लोक्यते' इति व्युत्पत्त्या। (उत्तरार्धे) 'असंमूढः स मर्त्येषु' इत्यनेन एवं विजानतः मुक्तिरुक्ता। तदपि अत्राभिप्रेतम्। 'द्वाविमौ' इति, चिदचिद्वैलक्षण्याय। (यो लोकत्रयमिति)। अत्र व्यापनभरणस्वाम्यादयः प्रतिपन्नाः। 'कालं स' इति, नित्यविभूतिमत्त्वे प्रमाणम्। 'अव्यक्तादि' इति, लीलाविभूतिमत्त्वे वचनम्।

'कृष्ण एव हि' इति, तदायत्तोत्पत्त्यादिकत्वे तच्छेषत्वे च प्रमाणम्। **शुद्धे--- शब्द्यते इति।** 'सर्व शब्दानां वस्तुमात्रम् उपलक्ष्यमिति, न मुख्यार्थो ब्रहम' इति वादश्च अत्र परिहृतो भवति; भगवच्छब्दनिर्वचनात्। **'महाविभूत्याख्ये, सर्वकारणकारणे'** इति, उभयविभूतिमत्त्वं सिद्धम्। **'शुद्धे, ज्ञानशक्ति, विना हेयैः'** इत्यादिभिः, उभयलिंगत्वं ब्रहमणः सिद्धम्। **'कला' इति** नित्यविभूतेः अकालकाल्यत्वे वचनम्।

---

1. इत्यप - क. 2. कृते - घ. 3. शेषभूतं सर्वं - क,ग,घ. 4. प्युक्तम् - क,ग,घ.

तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः ।
शब्दोऽयं नोपचारेण त्वन्यत्र ह्युपचारतः ॥' (वि.पु.6-5-77)

एवं प्रकारममलं सत्यं [1]व्यापकमक्षयम् ।
समस्तहेयरहितं विष्ण्वाख्यं परमं पदम् ॥' (वि.पु.1-22-55)

कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः । (वि.पु.4-38)

क्रीडतो बालकस्येव चेष्टां तस्य निशामय ' (वि.पु.1-2-20) [2]इति[2] ।

मनुनाऽपि - *प्रशासितारं सर्वेषामणीयासमणीयसाम्'* (म.स्मृ.12-122) [3]इत्याद्यु[3]क्तम् । [4]याज्ञवल्क्येनाऽपि [4]-

क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता' (याज्ञ.स्मृ.34) [5]इत्यादि[5] ।

[6]आपस्तम्बेनाऽपि [6] - 'पूः प्राणिनः [7]सर्व[7]गुहाशयस्य' (आप.ध.सू.22-4) इति । सर्वे प्राणिनः, गुहाशयस्य- परमात्मनः, पूः- पुरम्, शरीरमित्यर्थः। 'प्राणिनः' इति [8]जीवात्मकभूत[8]संघाताः ।

[स्व-परमतविमर्शः]

ननु च -[9]किमनेनाडम्बरेण [9] ? चोद्यं तु न परिहृतम्!

उच्यते - एवमभ्युपगच्छतामस्माकम् ; आत्मधर्मभूतस्य चैतन्यस्य स्वाभाविकस्याऽपि, कर्मणा पारमार्थिकं संकोचं विकासं च ब्रुवतां, सर्वमिदं परिहृतम् ।

मनुनाऽपीति । प्रशासितृत्वादिगुणा उक्ताः इत्यभिप्रायः । ईश्वरज्ञानादिति । न तु निर्विशेषज्ञानात् इति भावः । पुरम्- शरीरमित्यर्थः इति । 'अंगं वपुर्वर्ष्म पुरं प्रतीकम्' इति नैघण्टुकाः ।

एवमिति । न केवलं वचनविरोधादेव परिहारः ; केवल तर्केणाऽपि परिहारो विद्यते इत्यभिप्रायः। एवमभ्युपगच्छताम् - तत् प्रमाणप्रमेयं च पारमार्थिकमभ्युपगच्छताम्, इत्यर्थः । आत्मधर्मभूतस्य इत्यनेन, स्वरूपव्यावृत्तिः।

पारमार्थिकमिति । न हि ब्रह्माज्ञानवादिना संकोचविकासौ वक्तुं शक्यौ । तथा सति तावपि व्यावहारिकौ स्याताम् ; न परमार्थौ । तथा सति संकोचविकासविषयभ्रमहेतुतया तिरोधान

---

1. नित्यं - ख. 2. इत्यादि -क,ग. 3. इत्यादिनोक्तम् - ग. 4.याज्ञवल्क्योऽपि - घ. 5. इति - ग. 6. आपस्तम्बोऽपि - घ. 7. सर्व एव - क. 8. जीवात्खभूत - घ, जीवात्म - घ. 9. किमनेना परिहारेण - घ.

भवतस्तु - प्रकाश एवस्वरूप[1]मिति, प्रकाशो [2]न[2] धर्मभूतः । तस्य संकोचो विकासो वा न अभ्युपगम्यते । प्रकाश[3]प्रसरानु[3]त्पत्तिमेव तिरोधानभूताः कर्मादयः कुर्वन्ति । अविद्या चेत्, तिरोधानम् ; तिरोधानभूतया [4]तया[4] स्वरूप-[5]भूतप्रकाश[5]नाशः- [6]पूर्व[6]मेवोक्तः ।

अस्माकं [7]च[7] - अविद्यारूपेण कर्मणा, स्वरूप[8]नित्यधर्म[8]भूतज्ञानप्रकाशः संकुचितः। तेन [9]देवादिरूपा[9]त्माभिमानो भवति - इति विशेषः ।

यथोक्तम् -

'अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते ।
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा ।। (वि.पु.6-7-62)
संसारतापानखिलानवाप्नोत्यतिसन्ततान् ।। (वि.पु.6-7-61)

वक्तव्यम् । तत्राऽपि व्यावहारिकसंकोचाभ्युपगमे, तद्विषयभ्रमहेतुतया पुनरपि तिरोधानमिति, अनवस्था स्यात् इत्यभिप्रायः । **सर्वमिदं परिहृतमिति** । देवादिभ्रमस्य अधिष्ठानस्फुरण-सापेक्षत्वात्, धर्मिस्वरूपं स्वयं प्रकाशरूपम् अधिष्ठानतया स्फुरति । (देवादि)- भ्रमविरोधिनः अणुत्वनित्यत्वाद्याकाराः । ते ज्ञानान्तरवेद्या इति, तत्तिरोधानात् भ्रम उपपद्यते । तिरोधानं च प्रकाशनिवृत्तिः । प्रकाशश्च न ज्ञान-स्वरूपः ; अपि तु प्रसराख्यः ज्ञानधर्मः । प्रकाश-रूपप्रसराभावश्च संकोचः ; भावान्तरस्यैव अभावत्वात् । संकोचाभावः प्रसरः, स एव तिरोधान-निवृत्तिरिति, न तदा भ्रमः ; एवं सति ज्ञानं धर्मिस्वरूपं च नित्यम्, ज्ञानंधर्मभूतप्रसराख्यप्रकाश-निवृत्तिरूपं तिरोधानमपि चोपपद्यते इत्यर्थः ।

प्रकाश एव प्रसरः, सदा प्रकाशशब्दवाच्यस्य ज्ञानस्य प्रसरः । तस्य अनुत्पत्तिरित्यर्थः । 'प्रकाश' शब्दो हि धर्मिपरो धर्मपरश्च ; 'भानुः भानुमान्' 'तेजः तेजस्वि' इतिवत् । **अनुत्पत्तिमेव** इति 'एवं' कारेण, स्वरूपाभावधर्मभूतज्ञानाभावौ च व्यावर्तितौ । **तिरोधान-भूताः** -तिरोधायकभूताः (तिरोधीयते एभिः इति करणे ल्युट् इत्यर्थः ।) **कर्मादयः**- इति 'आदि' शब्देन, प्रकृतिः वासना च गृह्यते ; 'वासनारेणुकुण्ठितः' 'गुणमायासमावृतः' इत्यादिवचनात् । **अविद्या चेत् --- वोक्त इति** । प्रकाशनिवृत्तिरूपं तिरोधानं, त्वन्मते स्वरूपनाशः स्यात् (इत्यर्थः) ।

अस्माकं ---- विशेष इति । अस्मन्मते आत्मधर्मभूतज्ञानसंकोचः तिरोधिरिति, धर्मि-स्वरूपस्य ज्ञानस्य च, नित्यत्वमुपपद्यते । तेन संकोचेन भ्रमविरोध्याकाराग्रहणात्, भ्रमोऽपि

1 वस्तुस्वरूप - घ. 2. नाम - घ. 3. प्रसरणानु - घ. 4. अविद्यया -घ. 5. प्रकाश - घ. 6. इति पूर्व-ग. 7. तु - क,ग,घ. 8. वन्नित्य - घ. 9. देवादिस्वरूपा - क,ग. देहादिरूपा - घ.

219 *तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।।*

सर्वभूतेषु भूपाल तारतम्येन वर्तते ।। (वि.पु.6-7-63)

इति, क्षेत्रज्ञानां स्वधर्म[1]भूतज्ञानस्य 'कर्म' संज्ञया अविद्यया संकोचं विकासं च दर्शयति ।

[अविद्यायाः स्वरूपानुपपत्तिः]

अपि च - आच्छादिका अविद्या, [2]श्रुतिभिश्च[2] एक्योपदेशबलाच्च, ब्रह्मस्वरूपतिरोधान[3]हेतुदोष[3]रूपा आश्रीयते । तस्याश्च मिथ्यारूपत्वेन, प्रपंचवत् स्वदर्शनमूलदोषापेक्षत्वात्, न सा मिथ्यादर्शनमूलदोषः स्यात् इति, ब्रह्मैव मिथ्यादर्शनमूलं स्यात् । तस्याश्च अनादित्वेऽपि मिथ्यारूपत्वादेव, ब्रह्मदृश्यत्वेनैव अनादित्वात् [4]तद्दर्शन[4]मूलपरमार्थदोषानभ्युपगमाच्च, ब्रह्मैव तद्दर्शनमूलं स्यात् । तस्य नित्यत्वात् [5]अनिर्मोक्ष एव[5] ।

उपपद्यते इत्यर्थः । **तारतम्येन वर्तते** इत्यनेन, ज्ञानसंकोचविकासौ सिद्धौ । न हि अणुमात्रस्य स्वरूपस्य तारतम्यम् । तस्मात् धर्मभूतज्ञानद्वारकमेव आत्मनस्तारतम्यम् - इति । ज्ञानद्वारकत्वं च तत्रैव उपरितनैः श्लोकैर्विवृतम् - 'अप्राणिमत्सु स्वल्पा सा स्थावरेषु' इत्यादिभिः। **क्षेत्रज्ञानाम् इति,** ('तया तिरोहितत्वाच्च' इति) उदाहृतश्लोकार्थमाह ।

आच्छादिकाऽविद्या शब्दविवरणार्थं, **ब्रह्म ----- दोषरूपा इति ।** उक्तमर्थं दूषयति **तस्याः इति** । यथा प्रपंचः मिथ्यारूपत्वेन स्वदर्शनहेतुदोषान्तरापेक्षः ; तथा दोषोऽपि, मिथ्यात्वात् दोषान्तरापेक्षः, इति अनवस्थादुःस्थत्वात्, न सा भेदभ्रममूलदोषः स्यात् । अतः परमार्थदोषे अभ्युपगन्तव्ये सति, तस्य ब्रह्मव्यतिरिक्तत्वे अद्वैतहानिप्रसंगात्, ब्रह्मैव दोषः स्यात् इत्यर्थः । (तस्याश्चेति । आच्छादिकाया अविद्यायाश्चेत्यर्थः।) मिथ्याभूतस्य प्रतीयमानत्वव्यतिरेकेण स्वरूपाभावात्, तत्प्रतीतेश्च स्वरूपप्रयुक्तत्वे सति उक्तदोषप्रसंगात्, अतिरिक्तहेतोश्च पूर्वकालवर्तितया, पश्चाद्भाविनो मिथ्याभूतस्य स्वरूपानादित्वमेव अनुपपन्नम् इत्यभिप्रायः । दृष्टा इति अविद्यायां ब्रह्मदर्शनविषयतारम्भस्य केनचित्कालविशेषेण परिच्छेत्तुमशक्यत्वात् (इत्यर्थो भवेत्) । ब्रह्मैवेति । एवम् अनवस्थाद्वैतहानिपरिहारार्थं ब्रह्मैव दोषः स्यात् इत्यर्थः । **तस्य ---- क्ष एवेति** । तदपरमार्थभेददर्शनस्य स्वरूपप्रयुक्तत्वेन तदनिर्मोक्षप्रसंगात् ; निर्मोक्षे च स्वरूपोच्छेदप्रसंगात् इत्यर्थः ।

---

1. भूतस्य - क.ग.घ. 2. श्रुतेश्च -घ. 3. हेतुर्दोष - घ. 4. दर्शन - ख. 5. अनिर्मोक्षः - घ.

[एकजीववादप्रतिपादनम्]

अत एव, इदमपि निरस्तम् -

एकमेव शरीरं जीववत् ; निर्जीवानि [1]इतराणि शरीराणि[1] । [4]यथा स्वप्न[2] दृष्टनानाविध [3]शरीराणां [4]निर्जीवत्वम्[4] । तत्र [5]स्वप्ने, दृष्टुः[5] शरीरम् एकमेव जीववत् । तस्य स्वप्न[6]वेलायां[6] दृश्यभूतनानाविधानन्तशरीराणां निर्जीवत्वमेव । अनेनैकेनैव [7]अन्येषां जीवानां शरीराणां च परिकल्पितत्वात्, जीवाः मिथ्याभूताः इति ।

[उक्तवादनिरासः]

ब्रह्मणा स्वस्वरूपव्यतिरिक्तस्य [8]जीव[8]भावस्य, सर्वशरीराणां च कल्पितत्वात्, एकस्मिन्नपि शरीरे, शरीरवत् जीव [9]सद्भावस्य[9] मिथ्यारूपत्वात्, सर्वाणि शरीराणि मिथ्यारूपाणि, तत्र जीवसद्भावश्च मिथ्या [10]रूप[10] इति, एकस्य शरीरस्य तत्र जीवसद्भावस्य च न कश्चिद्विशेषः ।

अस्माकं तु - [11]स्वप्ने[11], दृष्टु[12]शरीरस्य[12], तस्मिन् आत्म[13]सद्भावस्य च [13]प्रबोधवेलायामबाधितत्वात्, अन्येषां शरीराणां तद्गतजीवानां च बाधितत्वात्, ते सर्वे मिथ्याभूताः । स्वशरीरमेकम्, तस्मिन् जीवभावश्च परमार्थः - इति विशेषः ।

[अविद्याया निवर्तकस्य निवृत्तेश्च अनुपपत्तिः]

अपि च - केन वा अविद्यानिवृत्तिः ? सा च कीदृशी ? - इति विवेचनीयम् ।

अत एव-ब्रह्मव्यतिरिक्तस्य कृत्स्नस्यमिथ्यात्वाभ्युपगमादेव ।

एकमेवेत्यादिना, निरसनीयमुपन्यस्यति । इतिः समाप्तौ ।

जीवभावः - जीवत्वम् । ब्रह्मणा कल्पितत्वात् - इत्यन्वयः । 'स्वस्वरूप-व्यतिरिक्तस्ये'ति, हेतुगर्भ विशेषणम् । न कश्चिद्विशेष इति । प्रातिभासिकत्वं, स्वप्न-दृष्टशरीरस्थस्य अन्यशरीरस्थस्य च अविशिष्टम् इत्यर्थः । तस्मिन् जीवभावः - जीवसद्भाव इत्यर्थः । लोकसिद्धप्रक्रिययास्वाप्नार्थानां बाधाभ्युपगमः । सूत्रकारेणापि हि । तथाकृतम् ; 'वैधर्म्याच्च न स्वप्नादिवत्' इत्यत्र ।

---

1. इतराणि - घ. 2. स्वप्न -घ. 3. नाना-घ. 4. यथा निर्जीवत्वम् -क.ग. 5. स्वप्नदृष्टुः -क.ग. 6. दशायां -घ. 7. परिकल्पितत्वात् - क.ख. 8. तस्य सर्वजीव -घ. 9. सद्भावस्य च. क.ग. 10. भूत. घ. 11. स्वप्ने - घ. 12. स्वशरीरस्य - घ. 13. सद्भावस्य .

ऐक्यज्ञान निवर्तकम् ; निवृत्तिश्च अनिर्वचनीयप्रत्यनीकाकारा - इति चेत्, अनिर्वचनीयप्रत्यनीकं, निर्वचनीयम् । तच्च सद्वा, असद्वा द्विरूपं वा । कोट्यन्तर[1] न विद्यते ।

ब्रह्मव्यतिरेकेण एतदभ्युपगमे, पुनरपि अविद्या न निवृत्ता स्यात् ।
ब्रह्मव्यतिरेकेण एतदभ्युपगमे, पुनरपि अविद्या न निवृत्ता स्यात् ।

ब्रह्मैव चेत् ! निवृत्तिः, तत् प्रागपि[2] अविशिष्टमिति, वेदान्त-ज्ञानात्पूर्वमेव निवृत्तिः स्यात् । 'ऐक्यज्ञान निवर्तकम्, तदभावात् संसारः' इति भवद्दर्शन विहन्यते ।

किंच - निवर्तज्ञानस्याऽपि अविद्यारूपत्वात्, [3]तन्निवर्तन[3] केन ? इति वक्तव्यम् ।

निवर्तकज्ञान, स्वेतरसमस्तभेदं निवर्त्य, [4]क्षणिकत्वादेव[4] स्वयमेव[5]नश्यति[5]; दावानलविष[6]नाशन[6]विषान्तरवत् - इति चेत्, न ; निवर्तकज्ञानस्य ब्रह्म-व्यतिरिक्तत्वेन तत्स्वरूप-तदुत्पत्ति-विनाशानां मिथ्यारूपत्वात्, तद्विनाशरूपा

केनेति । किं शब्दः क्षेपार्थः ।

अनिर्वचनीय ---- न विद्यते इति , निवृत्तिः दूषयति । (सद्वा - अबाधितं वा । असद्वा-बाधितं वा । द्विरूपं वा - किंचिदंशे बाधितं, तथा किंचिदंशे अबाधितं वा ।) 'अनिर्वचनीय' शब्दशक्त्यैव पंचमकोट्यभावो दर्शितः । (ब्रह्मव्यतिरेकेण-ब्रह्मातिरिक्ततया । एतदभ्युपगमे-अविद्यानिवृत्तेरभ्युपगमे) । व्यावहारिकसद्धि अनिर्वचनीयम् । तस्मात् अविद्या न निवृत्ता स्यात् । असत्त्वपक्षेऽपि इदमेव दूषणम् । निवृत्तिः असती चेत् । द्वौ नञौ प्रकृतमर्थं सूचयतः इति न्यायात्, अविद्याह्यनिवृत्ता स्यात् । द्विरूपपक्षेऽपि, सदंशेन अद्वैतहानिः । असदंशेन, निवृत्तेरसत्त्वात् अविद्यास्थितिरेव इत्यर्थः ।

ब्रह्मैव चेन्निवृत्तिरिति । स्वरूपमेव अविद्यानिवृत्तिश्चेत्, अविद्यानुदय एव स्यात् ; निवृत्तौ सत्याम्, निवर्त्यस्थित्यनुपपत्तेः । तन्निवर्तनं केनेति । 'किं' शब्दः क्षेपार्थः ।

नेति । वस्तुत उत्पन्नस्यैव हि वस्तुतो विनाशः । उत्पत्त्यादेः काल्पनिकत्वेन, विनाशोऽपि काल्पनिक इति, तद्विनाशतद्विषयभ्रम-भ्रान्त-भ्रमहेतुरूपा अविद्या स्थितेति, तन्निवर्तकं

---

1. कल्पान्तरं - क,ग. 2. प्रागपि - घ. 3. निवृत्तिः - घ. 4.क्षणिकत्वात् - घ. 5. विनश्यति - क. 6. नाशक - घ.

अविद्या तिष्ठत्येवेति, [1]तद्विनाशदर्शनस्य निवर्तकं[1] वक्तव्यमेव । दावाग्न्यादीनामपि, पूर्वावस्थाविरोधिपरिणामपरम्परा अवर्जनीयैव

[अविद्यायाः ज्ञात्रनुपपत्तिः सर्वस्य ज्ञानस्य त्रिरूपता च]

अपि च - चिन्मात्रब्रह्मव्यतिरिक्तकृत्स्ननिषेधविषयज्ञानस्य कोऽय ज्ञाता?

अध्यासरूपः - इति चेत्, न ; तस्य निषेध्यतया निवर्तकज्ञानकर्मत्वात्, [2]तत्कर्तृत्वा[2]नुपपत्तेः ।

ब्रह्मस्वरूपमेव - इति चेत् ,

[3]न ; ब्रह्मणः[3] निवर्तकज्ञानं प्रति ज्ञातृत्वम्, किं स्वरूपम् ? उत अध्यस्तम्?

अध्यस्तं चेत्,

[4]अयमध्यासः, तन्मूला[4] [5]विद्यान्तरं च निवर्तक[5]ज्ञाना[5]विषयतया तिष्ठत्येव । तन्निवर्तकान्तराभ्युपगमे, तस्याऽपि [6]त्रिरूपतया[6] [7]अनवस्थैव[7] । सर्वस्य हि ज्ञानस्य [8]त्रिरूपत्व[8]विरहे, ज्ञानत्वमेव हीयते ; [9]कस्यचित्[9] कंचन अर्थविशेषं प्रति सिद्धिरूपत्वात् ।

वक्तव्यमित्यर्थः । 'स्वरूप-तदुत्पत्ती' त्यत्र 'स्वरूप' शब्दः, स्थितिवाची । तद्विनाशरूपेति । विनाशानुबन्धिनां भ्रम-तदाश्रय-तद्धेतूनामपि, 'विनाश' शब्देन विवक्षा । तद्विनाशदर्शनस्य इत्यत्रापि, तदाश्रय-तत्कल्पकाविद्या-तत्कल्पनीयानां च प्रदर्शनं कृतम् । पूर्वावस्थेति । दावाग्न्यादीनां विनाशो नाम पूर्वावस्थाविरोध्यवस्थान्तरप्राप्तिः ; न तु द्रव्याभावः। एवम् अविद्यायाः अवस्थान्तरप्राप्तौ सा न निवृत्ता स्यात् इत्यर्थः ।

(ज्ञानस्य ज्ञाता कः - ज्ञानस्य आश्रयभूतोऽर्थः कः ? इत्यर्थः ।) किम् अध्यासरूपो ज्ञाता? उत ब्रह्मैव ज्ञातृ ? इति विकल्पोऽभिप्रेतः ।

(अध्यासरूप इति । ब्रह्मणि आरोपितः अहंकाररूप एवार्थः निवर्तक-ज्ञानस्याश्रयः इत्यर्थः।) नेति । (तस्य - अध्यासरूपाहंकारस्य ।) निषेध्यतया-निवर्त्यतया । तत्कर्तृत्वानुपपत्तेरिति। कर्मकर्तृविरोधादिति भावः ।

ब्रह्मण इति । ब्रह्मैव ज्ञातृ इति पक्षे, ज्ञातृत्वधर्मे विकल्पः इत्यर्थः ।

तस्यापि त्रिरूपतयेति । निवर्तकज्ञानस्य त्रिरूपत्वं ज्ञातृ ज्ञेयानुबन्धित्वकृतम् ।

---

1. तद्विनाशस्य निवर्तकत्वं - घ. 2. कर्तृत्वा - घ. 3. ब्रह्मणः - घ. 4. तन्मूला - घ. 5. ज्ञानाद्य - घ. 6. त्रिरूपत्वात् - क,ग,घ. 7. अनवस्था - घ. 8. त्रिरूपकत्व - ग. 9. कस्य - घ.

ज्ञानस्य त्रिरूपत्वविरहे, भवता स्वरूपभूत [1]ज्ञानवत् निवर्तकज्ञानमपि अनिवर्तकं स्यात् ।

ब्रह्मस्वरूपस्यैव ज्ञातृत्वाभ्युपगमे, अस्मदीय [2]पक्ष एव[2] परिगृहीतः स्यात् ।

'निवर्तकज्ञानस्वरूपज्ञातृत्वं च स्वनिवर्त्यान्तर्गतम्' - इति वचनम् ; 'भूतलव्यतिरिक्तं कृत्स्नं छिन्नं देवदत्तेन' इत्यस्यामेव छेदनक्रियायाम्, [3]अस्याश्छेदनक्रियायाः, छेतृत्वस्य [3] च छेद्यान्तर्भावयवचनवत्, [4]उपहास्यम्[4] ।

[अविद्यानिवर्तकज्ञानसामग्र्यनुपपत्तिः]

अपि च - निखिलभेद[5]निवर्तकम्[5] इदमैक्यज्ञानम्, केन [6]जातम्[6] ? इति [7]विवेचनीयम्[7] ।

श्रुत्यैव - इति चेत्,

न ; तस्याः ब्रह्म[8]व्यतिरिक्तायाः[8] अविद्यापरिकल्पितत्वात्, प्रपंच-[9]बाधकज्ञानोत्पादकत्वं[9] न सम्भवति । तथा हि; दुष्टकारणजन्यमपि रज्जु-सर्प-ज्ञानं, दुष्टकारणजन्येन, 'रज्जुरियं न सर्पः' इति ज्ञानेन न बाध्यते । रज्जुसर्पज्ञानभये वर्तमाने, केनचित् भ्रान्तेन पुरुषेण 'रज्जुरियं ; न सर्पः' [10]इत्युक्तेऽपि,[10] 'अयं भ्रान्तः' इति [11]ज्ञाने[11] सति, तद्वचनम् रज्जुसर्पज्ञानस्य बाधकं न भवति ; भयं च न निवर्तते । प्रयोजकज्ञानवतः, श्रवणवेला [12]यामेव हि ![12] ब्रह्मव्यतिरिक्तत्वेन श्रुतेरपि भ्रान्तिमूलत्वं ज्ञातमिति ।

ज्ञानस्य-प्रमाणज्ञानस्य ; न तु स्वरूपभूतज्ञानस्येत्यर्थः । कस्यचिदिति, (ज्ञानत्व त्रिरूपत्वयोः) अन्वयव्याप्तिं दर्शयति । सिद्धिरूपत्वात् - प्रकाशरूपत्वात् ।

(निवर्तकज्ञानमपि-प्रमाणज्ञानमपि । अनिवर्तकं स्यात् इति, प्रतिकूलतर्कः।

अस्मदीयेति । अपसिद्धान्तप्रसंग इत्यर्थः ।

उपहास्यमिति । अंगुल्यग्रादिवाक्यवत् अयोग्यार्थत्वात् न प्रमितिजनकमिति भावः । केन जातमिति । न केनापीति भावः ।

नेति । (तस्याः - श्रुतेः) अविद्याकल्पितवाक्यजन्यं ज्ञानं न भ्रमनिवर्तकम् इत्यर्थः ।

प्रयोजकज्ञानवतः -ब्रह्मव्यतिरिक्तं कृत्स्नं मिथ्या इति, मिथ्यात्वे प्रयोजकं

---

1. ज्ञानमप्यस्ति - घ. 2. एव पक्षः - क,ग. 3. छेतृत्वस्य - घ. 4. अपहास्यम् - घ. 5. निवर्तनम् - ख. 6. ज्ञातम् - घ. 7. विमर्शनीयम् - घ. निर्वचनीयम् - घ. 8. व्यतिरिक्ततया - घ. 9. बाधज्ञानस्योत्पादकत्वं - क,ग. बोधोत्पादकत्वं - घ. 10. इत्युक्ते -घ. 11. ज्ञाते - क,ग. 12. यामेव - घ.

[ज्ञान - ज्ञातृ - शास्त्राणां बाध्यत्वे दोषः]

[1]किंच-निवर्तक ज्ञानस्य, ज्ञातुः, तत्सामग्रीभूतशास्त्रस्य च ब्रह्मव्यतिरिक्ततया यदि बाध्यत्व[2]मुच्यते[2]।

हन्त तर्हि ! प्रपंचनिवृत्तेः मिथ्यात्वमापततीति, प्रपंचस्य सत्यता स्यात् ; स्वप्नदृष्ट[3]पुरुष[3][4]वाक्यावगत [4]पुत्रादिमरणस्य मिथ्यात्वेन [4] [5]पुत्रादि[5]सत्यतावत् ।

किंच-तत्त्वमस्यादि [6]वाक्यं, न प्रपंचस्य बाधकम् [6] ; भ्रान्तिमूलत्वात्, [7]भ्रान्त [7]प्रयुक्तरज्जुसर्पबाधकवाक्यवत् ।

[8]ननु च[8]-स्वप्ने कस्मिंश्चिद्भये वर्तमाने, स्वप्नदशायामेव 'अयं स्वप्नः' इति ज्ञाते सति, पूर्वभयनिवृत्तिर्दृष्टा ; तद्वत् अत्रापि सम्भवति - [9]इति, [9]

नैवम् ; [10]स्वप्नवेलायामेव[10] 'सोऽपि स्वप्नः' इति ज्ञाते सति, [11]पुनः भयानिवृत्तिरेव[11] दृष्टेति, न कश्चिद्विशेषः । श्रवणवेलायामेव 'सोऽपि स्वप्नः' इति [12]ज्ञातमेवेत्युक्तम्[12]।

[ब्रह्मणः मिथ्याभूतशास्त्रसिद्धत्वेऽपि, सत्यत्वसिद्धिशंका-तत्परिहारौ]

यदपि चेदमुक्तम्-भ्रान्तिपरिकल्पितत्वेन मिथ्यारूपमपि शास्त्रम्, 'सत्

ब्रह्मव्यतिरिक्तत्वम्, इति ज्ञानवतः इत्यर्थः 'निदिध्यासनेन निरस्तसमस्तभेदवासनस्य निवर्तकज्ञानोत्पत्तिः' इत्यभ्युपगमात्, श्रवणवेलायामेव श्रुतेः भ्रान्तिमूलत्वज्ञानाच्च, न सा बाधकज्ञानहेतुः इत्यर्थः । भ्रान्ति ----ज्ञातमिति, बाधकज्ञानोत्पादकत्वं न सम्भवति इति पूर्वेणान्वयः ।

हन्त तर्हीति । ब्रह्मव्यतिरिक्तत्वोपाधेः प्रपंचवत् तन्निवृत्तावपि अविशिष्टत्वात्, निवृत्तिरपि मिथ्या भवतीति, तादृश निवृत्तेः निवर्त्यस्य च उभयस्य विरुद्धस्य मिथ्यात्वम्, मातृत्व-वन्ध्यात्वयोरिव अनुपपन्नम् इत्यर्थः । स्वप्नेत्यादिना, तत्र (उक्तार्थे) दृष्टान्तमाह । निवृत्तेर्मिथ्यात्वे निवर्त्यस्थितिरेव ; न तु निवर्त्यसत्यत्वम् इति चेत् , न ; निवर्त्यस्थितेः यावत्कालं बाधानुदयात् सत्यत्वसिद्धेः, अबाधिततया हि । स्थिति सत्यत्वम् ।

किंचेति । अयम् अनिष्टप्रसंगः ; नत्वनुमानम् । व्याप्तिप्रदर्शनार्थं प्रतिज्ञा हेतुरूपेणोक्तम्। नैवमिति । प्रथमस्वप्ने बाधके द्वितीयस्वप्नेऽपि 'स्वप्नः' इति ज्ञाते, भयान्निवृत्तिदर्शनात्, इत्यर्थः

---

1. निवर्तक - घ. 2. मुच्येत - घ. 3. पुरुषेण - घ. 4. पित्रादिमरणस्य - क,ग, पुत्रादिमरणा - ख. पित्रादिमरण - घ. 5. पित्रादि - क,ग,घ. 6. वाक्यजन्यज्ञानं प्रपंचस्य अबाधकम् - घ. 7. भ्रान्ति - घ. 8. ननु - घ. 9. इति चेत् - घ. 10. तद्दशायामेव - घ. 11. अनिवृत्तिरेव - घ. 12. पूर्वमेवोक्तम् - घ.

अद्वितीयं ब्रह्म' इति बोधयति । सतो ब्रह्मणः विषयस्य, पश्चात्तन-बाधादर्शनात्, ब्रह्म सुस्थितमेव - इति,

तदयुक्तम् ; 'शून्यमेव तत्त्वम्' इति वाक्येन तस्यापि बाधितत्वात् ।

इदं भ्रान्ति [1]मूलं[1] वाक्यम् - इति चेत्,

'सत् ------ अद्वितीयं ब्रह्म' इति वाक्यमपि भ्रान्तिमूलमिति त्वयैवोक्तम्। पश्चात्तनबाधादर्शनं तु, [2]सर्वशून्यवाक्यस्यैव [2] इति विशेषः।

[वादानधिकारापादकहेतुप्रदर्शनम्]

सर्वशून्यवादिनः ब्रह्मव्यतिरिक्तवस्तु [3]मिथ्यात्व[3]वादिनश्च, स्वपक्ष [4]साधन[4] प्रमाण-पारमार्थ्यानभ्युपगमेन, अभियुक्तैः वादानधिकार एव प्रतिपादितः-

[5]*'अधिकारोऽनुपायत्वान्न वादे शून्यवादिनः'* (कु.वा.5) इति । [5]

[शास्त्रस्य प्रत्यक्षबाधकत्वासिद्धिः]

अपि च - प्रत्यक्ष [6]दृष्टस्य प्रपंचस्य[6] मिथ्यात्वं, केन प्रमाणेन साध्यते ? प्रत्यक्षस्य दोषमूलत्वेन [7]अन्यथासिद्धि [7]सम्भवात्, निर्दोषं शास्त्रम् अनन्यथासिद्धम् प्रत्यक्षस्य बाधकम् - इति चेत्,

---

न कश्चिद्विशेष इति । बाध्यबाधकयोः न कश्चिद्विशेषः इत्यर्थः। स्वप्नशब्दः गौणवृत्या मिथ्यात्वपरः ।

(सतो ब्रह्मणः -सत्पदाभिधेयस्य ब्रह्मणः । विषयस्य - मिथ्याभूतशास्त्रजन्यज्ञानगोचरस्य) (भ्रान्तिमूलमितीति । वेदादिरूपशास्त्रस्यापि आविद्यकत्वेन भ्रान्तिमूलतायाः अनिवार्यत्वात् इत्याशयः । सर्वशून्यवाक्यस्यैवेति । बौद्धाभिमतार्थप्रतिपादकस्य 'सर्वं शून्यम्' इति वाक्यस्येत्यर्थः। विशेषः - वैदिकाद्वाक्याद्वैलक्षण्यमिति भावः ।)

(सर्वशून्यवादिनः माध्यमिका बौद्धाः । ब्रह्मव्यतिरिक्तवस्तुमिथ्यात्ववादिनः - अद्वैतिनः अभियुक्तैरिति । (कुमारिल) भट्टाचार्यैः इत्यर्थः । 'सर्वदा सदुपायानां वादमार्गः प्रवर्तते ' इति पूर्वार्धम् । (श्लोके) 'शून्यवादिनः' इत्युक्तेऽपि ब्रह्मव्यतिरिक्तवस्तुमिथ्यात्ववादिनोऽपि ग्रहणम्; तुल्यन्यायत्वात् । न्यायश्च स्वपक्षसाधनप्रमाणपारमार्थ्यानभ्युपगमः । सदुपायानाम् - परमार्थभूतप्रमाणवादिनाम् । अनेन ग्रन्थेन शून्यत्वादिनो व्याहतिरापाद्यते । कथाप्रवृत्तेन त्वया कथाप्रवृत्तिविरुद्धमंगीकृतम् इति ।

---

1. मूल - क,ग. 2. शून्यवाक्यस्य -घ. 3. मिथ्या - घ. 4. साधक - घ. 5. इति - घ. 6. दृष्टप्रपंचस्य - क,ग,घ. 7. असिद्धि- घ.

केन दोषेण जातं प्रत्यक्षम् अनन्तभेदविषयम् ? - इति वक्तव्यम् ।

अनादिभेद [1] वासनाख्य[1]दोषजातं प्रत्यक्षम् - इति चेत्,

हन्त ! तर्हि अनेनैव दोषेण जातं शास्त्रमपीति, एकदोषमूलत्वात् [2]शास्त्र-प्रत्यक्षयोः [2], न बाध्यबाधकभावसिद्धिः ।।

[शास्त्र - प्रत्यक्षयोर्विषयभेदप्रदर्शनम्]

आकाशवाय्वादि [3]भूत-तदारब्ध[3]शब्दस्पर्शादि [4]युक्तमनुष्यत्वादि [4]संस्थान-संस्थितपदार्थग्राहि, प्रत्यक्षम् । शास्त्रं तु प्रत्यक्षा [5]द्यपरिच्छेद्य-[5]सर्वान्तरात्मत्व-[6]सत्यत्वाद्यनन्त [6]विशेषणविशिष्टब्रह्मस्वरूप-तदुपासनाद्याराधनप्रकार तत्प्राप्ति-पूर्वक-तत्प्रसादलभ्यफलविशेष-तदनिष्टकरण-मूलनिग्रहविशेष-विषयम्-इति शास्त्र-प्रत्यक्षयोः न विरोधः ।

अनादिनिधनाविच्छिन्नपाठसम्प्रद [7]यताद्यनेकगुणविशिष्टस्य शास्त्रस्य बलीयस्त्वं वदता, प्रत्यक्षपारमार्थ्यम् [7]अवश्यमभ्युपगन्तव्यमिति [7], अलमनेन श्रुति-शतविततिवातवेगपराहतकुदृष्टिदुष्टयुक्तिजालतूलनिरसनेनेति, उपरम्यते ।

[इति शांकरमतनिराकरणप्रकरणम्]

अपिचेत्यादिना, शास्त्र-प्रत्यक्षयोः बाधकत्व-बाध्यत्वे निरस्यति ।

अनन्तभेदविषयमिति । काच-तिमिरादेर्दोषत्वं कैश्चिदुक्तमिति, तस्य सर्वभेदानुगतत्वाभावादयुक्तम् इत्यभिप्रायः । काचतिमिराद्यभावेऽपि क्वचिद्दर्शनात् अन्यत्र कल्प्यते चेत् । वाक्यत्वात् वेदस्य पौरुषेयत्वादिकं कल्प्यताम् इति ।

हन्त शब्दः उपालम्भसूचकः ।

(तदारब्धेति । भूतविकारैरित्यर्थः । संस्थानसंस्थितः -संस्थानविशिष्टः । प्रत्यक्षाद्यपरिच्छेद्यम्-प्रत्यक्षादिभिः 'इदम् इत्थम्' इति निर्णेतुमशक्यम् ।) तदुपासनादीति 'आदि' शब्देन, यागदानादयो विवक्षिताः । तत्प्राप्तिः - (ब्रह्मस्वाम्यप्राप्तिः) मोक्षः । फलविशेषः - त्रिवर्गः । तदनिष्टकरणम्-पापम् ।

अनादीत्यादि । शब्दस्वरूपग्रहण-व्युत्पत्ति-तात्पर्यलिंगग्रहणादेः, अपौरुषेयत्वानु-मानलिंगस्य च प्रत्यक्षमूलत्वात्, तत्पारमार्थ्यम् अवश्याभ्युपेत्यम् । अन्यथा धर्मिस्वरूप-

---

1. समाख्य - घ. 2. प्रत्यक्षशास्त्रयोः - क. 3. भूतारब्ध - घ. 4. संयुक्तदेवमनुष्यादि - घ. 5. द्यगोचरसिद्ध -घ. 6. त्वाद्यनन्त -ख. 7. अवश्यं वक्तव्यमिति -ख.

[भास्करमतनिराकरणारम्भः]

[तत्र ब्रह्मणो निर्दोषत्वासिद्धिः]

द्वितीये तु पक्षे उपाधिब्रह्मव्यतिरिक्तवस्त्वन्तरानभ्युपगमात् ब्रह्मण्येव[1] उपाधिसंसर्गात्, औपाधिकाः सर्वे दोषाः ब्रह्मण्येव भवेयुः । ततश्च अपहतपाप्मत्वादिनिर्दोष[2]श्रुतयः सर्वाः विहन्यन्ते ।

यथा - [3]घटाकाशादेः[3] परिच्छिन्नतया महाकाशाद्वैलक्षण्यम्, परस्परभेदश्च दृश्यते ; तत्रस्थाः [4]दोषा वा गुणा वा[4] अनवच्छिन्ने महाकाशे न सम्बध्यन्ते ; एवम्, उपाधिकृतभेदव्यवस्थितजीव [5]गताः दोषाः[5] अनुपहिते परे ब्रह्मणि न सम्बध्यन्ते - इति चेत्,

नैतदुपपद्यते, निरवयवस्य आकाशस्य [6]अनवच्छेद्यस्य[6] घटादिभिः छेदासम्भवात्, [7]तेनैवाकाशेन[7] घटादयः संयुक्ताः इति, ब्रह्मणोऽपि [8]अच्छेद्यत्वात्[8] ब्रह्मैव उपाधिसंयुक्तं स्यात् ।

तद्बलीयस्त्वहेतुभूतगुणासिद्धिः इत्यर्थः । **'इति'** शब्देन, अन्येषामपि कुतर्कजालानां दूषणम् उक्तप्रयोजकान्तर्भूतम् इत्यभिप्रेतम् । श्रुतिशतेति 'शत' शब्दः, शाखाभेदपरः । **वितति** शब्दः, प्रतिशाखं वाक्यपरम्परापरः । **वातवेग** शब्देन प्राबल्यमुक्तम् । **तूल**शब्देन परमतस्य दौर्बल्यमभिप्रेतम् । 'न हि वचनविरुद्धस्तर्कः प्रबलः' इति स्पष्टम् । एवं ब्रह्माज्ञानपक्षः प्रतिक्षिप्तः ।

द्वितीयेत्वित्यादिना, द्वितीयश्लोकोक्तक्रमेण भास्करमतं निराकरोति । मिथ्यात्वप्रयुक्तानुपपत्त्यप्रसंगेऽपि, जीव ब्रह्मस्वरूपैक्यनिबन्धनदोषाः भवन्त्येवेति ; तु शब्दाभिप्रायः । **ब्रह्मण्येव उपाधिसंसर्गस्य** हेतुः उपाधिब्रह्मव्यतिरिक्तवस्त्वन्तरानभ्युपगमः। **व्यतिरिक्त**शब्दः, ईश्वरत्वाकाराज्जीवत्वाकारविशेषेण भेदानुवादपरः । **वस्त्वन्तरशब्दः** धर्म्यन्तरवाची । आकारभेदाभ्युगमेऽपि, धर्म्यैकत्वाभ्युपगमात्, ब्रह्मण्येवोपाधिरिति, तत्कृतदोषाः तत्रैव स्युः इत्यर्थः ।

तत्रस्था इति । अल्पत्वम्, अभिमतविनियोगविशेषानर्हत्वं च घटाकाशस्य दोषः । अभिमतविनियोगविशेषार्हत्वं गुणः । तदुभयं महाकाशे न प्रसजेत् । घट करकाद्यवच्छिन्नाकारः परस्परभेदश्च दृश्यते । न हि घटावच्छिन्नाकाशकार्यं करकावच्छिन्नाकाशे सम्भवति । एवं उपाधिभेदकृतपरस्परभेदेन गुण-दोषव्यवस्थान्विताः जीवाः तद्गतगुणदोषाश्च न परंब्रह्माणि

---

1. ब्रह्मण एव - घ. 2. निर्दोषत्वश्रुतयः -क.ग., श्रुतयः - घ. 3. घटकरकादेः, घटकरकादि - घ. 4. गुणा वा दोषा वा - क.ग. 5. गतदोषाः - घ. 6. अच्छेद्यस्य - घ. 7. आकाशेनैव घ. 8. अपचछेद्यत्वात् - घ.

घटसंयुक्ताकाशप्रदेशः अन्यस्मात् [1]आकाशप्रदेशात्[1] भिद्यते - इति चेत्, [2]आकाशस्यैकस्यैव[2] प्रदेशभेदेन घटादिसंयोगात्, घटादौ गच्छति, [3]तस्य च प्रदेशस्य[3] अनियम इति ; तद्वत् ब्रह्मण्येव प्रदेशभेदानियमेन उपाधि-संसर्गात्, उपाधौ गच्छति, संयुक्त-वियुक्तब्रह्म [4]प्रदेशभेदाच्च,[4] [5]ब्रह्मण्येव[5] उपाधि[6]संसर्गः[6], क्षणे क्षणे [7]बन्धो मोक्षश्च भवतीति[7], सन्तः परिहसन्ति ।

[श्रोत्रदृष्टान्तेन ब्रह्मणि व्यवस्थाशंका - तत्परिहारौ]

[8]निरवयवस्य आकाशस्यैव[8] श्रोत्रेन्द्रियत्वेऽपि इन्द्रियव्यवस्थावत्, ब्रह्मण्यपि व्यवस्था उपपद्यते - इति चेत्,

न ; वायुविशेषसंस्कृतकर्णप्रदेश [9]संयुक्तस्यैव[9] आकाशप्रदेशस्य इन्द्रियत्वात्, तस्य च प्रदेशान्त[10]राद्भेदा[10]नियमेऽपि इन्द्रियव्यवस्था उपपद्यते । [11]आकाशस्य तु[11] सर्वेषा शरीरेषु गच्छत्सु, अनियमेन [12]सर्वप्रदेश[12]संयोग इति, [13]ब्रह्मण्यपि[13] उपाधिसंयोग [14]प्रदेशानियम[14] एव ।

सम्बध्यन्त इति, निर्दोषत्वश्रुतीनां सावकाशत्वात्, न तत्र बाधप्रसंगः - इत्यर्थः ।

नैतदिति । उरगक्षतांगुलिवत् ब्रह्म खण्डनार्ह चेत् ; ब्रह्मणि जीवगतदोषासंस्पर्शः उपपद्यते । ब्रह्मणो निरवयवत्वेन अच्छेद्यत्वात्, ब्रह्मण्येव उपाधिसंसर्गः स्यादिति, निर्दोषश्रुतिबाध एवेत्यर्थः ।

आकाशस्येत्यादि । आकाशव्यक्तयः अनन्ताः सन्ति चेत्, उपाधीनां गमनेऽपि, आकाशव्यक्त्यन्तरासम्बन्धेन गुणदोषव्यवस्था स्यात् ; न च तथा आकाशव्यक्तिभेदोऽस्ति - इति भावः । इति दृष्टान्ते अनियमो दर्शितः । तद्वत् इति, दार्ष्टान्तिके तं (अनियमं) दर्शयति । ब्रह्मण्येव ----- संसर्गात्, उपाधौ --- भेदाश्च इति हेतुद्वयस्य साध्यद्वयं क्रमादुच्यते । 'ब्रह्म --- संसर्गः, क्षणे --- मोक्षश्च भवति' इति । निरवयवत्वेन अच्छेद्यत्वात्, व्यक्तिबहुत्वाभावात्, उपाधीनाम् एकत्रैव स्थित्यभावाच्च व्यवस्थानुपपत्तिः इत्यर्थः ।

निरवयवस्येति । यथा निरवयवस्याकाशस्यैव श्रोत्रेन्द्रियत्वेऽपि, श्रोत्रेन्द्रियाणां परस्परव्यवस्था, इन्द्रियानिन्द्रिय व्यवस्था च उपपद्यते ; तथा जीवानाम् अन्योन्यव्यवस्था, जीवब्रह्मव्यवस्था च उपपन्ना इत्यर्थः ।

---

1. आकाशात् - घ. 2. न ; आकाशस्यैव -घ. न ;अत्राकाशस्यैव -घ. 3. तस्य च प्रदेशभेदस्य - प्रदेशस्य -घ. 4. प्रदेशाभेदाच्च - घ, प्रदेशाच्च - घ. 5. ब्रह्मणः घ. 6. संसर्गात् -घ. 7. बन्ध-मोक्षौ च स्यातामिति - क.ग.घ. 8. निरवयवस्यैवाकाशस्य -क.ग. 9. संस्कृतस्यैव -घ. 10. रत्वाद्भेदा -घ. 11. आकाशस्य च -घ. 12. देश -ख. 13. ब्रह्मणः -घ. 14. प्रदेश - घ.

[इन्द्रियाणामाहंकारिकत्वम्]

आकाशस्य स्वरूपेणैव श्रोत्रेन्द्रियत्वमभ्युपगम्याऽपि [1]इन्द्रिय[1]व्यवस्था उक्ता । परमार्थतस्तु - आकाशः न श्रोत्रेन्द्रियम् । 'वैकारिकात् अहंकारात् एकादशेन्द्रियाणि जायन्ते ' [2]इति हि[2] वैदिकाः ।

यथोक्तं भगवता पराशरेण-

तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश ।

एकादशं मनश्चात्र देवा वैकारिकाः स्मृताः ॥ ' (वि.पु.1-2-47)

इति । अयमर्थः - 'वैकारिकः, तैजसः, भूतादिः' इति त्रिविधोऽहंकारः । स च क्रमात् सात्त्विको राजसः तामसश्च । तत्र 'तामसात् - भूतादेः आकाशादीनि भूतानि जायन्ते' इति सृष्टिक्रममुक्त्वा, 'तैजसात् - राजसाहंकारात् एकादश इन्द्रियाणि जायन्ते' इति परमतम् उपन्यस्य, 'सात्त्विकाहंकारात् वैकारि [3]काणि-इन्द्रियाणि [3] जायन्ते' इति [4]स्वमतमुच्यते[4] - '*देवा वैकारिकाः स्मृताः* ' (वि.पु.1-2-47) इति । देवाः-इन्द्रियाणि । एवम्- [5]आहंकारिकाणाम् इन्द्रियाणां [5] भूतैश्चाप्यायनं महाभारते उच्यते । भौतिकत्वेऽपीन्द्रियाणाम्, [6]आकाशादि [6]भूतविकारत्वादेव

न वायुवित्यादि । उच्चारणप्रयत्नजनितवायुविशेषसंयोगसंस्कृतकर्णशष्कुली-संयुक्तस्यैव आकाशस्य शब्दोपलम्भहेतुत्वमेव श्रोत्रेन्द्रियत्वमिति, प्रदेशभेदानियमेऽपि उपलम्भकार्यकरत्वोपपत्तेः, उपलम्भहेतोः प्रदेशस्य इन्द्रियत्वात्, तदहेतोः अनिन्द्रियत्वाच्च इन्द्रियानिन्द्रियव्यवस्थोपपत्तिः । प्रदेशभेदेनापि एकपुरुषं प्रति वायुविशेषसंस्कृतकर्णसंयुक्तस्य प्रदेशविशेषस्य शब्दोपलम्भकार्यकरत्वात्, तं प्रति तादृशकर्णसंयुक्तस्यापि नभः प्रदेशान्तरस्य अकार्यकरत्वेन इन्द्रियाणां परस्परव्यवस्थासिद्धिश्च । एवं प्रदेशभेदेनाऽपि कदाचित् कार्यकरत्वात् इन्द्रियव्यवस्था-सिद्धिः इत्यर्थः । **अनियमेऽपि इति** , दार्ष्टान्तिकदूषणसिद्ध्यर्थमुक्तम् । 'तु' शब्दः प्रदेशव्यवस्थित्यभावरूपवैषम्यपरः । आकाशस्य तु सर्वशरीराणां गमनात् तत्कर्णप्रदेशभेदेन संयोगो विद्यत इति अनियम इत्यर्थः । इति ब्रह्मण्यपीति । 'इतिः' हेतौ । **उपाधि** --- शानियमः- उपाधिसंयोगस्य प्रदेशानियमः, एवं ब्रह्मण्यपि प्रदेश भेदानियमेन उपाधिसंयोगः इत्यर्थः । आकाशप्रदेशानियमेऽपि कदाचित्कार्यकरत्वरूपं श्रोत्रेन्द्रियत्वमिति, इन्द्रिय-व्यवस्थोपपद्यते; एवं ब्रह्मण्यपि प्रदेशभेदानियमेन उपाधिसंयोगे जीवत्वमपि कादाचित्कं स्यात् । तत् अजत्वनियत्वश्रुतिविरुद्धम् । अतः जीव ब्रह्मव्यवस्था नोपपद्यते -इत्यभिप्रायः । **स्वरूपेणैव** इति पदेन, भूतैः इन्द्रियाणाम् आप्यायनव्यावृत्तिः ।

1. इन्द्रियस्य - घ. 2. इति - घ. 3. कादीन्द्रियाणि -घ. 4. स्वमतं सूच्यते - ग. 5. इन्द्रियाणामाहंकारिकाणां - क,ग. अहंकाराणामिन्द्रियाणां - घ. 6. आकाश - घ.

आकाशादि-भूत-परिणामविशेषाः व्यवस्थिता एव, शरीरवत् पुरुषाणाम् इन्द्रियाणि भवन्तीति, ब्रह्मणि अच्छेद्ये निरवयवे निर्विकारे तु, अनियमेन अनन्त-हेयोपाधिसंसर्ग [1]दोषो दुष्परिहर[2] एव - इति, श्रद्धधानानामेव अयं पक्ष इति, शास्त्रविदो न बहुमन्यन्ते ।

[भास्करमतनिरासोपसंहारः]

स्वरूपपरिणामाभ्युपगमात् [3]अविकार [3]श्रुतिर्बाध्यते ; [4]निरवद्यता च । 'ब्रह्मणः [4] शक्तिपरिणामः' - इति चेत्,

केयं शक्ति [6]रित्युच्यते[5]? - किं ब्रह्मपरिणामरूपा ? उत ब्रह्मणोऽनन्या काऽपि? - इति,

उभयपक्षेऽपि स्वरूपपरिणामः अवर्जनीय एव ।।

[इति भास्करमतनिरासः]

अयमर्थः इत्यादि, महत्तत्वादजायत' । इत्यादि प्रकरण-पर्यालोचनया तदनुगुणं व्याख्यातम् । **परमतमिति** । (श्लोके) 'आहुः' इति परमतोपन्यासः । **स्वमतमिति** । (श्लोके) 'वैकारिकाः स्मृताः' इति सिद्धान्तः इत्यर्थः । **देवाः** इति । 'देव' शब्दः इन्द्रियवाची ; ' न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैः' 'मनसा तु विशुद्धेन' 'सहैव सन्तं न विजानन्ति देवाः' इत्यादिषु प्रयोगात् । **एवमित्यादि**। वैकारिकात् (इन्द्रियाणाम्) उत्पत्तिवचनाविरोधाय, आपातप्रतीतार्थत्यागेन तदाप्यायनमेवार्थः इति मन्तव्यम् इत्यर्थः । **भौतिकत्वेऽपीति** । पूर्वं भूतानामेव इन्द्रियत्वाभ्युपगमेन परिहार उक्तः । अत्र भूत-परिणामत्वा-भ्युपगमेन परिहार उच्यते इति भिदा । 'भूतपरिणामत्वाविशेषात्, अनिन्द्रियत्वमपि स्यात् घटवत्' इति शंकापरिहारार्थम्, **भूतविकार-त्वादेव** इत्युक्तम् । **आकाशादि-भूतपरिणामविशेषाः** आकाशादिभूतविकारत्वादेव **शरीरवत् व्यवस्थिताः एव** (सन्तः) पुरुषाणाम् इन्द्रियाणि भवन्ति इत्यन्वयः । न हि शरीरस्य भूतपरिणाम-विशेषत्वात् अशरीरत्वम् । एवं भूतपरिणामत्वेन इन्द्रियाण्यपि व्यवस्थितानि भवन्तीति, जीवस्य ब्रह्मपरिणामत्वाभावात् व्यवस्था अनुपपन्ना इत्यर्थः । ब्रह्मपरिणामत्वेऽपि जीवस्य अजत्वनित्यत्व-श्रुतिबाधः, अकृताभ्यागम-कृतविप्रणाश-प्रसंगश्च । ब्रह्मणो निर्विकारत्वश्रुतिबाधश्च इत्यभिप्रायः। निरवयवत्वं निर्विकारत्वं च, अच्छेद्यत्वे हेतुः । **श्रद्धधानानाम्** - न्याय-निरुपणाक्षमाणाम् ; उपदेशमात्रतृप्तानाम् इत्यर्थः। एवं जीव ब्रह्मैक्याभ्युपगमे दोष उक्तः ।

स्वरूपेत्यादिना , अचिद्रूपेण ब्रह्मपरिणामाभ्युपगमे दूषणमाह ।**बाध्यत इति** । अविकारत्व-श्रुतिः निर्मलत्व श्रुतिश्च बाध्येते इत्यर्थः ।

---

1. दोषा दुष्परिहरा - घ. 2.अविकारत्व -क,ग. 3. निरवद्यस्य -घ. निरवद्या च -घ. 4. रुच्यते -क,ग,घ.

[तत्र ब्रह्मणि अपुरुषार्थसम्बन्धोपपादनम्]

[यादवप्रकाशमतनिरासारम्भः]

'तृतीयेऽपि पक्षे[1] - जीव-ब्रह्मणोः [2]भेदवत् अभेदस्य च अभ्युपगमात्, तस्य च तदभावात्, सौभरिभेद 'वत्[3] स्वावतारभेदवच्च सर्वस्य ईश्वरभेदत्वात्, [4] सर्वे जीवगता दोषाः तस्यैव स्युः ।।

एतदुक्तं भवति- 'ईश्वरः[5] स्वरूपेणैव सुरनरतिर्यक्स्थावरादिभेदेनाऽवस्थितः[6] 'इति हि[7] तदात्मकत्ववर्णनं क्रियते । तथा सति, एक-मृत्पिण्डारब्ध-घट-शरावादिगतानि उदकाहरणादीनि सर्वकार्याणि यथा तस्यैव भवन्ति ; एवं, सर्व-जीवगतसुखदुःखादि सर्वम्, ईश्वरगतमेव स्यात् - इति ।

ब्रह्मणः ---- इति चेदिति । न स्वरूपेण परिणामः ; अपि तु शक्तिरेव परिणमते ; 'देवात्म-शक्तिम्' इत्यादिवचनात् इति (शंकाशयः) । **ब्रह्मणोऽनन्या कापीति** । ब्रह्मस्वरूप-मेवेत्यर्थः। विकल्पशिरस्त्वेन अत्यन्तभेदो न शंकितः; तदनभ्युपगमात् । एवं भास्करमतं प्रतिक्षिप्तम्।

तृतीयेऽपीत्यादि । भास्कर-यादवप्रकाशाभ्यां स्वाभिमतार्थसाधक-प्रमाणसिद्ध्यर्थम्, बन्ध मोक्षादिव्यवस्थासिद्ध्यर्थं च प्रपंचस्य पारमार्थ्यमभ्युपेतम् । तत्र मुक्तौ अभेदश्रुतेः, भेदस्य औपाधिकत्वम्, अभेदस्य स्वाभाविकत्वं च, जीव ब्रह्मणोः अभ्युपेतम् । अचिद्ब्रह्मणोस्तु, सर्वस्य ब्रह्मात्मकत्वश्रुतेः, निर्मलत्वादिश्रुतेः, उपाध्यन्तराभ्युपगमे अनवस्थानाच्च, भेदाभेदौ स्वाभाविकावभ्युपगतौ, भास्करमते। यादवप्रकाशमते तु, मुक्तावपि भेदनिर्देशश्रुतेः, जीव ब्रह्मणोश्च भेदाभेदौ-स्वाभाविकावभिमतौ ; इति भिदा । **तस्य च तदभावात्** - ब्रह्मणः जीव-भावात् । सौभरिदृष्टान्तः, एकजीवभेदस्य । स्वावतारदृष्टान्तः, ईश्वरभेदस्य । न हि सौभरि-शरीरभेदात् जीवभेदः ; न च नृसिंहवामनादीनाम् अनीश्वरत्वम् ।

ईश्वरः स्वरूपेणैव इत्यनेन, ईश्वरस्य ब्रह्मांशत्वं निरस्तं भवति । कारणवाक्यानि च 'सदेव सोम्येदमग्र आसीत्' इत्यादीनि ऐककण्ठ्येन ईश्वरस्य जगत्कारणत्वं वदन्ति । जगत्कारणत्वं हि ब्रह्मलक्षणम् । ईश्वरस्य च 'न तत्समश्चाभ्यधिकश्च' इति समाभ्यधिकराहित्यं श्रूयते । तच्च ईश्वरस्य ब्रह्मांशत्वे तु न घटते ; अंशात् अंशिनः अधिकत्वेन ईश्वरादप्यधिकस्य सम्भवात् । तस्मात् समाभ्य-धिकराहित्यात्, जगत्कारणत्वाच्च ईश्वर एव ब्रह्मेति, ईश्वरस्य ब्रह्मांशत्वम् अनुपपन्नम् इत्यभि-प्रायः। **दुःखादि --- स्यात् इति** । न हि त्वया अस्मन्मत इव आत्मशरीर-भावेन तादात्म्यं वर्ण्यते; अपि तु 'ईश्वरः स्वरूपेणैव सुरनरादिरूपेण स्थितः' इति हि तादात्म्यं वर्ण्यते । तथा सति मृत्पिण्डारब्ध घटादिगतोदकाहरादिकार्याणि यथा मृत्पिण्डस्यैव भवन्ति ; एवं सर्वजीवगतसुखदुःख- भागी ईश्वरः स्यात् इत्यर्थः ।

---

1. तृतीयपक्षेऽपि - घ. 2. भेदस्य अनभ्युप - घ. 3. भेदवच्च - ग. 4. त्वाच्च - घ. 5. ईश्वरस्य- घ. 6. स्थितिः - घ. 7. इति - घ.'

[अंशभेदेन परिहारेऽपि असामंजस्यम्]

घट-करकादिसंस्थानानुपयुक्तमृद्द्रव्यं यथा कार्यान्तरानन्वितम् ; एवमेव सुरपशुमनुजादि[1] जीवत्वानुपयुक्तेश्वरः सर्वज्ञः सत्यसंकल्पत्वादिगुणाकरः - इति चेत्, सत्यम् ; [2]स एवेश्वरः[2] [3]एकेनांशेन[3] कल्याणगुणाकरः, [4]स एव च अन्येनांशेन[4] हेयगुणाकरः - इत्युक्तम् ; द्वयोरंशयोः ईश्वरत्वाविशेषात् ।

[भेदाभेदपक्षस्य अत्यन्तहेयत्वम्]

द्वावंशौ व्यवस्थितौ - इति चेत्,

कस्तेन लाभः ? एकस्यैव [5]एकेनांशेन[5] नित्यदुःखित्वात्, अंशान्तरेण सुखित्वमपि न [6]ईश्वरत्वाय[6] कल्पते ; यथा देवदत्तस्य एकस्मिन् हस्ते चन्दनपंकानु[7]लेपः, केयूर[7]-कटकांगुलीयकालंकारः, [8]एतस्यैव[8] अन्यस्मिन् हस्ते मुद्गराभिघातः कालानलज्वालानुप्रवेशश्च,तद्वदेव [9]ईश्वरस्य[9] स्यात् - इति, ब्रह्माज्ञानपक्षादपि पापीयान्, अयं भेदाभेदपक्षः ; अपरिमितदुःखस्य पारमार्थिकत्वात्, संसारिणामनन्त [10]त्वेन[10] दुस्तरत्वाच्च ।

[तादात्म्यस्य शरीरात्मभावनिबन्धनतया सर्वदोषासंस्पर्शः],

तस्माद्विलक्षणः अयं जीवांशः - इति चेत्,

आगतोऽसि [11]तर्हि[11], मदीयं पन्थानम् ; ईश्वरस्य स्वरूपेण तादात्म्यवर्णने, स्यादयं दोषः । आत्म-शरीरभावेन तु तादात्म्यप्रतिपादने न कश्चिद्दोषः । प्रत्युत निखिल[12]भुवन[12]नियमना[13]दि[13] महान् [14]गुणगणः[14] प्रतिपादितो भवति । सामानाधिकरण्यं च मुख्यवृत्तम् ।

घटेत्यादि। यद्यपि कार्यत्वेनोपयुक्तमृदंशस्पर्शी घटादिगतोदकाहरणादि भवति ; तथाऽपि कार्यत्वेनानुपयुक्तमृदंशान्तरस्पर्शी न भवति । तथा जीवत्वेनानुपयुक्तेश्वरांशे जीवगताः दोषाः न प्रसजन्ति इत्यर्थः । सत्यमिति । तत्राऽपि अंशिनः एकत्वात्, ईश्वरस्यैव दोषः प्रसजति इत्यर्थः। द्वावंशाविति । जीवेश्वरांशयोः व्यवस्थितत्वात्, जीवगतदोषः न ईश्वरस्पृक् इति शंकाशयः । कस्तेनेत्यादि। ईश्वरस्य चेतनत्वेन स्वांशजीवगतसर्वदुःखप्रतिसन्धातृत्वात्, अंशान्तरेण सुखित्वं न ईश्वरत्वाय भवति इत्यर्थः । यथेत्यादि ; तत्र दृष्टान्तः । ऐहिकाल्पसुखस्य मोक्षसुखस्य च स्थाने, चन्दनानुलेपः केयूराद्यलंकारश्च । ऐहिकाल्पदुःख नारकानन्तदुःखस्थाने, मुद्गराभिहतिः कालाग्निप्रवेशश्च। पापीयानिति । इदं पापीयस्त्वम् औपाधिकभेदाभेदवादिनोऽपि तुल्यम् ।

---

1. सुरनर, सुरनरमनुजादि, सुरनरपशुमनुजादि - घ. 2. ईश्वरः स एव - घ. 3. तेनांशेन - घ. 4. स एवाऽन्येनांशेन - ग,घ. एकेनांशेन - क. 5. एकांशेन - घ. 6. ईश्वराय - घ. 7. लेपनकेयूर - घ. 8. तस्यैव - क,ग,घ. 9. ईश्वरः - घ. 10. त्वेनाऽपि - घ. 11. हि तर्हि - घ. 12. चेतन - घ. 13. नादिभिः - घ. 14. अयं गुणगणः - क,ग, गुणः - घ.

[भेदाभेदपक्षदूषणम्]

अपि च - [1]एकस्य वस्तुनो हि[1] भिन्नाभिन्नत्वं विरुद्धत्वात् न सम्भवति- इत्युक्तम् । घटस्य [2]पटा[2]द्भिन्नत्वे सति, तस्य [3]तस्मिन्[3] अभावः, अभिन्नत्वे सति, तस्य च भाव इति, एकस्मिन् काले च एकस्मिन् देशे च, [4]एकस्य हि[4] पदार्थस्य युगपत् सद्भावः असद्भावश्च विरुद्धः ।

जात्यात्मा [5] भावः[5] व्यक्त्यात्मना च अभावः - इति चेत्,

[6]जातेः [6] [7]मुण्डेन व्यक्त्या च अभेदे[7] सति, खण्डे मुण्डस्यापि सद्भावप्रसंगः। [8]खण्डेन[8] च जातेः अभिन्नत्वे सद्भावः ; भिन्नत्वे असद्भावः ; अश्वे [9]महिषत्व[9]स्येवेति, विरोधो दुष्परिहर एव

ततोऽप्याधिक्यबुद्ध्या पश्चात्तनत्वात्, अत्रेदं दूषणमुक्तम् । **तस्मादिति** , अगत्या परेण विलक्षणत्वाभ्युपगमशंका । **आगतोऽसीति**, अभ्युपगमेन प्रतिपत्तिदूषणम् । अपसिद्धान्तप्रसंगः इत्यर्थः। **प्रत्युतेति** । न केवलं दोषाभावः ; मंगलगुणसिद्धिश्च इत्याशयः । **नियमनादि** इति आदिशब्देन धारकत्वशेषित्वाद्युच्यते । एवं श्रुतेः जीवब्रह्मणोर्भेदपरत्वं दूषितम् ।

अपिचेत्यादिना, सामान्येन सर्वस्य वस्तुनः भिन्नाभिन्नत्वं निरस्यति । **इत्युक्तमिति** । निर्विशेषवस्तुनिरासे प्रसंगादुक्तम् इत्यर्थः । तत्र विरुद्धत्वहेतोः सिद्धवत्कारेण असम्भव उक्तः । **घटस्येति**। (पूर्वमुक्तं विरुद्धत्वमेव) कथम् इति शंकायां तदुपपाद्यते । घटस्य पटाद्भिन्नत्वं नाम, तस्य तत्राभावः। अभिन्नत्वं नाम, तत्र तस्य भावः इत्यर्थः ।

जातेरिति। अभिन्नत्वपक्षे दूषणम् । जाति-व्यक्त्योरभेदश्चेत्, खण्ड-मुण्ड व्यक्तिद्वयेन जातेरभेदात्, खण्डस्य मुण्डत्वप्रसंगः इत्यर्थः । भिन्नत्वपक्षे - भेदः व्यक्तिगतः, अभेदश्च जातिगतः इति, नैकस्य द्व्यात्मकतेति दूषणस्य स्पष्टत्वात् तदनुक्तम् । **खण्डेन चेति**, भिन्नाभिन्नत्वपक्षे दूषणम् । जातेः मुण्डस्य च अभेदात्, खण्डस्य मुण्डत्वप्रसंगः । जातेः मुण्डस्य च भेदात्, अश्वस्य गजत्वाभाववत् खण्डस्य मुण्डत्वाभावप्रसंगः - इत्येवं युगपत् एकत्रैकस्य भावाभावविरोधः दुष्परिहरः इत्यर्थः । 'जातिरूपेणाभेदः, व्यक्तिरूपेण भेदः' इत्येवंरूपभेदाभेददूषणेन, यादवप्रकाशाभिमतः 'द्रव्यरूपेणाभेदः, अवस्थात्मना भेदः' इत्येवं रूपभेदाभेदश्च निरस्तो भवति, तुल्यन्यायत्वात् ।

---

1. एकस्यैव वस्तुनो - घ. 2. घता - घ. 3. तादात्म्यतया तस्मिन् - घ. 4. सद्भावः , तादात्म्यतया भावः - घ. 5. एकस्य - घ. 6. च भावः - घ. 7. न ; जातेः - घ. 8. मुण्डेन च अभेदे - ख. मुण्डेन अभेदे , मुण्डाभेदे - घ. 8. खण्डे - घ.

जात्यादेः वस्तुसंस्थानतया वस्तुनः प्रकारत्वात्, प्रकारप्रकारिणोश्च पदार्थान्तरत्वम्, प्रकारस्य पृथक्सिद्ध्यनर्हत्वम्, पृथगनुपलम्भश्च, [1]तस्य[1] संस्थानस्य च अनेकवस्तुषु प्रकारतया अवस्थितिश्च - इत्यादि, पूर्वमेवोक्तम् । [2]'सोऽयम्'[2] इति बुद्धिः प्रकारैक्यात् ; 'अयमपि दण्डी' इति बुद्धिवत् ।

[3]अयमेव च[3] जात्यादिः प्रकारो वस्तुनः, 'भेदः' इत्युच्यते ।

तद्योग एव [4]'वस्तुभिन्नम्'[4] इति [5]व्यवहारहेतुः - इत्यर्थः[5] । स च वस्तुनो भेदव्यवहारहेतुः, [6]स्वस्य[6] च*; संवेदनवत् । यथा संवेदनं, [7]वस्तुनो[7] व्यवहारहेतुः; स्वस्य व्यवहारहेतुश्च भवति ।*

[प्रत्यक्षस्य सन्मात्रग्राहित्वादिनिरासः, यादवप्रकाशमतनिरासोपसंहारश्च]

अत [8]एव[8] - सन्मात्रग्राहि प्रत्यक्षं ; न भेदग्राहि - इत्यादिवादाः [9]निरस्ताः[9]; जात्यादिसंस्थानसंस्थितस्यैव वस्तुनः प्रत्यक्षेण गृहीतत्वात्, तस्यैव संस्थानरूप [10]जात्यादेः[10], प्रतियोग्यपेक्षया भेदव्यवहार[11]हेतुत्वाच्च[11]।

वस्तुसंस्थानतया वस्तुनः प्रकारत्वात् - वस्त्वपृथक्सिद्धधर्मत्वेन वस्तुनो विशेषणत्वात् । **प्रकार ---- पदार्थान्तरत्वमिति** । 'इदम् इत्थम्' इति प्रकारप्रकारिभावेन प्रतीतेः नात्र अभेदः इति स्पष्टम् । **पृथक्सिद्ध्यनर्हत्वम्** इत्यनेन, सहोपालम्भनियमः प्रत्युक्तः । मत्वर्थीयप्रत्ययनिरपेक्ष-सामानाधिकरण्यमपि अपृथक्सिद्धधर्मवाचित्वात् इत्युक्तं भवति । एकशब्दानुविद्धप्रत्ययः धर्म्यैक्यात्; न तु धर्म धर्मिणोरभेदात् इति स्फुटतरम् । **संस्थान --------- वस्थितिश्च** इत्यनेन, प्रथम-पिण्डग्रहणेऽपि संस्थानस्य ग्रहणमस्ति इत्युक्तं भवति । अन्यथा द्वितीयपिण्डग्रहणे अनुवृत्तिः न हि बोद्धुं शक्यते। **इत्यादीति** । निर्विकल्पकप्रत्यक्षेण अभेदेन गृहीतम् इति चेत् तदपि प्रत्युक्तम् इति आदि शब्दाभिप्रायः । **प्रकारैक्यात्** एकप्रकारत्वात्, तुल्यप्रकारत्वात् इत्यर्थः। संस्थानातिरिक्तस्य (जातिरूपस्यार्थस्य) अदर्शनात् (सादृश्यायत्तस्य) अनुवृत्तव्यवहारस्य अन्यथासिद्धत्वेन (तत्कल्पकत्वायोगात्) संस्थानमेव जातिः इत्यर्थः। **सोऽयमिति बुद्धिः** - अनुवृत्त-विषयव्यवहारान्विता बुद्धिः, तज्जातीयत्वबुद्धिः। 'अयमपि गौः' इति बुद्धिः । **दण्डीति बुद्धिवदिति** । 'अयं दण्डी, अयमपि दण्डी' इति व्यवहारे दण्डित्वं नाम जातिः न ह्यस्ति इत्यर्थः ।

---

1. तस्य च - क,ग. 2. सोऽयं देवदत्तः - घ. 3. अयमेव - घ. 4. वस्तुनः भिन्नम् - ग. वस्तुनो भिन्नः- घ. 5. व्यवहारात् - घ. 6. स्वयम् - ग. 7. वस्तुनोऽन्य - घ. अन्य - घ. 8. एव च - क,ग,घ. 9. परास्ता-घ. 10. जात्यादि - घ. 11. हेतुः - घ.

स्वरूपपरिणामदोषश्च पूर्वमेवोक्तः ।

[इति यादवप्रकाशमतनिराकरणम्]

[स्वमतेन तत्त्वमसिवाक्यार्थोपपादनम्]

'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयति, एषत आत्माऽन्तर्याम्यमृतः' (बृ.उ.5-77)

'य आत्मनि तिष्ठन् आत्मनोऽन्तरः यमात्मा न वेद, यस्यात्मा शरीरं, य आत्मानमन्तरो यमयति, स त आत्मान्तर्याम्यमृतः ' (बृ.उ.मा.पा.5-7-26)

'यः पृथिवीमन्तरे संचरन्, यस्य पृथिवी शरीरं, यं पृथिवी न वेद' (सुबा.उ.7) **इत्यादि,**

'योऽक्षरमन्तरे संचरन्, यस्याक्षरं शरीरं, यमक्षरं न वेद' (सुबा.उ.7)

'द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥'

(मुण्ड.उ.3-1-1)

'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा' तै.आर.3-11 -3)

तद्योग एवेति । अभेदबुद्धिविरोधी हि भेदः । जात्यादिग्रहणे अभेदबुद्धिनिवृत्तेः, जात्यादिरेव भेदः इत्यर्थः । **स चेति** । स्वपरनिर्वाहको जात्यादिः इत्यर्थः । **संवेदनवदिति** । संवेदनस्य स्वपरव्यवहारहेतुत्वं हि पराभ्युपगतम् ।

अत एवेति । उक्तार्थेनैव परोक्ता भेदस्य, प्रमाणानुपपत्तिः प्रमेयानुपपत्तिश्च परिहृता भवति (इत्याशयः) **इत्यादि** इति 'आदि'शब्देन प्रमेयानुपपत्तिर्विवक्षिता । **प्रत्यक्षेणेति** । 'प्रत्यक्ष-ज्ञानम् एकक्षणवर्त्यपि, तस्मिन्नेव क्षणे जात्यादिविशिष्टमेव वस्तु गृह्णाति' इत्यनेन प्रमाणानुपपत्तिः परिहृता । स्वरूपधर्मविकल्पेन हि प्रमेयानुपपत्तिः। तत्र स्वरूपव्यवहारवत् भेद-व्यवहारप्रसंगः गोत्वादिव्यवहारादेव प्रत्युक्तः ; 'भिन्नः' इति व्यवहारविशेषस्य प्रतियोग्यपेक्षत्वम् 'दाराः' इत्यादौ पुंस्त्व बहुत्वादिवत् शब्दस्वभावायत्तम् इति नार्थस्वरूपदोषः ; हानादिव्यवहारे जात्यादिव्यवहारे च प्रतियोगिनिरपेक्षत्वात् । स्वपरनिर्वाहकत्वाभ्युपगमेन, जात्यादेरेव भेदत्वाच्च अनवस्थान्योन्याश्रयौ परिहृतौ इत्यर्थः । एवम् जीवब्रह्मस्वरूपैक्ये निर्दोषत्वश्रुतिबाध उक्तः । अचिद्ब्रह्मैक्यप्रयुक्त-दोषोऽपि भास्करमत इव अत्राप्यापततीत्याह **स्वरूपेति** । **दोषः** - अविकारत्व श्रुतिबाधः । एवं द्वितीयश्लोकार्थो विवृतः ।

यः पृथिव्यामित्यादि । पूर्वमीषद्विवृतं प्रथमश्लोकार्थं महाविस्तरेण वक्तुमारभते । तत्र 'तत्त्वमसि' इति सामानाधिकरण्यस्य भेदश्रुति-घटकश्रुत्योरविरोधेन अर्थं वक्ष्यन्, तदुपयोगिनीः घटकश्रुतीः उदाहरति । **यः पृथिव्याम् इति**, काण्वशाखावाक्यम् । **य आत्मनि** इति माध्यन्दिन-

तत्सृष्ट्वा तदेवाऽनुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाऽभवत्' (तै.उ.आन.6-2,3) इत्यादि,

'[1]सत्यं[1] चाऽनृतं च सत्यमभवत्' (तै.उ.आन.6-3)

'अनेन जीवेनाऽऽ [2]त्मना[2]' (छा.उ.6-3-2) इत्यादि,

'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनाऽमृतत्वमेति' (श्वे.उ.1-6)

भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं [3]ब्रह्ममेतत् [3](श्वे.उ.1-12)

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् (श्वे.उ.61.3)

'प्रधानक्षेत्रज्ञपतिर्गुणेशः' (श्वे.उ 6-16)

'ज्ञाज्ञौ द्वावजावीशनीशौ' (श्वे.उ.1-9)

इत्यादिश्रुतिशतैः, तदुपबृंहणैः-

'जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम्' (वा.रा.यु.126-16)

'यत्किंचित् सृज्यते येन सत्त्वजातेन वै द्विज ।

तस्य सृज्यस्य सम्भूतौ तत्सर्वं वै हरेस्तनुः ।।' (वि.पु.1-22-38)

शाखावाक्यम् । अनेन वाक्यद्वयेन अचिज्जीवान्तर्यामित्वं सिद्धम् । 'उभयेऽपि हि भेदेनैनमधीयते' (ब्र.सू. 1-2-21) इति सूत्रानुसारात् उभयवाक्योपादानम् । यः **पृथिवीम्** इति सुबालोपनिषद्वाक्यं कारणावस्थस्याऽपि अन्तर्यामित्वं वक्तुं , देवताविशेषं ज्ञापयितुं च । 'योऽक्षरम्' इत्याद्युदाहर्तव्येऽपि 'यः पृथिव्याम्' इत्याद्युपादानं प्रकरणज्ञापनार्थम् । **अन्तर्याम्यमृतः** इत्यत्र 'अमृत ' शब्दस्य, **'एष------- आत्माऽपहतपाप्मा'** इत्यत्र 'अपहतपाप्म' शब्दस्य चार्थः- तद्गतदोषासंस्पृष्टत्वम् - इति, तदुक्तेः प्रदर्शनपरत्वं दर्शयितुं 'द्वा सुपर्णा' इत्याद्युदाहृतम्; न तु भेदश्रुतित्वात् । भेदश्रुतयो हि उत्तरत्र वक्ष्यन्ते । 'अन्तःप्रविष्टः ' इतीदमपि घटकवाक्यम्, सर्वात्मत्वं ; तदन्तर्यामित्वात्, न तु स्वरूपैक्यात् इति हि अस्यार्थः । **'तत्सृष्ट्वा'** इति, तच्छब्दवाच्यत्वं तत्तदनुप्रवेशकृतम् ; न तु स्वरूपैक्यकृतमिति स्पष्टार्थकं वाक्यम् । **सत्यं चाऽनृतं च** इति वाक्यं, तत्तदनुप्रवेशेऽपि तद्गतदोषासंस्पृष्टत्वमाह । चिदचिदनुप्रवेशेन तत्तच्छब्दवाच्यमपि ब्रह्म, **सत्यमभवत्** अप्रच्युतस्वस्वभावमभवत् इत्यर्थः । नामरूपव्याकरणश्रुतेरपि घटकत्वात् तामाह **'अनेन' इति । 'जीवेन'** इति निर्देशस्य, अनुप्रवेशकृतत्वं पूर्वोदाहृतवाक्यैः स्पष्टम् । **'पृथक्'** इति भेदश्रुतिः । **तेन जुष्टः** - ब्रह्मणाऽनुगृहीतः । पृथक्त्वज्ञानात् अमृतत्वमेति इत्यर्थः । **भोक्तेति** । भोक्तारम् इत्यर्थः । भोक्तृभोग्यनियन्तॄन् यथावत् ज्ञात्वा, त्रिविधमेतत् ब्रह्म सर्वं मया तव प्रोक्तम् इत्यर्थः । **नित्यो नित्यानामिति**, आत्मनां नित्यत्वं बहुत्वं च दर्शयति । **स्थैर्यं ते वसुधातलम्**

1.सत्सत्यं - ग. 2. त्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि - घ. 3. ब्रह्म एतत् - क,ग. ब्रह्मैतत् -ख.

'*अहमात्मा गुडाकेश सर्वभूताशयस्थितः*' (भ.गी.10-20)

'*सर्वस्य चाऽहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च*' (भ.गी.15-15)

इत्यादिवेदविदग्रेसरवाल्मीकि-पराशर-द्वैपायनवचोभिश्च [1], परस्य ब्रह्मणः सर्वस्याऽऽत्मत्वावगमात्, चिदचिदात्मकस्य[2] वस्तुनः [3]तच्छरीरत्वावगमाच्च, शरीरस्य च शरीरिणं प्रति प्रकारतयैव [4]पदार्थत्वात्[4], शरीरशरीरिणोश्च धर्म-[5]भेदेऽपि[5] तयोरसंकरात्, 'सर्वशरीरं ब्रह्म' इति ब्रह्मणो वैभवप्रतिपादयद्भिः [6] सामानाधिकरण्यादिभिः मुख्यवृत्तैः सर्वचेतनाचेतनप्रकारं [7]ब्रह्मैव[7] अभिधीयते ।।

[सामानाधिकरण्यस्य स्वमते मुख्यता]

सामानाधिकरण्यं हि । द्वयोः पदयोः प्रकारद्वयमुखेन एकार्थनिष्ठत्वम् । तस्य च [8]एतस्मिन्[8] पक्षे मुख्यता । तथा हि - 'तत् त्वम्' इति सामानाधिकरण्ये, 'तत्' इत्यनेन जगत्कारणं सर्वकल्याणगुणाकरं निरवद्यं ब्रह्म उच्यते । 'त्वम्' [9]इति च[9] [10]चेतनसमानाधिकरणवृत्तेन [10], जीवान्तर्यामि रूपं, तच्छरीरं तदात्मतया अवस्थितं,

---

इति । भूम्याः स्थिरत्वस्वभाववत्त्वं त्वदधीनम् इत्यर्थः । सामानाधिकरण्यप्रयोगः कार्यकारणभावात् लाक्षणिकः। (अतः) सर्वस्य उत्पत्ति-स्थिति प्रवृत्तयः भगवदधीनाः इत्युक्तं भवति । **यत्किंचिदिति ।** कृत्स्नकार्यवर्गस्य कारणं तत्तत्कारणान्तर्यामितया तत्तच्छरीरकं ब्रह्मैव इत्यर्थः । **अहमात्मेति** 'आत्म'शब्देन सर्वमपि शरीरम् इति अर्थात् सिद्धम् । **सर्वस्य चाऽहम्** इति, अन्तर्यामित्वपरम् । 'हृदि ह्ययमात्मा' इति जीवस्य हृत्स्थत्वात्, तदन्तर्यामी च हृदि स्थित एवेत्यर्थः

शरीरस्य चेति । अनेन आकृत्यधिकरणन्यायः (पू.मी.1-3-12) स्मारितः । **असंकरादिति** महापातकिनः तत्संसर्गिणश्च धर्मभेदेऽपि, संसर्गप्रयुक्तं पातकित्वमापतति । काष्ठस्य रुमायाश्च धर्मभेदे सत्येव काष्ठस्य संसर्गप्रयुक्तं लवणत्वं दृश्यते ; एवं धर्मभेदेऽपि संसर्गप्रयुक्तो यः संकरः, तस्य शरीरशरीरिणोरसम्भवात् इत्यर्थः । 'धर्मभेदेन च' इति पाठः । एवमुक्तहेतुभिः सर्वशरीरं ब्रह्म । **सामानाधिकरण्यादीति** , 'आदि' शब्देन व्यधिकरणवाक्यविशेषाः शरीर-तनु-अंगादि-शब्दवन्तोविवक्षिताः । सर्वशरीरत्वात् सर्वचेतनाचेतनप्रकारं ब्रह्मैव, सर्वशब्दानां मुख्याभिधेयम् इत्यर्थः । **निरवद्यमिति,** कारणत्वशंकितदोषव्यावर्तकशोधकवाक्यार्थमाह । **त्वमिति चेति ।** तच्छब्देन (साकं) समानाधिकरणवृत्तेन 'त्वम्' इति पदेन इत्यर्थः । **तच्छरीरं -- वस्थितमिति ।** 'त्वं' शब्दस्य जीवान्तर्यामिपरत्वे लक्षणा स्यादित्यत्र (उत्तरम्) । **इतरेषु ------ स्यादिति ।** ब्रह्माज्ञानपक्षे-प्रवृत्तिनिमित्ताभावेन सामानाधिकरण्यलक्षणहानिः, अविद्याश्रयत्वदोषश्चच स्यात् ।

---

1. नादिभिश्च - घ. 2. त्मक - घ. 3. शरीर - घ. 4. तत्पद(र्थत्वात् - ग. 5. भेदेन - घ. 6. प्रकाशयद्भिः - घ. 7. ब्रह्म च - घ. 8. एकस्मिन् - घ. 9. इति च पदेन, इति पदेन च, इत्यनेन च, इति - घ. 10. समानाधिकरणवृत्तेन , सामानाधिकरण्यवृत्तेन, वाक्येन - घ.

तत्प्रकारं ब्रह्म उच्यते। इतरेषु पक्षेषु सामानाधिकरण्यहानिः, ब्रह्मण: सदोषता च स्यात्।

[चिदचितोः ब्रह्मप्रकारत्वसमर्थनम्]

एतदुक्तं भवति - 'ब्रह्मैवेवमवस्थितम्' इत्यत्र 'एवं' शब्दार्थभूत [1]प्रकारस्तयैव विचित्रचेतनाचेतना [2]त्मक[2]प्रपंचस्य स्थूलस्य [3]सूक्ष्मस्य च[3] सद्भावः। तथा [4]च[4] 'बहुस्यां प्रजायेय' इति, अयमर्थः सम्पन्नो भवति ; तस्यैवेश्वरस्य कार्यतया कारणतया च [5]नानासंस्थानसंस्थितस्य [5], संस्थानतया चिदचिद्वस्तुजातम्, अवस्थितम् - इति।

ननु च - संस्थानरूपेण प्रकारतया 'एवं शब्दार्थत्वं [6]जाति[6]-गुणयोरेव [7]दृष्टं[7] न द्रव्यस्य। [8]स्वतन्त्र[8]सिद्धियोग्यस्य पदार्थस्य, 'एवं' शब्दार्थतया ईश्वरस्य प्रकारमात्रत्वम् [9]अयुक्तम् - इति चेत्, [9]

द्वितीय-पक्षेऽपि-ब्रह्मण एव तच्छब्दावगतकल्याणगुण-विरुद्धाज्ञत्वादिप्रसंग इति, सर्वज्ञत्वादि-व्याघातादेव 'त्वं' शब्दस्य जीवत्वप्रहाणेन वस्तुमात्रपरत्वे स्वाभिमुखचेतनत्वरूपप्रवृत्तिनिमित्त-हानमापतति। स्वाभिमुखचेतनो हि 'त्वं' शब्दवाच्यः। आभिमुख्यं च श्वेतकेतोः जीवत्वविशिष्टस्यैव; न वस्तुमात्रस्य। अतः सामानाधिकरण्यलक्षणहानिः सदोषत्वं च इत्यर्थः। तृतीयेऽपि पक्षे - सार्वज्ञयादिगुणकत्वात्, तच्छब्दवाच्यतया प्रकृतः ईश्वर इति, ब्रह्मांशभूतजीवेश्वरवाचिपदयोः 'घटः शरावः' इतिवत् सामानाधिकरण्यमयुक्तम् - (इत्यादि)।

एतदुक्तमिति। सृष्टेः प्राक् एकत्वावधारणात्, 'यतः प्रधानपुरुषौ' इति प्रधानपुरुषयोरपि उत्पत्तिमत्त्वदर्शनाच्च तदानी न शरीरशरीरिभावः सिध्यतीति, द्रव्यैकत्वमेवाभ्युपगन्तव्यम् इत्यत्र (उत्तरम्)। **ब्रह्मैवेवमिति**। यद्विशेषणं वेदान्तवाक्येषु श्रुतं तत्तद्बाहुल्यात्, तदभिप्रेत्य अत्र 'एवं'शब्दः प्रयुक्तः। (अनेन) यथा निमित्तकारणत्वं निमित्तत्वोपयोगिसर्वज्ञत्वादि सापेक्षम् एवम्, उपादानत्वमपि निष्कृष्टस्वरूपस्यानुपपन्नत्वात् प्रकृतिपुरुषविशिष्टत्व सापेक्षमिति, कारण-विषय-मेकत्वावधारणं न कारणत्वोपयुक्तविशेषणविरोधीति, तदानीमपि चिदचिद्विशिष्टमेव ब्रह्म इत्यभि-प्रायेण परिहार उच्यते। एवं शब्दार्थभूतप्रकारतया - तत्तच्छब्दप्रवृत्तिनिमित्तभूतप्रकारतया। सूक्ष्मस्येत्यनेन, एकत्वावधारणं व्याख्यातम्। नामरूपविभागानर्हसूक्ष्मदशापत्तिविवक्षया एकत्वा-वधारणम्। नामरूपविभागार्ह- स्थूलदशापत्त्या, बहुत्वनिर्देशः इति भावः। संस्थानतया-अपृथक्सिद्धधर्मतया। विशिष्टं वस्तु एकमेव अवस्थाद्वयान्वितमिति कार्यकारणयोरेकत्वसिद्धिरित्यर्थः।

1.प्रकारान्तर - घ. 2. त्मकस्य - घ. 3. सूक्ष्मस्य - घ. 4. चाऽयमर्थः - घ. 5. संस्थितस्य - घ. 6.जातमिति - घ. 7. दृष्टव्यम् - घ. 8. स्वतन्त्रस्य -घ. 9. अयुक्तम् -ख. अयुक्तमिति - घ.

उच्यते - द्रव्यस्यापि दण्ड[1]-कुण्डलादेः द्रव्यान्तरप्रकारत्वं दृष्टमेव ।

[शरीरवाचिनां आत्मपर्यन्तत्वेन सामानाधिकरण्यम्]

ननु च - "दण्डादेः स्वतन्त्रस्य [2] द्रव्यान्तरप्रकारत्वे, मत्वर्थीय"प्रत्ययो[3] दृष्टः; यथा - 'दण्डी कुण्डली' इति । अतः गोत्वादितुल्यतया चेतनाचेतयस्य द्रव्यभूतस्य वस्तुनः, ईश्वरप्रकारतया सामानाधिकर "ण्येन प्रतिपादनं, [4] न युज्यते -

अत्रोच्यते - 'गौः, अश्वः, मनुष्यः, देवः' इति भूत "संघात"रूपाणां द्रव्याणामेव, 'देवदत्तः, मनुष्यो जातः पुण्यविशेषेण ; यज्ञदत्तः, गौर्जातः "पापेन कर्मणा, [6] अन्यश्चेतनः, पुण्यातिरेकेण देवो जातः' इत्यादि, देवादिशरीराणां चेतनप्रकारतया लोकवेदयोः सामानाधिकरण्येन प्रतिपादनं दृष्टम् ।

ननु च इति । जातिगुणयोरेव द्रव्यापृथक्सिद्धिरिति, तयोरन्यतरवाचित्वमेव मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यप्रयोजकम् । द्रव्यस्य तु दण्डकुण्डलादेः अपृथक्सिद्ध्यभावात्, तद्वाचिशब्दस्य मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिलरण्यं नोपपद्यते - इति (चोद्यस्य) अभिप्रायः । संस्थानरूपेण प्रकारतया - अपृथक्सिद्धविशेषणरूपेण प्रकारतया । **दृष्टमिति** । 'घटः, पटः, शुक्लः' इत्यादिषु (इत्यर्थः) एवं शब्दार्थत्वम् इति, 'एवं'शब्दः धर्ममुखेन धर्मिवाचिशब्दानां प्रदर्शनार्थः। **स्वतन्त्र ---- अयुक्तमिति** । पृथक्सिद्ध्यर्हस्य चिदचित्पदार्थस्य ईश्वरपर्यन्तशब्दाभिधेयतया ईश्वरप्रकारत्वमयुक्तमित्यर्थः ।

उच्यत इति, (पूर्वोक्तानुपपत्तिं) परिहरति । द्रव्यस्यापीति । (अनेन) किं द्रव्यस्य द्रव्यान्तरं प्रति प्रकारत्वमयुक्तमिति वा ? नियतप्रकारत्वमयुक्तमिति वा ? इति चोद्याशयं विकल्प्य, प्रथमं शिरः प्रतिवदति । दृष्टमेवेति । दण्डकुण्डलादेः प्रकारत्वे दृष्टेऽपि, तस्य पृथक्सिद्ध्यर्हत्वं प्रमाणान्तरसिद्धम् । अत्र तु चिदचितोः ब्रह्मप्रकारत्वं दृष्टम् ; पृथक्सिद्ध्यर्हत्वे तु, न प्रमाणमिति, नियतप्रकारत्वं सिद्धमित्यभिप्रायः ।

ननु चेति । द्रव्यस्य द्रव्यान्तरं प्रति प्रकारत्वे सत्यपि, नियतप्रकारत्वायोगात्, न मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यम् इत्यर्थः । **गौः, अश्वः इत्यादि** । (अनेन) द्रव्यस्य द्रव्यान्तरं प्रति प्रकारत्वं, प्रभाप्रभावत्सु दृष्टमिति हृदि निधाय, द्रव्यस्य द्रव्यान्तरविशेषणत्वे मत्वर्थीयनिरपेक्षसामानाधिकरण्यप्रयोगं दर्शयति । **भूतेति**, द्रव्यत्वहेतुतयोक्तम् । **'पुण्यविशेषेण' इत्यादि**, देवमनुष्यादिशब्दस्य पिण्डमात्रपर्यन्तत्वशंकाव्यावृत्त्यर्थमुक्तम् । न हि पिण्डस्या-चेतनस्य पुण्यपापवत्त्वम् । **देवादीति** । (पूर्वमुक्तेन) गौरश्वः (इत्यादिना) नात्र पुनरुक्तिः

---

1. द्रव्य - घ. 2. दण्डादेः - घ. 3. प्रत्यययोगो - घ., प्रयोगो - घ. 4. रण्यवर्णनम् - घ. 5. संघात-विशेष - घ. 6. पापकर्मणा - घ., पापविशेषेण कर्मणा - घ.

अयमर्थः - जातिर्वा [1]द्रव्यं वा गुणो वा[1] न तत्राऽऽदरः । कंचन द्रव्यविशेषं प्रति विशेषणतयैव यस्य सद्भावः; तस्य तदपृथक्सिद्धेः, [2]तत्प्रकारतया[2] तत्सामानाधिकरण्येन प्रतिपादनं युक्तम् । [3]यस्य[3] पुनर्द्रव्यस्य पृथक्सिद्धस्यैव, [4]कदाचित् क्वचित्[4] द्रव्यान्तरप्रकारत्वमिष्यते; तत्र [5]मत्वर्थीयप्रत्ययः[6] - इति विशेषः ।

[सर्वेषां शब्दानामीश्वरपर्यन्तता, एकविज्ञानेन सर्वविज्ञानोपपत्तिश्च]

एवमेव स्थावरजंगमात्मकस्य [7]सर्वस्य[7] वस्तुनः ईश्वरशरीरत्वेनतत्प्रकारतयैव-स्वरूपसद्भाव इति, [8]तत्प्रकारी[8] ईश्वर एव [9]तत्तच्छब्देना[9]भिधीयत इति, [10]तत्सा[10]मानाधिकरण्येन प्रतिपादनं युक्तम् । [11]तदेतत् सर्वं[11] पूर्वमेव नामरूप-[12]व्याकरण[12]श्रुतिविवरणे प्रपंचितम् ।

शंकनीया; शब्दपरत्वेन अर्थपरत्वेन च प्रयुक्तत्वात् । 'गौः, अश्वः, मनुष्यः, देवः' इति शब्द-वाच्यानां देवत्व-मनुष्यत्वादिसंस्थानविशिष्टानां शरीराणाम् इत्यर्थः । **चेतनप्रकारतया** - चेतनस्य नियतप्रकारतया । 'देवो, जातः' इत्यादिशब्दः प्रतिपादनविशेषणभूतः । 'गौः, अश्वः' इत्यादि-शब्दवाच्यानां, भूतसंघातरूपतया द्रव्याणां, देवत्वमनुष्यत्वादिसंस्थानविशिष्टानां शरीराणां, चेतनप्रकारतया 'देवदत्तो मनुष्यो जातः, पुण्यविशेषेण' इत्यादिकं सामानाधिकरण्येन प्रतिपादनं, लोकवेदयोर्दृष्टम्-इत्यन्वयः । अर्थसामानाधिकरण्याद्धि शब्दसामानाधिकरण्यम् । शरीरस्य चेतन-सामानाधिकरण्यं नाम चैतन्यसमानाश्रयत्वम् । शरीरं चैतन्यं च चेतनविशेषणम् । तत्र औपाधिकत्वं स्वाभाविकत्वं चेति विशेषः ।

अयमर्थ इति । मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्ये प्रयोजकम्, अद्रव्यत्वे सति विशेषणत्वमेव । तस्मात् अत्र ('गौः, अश्वः' इति द्रव्यवाचिस्थले) सामानाधिकरण्यं लाक्षणिकम् इत्यत्र (उत्तरमिदम्) सामानाधिकरण्ये जातित्वं वा गुणत्वं वा अन्यद्वा न प्रयोजकम् ---- तत्र अव्याप्तप्रयोजककल्पनेन अमुख्यत्वाश्रयणमयुक्तम् इत्यर्थः । **कंचन** इति, सर्वप्रयोगानुगतं प्रयोजकमाह । तदपृ----- कारतया - तत्प्रकारत्वेन तदपृथक्सिद्धेः । द्रव्यवाचिपदानामपि प्रकारिपर्यन्तत्वे, दण्डकुण्डलादेरपि तथा प्रसजेत् इति शंकायाम् तद्वैषम्यमाह **यस्य पुनरिति** ।

एवमेवेति । (यथा) जीवं प्रति शरीरस्य नियतप्रकारत्वेन तद्वाचिपदानां तत्पर्यन्तत्वं, (तथा- इत्यर्थः) । **तदेतदिति** । एवं सद्विद्योपसंहारगतं 'तत् त्वम् असि' इति सामानाधिकरण्यं, न द्रव्यैक्यपरम्; अपि तु आत्मशरीरभावपरम् इत्युक्तम् ।

---

1. गुणो वा द्रव्यं वा - क,ग. 2. प्रकारतया - घ. 3. यत्र - घ. 4. कदाचित् - घ. 5. विशेषण - घ. 6. मत्वर्थीयः - घ. 7. सर्वस्यैव - घ. 8. तत्प्रकारः - घ. 9. तच्छब्देना - घ. 10. तत्तत्सामा - घ. 11. तदेतत् - ख. 12. रूप - ख.

अतः प्रकृति-पुरुष-महदहंकार-तन्मात्र [1]भूतेन्द्रिय-तदा[1]रब्धचतुर्दश-भुवनात्मक-ब्रह्माण्डतदन्तर्वर्तिदेवतिर्यङ्मनुष्यस्थावरादि-[2]सर्वप्रकार[2]संस्थान-संस्थितं कार्यमपि सर्वं ब्रह्मैवेति, कारणभूतब्रह्मविज्ञानादेव सर्वं विज्ञातं भवतीति, एकविज्ञानेन सर्वविज्ञानमुपपन्न[3]तरम् ।

तदेवं-कार्यकारणभावादिमुखेन कृत्स्नस्य चिदचिद्वस्तुनः [4]परब्रह्म[4]प्रकारतया तदात्मकत्वम् - उक्तम् ।

[ब्रह्मणो जगदुपादानतायाः निर्विकारत्वविघटकत्वाक्षेपः]

ननु च - परस्य ब्रह्मणः स्वरूपेण परिणामास्पदत्वं, निर्विकार निरवद्य[5]श्रुतिव्याकोप[5]प्रसंगेन निवारितम् ।

अत इति । 'तत्त्वमसि' इति वाक्यस्य विशिष्टैक्यपरत्वोपपादनात् इत्यर्थः । एवम् उपक्रमगतम् एकविज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यमपि विशिष्टैक्यपरम् (इत्याशयः) ।

प्रकृति-पुरुषेत्यादि । सद्विद्यायां तेजोबन्नसृष्टिकथनम् अन्येषामपि प्रदर्शनार्थम् इत्यभिप्रायः । **स्थावरादिति** 'आदि'शब्देन, देवतिर्यगादिषु अवान्तरजातिभेदो विवक्षितः । **सर्व - --- संस्थितम्** - नानाविधानसंस्थानविशिष्टम् । विशिष्टमेव कारणम्, तदेव कार्यमिति, कार्यकारणयोः अनन्यत्वात्, तज्ज्ञानेन तज्ज्ञानम् इत्यर्थः । **उपपन्नतरमिति** । मुख्यतया उपपन्नमित्यर्थः ।

कार्यकारणभाव शब्देन 'सन्मूलाः, सत्प्रतिष्ठाः' इत्यस्यार्थो विवक्षितः । आदिशब्देन सदायतनत्वं विवक्षितम् । तच्च धार्यधारकभावः । **प्रकारतयेति** । न तु स्वरूपैक्येन तादात्म्यमित्यर्थः। तादात्म्यं द्विविधम् ; कार्यकारणभावात्, प्रकारप्रकारिभावाच्च । तत्र (आद्येनैव द्वितीयोऽपि) सिद्धः। विशिष्टस्यैव कार्यत्वकारणत्वयोः योगात्, अन्तःप्रविश्य धारकत्वेन नियन्तृत्वेन च स्थितिहेतुत्वाच्च। अतः 'सन्मूलाः' इति वाक्ये उभयविधं तादात्म्यमभिप्रेतम् - इति ग्रन्थाभिप्रायः । 'सर्वं खल्विदं ब्रह्म' इत्यस्यापि, अयमेवार्थः ।

एकविज्ञानेनेति । (अनेन) 'प्रकृतिश्च' इति सूत्रार्थमाह । अनेन श्रुतिश्च स्मारिता । **अत्रोच्यत इति** । उपादानत्वं सद्वारकमिति, (निर्विकारत्वस्य) अविरोधः इत्यभिप्रायः । **अविशेषेण इति,** 'यतो वा इमानि' 'सन्मूलाः सोम्येमाः' 'इदं सर्वमसृजत' 'निःसरन्ति यथा लोहपिण्डात् तप्ताः स्फुलिंगकाः । सकाशादात्मनस्तद्वत् आत्मानः प्रभवन्ति हि' । इत्यादि-

---

1. भूतेन्द्रियैस्तदा - घ. भूतेन्द्रियैरा - घ. 2. प्रकार - घ. 3. तरं भवति - ख. 4. ब्रह्म - घ. 5. कोप-ख.

प्रकृतिश्च प्रतिज्ञा - दृष्टान्तानुपरोधात्' (ब्र.सू.1-4-23) इति, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा- [1]मृत्तत्कार्य[1]दृष्टान्ताभ्या परमपुरुषस्य जगदुपादानकारणत्वं च प्रतिपादतिम् । उपादानकारणत्वं च परिणामास्पदत्वमेव ; कथमिदमुप[2]पद्यते[2] ?

[ब्रह्मण उपादानतायाः निर्विकारत्वाविघटकत्वम्, तस्य चिद्रूपेण अचिद्रूपेण च परिणामाभ्युपगमे दोषोपपादनम्]

अत्रोच्यते - सजीवस्य प्रपंचस्य [3]अविशेषेण [3] कारणत्वमुक्तम् । [4]तत्र ईश्वरस्य[4] जीव[5]रूप[5]परिणामाभ्युप[6]गमे [6] -

नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ' (ब्र.सू.2-3-18)

इति विरुध्यते । वैषम्यनैर्घृण्यपरिहारश्च, जीवानादित्वाभ्युपगमेन [7]तत्तत्कर्म[7] [8]निमित्ततया प्रतिपादितः [8]-

'वैषम्यनैर्घृण्ये न सापेक्षत्वात्' (ब्र.सू.2-1-34)

न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च'

(ब्र.सू.2-1-35) इति । अकृताभ्यागम-कृत[9]विप्रणाशप्रसंगश्च [9] अनित्यत्वे अभिहितः।

तथा प्रकृतेरपि अनादिता [10]श्रुतिभिः [10] प्रतिपादिता -

अजामेका लोहित - शुक्ल- कृष्णा बह्वी प्रजा जनयन्ती सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येना भुक्तभोगामजोऽन्यः' (तै.ना.उ.10-5)

श्रुतिस्मृत्यभिप्रायेण एवमुक्तम् । (प्रपंचस्य - प्रपंचं प्रति ।) तत्रेत्यादि । जीवरूपेण परिणामाभ्युपगमे, अजत्व-नित्यत्वश्रुतिविरोधः, वैषम्य नैर्घृण्यपरिहारविरोधः अकृताभ्यागम कृतविप्रणाशप्रसंगश्च दूषणानि इत्यर्थः ।

अकृताभ्यागमः - अहेतुकफलप्राप्तिः । कृतविप्रणाशः - कृतस्य कर्मणो निष्फलत्वम् वैषम्येत्यादिना श्रुत्यर्थापत्तिविरोध उक्तः । अस्मान्मायी इति । ब्रह्मणः सद्वारके उपादानत्वे विवक्षिते, द्वारभूतस्य परिणामित्वम्, द्वारभूतेन द्वारिणस्सम्बन्धश्चापेक्षित इति, द्वारभूतायाः प्रकृतेः परिणामित्वे श्रुतिरियम् । माया त्विति । अनेन मायाशब्दार्थोऽपि स्पष्टः । जनित्री - समष्टिजनित्री । भूतभाविनी - व्यष्टिहेतुः ।

'प्रकृतिं पुरुषम्' इत्यादिना, प्रकृतिपुरुषयोः अनादित्वम् । 'भूमिरापः' इत्यादिना,

---

1. मृद्घटादि - घ. 2. पद्यते इति चेत् - घ. 3. विशेषेण - घ. 4. ईश्वरस्य - घ. 5. रूपेण - घ. 6. गमेन - ग. 7. तत्कर्म -ख. 8. तया च क्रियते -घ. 9. प्रणाशश्च - घ. 10. श्रुतिभिरेव - घ.

[1]इति[1], प्रकृति-पुरुषयोःअजत्वं [2]दर्शयति[2] ।

'अस्मान्मायी सृजते [3]विश्वमेत[3]त्तस्मिंश्चान्यो मायया संनिरुद्धः ' (श्वे.उ.49)

माया तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' (श्वे.उ.4-10) **इति, प्रकृतिरेव स्वरूपेण विकारास्पदम् - [4]इति च[4] दर्शयति ।**

गौरनाद्यन्तवती सा जनित्री भूतभावित्री (मन्त्रि.उ.1-5) **[5]इति च[5] ।**

[6]स्मृतिश्च[6] -

'प्रकृतिं पुरुषं चैव विद्ध्यनादी[7]उभावपि[7] (भ.गी. 13-19)

'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।

'अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा' (भ.गी.7-4)

'अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।

'जीवभूतां महाबाहो ययेदं धार्यते जगत् ।।' (भ.गी.7-5)

'प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।'(भ.गी.9-8)

'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।' (भ.गी.9-10)

[8]इत्यादिका[8] ।

द्वारभूतायाः प्रकृतेः परिणामित्वं च सिद्धम् । एवं जीवरूपेण अचिद्रूपेण च ब्रह्मणः परिणामे दूषणमुक्तम् ।

प्रकृतेरपि इति । प्रकृतिरेव परिणामिनी चेत्, कथं ब्रह्मणः उपादानत्वम् ? इत्यत्र (उत्तरमिदम्) । 'गौरनाद्यन्तवती' इत्यादिषु प्रकृतिवाचिशब्दः, तच्छरीरकब्रह्मवाची इत्यर्थः । **पुरुषशब्दोऽपीति** । 'यतः प्रधानपुरुषौ' इत्यादिषु 'पुरुष' शब्दोऽपि तथा (इत्याशयः) । **तद्विकाराणाम्**- प्रकृतिविकाराणाम् ।

जीवप्रकारसंस्थिते इति - इह उभयत्रापि प्रकृतिप्रकार - जीवप्रकारशब्दौ बहुव्रीहि-समासरूपौ । तथा च - प्रकृतिप्रकारकः जीवप्रकारकः इति संस्थितशब्देन च अर्थः । अनन्तरं च कर्मधारयो बोध्यः । यद्वा प्रकृतिरेव प्रकारः, जीव एव प्रकारः इति आदौ कर्मधारयः। ततः तादृशप्रकारेण संस्थितः (विशिष्टः) इति तृतीयातत्पुरुषो बोध्यः । **अपुरुषार्थाः** - पुरुषस्यानीप्सिताः,

---

1. 'गौरनाद्यन्तवती' इति च -घ. 2. प्रतिपादयति -घ. 3. विश्वमेन -घ. 4. इति -घ. 5. इति - घ. 6. स्मृतिश्च भवति - क.ग.घ. 7. उभावपि । विकारांश्च गुणांश्चेव विद्धि प्रकृतिसम्भवान् इति - ग.घ. 8. इत्यादिना - घ.

[1]एवं च, प्रकृतेरपि [1]ईश्वरशरीरत्वात्, 'प्रकृति'शब्दोऽपि, तदात्मभूतस्येश्वरस्य तत्प्रकारसंस्थितस्य वाचकः । 'पुरुष'शब्दोऽपि, तदात्मभूतस्येश्वरस्य पुरुषप्रकारसंस्थितस्य वाचकः । अतः तद्विकाराणामपि, तथैव [2]ईश्वर[2] आत्मा । तदाह -

'व्यक्तं विष्णुस्तथाऽव्यक्तं पुरुषः काल एव च' (वि.पु.1-2-20)

'स एव क्षोभको ब्रह्मन् क्षोभ्यश्च परमेश्वरः' (वि.पु.1-2-33) इति ।

अतः [3]प्रकृति[3]प्रकारसंस्थिते परमात्मनि, प्रकार[4]भूत[4]प्रकृत्यंशे, विकारः प्रकार्यंशे च, अविकारः। एवमेव जीवप्रकारसंस्थिते परमात्मनि च, प्रकारभूतजीवांशे, सर्वे च [5]अपुरुषार्थाः[5] ; प्रकार्यंशेः, नियन्ता निरवद्यः सर्वकल्याणगुणा [6]श्रय[6]ः सत्यसंकल्प एव ।

[7]तथा च सति,[7] कारणा[8]वस्थ[8]ः ईश्वर [9]एवेति, तदु[9]पादान [10]कजग[10]त्कार्यावस्थोऽपि स एवेति, कार्यकारणयोरनन्यत्वं सर्वश्रुत्यविरोधश्च भवति ।

वर्ज्याः इत्यर्थः ।) सत्यसंकल्प इत्यनेन, 'अपहतपाप्मा' इत्यादिवाक्यं स्मारितम् । उपादानत्वश्रुतिः विशिष्टविषया ; निर्विकारत्वादि श्रुतिः विशेष्यांशमात्रविषया इत्यर्थः। कार्यकारणयोः अनन्यत्वं, कारणात् कार्यस्य द्रव्यान्तरत्वं वारयति ; न तु कारणस्य विशिष्टत्वविरोधि; अविशिष्टत्वे कारणत्वायोगात् इत्यर्थः । सर्वेति । उपपादितप्रकारेण निर्दोषत्वोपादानत्वादिपरश्रुत्यविरोधः इत्यर्थः ।

'चिदचिद्विशिष्टस्य ब्रह्मणो नित्यत्वात् सृष्टिप्रलयायोगः, ब्रह्मणः कारणत्वं कार्यत्वं चायुक्तम्' इत्यस्योत्तरमाह तदेवमित्यादि - । तदापत्तिः - सूक्ष्मदशापत्तिः । द्रव्यनित्यत्वेऽपि अवस्थाभेदेन सर्गाद्युपपत्तिः इत्यर्थः । अजयोः इत्यनेन, कारणत्वावस्थायां सत्त्वं सूचितम् । कार्यभूतयोः इत्यनेन, कार्यावस्थां प्रति कारणत्वम् - इत्युक्तम् ।

तस्मादिति । तर्हि (अवस्थां प्रति कारणत्वे) कार्यत्व कारणत्वे प्रकृतिपुरुषयोरेवेति, परमात्मनः कारणत्वादिनिर्देशः अमुख्यः स्यादित्यत्र उत्तरमिदम् । जीवात्मेति । चिदचिद्द्रव्ययोः परमात्माख्यद्रव्येण सहोपलम्भनियमाभावात्, जातिगुणवत् प्रकारतैकस्वभावत्वमयुक्तम्-इत्यत्र

---

1. प्रकृतेरपि - घ. 2. ईश्वर एव -घ 3. सर्व -घ. 4. भूते - घ. 5. न पुरुषार्थः, च पुरुषार्थाः - घ. 6. करः - क,ग. 7. तथा - घ. 8. वस्थाऽपि - घ. 9. एवैतदु - घ. 10. न जग, न जग - घ.

[ब्रह्हमण एव कारणत्व-कार्यत्वसमर्थनम्]

तदेव नामरूपविभागानर्हं [1]सूक्ष्मदशा[1]पन्नप्रकृति-पुरुषशरीरं ब्रह्म, कारणावस्थम् । [2]जगतः तदा[2]पत्तिरेव [3]च प्रलयः[3] । नामरूप[4]विभाग-विभक्त-[4]स्थूलचिदचिद्वस्तुशरीरं ब्रह्म, कार्यावस्थम् । ब्रह्मणः तथाविधस्थूलभावः [5]एव सृष्टिः[5]-[6]इत्युच्यते[6]। यथोक्तं भगवता पराशरेण -

'प्रधानपुंसोरजयोः कारणं कार्यभूतयोः' (वि.पु.1-9-37) इति ।

तस्मात्, ईश्वरप्रकारभूतसर्वावस्थप्रकृति-पुरुषवाचिनः शब्दाः, तत्प्रकारविशिष्टतया अवस्थिते परमात्मनि, मुख्यतया वर्तन्ते ; जीवात्मवाचि [7]देवमनुष्यादिशब्दवत्[7] । [8]यथा देव-मनुष्यादि[8]शब्दाः, देवमनुष्यादिप्रकृतिपरिणामविशेषाणां जीवात्मप्रकारतयैव पदार्थत्वात्, प्रकारिणि जीवात्मनि मुख्यतया वर्तन्ते ।

तस्मात्, सर्वस्य चिदचिद्वस्तुनः परमात्मशरीरतया तत्प्रकारत्वात्, परमात्मनि मुख्यतया वर्तन्ते, सर्वे [9]तद्वाचकाः शब्दाः[9] ।

(उत्तरमिदम्) । **यथेति** । सहोपलम्भनियमः अपृथक्सिद्धप्रकारत्वे प्रयोजकः । तदभावात् देवादिशब्दानामपि जीवपर्यन्तत्वम् अमुख्यम् - इति शंकायाम् (इदमुक्तम्) । सहोपलम्भनियमः एकसामग्रीवेद्यत्वप्रयुक्तः ; न तु नियतप्रकारत्वप्रयुक्तः ; गन्धादिषु व्यभिचारात् । तस्मात् तदेकाश्रयत्वं तदेकप्रयोजनत्वं च नियतप्रकारत्वे प्रयोजकम् । ---- तस्मात् देवादिशरीरस्य चेतनप्रकारतैकस्वभावतद्वाचिशब्दानां तत्पर्यन्तत्वं मुख्यम् इत्यर्थः ।

तस्मात् इति, दृष्टान्तोक्तमर्थं वक्ष्यमाणशरीरलक्षणसंगत्यर्थं दार्ष्टान्तिके अतिदिशति ।

अयमेवेति । शरीरं हि । चेष्टाभोगेन्द्रियाश्रयः । (अतः) शरीरशरीरिलक्षणाभावात् चिदचिद्वस्तुनोः शरीरत्वं, परमात्मनः शरीरित्वं च अनुपपन्नम् इत्यत्र (उत्तरमिदम्) । **पृथक्सिद्ध्यनर्ह**शब्दः, प्रतिपदमन्वेति । तेन पदेन गृह-क्षेत्र-घट-पटादिव्यावृत्तिः । अत्र शरीरात्मलक्षणयोः सहोक्त्या, शरीरम् आत्मा च प्रतिसम्बन्धिनिरूप्यपदार्थः इति दर्शितं भवति । **सर्वात्मना**-यावद्द्रव्यभावितयेत्यर्थः । इदम् आधेयत्वनियाम्यत्वशेषत्वविशेषणम् । **आप्नोति** इति,

---

1. सूक्ष्मावस्था - घ. 2. जगत्तदा - घ. 3. प्रलयः - घ. 4. विभागार्ह - घ. 5. एव जगतः सृष्टिः - घ., जगतः सृष्टिः - क,सृष्टिः - घ. 6. उच्यते - घ. 7. यथा देवादि -ढ.8. देवमनुष्यादि - घ.9.वाचका -ख.

[शरीरात्मनोः लक्षणनिर्वचनम्]

[1]अयमेव[1] आत्म-शरीरभावः ; पृथ[2]क्सिद्ध्यनर्हा[2]धाराधेयभावः, [3]नियन्तृ-नियाम्य[3]भावः, शेषशेषिभावश्च । 'सर्वात्मना [4]आधारतया नियन्तृ[4]तया शेषितया च आप्नोतीति, आत्मा' । सर्वात्मना आधेयतया नियाम्यता शेषतया च अपृथ[5]क्सिद्धं प्रकार[5]भूतमिति,'आकारः, शरीरम्' इति चोच्यते । [6]एवमेव हि[6] ! जीवात्मनः स्वशरीरसम्बन्धः । एवमेव परमात्मनः [7]सर्व[7]शरीरत्वेन सर्वशब्द[8]-वाच्यत्वम् ।

[उक्तेऽर्थे श्रुतिसंमतिः, पुराणवचः संमतिश्च]

तदाह श्रुतिगणः -

'सर्वे वेदा यत् पदमामनन्ति' **(कठ.उ.2-15)**

'सर्वे वेदा यत्रैकं भवन्ति' **(तै.आर.उ.11-2)**

इति । तस्य एकस्य [9]वाच्य[9]त्वात् , [10]एकार्थ[10]वाचिनो भवन्ति - इत्यर्थः ।।

'आत्म'शब्दावयवार्थस्य शरीरलक्षणौपयिकत्वमभिप्रेत्य । **आधेयतया** इत्यस्य, 'द्रव्यत्वे सति' इति अध्याहारेण योजयितव्यम् । **अपृथक्सिद्धम्** इति पदं, प्रकारविशेषणम् । सर्वात्मना आधेयत्वादिभिःअपृथक्सिद्धप्रकारत्वात् इत्यर्थः । आकार इति । जातिगुणयोरप्याकारत्वम् ; अपृथक्सिद्धप्रकारत्वात् । शरीरमपि अपृथक्सिद्धप्रकारत्वात्, 'आकार' शब्दवाच्यम् । द्रव्यत्वात् 'शरीर'शब्दवाच्यम् इत्यर्थः । 'व्याप्यत्वे सति सर्वात्मना स्वार्थे धारयितुं शक्यं शरीरम्' इति शरीर-लक्षणम् । 'व्याप्तृत्वे सति (व्यापकत्वे सति वा) यावद्द्रव्यभावितया स्वार्थे धारयितुं शक्तः 'आत्मा' इति शरीरिलक्षणम् । उत्पतनादिव्यापाराणां रुग्णदेहनियमनस्य चाभावात् असम्भवातिव्याप्तिशंकयोः, 'स्वार्थशक्य'पदाभ्यां परिहारः । 'व्याप्यत्वे सति' इति, घटपटादिव्यावृत्त्यर्थम् । आत्मनो धर्मभूतज्ञानं, रत्नदीपादेः प्रभा च शरीरं स्यादिति तद्व्यावृत्त्यर्थं चोक्तम् । 'सर्वात्मना' इति, परकायप्रविष्टं प्रति परकायस्य देहत्वव्यावृत्त्यर्थम् । अत एव शरीरिलक्षणेऽपि व्यावर्त्यं स्पष्टतरम् । शेषशेषिभावस्य शरीरलक्षणत्वे तु 'स्वार्थे शक्यम्' इति पदानपेक्षैव ।

---

1. अयमेव च क,ग. 2. क्सिद्ध्यनर्हत्वा - घ. क्स्थित्यनर्हा - घ. 3. विशेषण-विशेष्य - घ. 4.नियन्तृ -घ. 5. क्सिद्धप्रकार - घ. 6. एवमेव - घ. 7. तव - घ. 8. शरीर - घ. 9. वाचक - घ. 10. ऐकात्म्य - घ.

'एको देवो बहुधा[1]निविष्टः[1]' (तै.आर.3-14-1)

'सहैव सन्तं न विजानन्ति देवाः'(तै.आर.3-11-12)

[2]इत्यादि । देवाः[2] - इन्द्रियाणि । देवमनुष्यादीनाम् अन्तर्यामितया [3]आत्मत्वेन[3] निविश्य, सहैव सन्तं, [4]तेषामिन्द्रियाणि[4] मनःपर्यन्तानि, न [5]विजानन्ति[5] इत्यर्थः।

तथा च पौराणिकानि वचांसि -

'*न ताः स्म सर्ववचसा प्रतिष्ठा यत्र शाश्वती*' (वि.पु.1-12-23)

[6]वाच्ये हि[6] ! वचसः प्रतिष्ठा ।

'*कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम्*' (जित.स्तो.7-4)

'वेदैश्च सर्वैरहमेव वेद्यः' (भ.गी.15-15)

इत्यादिनि [7]सर्वाणि हि[7] वचांसि, [8]स[8]शरीरात्मविशिष्टम् अन्तर्या[9]मिण[9]मेवआचक्षते

पदमिति । 'पद्यते' इति व्युत्पत्त्या प्राप्यमित्यर्थः । एकस्येति । *'अर्थैकत्वादेकं वाक्यम्'* (पू.मी.सू. 2-1-46) इति न्यायेन ब्रह्मण एकस्यैव प्रधानतया वाच्यत्वात्, सर्वे वेदाः एकं वाक्यं भवन्ति इत्यर्थः ।

एको देव इति । सर्वशरीरतया सर्वप्रकारत्वाद्धि सर्वशब्दवाच्यत्वम् ।

वचसः प्रतिष्ठा इत्युक्ते, शब्दगुणाश्रयाकाशशंका स्यादिति तद्व्यावृत्त्यर्थं, **वाच्ये हि इति ।** **प्रतिष्ठा** - पर्यवसानम् । वचसां वाच्यत्वे हेतुः, कार्याणां कारणत्वम् । 'सर्वं खल्विदं ब्रह्म तज्जलान्' इति हि श्रुतिः ।

अन्तरिति । 'अन्तः प्रविश्य नियन्तारम्' इत्यन्वयः । **अन्तर्यामितया** - 'अन्तरो यमयति' इति अन्तर्यामिब्राह्मणप्रतिपादितत्वात् इत्यर्थः , **अन्तःप्रविश्य** - प्रशासितृत्वे हेतुः । **आदित्यवर्ण इति** । 'यदा पश्यः पश्यते रुक्मवर्णम्' 'आदित्यवर्णं तमसः परस्तात्' इति वाक्ययोः दुराधर्षत्वभोग्यताभिप्रायेण आदित्यवर्णत्वं रुक्मवर्णत्वं चोक्तम् इत्यभिप्रायः । **(स्वप्नकल्पेति** । इन्द्रियाणां बाह्येभ्यो विषयेभ्यो विनिवर्त्य अन्तर्मुखीकरणानन्तरं या धीः उदेति; तस्याः

---

1. सन्निविष्टः - ग. 2. देवाः - घ. 3. आत्मनो - घ. 4. इन्द्रियाणि - घ. 5. जानन्ति -ख.
6. इति वाच्ये - घ. 7. हि सर्वाणि - घ. 8. सर्व - घ. 9. मिणम् - ख.

'हन्ताहमिमा [1]स्तिस्रो[1] देवता अनेनजीवेनाऽऽत्मनाऽनुप्रविश्यनामरूपव्याकरवाणि' (छा.उ.6-3-2) इति हि श्रुतिः । तथा च [2]मानवं वचः [2] -

[परमात्मनः सर्वशब्दवाच्यतायां हेतुः]

प्रशासितारं सर्वेषामणीयासमणीयसाम् ।
रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम् ।। (म.स्मृ.12-122)

[3]अन्तः [3] प्रविश्य-[4]अन्तर्यामितया, सर्वेषां प्रशासितारम्-नियन्तारम्, [4] अणी[5]यांसः-आत्मान[5]: ; कृत्स्नस्य [6]अचेतनस्य[6] व्यापकतया सूक्ष्म[7]भूताः ते[7] ; तेषामपि व्यापकत्वात्, [8]तेभ्योऽपि[8] सूक्ष्मतरः इत्यर्थः । [9]रुक्माभ[9]-आदित्य [10]वर्णः [10] । स्वप्नधी-[11]गम्यः [11]-स्वप्नकल्पबुद्धि [12]प्राप्यः [12] । विशदतमप्रत्यक्षतापन्नानुध्यानैक [13]लभ्यः[13] इत्यर्थः ।

[14]एनमेके [14]वदन्त्यग्निं मरुतोऽन्ये प्रजापतिम् ।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ।। (म.स्मृ.12-123)

इति । एके - वेदाः इत्यर्थः । उक्तरीत्या परस्यैव ब्रह्मणः , सर्वस्य प्रशासितृत्वेन सर्वान्तरात्मतया प्रविश्यावस्थित्वात्, [15]अग्न्यादयोऽपि शब्दाः [15] 'शाश्वतब्रह्म' शब्दवत्, तस्यैव [16]वाचका भवन्ति [16] - इत्यर्थः । तथा च स्मृत्यन्तरम् -

---

स्वप्नसादृश्यमित्यर्थः ।।) 'प्रशासितारम्' इति श्लोकेन परमात्मनः सर्वशब्दवाच्यत्वे हेतुरुक्तः ।

एनमेके इति, सर्वशब्दवाच्यत्वपरं श्लोकमाह । वेदाः इत्यर्थः इति । 'एक' शब्देन वादि-विप्रतिपत्तिशंका मा भूत् इति (इदम्) । **वेदाः** - वेदभागाः । **उक्तरीत्या** - पूर्वोक्तश्लोकरीत्या।

सर्वान्तरात्मत्वं नाम सर्वस्यानुप्रविश्य प्रशासितृत्वम्, इत्यर्थः । **शाश्वतेति** । 'अपरे ब्रह्म शाश्वतम्' इति दृष्टान्ततयोक्तम् इत्यभिप्रायः । यथा अद्वारकब्रह्मशब्दादयः, तस्यैव निरतिशयबृहत्त्वादिगुणविशिष्टस्य वाचकाः ; तथा सद्वारकशब्दा अपि अग्न्यादिमुखेन ब्रह्मण एव वाचकाः - इत्यर्थः । **तथा चेति** । स्मृत्यन्तरम् दक्षवचनम्। **पितृदेवेति** । 'पितृदेवादिशब्दवाच्यकर्मकं

---

1. तिस्रो - ख. 2. मानववचः - क. 3. इति अन्तः -घ. 4. न्तर्यामितया सर्वेषां, सर्वेषां नियन्तारम् - घ. 5. यांसः - घ. 6. चेतनस्य - घ. 7. भूताः - ख, भूतानाम् - घ. 8. तेषामपि - घ. 9. रुक्माभ् - घ. 10. वर्णम् - घ. 11. गम्यम् - घ. 12. प्राप्यम् - घ. 13. लभ्यम्, गम्यः - घ. 14. एवमन्ये - घ. 15. दयः शब्दोऽपि - ग. 16. वाचकाः - घ.

'ये यजन्ति पितॄन् देवान् ब्राह्मणान् सहुताशनान् ।
सर्वभूतान्तरात्मानं विष्णुमेव यजन्ति ते ।। (द.स्मृ.)

इति । पितृ-देव-ब्राह्मण-हुताशनादिशब्दाः, 'तन्मुखेन[1] तदन्तरात्मभूतस्य विष्णोरेव वाचकाः - 'इत्युक्तं भवति[2] ।

[जीवात्मनां स्वाभाविकं रूपम्, तत्संहारहेतुनिवारणं च]

[3]अत्रेदं[3] सर्वशास्त्रहृदयम् - जीवात्मानः, स्वयम् असंकुचितापरिच्छिन्न-निर्मलज्ञान-स्वरूपाः सन्तः कर्मरूपाविद्यावेष्टिताः, [4]तत्तत्कर्मा[4]नुरूप-ज्ञानसंकोचमापन्नाः, ब्रह्मादिस्तम्ब [5]पर्यन्तविविध[5]विचित्रदेहेषु प्रविष्टाः, तत्तद्देहोचितलब्धज्ञानप्रसराः, तत्तद्देहात्मभिमानिनः, तदुचितकर्माणि कुर्वाणाः, तदनुगुणसुखदुःखोपभोगरूपसंसार [6]प्रवाहं[6] प्रतिपद्यन्ते ।

यजनं, विष्णुकर्मकम्' इत्युक्ते, 'पितृदेवादिशब्दानां विष्णुवाचित्वम् अर्थसिद्धम् । तत्र हेतुः, 'सर्वभूतान्तरात्मानम्' इत्युच्यते । पितृदेवादिशरीरकत्वेन तदन्तरात्मत्वात्, तत्तच्छब्दाः परमात्मपर्यन्ताः - इत्यर्थः ।

एवं सिद्धवस्तुपराणां भेदाभेदघटकश्रुतीनाम् अर्थ उपपादितः ।

सर्वशास्त्रहृदयमिति । सर्वाः श्रुतयः प्रयोजनपर्यवसायिन्यः । तस्मात् । (भेदश्रुत्यादीनामपि) प्रयोजनपर्यवसायित्वम् अवश्यम्भावि । तत्तु प्रमाणान्तरानवगतभेदज्ञापन तन्निषेधपरत्वेन उपपद्यते । तस्मात् भेदश्रुतयः, उपायपराः निवर्त्यपराश्च श्रुतयः कात्स्न्येन पर्यालोचनीयाः-इति, तत्कृत्स्नपर्यालोचने अस्मदुक्त एवार्थः उपपन्नः स्यात् - इत्यभिप्रायः । **जीवात्मानः** इत्यादिना, निवर्त्यस्वरूपमाह । **स्वयम्**-स्वत इत्यर्थः । ज्ञानं स्वभावत एव असंकुचितम् । **अपरिच्छिन्नेति** । (इदम्) रत्नादिप्रभायाः संकोचकाभावेऽपि कतिपयदेशवर्तित्वं दृष्टमिति तद्व्यावृत्त्यर्थम् । **ज्ञानस्य निर्मलत्वम्**-रागद्वेषादिरूपत्वाभावः । सर्वस्य भगवदात्मकत्वेन ग्रहणात्, न रागद्वेषादिभावः । स हि अयथावद्ग्रहणाद्भवति । तस्मात् अयथार्थविषयत्वाभावः नैर्मल्यं विवक्षितम् । **ज्ञानस्वरूपाः** इत्यत्र 'स्वरूप' शब्दः धर्मवाची । **कर्मरूपा विद्येति** । 'अविद्या कर्मसंज्ञान्या' इति वचनात् । **तत्तत्कर्मेति** । कर्मतारतम्यानुरूपः संकोचः (इत्यर्थः) । **विविध** शब्दः देवादिभेदपरः ।

---

1. तत्तन्मुखेन - घ. 2. इत्युक्तम् - घ. 3. तत्रेदं - घ. 4. तत्कर्मा - घ. 5. पर्यन्तेषु - घ. 6. प्रवाहरूपम् घ.

[1]एतेषां[1] संसारमोचनं, भगवत्प्रपत्तिमन्तरेण नोपपद्यत इति, तदर्थं [4]प्रथमम् - एषां[2] देवादिभेदरहितज्ञानैकाक[3]ारतया सर्वेषां साम्यं प्रतिपाद्य, तस्याऽपि स्वरूपस्य भगवच्छेषतैकस्वरूपैकरसतया भगवदात्मकतामपि प्रतिपाद्य, भगवत्स्वरूपं च हेयप्रत्यनीककल्याणैकतानतया सकलेतरविसजा [4]तीयम्, अनवधिकातिशया [4]-संख्येयकल्याणगुणगणां [5]श्रयं[5], स्वसंकल्पप्रवृत्तसमस्तचिदचिद्वस्तुजाततया सर्वस्यात्मभूतं प्रतिपाद्य, तदुपा [6]सनं सांगं तत्प्रापकं[6] प्रतिपादयन्ति [7]शास्त्राणि - इति[7] ।।

विचित्र शब्दः अवान्तरवैविध्यपरः । तत्तद्देहेति । 'अप्राणिमत्सु स्वल्पा सा स्थावरेषु' इत्यादिवचनात् इति भावः । पूर्वं, कर्मतारतम्येन ज्ञानसंकोच उक्तः ; अत्र कर्माधीनं तारतम्यं देहविशेष-द्वारकम्-इत्युच्यते । तत्तद्देहेति । अनेन सुखदुःखविभागहेतुरुक्तः । आत्माभिमानानुकूलं हि सुखम् । तत्प्रतिकूलं हि दुःखम् । तदुचितेति । अनेन बीजांकुरन्यायात् अनादित्वमुक्तं भवति ।

एतेषामित्यादिना, उपायमाह । प्रपत्तिमन्तरेण नोपपद्यत इति, भक्तियोग-निष्ठस्यापि तन्निष्पत्त्यर्थं तदंगत्वेन प्रपत्तेरपेक्षितत्वात्, प्रपत्तिनिष्ठस्य स्वतन्त्रतया उपायत्वाच्चोक्तम् । **प्रथममिति**। प्राथम्यम् अर्थक्रमेण । न हि देहस्यैवात्मत्वे मोक्षोपायापेक्षा । देहातिरिक्तत्वेऽपि, भगवच्छेषतैकरसत्वे सिद्धे हि तत्प्राप्त्यपेक्षा । तस्मात् प्रथमज्ञाप्यं देहातिरिक्तज्ञानैकाकारत्वं, भगवच्छेषतैकरसत्वं च आत्मनः-इत्यर्थः । भगवत्स्वरूपं च इत्यादिना, दिव्यात्मस्वरूपस्य हेयप्रत्यनीकत्वं कल्याणरूपत्वं चोच्यते। **अनवधिकेति** , मंगलगुणाश्रयत्वमुच्यते । कल्याणैकतानत्वम् आनन्दरूपत्वम् । स्वसंकल्पेति, शरीरात्मभावमाह । **तदुपासनमिति** । तदुपायश्च उपासनम् इत्यर्थः। **निर्वाणेति**, आत्मनो ज्ञानैकाकारत्वे प्रमाणमाह ।

प्रकृतिसंसर्गेति (इदम्) अचेतनप्रकृतेः कथं दुःखाद्यास्पदत्वम् ? इति शंकायां (उत्तरात्मकं व्याख्यानम्) । प्राप्ताप्राप्तविवेकेनेति । अन्वयव्यतिरेकाभ्यामित्यर्थः । प्रकृतेरेव धर्माः इति व्याख्येयग्रन्थभंग्यनुकारः । प्रकृतिसम्बन्धे सति दुःखादिसद्भावः ; प्रकृतिसंबन्धविरहे

---

1. एषां, तेषां, येषां - घ. 2. एतेषां - घ. 3. ज्ञाना - घ. 4. तीया - घ. 5. लयम् - क,ग,घ. 6. सनसांगतत्प्रापकं - घ. 7. शास्त्राणि - घ.

[जीवात्मनां ज्ञानानन्दस्वरूपता]

यथोक्तम् -

निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः ।
दुःखाज्ञानमला धर्माः प्रकृतेस्ते न चात्मनः ।।' (वि.पु.6-7-22)

प्रकृतिसंसर्गकृतकर्ममूलत्वात्, न आत्मस्वरूपप्रयुक्ता [1]धर्मा[1] इत्यर्थः । प्राप्ताप्राप्तविवेकेन 'प्रकृतेरेव धर्माः' इत्युक्तम् ।

[आत्मसु ज्ञानैकाकारतादर्शनमेव पाण्डित्यम्]

'विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ।।' (भ.गी.5-18)

इति, देव-तिर्यङ्-मनुष्य-स्थाव[2]ररूपप्रकृति[3]संसृष्टस्यात्मनः स्वरूपविवे[4]चनी बुद्धिः[4] येषां, ते पण्डिताः । तत्तत्प्रकृतिविशेष[5]विविक्तात्म[5]याथात्म्यज्ञानवन्तः, [6]तत्र तत्र[6] अत्यन्तविषमाकारे वर्तमानमात्मानं, [7]समानाकारं[7] पश्यन्तीति, 'समदर्शिनः' इत्युक्तम् ।।

[8] **तदिदमाह -**

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ।।(भ.गी.5-19)

दुःखादिनिवृत्तिश्चेति, दुःखादीनां प्रकृतिधर्मत्वे यत् फलं ; तदिदानीं दृष्टम् इत्यभिप्रायेण (इयं) वचनभंगीति यावत्। विद्याविनयेति । (इदं) देवादिभेदस्य औपाधिकत्वात्, उपाधिवियुक्तरूपसाम्ये प्रमाणम् । **देवतिर्यङिति** । ब्राह्मणादेः इतरेषामपि उत्कर्षापकर्षशास्त्रम् उपाधिसंसृष्टविषयम् । तद्वियुक्तस्वरूपस्य (तु) साम्यमेवेत्यर्थः । 'विद्या विनयसम्पन्ने' इति श्लोकेन, तत्तद्वैषम्यं विद्यमानमपि न आत्मस्वरूपस्पर्शि इति दर्शयितुं, ब्राह्मणत्वादिविशिष्टे समदर्शित्वमुक्तम् ।

तदिदमाहेति । 'साम्यम् उपाधिवियुक्तस्वरूपविषयम्' इति स्पष्टयितुम् । **निर्दोषम्** इत्यादि, 'दोष' शब्दस्य अभक्ष्यभक्षणादिमात्रविषयत्वशंकाव्युदासाय । **दैवी ह्येषेति**, प्रपत्तिमन्तरेण

---

1. धर्माः - घ. 2. रात्मक - घ. 3. संसर्ग - घ. 4. चनबुद्धिः - घ. 5. वियुक्तात्मतया - घ. 6. तत्र - घ. 7. सामानाधिकरण्यं - घ. 8.तदिदमाह - घ.

इति । निर्दोषं-[1]देवादि[2]प्रकृति[2]विशेषसंसर्ग[1]रूपदोषरहितम्, स्वरूपेणानवस्थित [3]सर्वम् आत्म[3]वस्तु, निर्वाणरूपज्ञानैकाकारतया समम् - इत्यर्थः ।

[जीवात्मनां भगवच्छेषतैकरसत्वादि]

तस्य एवम्भूतस्य आत्मनः, भगवच्छेषतैक [4]रसता[4], तन्नियाम्यता, तदेकाधारता च, [5]तच्छरीर[5]-तत्तनुप्रभृतिभिः शब्दैः, तत्सामानाधिकरण्येन च श्रुतिस्मृतीतिहासपुराणादिषु प्रति [6]पाद्यते[6] - इति पूर्वमेवोक्तम् ।।

[प्रपदनस्य अत्यन्तावश्यकता]

'दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।।' (भ.गी.7-14)

[7]इति, - तस्यै[7]तस्यात्मनः, [8]कर्मकृतविचित्र[8]गुणमयप्रकृतिसंसर्गरूपात् संसारात् मोक्षः, भगवत्प्रपत्तिमन्तरेण नोपपद्यते - इत्युक्तं भवति ;

मोक्षासिद्धौ प्रमाणमाह । गुणमयी इत्यनेन, 'माया' शब्दः प्रकृतिवाचीतिगम्यते । **तस्यैतस्येति** । स्वतश्शुद्धस्याऽपि उपाधितो मलिनस्येति भावः । **श्रुतिभिश्चेति** । 'भगवत्प्रपत्तिमन्तरेण नोपपद्यते' इत्युक्तं भवति इत्यन्वयः । 'विद्वान्' इति वेदनवाचिशब्दः उपासनप्रपदनसाधारण इति, 'तमेवं विद्वान्' इत्यादिवाक्यानां प्रपत्तिमन्तरेण मोक्षानुपपत्तिपरत्वमुच्यते इति भावः । वाक्यार्थज्ञानमात्रस्य उपायतलाव्यावृत्तिरेवाभिप्रेता । मया ततमिति, व्याप्तिरुक्ता । व्याप्तिश्च धारकत्वेनेत्युक्त मत्स्थानि इति । (इदं) पूर्वोक्तस्य भगवदेकनियाम्यत्व तदेकधार्यत्वादेः प्रमाणम् । भगवतः तदायत्तस्थितित्वं व्यावर्तितम्, ' न चाहं तेष्ववस्थितः' इति । एवं (तेषां) स्वायत्तस्थितित्वविधानात्, ' न च मत्स्थानि' इति, तदेव न निषिध्यते ; अपि तु - लोके धार्य धारकभावो यथा भवति तथात्वं निषिध्यते । अनायासेन स्वसंकल्पमात्रेण धारकत्वात् इत्यर्थः । 'पश्य मे' इति, लोकसिद्धधार्य धारकभाववैलक्षण्यमेव उपपादयति । तस्मात् स्वैश्वर्यवैचित्र्यमुक्तम् इत्यर्थः । **विष्टभ्येति** । (इदम्) एवं सर्वशक्तियोगात् स्वसंकल्पैकदेशेन धारकत्वे स्पष्टं प्रमाणम् ।

अनन्तविचित्रमहाश्चर्यम् - अनन्तवैचित्र्यात् विस्मयनीयम् इत्यर्थः । **अयुतेति** । अनेन 'यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता' इति वचनं स्मारितम् । **प्रशासनेन**

---

1. देवादिरूप - घ. 2. संसर्गविशेष - घ. 3. सर्वात्म - घ. 4. रसतया - घ. 5. तत्तच्छरीर - ग. 6. पाद्यन्ते - घ. 7. तस्यै - घ. 8. विचित्र - घ.

'नाऽन्यः पन्था अयनाय विद्यते' (तै.आर.3-12-17)

[1]इत्यादिभिः श्रुतिभि [1]श्च ।।

[भगवतो विचित्रैश्वर्यवत्त्वम्]

'मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।

मत्स्थानि सर्वभूतानि न चाऽहं तेष्ववस्थितः ।।' (भ.गी.9-4)

'न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्' (भ.गी.9-5)

[2]इति सर्वशक्तियोगात् [2] स्वैश्वर्यवैचित्र्य [3]मुक्तम् । तदाह -

'विष्टभ्याऽहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।' (भ.गी.10-42)

इति । अनन्तविचित्रमहा [4]श्चर्यरूपं जगत् [4], मम अयुतायुतांशांशेन आत्मतया प्रविश्य सर्वं मत्संकल्पेन विष्टभ्य, अनेन रूपेण अनन्तमहा [5]विभूतिः अपरिमितोदारगुणसागरः, निरतिशयाश्चर्यभूतः स्थितोऽहम् - इत्यर्थः ।

[ब्रह्मणो दुर्ज्ञेयाश्चर्यरूपता]

तदिदमाह -

'एकत्वे सति नानात्वं नानात्वे सति चैकता ।

अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हति ।।

सर्वधारणश्रुत्यनुरोधादुक्तं मत्संकल्पेनेति, न तु एकांशेनेत्यंशशब्दव्याख्यानम् । 'अंशशब्दः स्वरूपैकदेशपरः । निरंशे प्रतिपदार्थं पूर्णवर्तिन्यपि स्वरूपे 'अंश'शब्दव्यवहारः, एकस्मिन्नेव वस्तुनि स्वरूपस्य पूर्णवृत्तितया अन्यत्र वृत्त्ययोगयत्वशंकाव्युदासार्थः । एकांशेनेत्यनेन फलितमर्थम् अनेनरूपेण इत्याह । एवं ' न च मत्स्थानि' इति, मायावादपक्षानुगुण्यशंकावहः ग्रन्थः व्याख्यातः।

तदिदमाहेत्यादिना भेदाभेदपक्षानुगुण इव यः श्लोकः ; सः व्याख्यायते । तदिदम् - आश्चर्यरूपत्वम् । प्रशासितृत्त्वेनेति , 'एकत्वे सति नानात्वम्' इत्येतद्व्याचष्टे । 'एक'शब्दः प्रकारैक्यपरः । शरीरतया प्रकारित्वोपपादकं 'प्रशासितृत्वेन' इति पदम् ।

---

1. इत्यादिश्रुति - क,ग,घ. इति श्रुति - घ. 2. सर्वशक्तियोगात् - घ. इति - घ. 3. मुक्तम् । तथाह - घ. । मुक्तम् । तथा हि - घ. मुक्तम् - घ. 4. श्चर्यं जगत् - घ. 5. विभूत्यपरि - घ.

[1]इति । प्रशासितृत्वेन[1] [2]एक एव[2] सन्, विचित्रचिदचिद्व [3]स्तुषु अन्तरात्म[3]तया प्रविशय, [4]तत्तद्रूपेण[4] विचित्र[5]प्रकार[5], [6]विचित्र [6]कर्मकारयन्, नानारूपता भजते एव [7]स्वल्पाल्पांशेन सर्वाश्चर्यमय [7]। नानारूपं जगत्, [8]तदन्त[8]रात्मतया [9]प्रविशय, विष्टभ्य[9], नानात्वेनाऽवस्थि [10]तोऽपि सन्, [10] अनवधिकातिशयासंख्येय-कल्याणगुणगणः, सर्वेश्वरेश्वरः, परब्रह्मभूतः पुरुषोत्तमो नारायणः, निरतिशयाश्चर्यभूतः, नील [11]तोयदसंकाशः [11], पुण्डरीक [12]दलामलायतेक्षणः [12], [13]सहस्रांशुः, सहस्रकिरणः [13], परमे [14]व्योम्नि [14],

'यो वेद निहितं गुहायां परमे व्योमन्' (तै.उ.आन.1-1)

'तदक्षरे परमे व्योमन्' (तै.ना.उ.1-2)

इत्यादिश्रुतिसिद्धे, [15]एक एवा[15]वतिष्ठते ।

तत्तद् -----प्रकारः - तत्तच्छरीरतया विचित्रप्रकारः । 'विचित्र------यन्' इत्यनेन तदधीननप्रवृत्तित्वमुक्तम् । तच्च तन्नियाम्यत्वमिति, शरीरित्वम् उपपादितं भवति । नानारूपत्वम् - तच्छरीरकतया विचित्रप्रकारत्वम् ।

'नानात्वेसति चैकता' इत्येतद्व्याचष्टे एवमिति । 'अवस्थितोऽपि सन्' इत्यनेन 'नानात्वे सति' इत्येतद्व्याख्यातम् । लीलाविभूतिविशिष्टवैचित्र्यानुभाषणपरः। सप्तम्यन्तो नानात्वशब्दः इत्यर्थः । **अनवधिकेति**, एकतापदं व्याचष्टे । नित्यविभूतिमत्तया समाभ्यधिकराहित्यम्, 'एकता'शब्दार्थः । 'अनवधिके'त्यादिपदेन, विभूति-द्वयनियमनधारणाद्यनुगुणगुणकत्वमुक्तम् । 'सर्वे------ब्रह्मभूतः' इति, ईश्वरातिरिक्त-परब्रह्मव्यावृत्त्यर्थमुक्तम् । पुरुषोत्तम-नारायणशब्दाभ्यां, पुरुषसूक्त नारायणानुवाकौ उक्तार्थप्रमाणत्वेन स्मारितौ । **नीलतोयदेत्यादि**, विग्रह-द्वाराऽपि आश्चर्यत्वविवक्षया । पुण्डरीकेत्यादिना, 'तस्य यथा कप्यासम्' इति श्रुतिः, विग्रह-वैलक्षण्ये प्रमाणत्वेन स्मारिता । अमलशब्दः, पंकजदोषाः अक्षिणि मा भूवन् इत्यभिप्रायेण । **आयतेति**, पंकजादधिकगुणनिवृत्ति- शंकाव्यावृत्त्यर्थम् । **परमे व्योम्नि इति** । नित्यविभूतियोगोऽपि समाभ्यधिकराहित्यहेतुः इत्यभिप्रायः ।

---

1. प्रशासितृ- घ. 2. एकः - घ. 3. द्वस्तुष्वात्म, द्वस्त्वन्तरात्म, द्वस्तुष्वनन्तात्म - घ. 4. तद्रूपेण - घ. 5. त्राकारः - घ. 6. विचित्रं - घ. 7. स्वल्पांशेन तु सर्वाश्चर्यमयं - क,ग., स्वसंकल्पात् - घ. 8. अन्त - घ. 9. प्रविशय -घ, प्रविष्टभ्य - घ. 10. तोऽपि - घ. 11. जीमूतसंकाशः-घ, जीमूतसंकाशवपुः - घ. 12. दलायतामलेक्षणम् -घ, दलायताक्षः - घ. 13, सहस्रांशुः, - घ. 14. व्योमन् - घ. 15. एवा - घ .

[ब्रह्मण समाभ्यधिकरहितत्वम्]

ब्रह्मव्यतिरिक्तस्य कस्यचिदपि वस्तुनः[1], एकस्वभावस्य एककार्य-शक्तियुक्तस्य, एकरूपस्य, [2]रूपान्तरयोगः[2], [3]स्वभावान्तरयोगः, शक्त्य [3]न्तर-योगश्च न घटते । [4]तस्यैकस्य[4] [5]परस्य ब्रह्मणः[5], सर्ववस्तुविसजातीयतया सर्वस्वभावत्वं सर्वशक्तियोगश्च - इति, एकस्यैव [6]विचित्रानन्त [6]नानारूपता च, पुनरपि अनन्तापरिमिताश्चर्ययोगेन एकरूपता च, न विरुद्धेति, वस्तुमात्रसाम्यात् विरोधचिन्ता न युक्ता - इत्यर्थः। यथोक्तम् -

'शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥
भवन्ति तपतां श्रेष्ठ ! पावकस्य यथोष्णता ॥' (वि.पु.1-3-2,3)

एतदुक्तं भवति - सर्वेषाम् अग्निजलादीनां भावानाम्, [7]एकस्मिन्नपि [7] भावे [8]दृष्टैव[8] शक्तिः, तद्विस [9]जातीय[9]भावान्त [10]रेऽपीति[10] न चिन्तयितु युक्ता ; जलादौ

एकस्वभावस्येति । न हि औष्ण्यस्वभावः अग्निः, शैत्यस्वभावो भवति । **एककार्येति**। न हि दाहशक्तोऽग्निः, जाड्यजननशक्तः । **एकरूपस्य** - एकाकारस्य । न हि ऊर्ध्वज्वलनवतो रूपवतोऽग्नेः, गन्धादिमत्त्वं तिर्यक्पवनादिकं वा इत्यभिप्रायः । **सर्व --- तीयतयेति**। विसजातीय-धर्मिणः विसजातीयधर्मयोगः उपपद्यते इत्यर्थः । **विचित्रेति** । विस्मयनीयमित्यर्थः । **अनन्तेत्यादि** । अनन्तशब्दः असङ्ख्येयवाची । अपरिमिताश्चर्यशब्देन अत्यन्ताश्चर्यत्वं विवक्षितम् । असङ्ख्येया-त्यन्ताश्चर्यभूतपदार्थयोगेन समाभ्यधिकराहित्यमित्यर्थः । **अत्यन्ता -------योगोनाम** , दिव्या-युधभूषणादियोगः । **वस्तु ---- न युक्तेति** । 'वस्तुत्वात् चेतनोऽपि अचित्स्यात्' इत्यादिवत् अयुक्तमिति भावः । अस्य वचनस्य (एकत्वे सति) ब्रह्मणो भिन्नाभिन्नतापरत्वमपि अयुक्तम् ; 'अचिन्त्यं ब्रह्मणोरूपं कस्तद्वेदितुमर्हति' इत्युक्तत्वात् । न हि मृद्घटादिष्वपि दृष्टत्वेन पराभिमतस्य भिन्नाभिन्नत्वस्य अचिन्त्यत्वम् ?

पावकस्य सर्गादिशक्तिर्नास्ति । तस्मात् दृष्टान्तदार्ष्टान्तिकयोः विवक्षितांशः कः ? इत्यपेक्षायाम् **एतदुक्तमिति** । नानुमातुं युक्तम् ----- इत्येतदुक्तंभवतीत्यन्वयः । सर्गाद्या

---

1. चिद्वस्तुनः, चिदपि चिदचिद्वस्तुनः -घ. 2. रुपायोगः -घ. 3. शक्त्य - घ. 4. तस्यैतस्य - क, ग,घ. 5. परब्रह्मणः क,ग,घ. 6.विचित्र - घ. 7. एकस्मिन् - ग. 8. दृष्टैव हि -घ, दृष्टा -घ. 9. जातीये - घ. 10. रज्पि - घ.

अदृष्टाऽपि [1]तद्विसजातीये[1] पावके [2]भासकत्वोष्ण[3]त्वादि[3]शक्तिः यथा दृश्यते ; एवमेव सर्ववस्तुविसजातीये ब्रह्मणि, सर्व [4]साम्यं[4] नानुमातुं युक्तम् - इति ।

[फलितार्थकथनम्]

अतः - विचित्रानन्तशक्तियुक्तं [5]ब्रह्म[5] - इत्यर्थः । तदाह -

जगदेतन्महा [6]श्चर्यं रूपं [6]यस्य महात्मनः ।

तेनाश्चर्यवरेणाहं भवता कृष्ण! [7]संगतः ॥ (वि.पु.5-19-7) इति[7] ।

[विविधश्रुतिसमन्वयः]

तदेतत्, नानाविधानन्तश्रुतिनिकर-शिष्टपरिगृहीततद्व्याख्यानपरिश्रमात् अवधारितम् । तथा हि - प्रमाणान्तरा[8]परिदृष्टा[8]-परिमित-परिणामाने[9]कतत्त्व[9]नियतक्रम- विशिष्टौ सृष्टि-प्रलयौ ब्रह्मणः, अनेकविधाः श्रुतयो वदन्ति ।

भावशक्तयः - सर्गादिगोचराः पदार्थशक्तयः ब्रह्मणः सम्भवन्ति इत्यन्वयः ।

जगदेतदिति । अक्रूरवचनमिदम् । (इदं) ब्रह्मणः सकलेतरविसजातीयत्वात् आश्चर्य शक्तियोगे प्रमाणम् ।

तदेतदिति । स्वविरचितग्रन्थस्य आपातप्रतीतार्थमात्रमेव न केवलं विवक्षितम् । अपि तु अतिगम्भीरत्वात् अर्थगौरवमस्ति इत्यभिप्रायः । तदेतत् - अभेदभेदघटकश्रुत्यादिविषयम् अर्थजातम् इत्यर्थः । अधीयमानानामेव श्रुतीनाम् अर्थवैविध्यात् नानाविधत्वं दृश्यते । अनन्तशब्देन अनधीयमानाः इतिहासपुराणोपबृंहिताः शाखाभेदाः विवक्षिताः । सोपबृंहणश्रुतिनिकरेषु तद्व्याख्यानेषु च परिश्रमात् अवधारितम् इत्यर्थः । प्रमाणेत्यादिना , प्रथमं सृष्टि प्रलयश्रुतिवैविध्यमाह । अनेकतत्त्वानि - महदादीति ; तानि च अपरिमितपरिमाणानि । 'प्रकृतेर्महान्, महतोऽहंकारः' इति पारम्पर्य नियतक्रमः । अनेकतत्त्वानि नियतक्रमाश्च प्रमाणान्तराविषयाः , तैर्विशिष्टौ सृष्टि प्रलयौ इत्यर्थः ।

अनेकविधाः श्रुतय इति । क्वचित् तेजोबन्नमात्रसृष्टिः, क्वचित् पंचभूतमात्रसृष्टिः, क्वचित् महदादिसृष्टिश्चेति, सृष्टिवैविध्यं श्रूयते । तत्र सृष्टिप्रलयपरकृत्स्नवाक्यपर्यालोचनया हि

---

1. तद्विजातीये - घ. 2. भास्वर - क,ग, अवभासक -घ. 3. तादि -क,ग,घ. 4. साम्यात् - घ. 5.ब्रह्मैव - क,ग. 6. श्चर्यं - घ. 7. संगतः - ख. 8. दृष्टा - घ. 9. नेकत्व - घ.

'निरवद्यं निरंजनम्' (श्वे.उ.6-19)

'विज्ञानम्' (तै.उ.भृ.5-1)

'आनन्दम्' (तै.उ.आन. 9-1)

'निर्विकारम्' (यो.शि.3-21)

'निष्कलं निष्क्रियं शान्तम्' (श्वे. उ.6-19)

'निर्गुणः' (श्वे.उ. 6-11)

इत्यादिकाः, '[1]निर्गुणं ज्ञानस्वरूपं[1] ब्रह्म'- इति काश्चन श्रुतयः अभिदधति ।

'नेह नानास्ति किंचन, मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति'

(बृ.उ.6-4-19)

'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन [2]कं पश्येत्, केन कं विजानीयात्'[2]

(बृ.उ.4-4-14)

इत्यादिकाः, नानात्वनिषेधवादिन्यः, सन्ति काश्चन श्रुतयः ।

'यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः' (मुण्ड.उ.1-1-10)

'सर्वाणि रूपाणि विचित्य धीरः, नामानि कृत्वाऽभिवदन्यदास्ते'

(तै.आर.पु.3-12-16)

'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि' (तै.ना.उ.1-8)

'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामस्सत्यसंकल्पः' । (छा.उ.8-1-5) **इति, सर्वस्मिन् जगति हेयतयाऽवगतं सर्वं गुणं प्रतिषिध्य, निरतिशयकल्याण-गुणानन्त्यं, सर्वज्ञता, सर्वशक्ति [3]योग[3] सर्वनामरूपव्याकरणं, सर्वस्याधारता च, काश्चन [4]श्रुतयो ब्रुवते[4] ।**

'सर्वं खल्विदं ब्रह्म तज्जलानिति' । (छा.उ.14-1)

सृष्टिप्रलयक्रमनिष्कर्षः क्रियते ; एवम् अर्थान्तरेष्वपि कृत्स्नवाक्य-पर्यालोचनयैवाऽर्थनिर्णयः कर्तव्यः इति भावः । **निरवद्यम्** इत्यादयः, निर्गुणश्रुतयः । **नेह इति,** भेदनिषेधश्रुतीराह ।

सर्वं खल्विदम् इति, ऐक्य श्रुतीराह ।

---

1. निर्गुणज्ञानस्वरूपं-घ, निर्गुणज्ञानं - घ. 2. पश्येत् - घ. 3. रूपताम् -घ. 4.श्रुतयो ब्रुवन्ति - क, ग,घ, ब्रुवते - ख.

'ऐतदात्म्यमिदं सर्वम्' । (छा.उ.6-8-7)

'एकस्सन् बहुधा विचारः' (तै.आर.3-11-2)

इत्यादिकाः, ब्रह्मसृष्टं जगत् नानाकारं प्रतिपाद्य, तदैक्यं च प्रतिपादयन्ति [1]काश्चन श्रुतयः [1] ।

'पृथगात्मानं प्रेरितारं च मत्वा' । (श्वे.उ.1-6)

'भोक्ता भोग्यं प्रेरितारं च मत्वा' (श्वे.उ.1-12)

'प्रजापतिरकामयत प्रजाः सृजेयेति' (तै.सं.उ.1-1-1)

'पतिं विश्वस्या [2]त्मेश्वरं शाश्वतं शिवमच्युतम्' [2] (तै.ना.उ.11-3)

'तमीश्वराणां परमं महेश्वरम् तं देवतानां परमं च दैवतम्' (श्वे.उ.6-7)

'सर्वस्य वशी सर्वस्येशानः' (बृ.उ.6-4-22)

इत्यादिकाः, ब्रह्मणः सर्वस्मादन्यत्वं, सर्वस्य [3]ईशितव्य[3]त्वम्, ईश्वरत्वं च ब्रह्मणः, [4]सर्वस्य शेषतां, [4] पतित्वं च ईश्वरस्य, काश्चन ।

'अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा' (तै.आर.3-11-3)

[5]*'एष त आत्माऽन्तर्याम्यमृतः'* । (बृ.उ.5-7-7)

'यस्य पृथिवी शरीरं ---यस्यापः शरीरं -- -यस्य तेजः शरीरम्' ।

(सुबा.उ.7)

इत्यादि,

पृथगात्मानम् इति, भेदश्रुतीराह । अन्तःप्रविष्टः इति, शरीरात्मभावश्रुतीराह । एवं नानाविधत्वं दर्शितम् ।

अविरोध इत्यादि । परपक्षेषु अन्योन्यविरोधः मुख्यार्थविरोधश्च भवतः ; सगुणभेदश्रुतीनां बाध्यत्वाभ्युपगमात्, विरोधः सम्प्रतिपन्नः । ऐक्यश्रुतिष्वपि, तत्त्वमादिपदानां लक्षणाश्रयणात् अमुख्यत्वम् । एवं भेदाभेदपक्षेऽपि निर्दोषत्वाविकारत्वादिपरश्रुतिविरोधः ; 'तत्त्व'मादिपदेष्वपि निर्दोषत्वसदोषत्वादि व्याघातात् अन्यतरपदामुख्यत्वप्रसंगः इति भावः । तस्मात् अविरोधेन मुख्यत्वेन च, वर्णनीयम् - वर्णयितुं युक्तम् इत्यर्थः । वर्णितं चेति । कः पुनः अविरुद्धोऽर्थः ? कश्च मुख्योऽर्थः ? इत्यत्र (उत्तरमिदम् ।) न अस्माभिः स्वबुद्ध्या अर्थस्थितिः (अपि तु)

---

1. काश्चन - घ. 2. त्मेश्वरं -घ. 3. ईशितृ -घ. 4. सर्वशेषिताम् - घ. 5. एष - ग.

'यस्याव्यक्तं शरीरं --- यस्याक्षरं शरीरं ---- यस्य मृत्युः शरीरम्' ।

(सुबा.उ.7)

'यस्याऽत्मा शरीरम्' (बृ.उ.मा.पा.5-7-26)

इति, ब्रह्मव्यतिरिक्तस्य सर्वस्य वस्तुनः ब्रह्मणश्च शरीरात्मभावं दर्शयन्ति [1]काश्चन[1] - इति, नानारूपाणां वाक्यानाम् अविरोधः, मुख्यार्थापरित्यागश्च यथा सम्भवति ; [2]तथैव[2] वर्णनीयं, वर्णितं च ।

[सर्वासां श्रुतीनां सामरस्यप्रकारः]

अविकारश्रुतयः, स्वरूपपरिणामपरिहारादेव मुख्यार्थाः ।

निर्गुण [3]वादाश्च[3], प्राकृतहेयगुणनिषेध [4]विषय[4]तया व्य[5]वस्थिताः[5] ।

नानात्वनिषेधवादाश्च, [6]एकस्यैव[6] ब्रह्मणः शरीरतया प्रकारभूतं, [7]सर्वं चेतना[7]चेतनं [8]वस्तु[8] - इति, सर्वस्यात्मतया सर्वप्रकारं ब्रह्मैव अवस्थितमिति सुरक्षिताः ।

सर्वविलक्षणत्व-पतित्वेश्वरत्व- [9]कल्याण[9]गुणाकरत्व- सत्यकामत्वसत्य-संकल्पत्वादिवाक्यं, तदभ्युपगमादेव सुरक्षितम् ।

ज्ञानानन्दमात्र [10]वादि च[10], सर्वस्मादन्यस्य, सर्वकल्याणगुणा [11]श्रयस्य[11] सर्वेश्वरस्य, सर्वशेषिणः, सर्वाधारस्य, [12]सर्वोत्पत्ति[12]स्थितिप्रलयहेतुभूतस्य, निरवद्यस्य, निर्विकारस्य, सर्वात्मभूतस्य परस्य ब्रह्मणः स्वरूप [13]निरूपक[13]धर्मः, मल-प्रत्यनीकानन्दरूपंज्ञानमेवेति, [14]स्वप्रकाश[14]तया [15]स्वरूपमपि ज्ञान[15]मेवेति च प्रतिपादनात्, [16]अनुपालितम्[16] ।

पूर्वाचार्यैरेवोपदिष्टः ग्रन्थनिबद्धश्चार्थ उच्यते इति भावः । व्यवस्थिताः - विशेषेणाऽवस्थिताः। नानात्वेति । भेद-निषेधवाक्यं च प्रकारिनानात्वानभ्युपगमात् मुख्यार्थम् (इत्याशयः) । कल्याणगुणाकरत्वशब्देन, अनुक्तसकलगुणास्पदत्वं च विवक्षितम् ।

ज्ञानानन्देति । ज्ञानानन्दमात्रवादिवाक्यम्, अपृथक्सिद्धधर्मवाचिपदानां धर्मिपर्यन्तत्वात्, धर्मिस्वरूपस्य ज्ञानवत् स्वयंप्रकाशत्वाच्च मुख्यार्थम् (इत्यर्थः) । सर्वस्मादन्यत्वम् - (सर्वस्माद्)

---

1. काश्चित् - घ. 2. तथा - घ. 3. वादश्च - घ. 4. पर - क,ग,घ. 5. स्थितः - घ. 6. एकस्य - क,ग,घ. 7. चेतना - घ. 8. वदन्ति - घ. 9. सर्वकल्याण - ग. 10. वाचि - घ. 11. करस्य -घ.12. सर्वस्योत्पत्ति, सर्वोद्भव - घ. 13. निरूपण -घ, निरूपणो- घ. 14. स्वरूपप्रकाश - घ. 15. स्वरूप विज्ञान - घ. 16. उपपादितम् - घ.

ऐक्यवादाश्च, शरीरात्मभावेन सामानाधि[1]करण्यमुख्यार्थतोप[2]पादनादेव सुस्थिताः।

[भेदादिषु मध्ये कस्यार्थस्य श्रुतितात्पर्यविषयता ? इत्यस्योत्तरम्]

एवं च सति, [3]अभेदो वा[3] भेदो वा द्व्यात्मकता वा वेदान्तवेद्यः कोऽयमर्थः समर्थितो भवति ?

सर्वस्य वेदवेद्यत्वात्, सर्वं समर्थितम् । सर्वशरीरतया सर्वप्रकारं ब्रह्मैव अवस्थितमिति, अभेदः समर्थितः ।

एकमेव ब्रह्म, नानाभूत[4]चिदचिद्वस्तुप्रकारं[4] नानात्वेन अवस्थितमिति, भेदाभेदौ । [5]अचिद्वस्तुनश्च चिद्व[5]स्तुनश्च ईश्वरस्य च, स्वरूपस्वभाववैलक्षण्यात् असंकराच्च, भेदः समर्थितः ।

[ऐक्यज्ञानस्य मोक्षसाधनत्वशंका, तन्निरासश्च]

ननु च -

'तत्त्वमसि श्वेतकेतो' **(छा.उ.6-8-7)**

'तस्य तावदेव चिरम्' **(छा.उ.6-14-2)**

विलक्षणत्वम् । तदुपपादकं, सर्वकल्याणगुणाकरत्वादिना । उच्यते । इति च प्रतिपादनादिति (ज्ञानरूपस्यापि ब्रह्मणः) श्रुतिबलात् ज्ञानाद्याश्रयत्वमपि स्वीकार्यमिति, धर्मभूतज्ञानस्यैव हि ज्ञानाद्यनाश्रयत्वं दृष्टमिति च, (ब्रह्मणो धर्मित्वेन) धर्मत्वाभावात् ज्ञानाद्याश्रयत्वं युक्तमिति च (भावः) । स्वरूपनिरुपकेति । स्वरूपनिरूपकधर्मवाचिपदस्य धर्मिपर्यन्तत्वम्, 'तद्गुणसारत्वात्' *(ब्र.सू.2-3-30)* इति सूत्रोक्तमिह दर्शितम् । 'ज्ञान'शब्दः धर्मभूतज्ञानपरः । मलप्रत्यनीकशब्दविशेषितत्वात् धर्मभूतज्ञानं चिदचिद्व्यावर्तकम् । धर्मभूतज्ञानस्य स्वरूपनिरूपणधर्मत्वम्, विशेषणभूतचिदचिद्रूपजगदपेक्षया विशेष्यांशस्य व्यावर्तकतया ।

सर्वं समर्थितमिति । परैरुक्तो भेदः भेदाभेदौ च, भेदश्रुतिविरोधात् अमुख्यत्वाच्च न प्रामाणिकाः । भेदश्रुत्यविरुद्धौ भेदाभेदौ अभेदश्च, अस्मदभिमता इति, अस्माकं भेदपक्ष एव इत्यभिप्रायः ।

ननु च ---- गम्यत इति । सर्वं समर्थितमिति हि पूर्वमुक्तम्, तदयुक्तम् ; ऐक्यज्ञानस्य अपवर्गोपायत्वेन परमार्थविषयत्वात्, तत्रैव तात्पर्यमिति, तदानुगुण्येन श्रुत्यन्तरं नेयम् इति

---

1. करण्येन - घ. 2. र्थोप - घ. 3. अभेदः - घ. 4. चिद्वस्तुप्रकारतया-घ, चित्प्रकारं-घ, चिदब्रह्मप्रकारं - घ. 5. चिदचिद्वस्तुनश्च -घ, अचिद्वस्तुनश्च - घ.

इति ऐक्यज्ञानमेव परमपुरुषार्थलक्षणमोक्षसाधानम् - [1]इति[1] गम्यते,

नैतदेवम् ;

'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ' (श्वे.उ.1-6)

इति, आत्मानं [2]प्रेरितारंच[2] - अन्तर्यामिणं पृथक् [3]मत्वा,[3] ततः पृथक्त्वज्ञानाद्धेतोः, तेन - परमात्मना, जुष्टः अमृतत्वमेति इति, 'साक्षादमृतत्वप्राप्तिसाधनम्, आत्मनः नियन्तुश्च [4]पृथग्भाव[4]ज्ञानमेव ' इत्यवगम्यते ।

[सगुणब्रह्मणः अपरमार्थत्वाभावः]

ऐक्य[5]वाक्य[5]विरोधात्, 'एतत् अपरमार्थसगुणब्रह्मप्राप्तिविषयम्' इत्यभ्युपगन्तव्यम् - इति चेत्,

पृथक्त्वज्ञानस्यैव साक्षादमृत [6]त्वप्राप्तिसाधनत्व [6]श्रवणात्, विपरीतं कस्मान्न भवति ?

एतदुक्तं भवति - द्वयोस्तुल्ययोर्विरोधे सति, अविरोधेन तयोर्विषयः विवेचनीयः - इति ।

कथमविरोधः ? - इति चेत्,

चोद्याभिप्रायः । परमपुरुषार्थ शब्देन, उपासनादयः सगुणप्राप्तिरूपार्वाचीनमोक्षफला इति, तद्व्यावृत्तिरभिप्रेता । गम्यत इति । 'तत्वमसि' इत्येतावदेव अत्र श्रूयते । 'ऐक्यज्ञानं मोक्षसाधनम्' इत्ययमर्थः, न कण्ठोक्तः ; अपि तु गम्यते, इति भावः । ततः ----- हेतोः इति । 'ततः' इति व्याख्येयं पदम् । अस्य प्रकृत्यर्थं 'पृथक्त्वज्ञानात्' इति, प्रत्ययार्थं हेतोः इति च व्याचष्टे । जुष्टः - अनुगृहीतः इत्यर्थः । जुषी-प्रीतिसेवनयोः (पा.धा.1289) साक्षात् शब्देन कण्ठोक्ति-र्विवक्षिता । अनेन ऐक्यज्ञानस्य मोक्षसाधनत्वगम्यताव्यावृत्तिः । पृथक्त्वज्ञानस्य मोक्षोपायत्वश्रुतिविरोधात्, ऐक्यज्ञानम् अपरमार्थविषयं स्यात् इत्यर्थः ।

विवेचनीय इति । तुल्यप्रमाणभूतयोः द्वयोः विरोधे अन्यतरस्य बाधे, अन्यस्याऽपि बाधप्रसंगात्, द्वयोरपि अविरोधेन विषयो विवेचनीयः - इत्यर्थः ।

कथम् इति, विषयभेदेन अविरोधं पृच्छति ।

---

1. इत्यव - घ. 2. प्रेरकं च - घ. 3. ज्ञात्वा - घ. 4. पृथक्त्व, पृथक् - घ. 5. वाक्यज्ञान -घ. 6. प्राप्ति - घ.

[तत्त्वमसिश्रुतिलभ्योऽर्थः]

अन्तर्यामिरूपेण अवस्थितस्य परस्य शरीरतया प्रकारत्वात् जीवात्मनः, तत्प्रकारं ब्रह्मैव 'त्वम्' इति शब्देन [1]अभिधीयते[1]; तथैव ज्ञातव्यमिति, तस्य [2]वाक्यस्यार्थः[2]। एवम्भूताज्जीवात्, तदात्मतया अवस्थितस्य परमात्मनः, निखिलदोषरहिततया सत्यसंकल्पत्वाद्यनवधिकातिशयासंख्येयकल्याण-[3]गुणा[3]करत्वेन [4]च य[4]: [5]पृथग्भावः[5], सः अनु[6]सन्धेय इति, अस्य वाक्यस्य विषयः[6] - [7]इत्ययमर्थः[7] पूर्वमेव असकृदुक्तः।

[तत्त्वत्रयस्वभावविवेकस्य मोक्षोपयोगिता]

'*भोक्ता भोग्यं प्रेरितारं च मत्वा*' (श्वे.उ.1-12)

इति, भोग्य[8]भूतस्य[8] वस्तुनः - अचेतनत्वं परमार्थत्वं [9]सतत[9]विकारास्पदत्वम् - इत्यादयः स्वभावाः; भोक्तुः जीवात्मनश्च - [10]अमलापरि[10]च्छिन्न-ज्ञानानन्दस्वभाव[11]स्यैव अनादि[11]कर्मरूपाविद्याकृतनानाविध-ज्ञानसंकोच-विकासौ, भोग्यभूताचिद्वस्तुसंसर्गश्च, परमात्मोपासनात् मोक्षश्च- इत्यादयः स्वभावाः; एवम्भूतभोक्तृभोग्ययोः अन्तर्यामि[12]रूपेणा[12]वस्थानं, [13]स्वरूपेण च[13] अपरिमितगुणौघाश्र[14]यत्वेन[14] अवस्थानम् इति, परस्य [15]ब्रह्मणः[15] त्रिविधावस्थानं ज्ञातव्यम् - इत्यर्थः।

अन्तर्यामि इति, विषयविभागं दर्शयति। (अनेन) ऐक्यज्ञानस्य मोक्षोपायत्वश्रुतेः विषयो दर्शितः। एवम्भूतेति, पृथक्त्वज्ञानस्य मोक्षोपायत्वश्रुतेर्विषयो दर्शितः। असकृदुक्तः (इत्यन्तेन) अभेदतात्पर्यशंका निराकृता।

'भोक्ता भोग्यम्' (इत्यादिना) भेदाभेदज्ञानस्य मोक्षोपायतया तत्र तात्पर्यमिति शंकां व्युदस्यति। भोग्येति, अचित्स्वभावं दर्शयति। 'अचेतना परार्था च नित्या सतत विक्रिया। त्रिगुणा कर्मिणां क्षेत्रं प्रकृते रूपमुच्यते'। इत्यस्यार्थोऽभिप्रेतः। भोक्तुः इति जीवस्वभावमाह। एवम्भूतेति। सद्वारकम् आकारद्वयम्, अद्वारकः एक आकारश्चेति, ब्रह्म त्रिविधम् - जीवान्तर्यामितया अवस्थानम्, अचिदन्तर्यामितया अवस्थानम्, स्वरूपेण अवस्थानं चेति, त्रिविधं ब्रह्म -इत्यर्थः।

---

1. व्यवह्रियते - घ. 2. वाक्यस्य विषयः - क,ग,घ. 3. गुणगणा - घ. 4. यः - घ. 5. पृथक्स्वभावः- घ. 6. सन्धीयत इति, अस्य वाक्यस्य च विषयः, सन्धेयः - घ. 7. इत्यर्थः - घ. 8. रूपस्य - क, ग. 9. सततं - ग. 10. अपरि -घ. 11. वानादि -घ. 12. रूपेण चाव - घ. 13. स्वरूपेण - घ. 14. त्वेन च - घ. 15. ब्रह्मण इति - घ.

[सगुणस्यैव सद्विद्योपास्यता]

'तत्त्वमसि' (छा.उ.6-8-7) इति सद्विद्यायाम्[1] उपास्ये ब्रह्म सगुणम् ; सगुणब्रह्मप्राप्तिश्च फलम् [2]इति, अभियुक्तैः [2] पूर्वाचार्यैः व्याख्यातम् । [3]यथोक्तं[3] वाक्यकारेण -

'युक्तं तद्गुणकोपासनात्' (ब्र.न.वा.) इति । व्याख्यातं च द्रमिडाचार्येण, विद्याविकल्पं वदता -

'यद्यपि - सच्चित्तः, न निर्भुग्नदैवतं गुणगणं मनसाऽनुधावेत् ;

तथापि - अन्तर्गुणामेव देवतां [4]भजते - इति,[4] [5]तत्रापि[5] सगुणैव [6]देवता प्राप्यते'[6] (द.भा.) इति । सच्चित्तः-सद्विद्यानिष्ठः । न निर्भुग्नदैवतं गुणगणं मनसाऽनुधावेत् अपहतपाप्मत्वादि [7]कल्याणगुणगणं [7]दैवताद्विभक्तं, दहरविद्यानिष्ठ इव, सच्चित्तः न स्मरेत् ; तथापि - अन्तर्गुणामेव देवतां भजते देवतास्वरूपानुबन्धित्वात् [8]सकल[8]कल्याण[9]गुणगणस्य[9], केनचित् परदेवताऽसाधारणेन निखिलजगत्कारण[10]त्वादिना गुणेन[10] उपास्यमानाऽपि देवता, वस्तुतः स्वरूपानुबन्धि[11]सर्वकल्याणगुणगण[11]विशिष्टैव उपास्यते । अतः, सगुणमेव ब्रह्म तत्रापि प्राप्यमिति, सद्विद्या-दहरविद्ययोः विकल्पः - इत्यर्थः ।

तत्त्वमसीत्यादि । ऐक्यज्ञानोपायत्वश्रुतिविरोधेन हि पृथक्त्वज्ञानस्य अपरमार्थविषयत्वं शंकितम् । तत्र ऐक्यज्ञानपरत्वेन परोक्तं 'तत्त्वमसि' इति वाक्यं, सगुणपरम्- (इत्यर्थः) । वाक्यकारः - टंकापरपर्यायः आत्रेयवंश्यः ब्रह्मनन्दी छान्दोग्यव्याख्याकृत् इति प्राचां ग्रन्थेषु दृश्यते ।

युक्तमिति । सगुणस्यैव ब्रह्मणः प्राप्यत्वं युक्तम् इत्यर्थः । (द्रमिडाचार्यः - द्रमिडदेशीयः भाष्यकारापरपर्यायः ब्रह्मनन्दिकृतस्य वाक्यस्य भाष्यकर्ता आचार्यः।) यद्यपि इत्यादिः, द्रमिडाचार्यग्रन्थः । देवतास्वरूपेति, 'अन्तर्गुणाम्' इतिपदस्य हेतुगर्भतां दर्शयन्, वाक्यस्यार्थमाह । निखिलजगत्कारणत्वम्, इति प्रकृतसद्विद्याया असाधारणत्वादुक्तम् ; प्रतिविद्यं व्यवस्थितानां गुणानां प्रदर्शनार्थम् । आदिशब्देन, सर्वविद्यासाधारणाः आनन्दत्वादयो विवक्षिताः । सर्वकल्याण-गुण शब्देन निरूपितस्वरूपस्य गुणाः विवक्षिताः । दहरविद्यायां 'य

---

1. यामपि - घ. 2. इति - घ. 3. तथोक्तं - घ. 4. भजते - घ. 5. तथाऽपि - घ. 6. देवता प्राप्या, देवताप्राप्तिः - घ. 7. कल्याणगुणं, गुणगणं - घ. 8. सकलस्य - घ. 9. गुणस्य - घ. 10. त्वादिगुणेन- घ, त्वादिगुणगणेन - घ. 11. सर्वकल्याणगुण-घ, सकलगुणगण - घ.

[सर्वस्य परमात्मनियाम्यत्वे विधि-निषेधयोः आनर्थक्यशंका ; तत्परिहारश्च]

ननु च - सर्वस्य जन्तोः परमात्मा अन्तर्यामी ; तन्नियाम्यं च सर्वम्[1] - इत्युक्तम् । एवं च सति, विधि - निषेधशास्त्राणाम् अधिकारी न दृश्यते । यः स्वबुद्ध्यैव प्रवृत्तिनिवृत्तिशक्तः, सः 'एवं कुर्यात्, न कुर्यात्' इति विधि-निषेधयोग्यः ; न चैष[2] दृश्यते । सर्वस्मिन् प्रवृत्तिजाते[3], सर्वस्य प्रेरकः परमात्मा कारयितेति, तस्य सर्वनियमनं प्रतिपादितम् । श्रूयते च -

'एष एव [4]साधु कर्म[5]कारयति तं ; यम् एभ्यो लोकेभ्यः उन्निनीषति' 186

(कौषी.उ.3-64)

'एष [5]एवासाधु कर्म[5]कारयति तं ; यम् [6]अधो [6]निनीषति **(कौषी.उ.3-65)**

[7] इति साध्वसाधुकर्मकारयितृत्वात् [8]नैर्घृण्यं च -

अत्रोच्यते - सर्वेषामेव चेतनानां चिच्छक्तियोगः, प्रवृत्तिशक्तियोगः [9]इत्यादि[9] सर्वं[10]प्रवृत्ति-निवृत्ति [10]परिकरं सामान्येन संविधाय, [11]तन्निर्वह [11]णाय तदाधारो भूत्वा अन्तः प्रविश्य, अनुमन्तृ [12]तया च[12] नियमनं कुर्वन्, शेषित्वेनावस्थितः परमात्मा । एतदाहितशक्तिः [13]सन्,[13] प्रवृत्तिनिवृत्त्यादि स्वयमेव कुरुते । एवं

इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्' इति दैवतात् पृथक् अपहतपाप्मत्वादिगुणजातं विभक्तमुपास्यं विहितम् । एवं सद्विद्यायां देवतायाः पृथक् गुणजातम् उपास्यत्वेन न विहितम् । तथापि, जगत्कारणत्वादिकतिपय-गुणविशिष्टत्वेन उपास्यमानं ब्रह्म, स्वतः अपरिमितकल्याण-गुणमिति, सामान्येन अपरिमितगुणत्वेन उपास्यमानत्वात्, तस्यापि प्राप्यं सगुणमेव ब्रह्म इत्यर्थः।

सर्वस्मिन् प्रवृत्तिजाते इति । स्वाधीनप्रवृत्तयः एव प्रजाः अपराधादिकं कुर्वन्ति ; तत्फलदुःखानुभवादिष्वेव राजनियाम्यत्वं तासाम् । अत्र तु साधनानुष्ठानदशायामपि, परमात्म-पराधीनप्रवृत्तय इति, अस्वाधीनानामेतेषां, न विधिनिषेधयोग्यत्वम्, इत्यभिप्रायेण इदमुक्तम् । 'प्रेरितारम्' इत्यादिभिः सर्वप्रेरकतया प्रतिपाद्यमानस्य परमात्मनः, सर्वनियमनम्, सर्वत्रप्रवृत्तिजाते कारयितृत्वपर्यन्तम् इत्यर्थः । **श्रूयते चेति** । (अनेन) कारयितृत्ववैशद्यार्थं श्रुतिं वदन्, नैर्घृण्यं च प्रसंजयति । **साध्व ---- ण्यं चेति** । अत्र च शब्दः अनुक्तसमुच्चयपरः । असाधुकर्मकारयितृत्वात् नैर्घृण्यं, साधुकर्मकारयितृत्वात् वैषम्यं चेत्यर्थः ।

अत्रोच्यत इत्यादि । इह चिच्छक्तियोगस्य भगवन्नित्येच्छाधीनत्वात्, तन्नित्यत्वाविरोधः

---

1. सर्वम् - घ. 2. तथा - घ. 3. जाले - घ. 4. साधु - घ. 5. एवासाधु - घ. 6. अथो - ख.
7. साध्व - घ. 8. त्वम्-घ. 9. इत्यादिकं - घ. 10. प्रवृत्ति - घ. 11. तन्निर्हर - घ. 12. तया - घ.
13. सन् जीवात्मा -घ., सन् जीवः - घ.

कुर्वाणम्, ईक्षमाणः परमात्मा, उदासीन आस्ते । अतः सर्वमुपपन्नम् ।

[ईश्वरस्य साध्वसाधुकर्मकारयितृत्वे विषयविवेकः]

साध्वसाधु[1]कर्म[1]कार[2]यितृत्वं[2] तु व्यवस्थितविषयं; न सर्वसाधारणम् । यस्तु पूर्वं स्वयमेवा[3]तिमा[3](त्रय)त्रानुकूल्ये प्रवृत्तः ; तं [4]प्रति प्रीतः स्वयमेव[4] भगवान् कल्याण- बुद्धियोगदानं [5]कुर्वन्[5], कल्याणे प्रवर्त[6]यति[6] । यः पुनरतिमात्रं प्रातिकूल्य प्रवृत्तः ; [7]तस्य तु[7] क्रूरां बुद्धिं ददत्, स्वयमेव[8]क्रूरेष्वेव कर्मसु[8] प्रेरयति भगवन् । यथोक्तं भगवता -

'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।।' (भ.गी.10-10)
'तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ।।' (भ.गी.10-11)

इति भावः । 'आदि' शब्देन निवृत्तिशक्तियोगः, इच्छाप्रयत्नौ च गृह्येते । **इत्यादि** इति, क्रियाविशेषणम् । **प्रवृत्तिनिवृत्तिपरिकरम्**-करणकलेबरम्, बाह्यप्रवृत्तिनिवृत्तिशक्तिम्, ज्ञान-चिकीर्षायत्नशक्तिं च सर्वचेतनानां सामान्येन तत्स्वातन्त्र्यार्हं प्रदाय इत्यर्थः ।

अनुमन्तृतयेति । एवं ज्ञानचिकीर्षाप्रयत्नेषु प्रवृत्तेषु प्रवृत्त्यारम्भे न परमात्मापेक्षाऽस्ति; अपि तु स्वयमेव प्रवर्तते । तदानीं परमात्मा उपेक्षकः । न च एतावता नियन्तृत्ववैकल्यम् ; परस्य उपेक्षाया अपि स्वस्वातन्त्र्याधीनत्वात्, देहसम्बन्धसुखदुःखाद्यन्वयदानादिना नियमनस्य विद्यमानत्वात्, जीवस्य नियमनार्हत्वानपगमाच्च । एवम् उपेक्षकः सन्, प्रथमप्रवृत्तौ सत्यां पश्चादनुमन्ता परमात्मा (इत्याशयः) । अनुमन्तृत्वं नाम प्रवृत्तिशैथिल्यपरिहारात्मकः तत्फल-पर्यन्तत्वहेतुः व्यापारः । तत् प्रवृत्तस्य प्रवर्तकत्वम् । एवं ज्ञान चिकीर्षादौ स्वातन्त्र्यात् विधि-निषेधयोग्यत्वम् । **नियमनं कुर्वन्** इति, नियमनवैकल्यशंकापरिहारार्थम् । **सर्वप्रकारनियमनशक्तोऽपि सन्**, संकल्पादेव अनुमन्तृतया नियच्छति । अनुमन्तृत्वमपि नियमनमेव; तेन विना प्रवृत्तेः फल-पर्यन्तत्वायोगात् । (पूर्वं) **आधारो भूत्वेति**, शेषित्वेनावस्थितः इति च नियमनप्रकारविशेषस्याभावेऽपि धारकत्वं शेषित्वं च सुस्थितमिति, आत्मशरीरभावस्य न हानिः इत्यभिप्रायेण ।

साध्विति । कारयितृत्वश्रुतेः व्यवस्थितविषयत्वात्, न विधिनिषेधशास्त्रानर्थक्यम् इति

---

1. कर्मणोः - घ. 2. यितृत्वं - घ. 3. वोक्त -घ. 4. प्रतिस्वयमेव, प्रति - घ. 5. कुर्वन्नेव - घ. 6. यते - घ. 7. तस्य - क,ग,घ. 8. कर्मसु - घ.

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ।। (भ.गी.16-19) इति ।

[स्फुटतया उपायस्वरूपोपदेशः, तत्र स्वाचार्यसमतिश्च]

सोऽयं परब्रह्म[1]भूतः पुरुषोत्तमः, निरतिशय-पुण्यसंचय [2]क्षीणा [2]शेष-जन्मोपचित- पापराशेः, परमपुरुषचरणारविन्दशरणागतिजनिततदाभि [3]मुख्यस्य, सदाचार्योपदेशोपबृंहित [4]शास्त्राधि [5]गततत्त्वयाथात्म्यावबोध [5]पूर्वकाह [5]रहरुपचीयमान-शमदमतपश्शौचक्षमार्जवभयाभयस्थानविवेकदयाहिंसाद्यात्मगुणोपेतस्य, वर्णाश्रमोचितपरमपुरुषाराधनवेषनित्यनैमित्तिककर्मोपसंहृतिनिषिद्धपरिहारनिष्ठस्य, [6]परमपुरुषचरणारविन्द [6]युगलन्यस्तात्मात्मी [7]यस्य, तद्भक्तिकारितानवरतस्तुति-स्मृतिनमस्कृतियतनकीर्तनगुणश्रवणवचनध्यानार्चनप्रणामादिप्रीतपरम-कारुणिकपुरुषोत्तमप्रसादविध्वस्तस्वान्तध्वान्तस्य, अनन्यप्रयोजनानवरत-निरति[8]शय-प्रियविशद [8]तमप्रत्यक्षतापन्नानुध्यानरूपभक्त्येक [9]लभ्यः[9] ।

भावः । दयायास्तु प्राचीनासंख्येयजन्मसु महापराधकारिणि, पश्चात्तन-प्रातिकूल्य-व्यवसाय-निवृत्तिमात्रेण तदपराधान् अनन्तान् अनादृत्य, तस्य निरतिशयसम्पत्प्रदानाय भगवान् प्रवर्तत इति सावकाशत्वम् ।

सोऽयमित्यादिना, उपायस्वरूपं विशदयति । **परब्रह्मभूत** इति, भक्तिः, ईश्वरविषया; न तु ब्रह्मविषया इति शंकाव्यावृत्त्यर्थम् । **निरतिशयेति** । 'जन्मान्तरसहस्रेषु तपोज्ञानसमाधिभिः। नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते' इत्यस्यार्थं हृदिनिधाय (इदम्)। **शरणागतिजनितेति** , 'मामेव ये प्रपद्यन्ते' इत्युक्ताग्रप्रपत्तिसापेक्षत्वमाह । **उपबृंहितम्** - पुष्कलीकृतम् । अनेन 'पाण्डित्यं च निर्विद्य' इति श्रुत्यर्थ उक्तः । **तत्त्वयाथात्म्येति** । 'रजः कार्यः प्रकारविपर्यासः, तमः कार्योधर्मिविपर्यासः ' तदुभयराहित्यं विवक्षितम् । **शमः** - अन्तःकरणजयः । **दमः** - बाह्येन्द्रियजयः । **तपः** - कृच्छ्रादि । **शौचम्** - (शुद्धिः) , मानस वाचिककायिकरूपेण त्रिविधम्। **क्षमा** - दुःखसहिष्णुत्वम् । **भयस्थानविवेकः** -भगवदपचारभीरुत्वम् । **अभयस्थानविवेकः** - तद्रक्षकत्वाध्यवसायादिना निर्भयत्वम् । **दया** - परदुःखसहिष्णुत्वम् । **अहिंसा** - परदुःखाहेतुत्वम्।

---

1. ब्रह्म - घ. 2. प्रक्षीणा - घ. 3. मुख्यस्य च - घ. 4. शास्त्रादव - घ. 5. पूर्वस्याहरह-घ. 6. चरण -घ. 7. यभारस्य -घ. 8. विशद -घ. 9. लभ्य इति - घ.

तदुक्तं परमगुरुभिः भगवद्यामुनाचार्यपादैः[1] -

'उभयपरिकर्मितस्वान्तस्य ऐकान्तिकात्यन्तिकभक्तियोगलभ्यः' (आ.सि.14) इति । [2]ज्ञानयोग-कर्म[2]योगसंस्कृतान्तःकरणस्य - इत्यर्थः । तथा च श्रुतिः -

'विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।' (ईशा.उ.11)

इति । अत्र 'अविद्या' शब्देन, विद्येत[3]रत् वर्णाश्रमाचारादि [4]पूर्वोक्तं कर्म,[4] उच्यते विद्या[5]शब्देन च[5]-भक्ति[6]रूपापन्नं ध्यानम्[6] उच्यते । यथोक्तम् -

'इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः ।
ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया ।।' (वि.पु.6-6-12) इति ।

परमपुरुषाराधनेति । (इदं) 'वर्णाश्रमाचारवता' इत्यादिवचनाभिप्रायेण । **उपसंहृतिः** - अनुष्ठानम् । **परम -----न्यस्तेति** । (अनेन) भगवति न्यस्तभरत्वमाह । **तद्भक्तिकारितेति** । 'शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम्' इत्यादिवचनानुगुण्येन, शास्त्रज्ञानात्प्रभृति भक्तिसापेक्षत्वात् (इदम्) उक्तम् । **स्तुतिः** -गुणकथनम् । **यतनम्** - भगवद्ध्यानादिकरणम् । **कीर्तनम्** - भगवन्नामोच्चारणम् । **वचनम्** - परेभ्यः भगवद्गुणानां प्रतिपादनम् । **ध्यानशब्देन** आरम्भण-संशीलनं विवक्षितम्, न तु अंगि (उपासनम्) ; अनुध्यानोपायत्वस्य उच्यमानत्वात् । 'यावद्धारणासिद्धि क्रियमाणम् अर्चनादिकम् अंगम् ; ततः पश्चादनुष्ठीयमानम् अंगि' इति विभागः । **स्वान्तध्यान्तम्** - पापमूलरजस्तमसी । विषयस्य प्रियत्वात्, अनुध्यानस्य निरतिशयप्रियत्वम् । **एवं विधानुध्यान- भक्तिः, तयैव लभ्यः** इत्यर्थः । (यद्वा इत्यादिना । अभिप्रायान्तरमप्युक्तं तात्पर्यदीपिकायाम् ।)

तदुक्तमिति अस्यार्थस्य साम्प्रदायिकत्वमाह ।

विद्यां चेति, (ज्ञानस्य) कर्मानुगृहीतत्वे प्रमाणम् ।

इयाजेत्यादिना, 'अविद्या' शब्दस्य कर्मवाचित्वे प्रयोगं दर्शयति । **ज्ञानव्यपाश्रयः** - शास्त्रजन्यज्ञानवान् । **ब्रह्मविद्यामधिष्ठाय** - विवेकजं ज्ञानमवलम्ब्य उद्दिश्य इत्यर्थः । न हि विवेकजन्यज्ञानस्य प्रेर्यत्वमुपपद्यते ।

---

1. चार्यैः-घ. 2. ज्ञानकर्म घ. 3. तरत्वात् - घ. 4. पूर्वोक्तकर्म -घ. 5. शब्देन - ख. 6. रूपापन्नध्यानम् - ख, रूपध्यानम्-घ.

[उपायविधिवाक्यानामैककण्ठ्येन योजना]

'तमेव विद्वान् अमृत इह भवति, नान्यः पन्था अयनाय विद्यते'[1] (तै.आर.पु.3-12-17)

'य एनं विदुरमृतास्ते भवन्ति' (तै.ना.उ.1-11)

'ब्रह्म विदाप्नोति परम्' (तै.उ.आन.1-1)

[2]*'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति'* (मुण्ड.उ.3-2-9)

इत्यादि वेदनशब्देन, ध्यानमेवा[3]भिहितम्[3] ;

'निदिध्यासितव्यः' (बृ.उ.6-5-6)

[4]इत्यादिना[4] ऐकार्थ्यात् । तदेव ध्यानं पुनरपि विशिनष्टि -

'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते [5]तेन[5] लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ।।'

(मुण्ड.उ.3-2-3)

इति । भक्तिरूपापन्नानुध्यानेनैव लभ्यते ; [6]न केवल[6]वेदनमात्रेण ; *'न मेधया'* (मुण्ड.उ.3-2-3) इति केवलस्य निषिद्धत्वात्

[भक्तेः ध्यानविशेषत्वोपपादनम् ; तस्य परमपुरुषप्रसाद हेतुता च]

एतदुक्तं भवति - योऽयं मुमुक्षुः वेदान्तविहितवेदनरूपध्यानादि [7]निष्ठः[7], यदा तस्य तस्मिन्नेवानुध्याने [8]अनवधि[8]कातिशया प्रीतिः जायते ; तदैव तेन लभ्यते परमपुरुषः - इति ।

यथोक्तं भगवता -

'पुरुषस्स परः पार्थ भक्त्या लभ्यस्त्वनन्यया' (भ.गी.8-22)

वेदान्तविहितेत्यादि । उपासनादिविधायिवाक्याविरोधाय केवलश्रवणादिनिषेधः इत्यवगम्यते इत्यभिप्रायः । ध्येयस्य निरतिशयत्वात् ध्याने प्रीतिः । ध्यानदशायां प्रीतिः, ध्यानस्य प्रीतिरूपत्वमुक्तं भवति । एवं वरणीयत्वहेतुर्गुण उक्तः।

---

1. विद्यते इति - घ. 2. स यो ह वै तत्परं ब्रह्म - घ, स यो ह वै तत्परं वेद ब्रह्म - घ. स यो ह वै तत्ब्रह्म पा. तपो ह वै तत्परं वेद ब्रह्म - ग. ब्रह्म - ख. 3. भिधीयते - घ. 4. इत्यनेन - घ. 5. स तेन - ग. 6. केवलं - क,ग. 7. विशिष्टः - क,ग. 8. निरवधि - क,ग.

'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।

ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ।।' (भ.गी.11-54)

'भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।

ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ।।' (भ.गी.18-55)

इति । तदनन्तरं मां तत एव -[1]भक्तेः[1] विशते इत्यर्थः । भक्तिरपि निरतिशय-प्रियानन्यप्रयोजन [2]स्वेतरवैतृष्ण्यावहज्ञानविशेष एवेति, तद्युक्त एव [3]तेन परेणा[3]त्मना वरणीयो [4]भवतीति[4], तेन [5]लभ्यते[5], इति श्रुत्यर्थः।

एवंविधपरभक्तिरूपज्ञानविशेषस्य उत्पादकः पूर्वोक्ताहरहरुपचीयमानज्ञान-पूर्वककर्मानुगृहीतभक्तियोग एव ।

[उक्तेऽर्थे पराशर- गीताचार्ययोः सम्मतिः]

यथोक्तं भगवता पराशरेण -

तदनन्तरमिति । 'भक्त्या मामभिजानाति' इति श्लोके भक्ति साध्यं ज्ञानानन्तरम् अपवर्गोपायः इति शंका माभूदिति, तद्व्याचष्टे (अनेन) । 'भक्त्या' इति परभक्तिरुच्यते ; 'मद्भक्तिं लभते पराम्' इति प्रकृतत्वात् । **'अभिजानाति'** इति, परज्ञानमुच्यते । 'यः' इति, धर्मिस्वरूपम् । **'यावान्'** इति, गुण-विभूत्यादि विवक्षितम् । **'ततः'** इति परमभक्तिरुच्यते । साक्षात्काराभिनिवेशः - **परभक्तिः** । साक्षात्कारः - **परज्ञानम्** । पश्चात् अनुभवाभिनिवेशः - **परमभक्तिः** । 'ततः' इति च न साक्षात्कारपरामर्शः ; 'प्रवेष्टुं भक्त्या शक्यः' इति पूर्वोदाहृतवचनैकार्थ्यात् । 'विशते' इति, प्रकृतिबन्धविनिर्मुक्तस्यानुभव उच्यते । (भक्तौ) अनन्यप्रयोजनत्वम् ; निरतिशयप्रियत्वात् । अनेन ऐश्वर्यार्थभक्तियोगो व्यावृत्तः । **स्वेतरेत्यादि** । भक्तेः प्रियतमत्वातिशयात्, भगवत्प्राप्तावपि नैरपेक्ष्यं भवतीत्यर्थः । **परभक्ति ---- षस्येति**, परज्ञानात्पूर्वभाविनी परभक्तिः न विवक्षिता ; परमभक्तिरेवाऽभिप्रेता । ज्ञानपूर्वक- कर्मानुगृहीतः - अहरहः अभ्यस्यमानो भक्तियोगः, परम-भक्तेरुत्पादक इत्यर्थः । अहरहभ्यस्यमान एव भक्तियोगः परमभक्तिदशापन्नः स्यात् इत्यर्थः । प्रीतिरूपध्यानेन निरतिशयानन्दरूपदिव्यात्मस्वरूपानुसन्धानं निरतिशयप्रियं सिध्यति । तदेव साक्षात्काररूपम् अनुभवाभिनिवेशं जनयति । सः अभिनिवेशः परमभक्तिरिति यावत् ।

---

1. भक्तिः -ग. 21. सकलेतर - ग,घ. 3. तेन परमा - घ. 4. भवति - घ. 5. लभ्यः - घ.

'वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ।।' (वि.पु.3-8-9) इति ।

निखिलजगदुद्धरणाय अवनितले अवतीर्णः परब्रह्मभूतः पुरुषोत्तमः, स्वयमेव एतदुक्तवान् -

[1]'स्वकर्मनिरतस्सिद्धिं यथा विन्दति [2]तच्छृणु' [2] । (भ.गी.18-45)
'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।।' (भ.गी.18-46)

[3]इति, यथो [3]दित [4] कर्म[4]परिणत [5]भक्त्येकलभ्य एव[5] ।

[उक्तार्थस्य सम्प्रदायपारम्पर्यप्राप्तता ; इतरार्थेषु तदभावश्च]

[6]भगवद्बोधायन [6]-टंक-द्रमिड-गुहदेव-कपर्दिभारुचि [7]प्रभृत्यविगीत [7]शिष्ट-परिगृहीतपुरातन [8]वेदवेदान्त[8]व्याख्यान [9]सुव्यक्तार्थ [9]श्रुतिनिकरदर्शितः अय पन्थाः।

अनेनचार्वाकशाक्यौलूक्याक्षपादक्षपणककपिलपतंजलिमतानुसारिणो वेदबाह्यः, वेदावलम्बिकुदृष्टिभिस्सह निरस्ताः । वेदावलम्बिनामपि [10]यथा[10]वस्थिरवस्तुविपर्यस्तदृशा बाह्य [11]साम्यं मनुनै[11] वोक्तम् -

---

वर्णाश्रमाचारवता इति, भगवदुपासनस्य कर्मानुगृहीतत्वे प्रमाणमाह । तत्तोषकारकः इत्यनेन, भगवत्तोषहेतुभूतज्ञानांगत्वं सिद्धम् ।

यथोदित -------- लभ्यः - यथोक्तकर्मानुगृहीतक्रमपरिणतभक्त्येकलभ्य इत्यर्थः । भगवद्बोधायनेत्यादिना यथोदितप्रकारस्य उपासनस्वरूपस्य विशिष्टशिष्ट-परिगृहीतव्याख्यानमूलत्वमाह । टंकः -ब्रह्मनन्दी । शिष्टपरिगृहीत शब्दः अर्थविशेषणम् ।

अनेन ------निरस्ताः इति । उक्तार्थविरुद्धम् उपायोपेयस्वरूपं वर्णयन्तो वादिनःतर्कानुगृहीतश्रुतिविरोधादेव निरस्ताः (इत्यर्थः)।औलूक्यः - कणादः। पतंजलिमतम् - हैरण्यगर्भम् । अक्षपाददादीनां वेदप्रामाण्याभ्युपगमेऽपि, वेदविरुद्धार्थानां कुतर्कमूलानामभ्युपगमात्,

---

1. स्वकर्मा - घ. 2. तत्क्षणम् - घ. 3. यथो - घ. 4. कर्म - घ. 5. भक्त्येकलभ्य एवेति-घ, भक्त्या लभ्य एव -घ. 6. बोधायन - ख. 7. त्यविगान -ढ, त्युदित - घ. 8. वेदान्त -घ. 9. सुव्यक्त -घ, सुस्पष्टार्थ - घ. 10. यथाप क्ष-घ. 11. साम्यं महर्षिणो -घ, समत्वं मनुनैवो - घ.

'या वेदबाह्या स्मृतयो याश्च काश्च कुदृष्टयः ।
सर्वस्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ।।' (म.स्मृ.12-95)
इति ।

रजस्तमोभ्यामस्पृष्टम् उक्तम् सत्त्वमेव 'येणां[1] स्वाभविको गुणः ; तेणामेव वैदिकरुचिः वेदार्थयाथात्म्यावबोधश्च - इत्यर्थः । यथोक्तं मात्स्ये -

[ब्रह्मकल्पेषु सात्विक राजसतामसविभागः]

'संकीर्णाः सात्विकाश्चैव राजसास्तामसास्तथा' (म.पु.290-13)

इति । [2]केचित्[2] ब्रह्मकल्पाः, संकीर्णाः ; केचित् सत्त्वप्रायाः ; केचित् रजः प्रायाः, केचित् तमः प्रायाः, - इति कल्प [3]विभागमुक्त्वा[3], सत्त्वरजस्तमोमयानां तत्त्वानां माहात्म्यं [4]वर्णनं च[4] तत्तत्कल्पप्रोक्त [5]पुराणेषु सत्त्वादिगुणमयेन ब्रह्मणा क्रियते - इति चोक्तम् ;

वेदस्य पौरुषेयत्वाभ्युपगमाच्च, तन्मतानुसारिणां बाह्यसाम्यात् बाह्यत्वोक्तिः । **या वेदबाह्या** इति । 'उत्पद्यन्ते व्ययन्ते च यान्यतोऽन्यानि कानिचित् । तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च' इत्येवं पूर्वश्लोके बाह्यानां निरस्तत्वात्, (अस्मिन्) श्लोके, कुदृष्टीनां बाह्यसाम्यमेव विवक्षितम् इत्यभिप्रायः ।

रजस्तमोभ्यामिति । 'तमो निष्ठा हि ताः स्मृताः' इत्यत्र तमःशब्दः रजसोऽप्युपलक्षणार्थः; शुद्धसत्त्वव्यतिरिक्तत्वात् इत्यभिप्रायः । **स्वाभाविकेत्यनेन** सत्त्वगुणस्य स्थायित्वं विवक्षितम् । अनेन क्वचित्प्रमाद्यतो व्यावृत्तिः । **तेषामेवेत्यादि**। वेदावलम्बिकुदृष्टीनां वेदैकरुचित्यमूल-सत्त्वगुणसद्भावेऽपि, तदर्थयाथात्म्यानवबोधहेतुभूतरजस्तमः सम्भवात् ते निरसनीयाः इत्यर्थः ।

'संकीर्णाः' इत्यादिवचने प्रमाणाप्रमाणाविभागकथनाभावेऽपि, सात्त्विकादि- विभागकथनस्य प्रयोजनान्तराभावात् , प्रामाण्याप्रामाण्यनिर्णय एव प्रयोजनम् इत्यभिप्रायः । **संकीर्णादिशब्दानां विशेष्याः ब्रह्मकल्पाः** ; 'यस्मिन् कल्पे तु' इत्युक्तेः इति भावः । कल्पानां रजः प्रभृतिगुणप्राचुर्यम् ; तस्मिन् कल्पे ब्रह्मणः तद्गुणप्राचुर्यात् । **तत्त्वानाम्** - दैवतानाम् । **यस्मिन्निति** । यस्मिन्कल्पे यत् पुराणं ब्रह्मणा उक्तं, तस्मिन्कल्पे तस्मिन्पुराणे तत्तद्गुणप्रचुरस्य तस्य तस्य दैवतस्य माहात्म्यं वर्ण्यते इत्यर्थः । **विशेषतः** - 'किं दैवतम् ? किं गुणकम्?' इति विशेषतः ।

---

1. एणां - घ. 2. अयमर्थः केचित् - घ. 3. विभागादुक्त्वा -घ, भेदमुक्त्वा - घ. 4. वर्णनं - घ.
5. त्कल्पोक्त - क,ग,घ.

'यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा' । (म.पु.290-15)

'तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते' । (म.पु.290-16)

इति । विशेषतश्चोक्तम् -

'अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते' (म.पु.290-14)

'राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः' (म.पु.290-15)

'सात्त्वि [1]केष्वथ[1] कल्पेषु माहात्म्यकमधिकं हरेः' (म.पु.290-16)

'तेष्वेव योगसंसिद्धाः गमिष्यन्ति परां गतिम्' (म.पु.290-17)

'संकीर्णेषु [2]सरस्वत्याः पितृणाम् [2]------ (म.पु.290-14) इत्यादि ।

[त्रैगुण्यस्य त्रैलोक्यव्यापिता ; पुराणेषु ग्राह्याग्राह्यविभागश्च]

एतदुक्तं भवति - आदिक्षेत्रज्ञत्वाद्ब्रह्मणः, तस्याऽपि केषुचिदहस्सु सत्त्वमुद्रिक्तम्, केषुचित् रजः, केषुचित् तमः । यथोक्तं भगवता -

'न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।

सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभि [3]र्गुणैः ॥' (भ.गी.18-40)

इति [3] ।

'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' (श्वे.उ.6-18)

इति श्रुतेः, ब्रह्मणोऽपि सृज्यत्वेन शास्त्रवश्यत्वेन च क्षेत्रज्ञत्वं गम्यते । सत्त्वप्रायेषु अहस्सु, तदितरेषु [4]च यानि[4] ब्रह्मणा प्रोक्तानि ; तेषां परस्परविरोधे

सृज्यत्वेन - ऐच्छत्वश्रवणात् अपहतपाप्मत्वादिश्रवणरूपापवादरहित- जन्मवत्त्वेन इति भावः । शास्त्रवश्यत्वेन - शास्त्रप्रदानं हि । तत्सापेक्षस्य, इति भावः ।

तेषामिति । न एतद्वचनविरोधात् तेषां बाधः ; किन्तु परस्परविरोधात् । कृत्स्नपुराणानाम् अर्थनिर्णायकत्वशक्तिविरहे सति, तानि किं कार्त्स्न्येन त्याज्यानि? उत कानिचित् स्वीकार्याणि? इत्यपेक्षायाम्, सत्त्वादि- मूलत्वलक्षणवैषम्यपरम् इदं वचनम् । अतः न *'भूयसा बलीयस्तया'* (पू.मी.3-3-10) अस्य बाधः इत्यर्थः । सत्त्वनिष्ठेनेति, स्वतः प्रमाणत्वात्, अपवादकवचनान्तरादर्शनात्, *'यो ह खलु वा अस्य'* (मैत्रा.उ.5-2) इत्यादि मैत्रायणीयश्रुत्या तत्तद्गुणकत्वेनाभिमतस्य तत्तद्देवताविशेषस्य प्रतिपादकानां प्रबन्धानां तत्तद्गुणमूलत्वस्य

---

1. केषु च - क,ग,घ. 2. पितृणां च निगद्यते -घ, सरस्वत्याः - घ. 3. गुणैः - घ. 4. यानि - घ.

सति, सात्त्विकाहः प्रोक्तं पुराणमेव[1] यथार्थम् ; तद्विरोधि अन्यत्, अयथार्थम् इति पुराणनिर्णयायैव[2], इदं सत्त्वनिष्ठेन ब्रह्मणा अभिहितमिति [3]विज्ञायते - इति[3] ।

[गीताचार्यवचनतः सत्त्वादिगुणत्रयकार्यविवेक]

सत्त्वादीनां कार्यं च भगवतैवोक्तम् -

'सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ।।' **(भ.गी.15-17)**

'प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
[4]बन्धं मोक्षं [4]च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ।।' **(भ.गी.18-30)**

'यथा धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ।।' **(भ.गी.18-31)**

'अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता ।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ [5]तामसी ।।' **(भ.गी.18-32)**

इति[5] । सर्वान् पुराणार्थान् ब्रह्मणः सकाशात् अधिगम्यैव सर्वाणि पुराणानि, पुराणकाराश्चक्रुः । यथोक्तम् -

'कथयामि यथापूर्वं दक्षाद्यैर्मुनिसत्तमैः ।
पृष्टः प्रोवाच भगवानब्जयोनिः पितामहः ।।' **(वि.पु.1-2-10) इति ।**

उचितत्वरूपेण वस्तुसामर्थ्येन, स्वतस्सिद्धस्य प्रामाण्यस्य स्थिरीकरणाच्च प्रामाण्यहेतुभूत-रजस्तमोऽभिभवननिरासकसत्त्वमूलत्वं सिद्धमिति भावः ।

सत्त्वादीनामिति । सात्त्विकादिविभागोऽस्तु ; तत्र कस्य प्रामाण्यम् ? कस्याप्रामाण्यम्? इत्यत्र (उत्तरमिदम्) ।

सर्वान् पुराणेति। पुराणानां ब्रह्म प्रोक्तत्वे, कथं पराशरादि प्रोक्तत्वं संघटते? (इत्यत्रोत्तरमिदम्) ।

अपौरुषेयेष्विति । पौरुषेयेषु हि विरोधे वक्तृगुणानुगुणप्रामाण्याप्रामाण्यविभागः उपपद्यते । अपौरुषेयश्रुतिवाक्येषु गुणानुगुणप्रामाण्यविभागेन निर्वाहो नोपपद्यते इति

---

1. प्रकमेव पुराणम् - क,ग. 2. निर्णयायत्त घ. 3. विज्ञायते - घ. 4. बन्धमोक्षं - ख. बन्धमोक्षौ - घ. 5. तामसी - घ.

[वेदवाक्येषु तात्पर्यनिर्णयेन विरोधपरिहारः]

अपौरुषेयेषु वेदवाक्येषु परस्परविरुद्धेषु कथम् ? - इति चेत्,

तात्पर्यनिश्चयात् अविरोधः, पूर्वमेवोक्तः ।

[श्रुतीनां शिवपारम्यपरत्वशंका]

यदपि चेदं विरुद्धमिव दृश्यते -

'प्राणं मनसि सह करणैर्नादान्ते परमात्मनि सम्प्रतिष्ठाप्य ध्यायीते शानं प्रध्यायीतैवम् सर्वमिदम्' (अ.शिखा.2-14)

ब्रह्म-विष्णु-रुद्रेन्द्राः ते सर्वे सम्प्रसूयन्ते ---' (अ.शिखा.2-15)

'[1]स कारणम् - - - -' (अ. शिखा.4-16)

'कारणं [1]तु ध्येयः सर्वैश्वर्यसम्पन्नः सर्वेश्वरः शम्भुराकाशमध्ये ध्येयः' (अ.शि.17)

'यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ।।' (श्वे.उ.3-9)

'ततो यदुत्तरतरं तदरूपमनामयम् ।

य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापियन्ति ।।' (श्वे.उ.3-10)

'सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।

सर्वव्यापी च भगवान् तस्मात् सर्वगतः शिवः ।।' (श्वे.उ.3-11)

'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः ।

तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी ।।' (श्वे.उ.4-18)

(शंकाशयः) । तात्पर्य ----- मेवोक्तः इति । अभेदश्रुत्यादीनां पूर्वापरपर्यालोचनादिना निर्वाहस्य उक्तत्वात्, तेनैव प्रकारेण अत्रापि अविरोधनिर्वाहः इत्यभिप्रायः ।

यदपि चेदमिति । एवं वेदपूर्वभागवचसां विरोधे निर्वाहोऽस्तु ; उपनिषद्भागेषु अन्यपरत्वाद्यभावात् तत्र कथं निर्वाहः ? इत्यत्र (उत्तरम्) ।

इत्यादि इति, 'आदि'शब्देन, अथर्वशिरोवाक्यानि, चतुर्मुखकारणत्वपराणि 'हिरण्यगर्भः समवर्तताग्रे' 'धाता यथापूर्वमकल्पयत्' 'प्रजापतिः प्रजा असृजत' इत्यादि वाक्यानि च विवक्षितानि।

---

1. न कारणम्' कारणं - क,ख,ग. अकारणम्' कारणं - घ. कारणं - घ.

इत्यादि । '[1]नारायाणः परं ब्रह्म[1]' इति [2]च पूर्वमेव प्रतिपादितम[2] ; तेन अस्य [3]कथमवि[3]रोधः[3]?

[उक्ताक्षेपपरिहारः हरेरेव जगत्कारणता च]

अत्यल्पमेतत् -

'वेदवित्प्रवरप्रोक्तवाक्यन्यायोपबृंहिताः ।

वेदाः सांगा हरिं प्राहुर्जगज्जन्मादिकारणम् ।। '

'जन्माद्यस्य यतः' (ब्र. सू. 1 - 1 - 2)

यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति ।

यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व तद्ब्रह्म' (तै.उ.भृ.1-2)

इति । जगज्जन्मादिकारणं [4]ब्रह्मेत्य[4]वगम्यते । तच्च जगत्सृष्टिप्रलय-प्रकरणेष्वेवावगन्तव्यम् ।

'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा.उ.6-2-1)

इति जगदुपादानताजगन्निमित्तताजगदन्तर्यामि[5]त्वादिमुखेन[5] परमकारणं सच्छब्देन [6]प्रतिपादितम्[6] । अयमेवाऽर्थः,

'ब्रह्म वा इदमेक एवाग्र आसीत्' (बृ.उ.3-4-11)

वेदवित्प्र -----बृंहिताः - स्मृतीतिहासपुराणमीमांसान्यायोपबृंहिताः इत्यर्थः । जगत्सृष्टिप्रलयप्रकरणेषु इति । न तु उपासनाविधिपरेषु 'शम्भुराकाशमध्ये ध्येयः' इत्यादिषु इत्यर्थः। तत्र हि कारणत्वानुवादेन ध्येयताविधिपरत्वम् । वेदवित्प्रवरेति श्लोकः श्रीभाष्यकारीय एव ।

सदेवेति । जगत्सृष्टिप्रलयप्रकरणेषु 'सत् ब्रह्म' इत्यादिभिः बहुभिः शब्दैः कारणत्वप्रतिपादनात् नारायणस्यैव कथं कारणत्वसिद्धिः ? इत्यत्र (उत्तरमिदम्) ।

ब्रह्म वा इत्यादि । (अनेन) गतिसामान्यन्यायात्, सर्वेषां कारणवाक्यानाम् ऐककण्ठ्यमभिप्रेत्य उदाहृतवाक्यैकार्थं वाक्यान्तरं दर्शयति । अयमेवाऽर्थः प्रतिपादितः इत्यर्थः । तथेति 'सद् ब्रह्म' शब्दयोः आत्मपर्यवसानमाह । **तथा चेति** । (अनेन) 'आत्म'शब्दस्य 'सद् ब्रह्म' शब्दापेक्षया विशेषशब्दत्वेऽपि, 'नारायण' शब्दापेक्षया सामान्यशब्दत्वात्, तत्र पर्यवसानमाह ।

---

1. 'नारायण परं ब्रह्म' (तै.ना.उ.) - रा.ग्रं.पा. 2. पूर्वमेव प्रतिपादितम् -घ,च पूर्वोक्तम् घ. 3. रोध इति - घ. 4. परं ब्रह्मेत्यव - घ. 5. तामुखेन - घ. 6. अभिहितम् - क,ग.

इति शाखान्तरे ब्रह्मशब्देन प्रतिपादितः ; अनेन 'सच्छब्दा[1]भिहितं[1] ब्रह्म' इत्यवगतम् । अयमेवार्थः [2]शाखान्तरे[2] -

[सृष्टेः प्राक्काले वर्तमानः आत्मा, नारायणः]

'आत्मा वा इदमेक एवाग्र आसीत्, नान्यत्किंचन मिषत्' (ऐत.उ.1-1) [3]इति, तथा[3] सद्ब्रह्मशब्दाभ्याम् आत्मैव [4]अभिहित[4] इति, अवगम्यते । तथा च शाखान्तरे -

'एको ह वै नारायण आसीन्न ब्रह्म नेशानो ----- नेमे द्यावा- [5]पृथिवी न नक्षत्राणि [5]'(महो.1-1) [6]इत्यादिना[6] सद्-ब्रह्मात्मादि [7]परमकारण[7]वाचिभिः [8] शब्दैः, नारायण एव [9]अभिधीयते[9] - इति निश्चीयते ।

'यमन्तस्समुद्रे कवयो वयन्ति' (तै.ना.उ.1-3) इत्यादि,

'नैनमूर्ध्वं न तिर्यंचं न मध्ये परिजग्र[10]भत्[10] ।

'न तस्येशे कश्चन तस्य नाम महद्यशः ' । (तै.ना.उ.1-10)

'न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।

हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति ' ।।

(तै.ना.उ.1-11)

यथा 'पशुना यजेत' इत्यत्र पशुसामान्यवाची 'पशु शब्दः' 'छागस्य वपायामेदसः' इति मन्त्रस्थ छागशब्दोक्तविशेषे पर्यवस्यति ; चेतनाचेतनसाधारणो ब्रह्म शब्दः चैतनैकान्तात्मशब्दोक्तविशेषे पर्यवस्यति ; तथा 'आत्म' शब्दश्च सर्व चेतनसाधारणः नारायण एव विशेषे पर्यवस्यतीति, नारायण एव सद्-ब्रह्मात्मादि शब्दैरभिधीयते इत्यर्थः ।

'यमन्तः' इत्यादिना, हिरण्यगर्भकारणत्वशंका च निराकरोति । अत्र समुद्रशायित्वलिंगेन अस्य प्रकरणस्य नारायणपरत्वनिश्चयार्थम्, 'यमन्तः समुद्रे' इति वाक्यमुपात्तम् । आदिशब्देन 'विद्युतः पुरुषादधि' इत्युक्तं विद्युद्वर्णपुरुषत्वं च विवक्षितम् 'वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसस्तुपारे' इति श्रुतेः । विद्युद्वर्णपुरुषत्वं हि परमपुरुषलिंगम् । जगत्कारणत्वानन्येश्वरत्व-मोक्षप्रदत्वरूपपरत्वप्रदर्शनार्थम्, 'नैनमूर्ध्वम्' इत्यादिवाक्यमुदाहृतम् ।

---

1. वगतं - घ. 2. तथा शाखा - ग. 3. इति - घ. 4. अवगतः - घ. 5. पृथिवी - घ. 6. इति - घ. 7. ब्रह्मादि - घ. 8. वादिभिः - क,ग,घ. 9. अभिहितः - क,ग. 10. भवत् - ख, ग.

इति 'सर्वस्मात्परत्वम्' अस्य प्रतिपाद्य,

'*न तस्येशे कश्चन*' (तै.ना.उ.1-10)

इति 'तस्मात्परं किमपि न विद्यते' इति च प्रतिषिध्य,

'*अद्भ्यः सम्भूतो हिरण्यगर्भ इत्यष्टौ*' (तै.ना.उ.1-12)

इति तेन एकवाक्यता गमयति[1] । तच्च महापुरुषप्रकरणम् -

'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ' (तै.आर.पु.3-13-6)

इति[2] नारायण एवेति[3] द्योतयति ।

[उक्तार्थस्य नारायणनुवाकतः सिद्धिः]

अयमर्थः नारायणानुवाके प्रपंचितः -

'*सहस्रशीर्षं देवम्*' (तै.ना.उ.11-1) **इत्यारभ्य,**

'*स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्*' (तै.ना.उ.11-12)

अद्भ्य इति । (अनेन) 'अद्भ्यः सम्भूतः' इति उत्तरनारायणैकवाक्यत्वाच्च नारायणपरत्वमाह । **तच्चेति** । 'वेदाहमेतं ----- परस्तात्' इति वाक्येन महापुरुष प्रकरणत्वावगमात्, लक्ष्मीपतित्वलिंगाच्च, 'अद्भ्यः सम्भूत' इत्यनुवाकस्य नारायणपरत्वम् इत्यर्थः । एतदेकवाक्यत्वात्, 'हिरण्यगर्भः समवर्तताग्रे' इत्यादिकमपि नारायणपरम् इत्यर्थः ।

अयमर्थः इति, नारायणानुवाकमपि प्रमाणत्वेनाह । **प्रपंचित इति** । न केवलं समुद्रशायित्वादिना लभ्यते ; अपि तु कण्ठोक्तः इत्यभिप्रायः । **सर्वशाखास्विति** । ('सहस्रशीर्षम्') इतीदन्तावत् सर्वविद्योपास्यविशेषनिर्णयपरम् ; दहरविद्याप्रकरणत्वात् । तत्तद्विद्यासु उपास्यत्वेन विहितं वस्तु किम् ? इत्यपेक्षायाम्, तत्तच्छब्दप्रत्यभिज्ञापितं तत्तत् अनूद्य, तस्य नारायणत्वं विधीयते इत्युपपन्नम् इत्यभिप्रायः । **समस्तस्येति** । (अनेन) 'विश्वमेवेदं पुरुषः' इति सामानाधिकरण्यस्यार्थमाह । तदाधेयत्व तन्नियाम्यत्व तच्छेषत्व तद्व्याप्यत्वैः तादात्म्यम् इत्यर्थः । **ब्रह्मशिवयोरपीति** । (अनेन) 'स ब्रह्मा स शिवः' इति सामानाधिकरण्यस्यार्थमाह । **इन्द्रादीति**, आदि शब्देन 'परमः स्वराट्' इति मुक्तसामानाधिकरण्यम्, 'विश्वमेवेदं पुरुषः' इति विश्वजगत्सामानाधिकरण्यं च विवक्षितम् । इन्द्रसामानाधिकरण्यं, मुक्तसामानाधिकरण्यं, विश्वजगत्सामानाधिकरण्यं च हि विभूतित्वकृतम् । तद्वदेव ब्रह्मशिवसामानाधिकरण्यं च इत्यर्थः । 'परमः स्वराट्' इति मुक्तात्मा उच्यते । तत्र 'परम' शब्देन कैवल्यमोक्षव्यावृत्तिः ।

---

1. अवगमयति-घ, निगमयति - घ. 2. इति च - ग,घ. 3. यणस्यैवेति - ग.घ. यणमेवेति - घ.

इति सर्वशाखासु परतत्त्वप्रतिपादनपरान्, अक्षर-शिव-शम्भु-परब्रह्म- परज्योतिः[1]-परतत्त्व-परायण-परमात्मादिसर्वशब्दान् तत्तद्गुणयोगेन नारायणे एव प्रयुज्य, तद्व्यतिरिक्तस्य समस्तस्य [2]तदायत्तता तन्नियाम्यता, तच्छेषता, तदात्मकता च तद्व्याप्यता तदाधारता[2] प्रतिपाद्य, ब्रह्म-शिवयोरपि इन्द्रादिसमानाकारतया तद्विभूतित्वं च प्रतिपादितम् ।

[मोक्षार्थोपासनविषयता नारायणस्यैव]

इदं च वाक्यं, केवलं [3]परतत्त्वप्रतिपादनपरम्[3] । अन्यत्किंचिदपि, अत्र न विधीयते । अस्मिन् वाक्ये प्रतिपादितस्य, सर्वस्मात्परत्वेनावस्थितस्य [4]ब्रह्मणः[4], वाक्यान्तरेषु,

ब्रह्मविदाप्नोति परम् (तै.उ.आन.1-1)

इत्यादिषु उपासनादि विधीयते । अतः *प्राणं मनसि सह करणैः* (अ.शिखा.2) इत्यादिवाक्यं, सर्वकारणे परमात्मनि [5]करण-प्राणादि [5] [6]सर्वं विकारजातम् उपसंहृत्य, 'तमेव परमात्मानं सर्वस्येशानं ध्यायीत' इति परब्रह्मभूतनारायणस्यैव ध्यानं विदधाति ।

केवलेति । अत्रानुवाके कस्यचिदर्थान्तरस्य विधानादर्शनात्, इदम् अनन्यपरम् उपास्यविशेषैकनिर्णयपरम् इत्यर्थः । अस्मिन् ---- विधीयते । यथा 'यस्य पर्णमयी जुहू' (तै.सं.3-5-7) इति वाक्ये पर्णमयत्वेनोक्तस्य 'जुह्वा जुहोति' इति होमसाधनत्वविधिः, तथा, अत्र सर्वस्मात्परत्वेनोक्तस्य नारायणस्य, 'ब्रह्मविदाप्नोति' इत्यादिषु मुमुक्षूपास्यत्वविधिः इत्यर्थः। अतः इत्यादिना पूर्वपक्षोदाहृतश्रुतीः व्याचष्टे । कारणवाक्यैः, श्रीपुरुषसूक्तेन, अनन्यार्थनारायणानुवाकादिभिश्च नारायणस्य परमकारणत्वेन प्रतिपन्नत्वात्, ब्रह्मशिवयोः तत्सृज्यत्व संहार्यत्वादिश्रवणाच्च इत्यर्थः । परमा --- संहृत्य - परमात्मनि विकारजातोपसंहारमनुसन्धाय इत्यर्थः । 'सर्व ---- यीत' इति, सर्वस्य वशी इति पूरकवाक्यान्वयप्रदर्शनम् । पतिं विश्वस्येति । ईशानत्वादिकं नारायणस्यैव मुख्यमिति, ईशानादिशब्दाः तस्यैव वाचकाः इत्यर्थः ।

1.परंज्योति -ख. 2. तदायत्ततां तद्व्याप्यतां तदाधारतां तन्नियाम्यतां तच्छेषतां तदात्मकतां च - क,ग. तदाधारतां तन्नियाम्यतां तच्छेषतां तदात्मकातां च - ख. 3. परतत्त्वप्रतीपादनैक - क,ग. परतत्त्वैकप्रतिपादन-घ. तत्त्वप्रतिपादनैक-घ, तत्त्वप्रतिपादन - घ. 4. परस्य ब्रह्मण, -घ. परब्रह्मणः - घ. 5. प्राणादि -घ. 6. सर्वविकार -घ.

'पतिं [1]विश्वस्य[1]' (तै.ना.उ.11-3)

'न तस्येशे कश्चन' (तै.ना.उ.1-10)

[2]इति[2], तस्यैव सर्वेशानता [3]प्रतिपादिता । अत एव,

'सर्वैश्वर्यसम्पन्नः सर्वेश्वरः शम्भुराकाशमध्ये ध्येयः (अ.शि.2)

इति [3]नारायणस्यैव[3] परमकारणस्य शम्भुशब्दवाच्यस्य, ध्यानं विधीयते ;

'कश्च ध्येयः ?' (अ.शी.1) इत्यारभ्य, *'कारणं तु ध्येयः'* (अ.शि.खा.2)

इति, कार्यस्य अध्येयता[4]पूर्वकं कारणैक[4]ध्येयतापरत्वात् वाक्यस्य । तस्यैव नारायणस्य परमकारणता, शम्भुशब्दवाच्यता च, परमकारणप्रतिपादनैकपरे नारायणानुवाके एव प्रतिपन्नेति, तद्विरोध्यर्थान्तर [5]परिकल्पनं, [5] कारणस्यैव [6]ध्येयत्वेन विधि[6]वाक्ये न युज्यते ।

[पुरुषात्परस्य तत्वान्तरस्य सत्त्वाशंकापरिहारौ]

यदपि -

'ततो यदुत्तरतरम्' (श्वे.उ.3-10)

इत्यत्र, पुरुषादन्यस्य [7]परतरत्वं[7] प्रतीयते - इत्यभ्यधायि, तदपि -

---

अत एवेति । 'विश्वाक्षं विश्वशम्भुवम्' इति नारायणवाचकत्वेन शम्भुशब्दप्रयोगदर्शनात्, 'शम्भूः स्वयम्भूर्द्रुहिणः' इति अर्थान्तरविषयत्वेन निखण्डुदर्शनाच्च इति भावः । कश्चेत्यादि । 'कश्च ध्येयः ?' 'कारणं तु ध्येयः' इति प्रश्न प्रतिवचनाभ्यां --कारणत्वानुवादेन ध्येयत्वं विधीयते इति निश्चीयते । अनुवादश्च तत्प्रतिपादकवाक्यान्तरसापेक्ष इति, (अत्र) नारायणस्यैव ध्येयत्वविधि इत्यर्थः । तस्यैवेत्यादि । अयमभिप्रायः - अनुवादरूपत्वेन वाक्यान्तरसापेक्षत्वात्, तद्विरुद्धार्थ-प्रतिपादनायोगात्, नारायणस्यैव ध्येयविधिः । कारणत्वं विधीयतां नाम ; तथाऽपि, सद्ब्रह्म आत्मादिशब्दवत् शम्भुशब्दस्य सामान्यशब्दत्वात्, नारायणे एवपर्यवसानं न्याय्यमिति, शिवादिशब्दानां 'नारायण' शब्दापेक्षया साधारणत्वात्, बह्वीषु उपनिषत्सु नारायणादिशब्दनिर्देशात्, तत्राऽपि एकैकत्र 'नारायण' शब्दाभ्यासाच्च तदानुगुण्येन अर्थो वर्णनीयः - इति च अनुसन्धेयम् । (यदपि इति । 'तदपि प्रत्युक्तम्' इत्यन्वयः) ।

---

1. विश्वस्यं इति - क,ग. 2. इति च - क,ग. 3. नारायणस्य - घ. 4. पूर्वकं कारणस्य - घ. पूर्वककारणैक - क,ख,ग. 5. कल्पनं -घ, प्रतिपादनपरत्वं - घ. 6. ध्येयत्वविधि - ख, ध्येयत्वविधिपर - घ. 7. परत्वं - घ.

'यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्' (श्वे.उ.3-9)

यस्मादपरम्-यस्मादन्यत्, 'किंचिदपि [1] परं नास्ति - केनापि प्रकारेण पुरुष-व्यतिरिक्तस्य परत्वं नास्ति, इत्यर्थः । अणीयस्त्वम्-सूक्ष्मत्वम् । ज्यायस्त्वम्-सर्वेश्वरत्वम् । सर्वव्यापित्वात् सर्वेश्वरत्वात् [2]अस्य, [2] एतद्व्यतिरिक्तस्य [3]कस्यापि [3] [4]अणीयस्त्वं ज्यायस्त्वं [4] च नास्ति इत्यर्थः ।

'यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्' (श्वे.उ.3-9)

इति पुरुषादन्यस्य कस्यापि जायस्त्वं निषिद्धमिति, तस्मादन्यस्य परत्वं न युज्यते? इति - प्रत्युक्तम् ।

[ततो यदुत्तरतरम् इति श्रुत्यर्थः]

कस्तर्हि अस्य वाक्यस्यार्थः ?

अस्य प्रकरणस्योपक्रमे -

'तमेव विदित्वाऽति मृत्युमेति । नान्यः पन्था विद्यतेऽयनाय' (श्वे.उ.3-8)

इति पुरुषवेदनस्य अमृतत्वहेतुता, तद्व्यतिरिक्तस्य [5]अपथता [5] च प्रतिज्ञाय,

'यस्मात् परं नापरमस्ति [6]किंचित् [6] -- तेनेदं पूर्णं पुरुषेण सर्वम्' (श्वे.उ.3-9)

यस्मात् इत्यादिपंचम्यन्तपदेन परशब्दस्य अन्वये सति, सम निषेधो न कृतः स्यात् । अपरशब्देन च पंचम्यन्तपदस्य अन्वये सति, समाभ्यधिकोभयनिषेधः कृतः स्यात् । तथा सति 'नान्यः पन्थाः' इति पुरुषवेदनस्यैव मोक्षोपायत्वप्रतिज्ञानस्य प्राकरणिकस्यापि आनुगुण्यम् । पंचम्यन्तपदस्य अन्यशब्देन अन्वयश्च 'नत्येतस्मादन्यत् परमस्ति' 'तदच्युतो नाऽस्ति परं ततोऽन्यत्' इत्यादि श्रुतिस्मृतिषु दृश्यते- इति ।

ज्यायस्त्वम्-धारकत्वम्, नियन्तृत्वादिगुणैः उत्कृष्टत्वम् । अत्र च नियन्तृत्वेन ज्यायस्त्वं विवक्षितम् ; प्रशासितारं सर्वेषामणीयांसमणीयसाम् इत्यादिवचनानुसारात् । यस्मात्परं नापरम् इत्यादिवाक्ये पुरुषादन्यस्य परत्वनिषेधात्, तद्विरुद्धं तदन्यस्य अधिकत्वप्रतिपादनपरत्वं व्याहतम् इत्यर्थः ।

---

1. किंचित् - घ. 2. अस्यैव - घ. 3. कस्यचित् - घ. 4. अणीयस्त्वं - घ. 5. अहेतुतां - घ.
6. किंचित् इति - घ.

[2]इत्येतदन्तेन[1], पुरुषस्य सर्वस्मात् परत्वं प्रतिपादितम्। यतः, पुरुषतत्त्वमेवोत्तरतरं 'ततः यत् उत्तरतरं ' पुरुषतत्त्वं; तदेव अरूपम् अनामयम्।

'य एतद्विदुरमृतास्ते [1]भवन्ति, अथेतरे दुःखमेवापियन्ति ' (श्वे.उ.3-10)

[2]इति पुरुष[2]वेदनस्य अमृतत्वहेतुत्वं, तदितरस्य [3]च, अपथत्वं [3] प्रतिज्ञातं, सहेतुकम् [4]उपसंहृतम्[4]। अन्यथा, [5]उपक्रमगत[5]प्रतिज्ञाभ्यां विरुध्यते।

[शिवशब्दाभिधेयः परमपुरुष एव]

पुरुषस्यैव शुद्धिगुणयोगेन शिवशब्दाभिधेयत्वम्,

'शाश्वतं शिवमच्युतम्' (तै.ना.उ.11-3)

इत्यादिना ज्ञातमेव। 'पुरुष एव शिवशब्दा[6]भिहितः [7] ' [8]इति,[8] अनन्तरमेव [9]च वदति[9] -

---

यत इति। (अनेन) ततो तदुत्तरतरम् इति वाक्यस्यार्थमाह। **अरूपम्** - कर्मकृतप्रकृतिसम्बन्धरहितम् इत्यर्थः। **अनामयम्** - तत्कृतदुःखादिसम्बन्धरहितम् इत्यर्थः। 'ततः' इति पंचम्यन्तं हेत्वर्थपरत्वेन योजितं। **अन्यथा ------- विरुध्यते** इति। पुरुषवेदनस्य मुक्तिहेतुत्वप्रतिज्ञया, तदन्यस्य अनुपायत्वप्रतिज्ञया च (विरुध्यते) इत्यर्थः।

पुरुषस्यैवेति। सर्वाननशिरोग्रीवः *'सर्वभूतगुहाशयः। सर्वव्यापी सभगवांस्तस्मात् सर्वगतः शिवः' (श्वे.उ. 3-11)* इत्यादिवाक्यगतस्य '**शिव**' शब्दस्यार्थमाह। **इत्यादिनेति**, 'आदि' पदेन 'सर्वः शर्वः शिवः स्थाणुः' इत्यादि प्रयोगो विवक्षितः। सर्वाननशिरोग्रीवत्वं च 'सहस्रशीर्षा पुरुषः' इत्यस्य प्रत्यभिज्ञापकम्। भगवच्छब्दस्तु पुरुषज्ञापकः इत्यनुसन्धेयम्। **पुरुष एवेति**। उत्तरत्रापि पुरुषप्रतिपादनात्, पुरुष एव शिवशब्दाभिहितः इत्यर्थः। (अत्र) एषः इति पदेन, शिवशब्दाभिहितः प्रत्यभिज्ञापितः। एवं कारणवाक्यबलात् उपास्यविशेषनिर्णयपरनारायणानुवाकेन च नारायणस्यैव परत्वमुक्तम्। **इत्यादि सर्वं नेयमिति**। कारणवाक्यैः नारायणस्यैव परमकारणत्वप्रतिपादनात्, अनन्यपरनारायणानुवाकादिभिः तस्यैव सर्वस्मात्परत्वनिश्चयात्, --- बह्वीषूपनिषत्सु नारायणादि- शब्दनिर्देशात्, एकैकत्रोपनिषदि नारायणादिशब्दाभ्यासाच्च, शिवादि- शब्दोऽपि सद्ब्रह्मादिशब्दवत् नारायणपर्यवसायी इत्यर्थः।

---

1. इत्यन्तेन - घ. 2. पुरुष - घ. 3. च अनुपायत्वं -घ, अपथत्वं - घ. 4. उदाहृतम् - घ. 5. उपक्रम - घ. 6. भिधेयः - क,ग,घ. 7. इत्यत्र -घ. 8. वदति - क,ख,ग.

'महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः' (श्वे.उ.3-12)

इति । उक्तेनैव न्यायेन ;

'न सन्न चाऽसच्छिव एव केवलः' (श्वे.उ.4-18)

इत्यादि सर्वं नेयम् ।

[पुरुषस्य प्रणववाच्यता ; उपास्यता च]

किंच -

'न तस्येशे कश्चन ' (तै.उ.1-10)

इति, निरस्तसमाभ्यधिकसम्भावनस्य पुरुषस्य,

'अणोरणीयान्' (तै.ना.उ.10-1)

इत्यस्मिन् अनुवाके[1], वेदाद्यन्तरूपतया वेदबीजभूतप्रणवस्य प्रकृति[2]भूताकारवाच्यतया महेश्वरत्वं प्रतिपाद्य, दहर[3]पुण्डरीकमध्यस्थाकाशान्तर्वर्तितया उपास्यत्वमुक्तम् ।

किंचेति । तत्र 'यद्वेदादौ स्वरः' इत्यादिवाक्यस्य न केवलं प्रकरणान्तरवाक्यैः नारायणपरत्वनिश्चयः ; अपि तु तस्यैव पूर्वापरपर्यालोचनयाऽपि इत्याशयः । अस्य वाक्यस्य पुरुषादन्यस्योत्कर्षपरत्वं प्रथमानुवाकोक्तपुरुषव्यतिरिक्तपरत्वनिषेधव्याहतम् इति दर्शयितुम् न तस्येशे इत्याद्युक्तम् । वेदाद्यन्तरूपतयेति । वेदस्य प्रणवः उत्पादकत्वात् आदिः । तल्लयस्थानत्वात् अन्तश्च इत्यभिप्रायः । अत एव वेदबीजभूतः प्रणवः । प्रकृतिभूतेति । प्रकृतिलीनत्वं नाम प्रकृतिभूताकारावस्थत्वम् । अकारावस्थप्रणववाच्यत्वं नाम अकारवाच्यत्वमेव इत्यर्थः । 'अकारेणोच्यते विष्णुः सर्वलोकेश्वरो हरिः । अकारो विष्णुवाचकः' इति श्रुतिस्मृतिवचनात् अकारवाच्यस्य नारायणस्यैव महेश्वरत्वमित्यर्थः । दहरेति । तत्रापि नारायणस्यैव महेश्वरत्वप्रतिपादनात् स एव दहरपुण्डरीकेऽप्युपास्यः इत्यर्थः ।

अयमर्थ इति । 'यद्वेदादौ ----- प्रतिष्ठितः' इत्यनेनैव प्रणववेदयोः अकारप्रणवयोश्च प्रकृति विकृतिभावः सिद्धः । *प्रकृतिलीनस्य* इत्यनेन, अकारश्च अवगतः । यः परः इति, परशब्देन वाच्यत्वं च अवगतम् । 'इदं परस्तात्परः' इत्यादिषु 'पर'शब्दस्य वाच्यतार्थत्वात् इत्यर्थः ।

---

1. इत्यनुवाके - घ. 2. प्रकृतिबीज - घ. 3. पुण्डरीकमध्यस्थाकाशवर्ति - ख, पुण्डरीकाकाशान्तर्वर्ति- घ. मध्यस्थाकाशान्तर्वर्ति - क,ग,घ.

['तस्य प्रकृतिलीनस्य' इति मन्त्रस्यार्थः]

अयमर्थः - सर्वस्य वेदजातस्य प्रकृतिः [1]प्रणवः [1] । [2]प्रणवस्य च[2] प्रकृतिः अकारः । प्रणवविकारो वेदः, स्वप्रकृतिभूते प्रणवे लीनः । [3]प्रणवोऽपि[3] अकार-विकारभूतः, स्वप्रकृतौ अकारे लीनः । [4]तस्य च[4] प्रणवप्रकृति [5]भूतस्य अकारस्य यः परः-वाच्यः ; [6]स एक महेश्वरः इति , सर्ववाचक[7]जात[7]प्रकृतिभूताकारवाच्यः, सर्ववाच्यजातप्रकृति [8]भूत[8]नारायणो यः ; सः महेश्वरः - इत्यर्थः ।

[पुरुषे अकारवाच्यतायाः, तत एव अकारात्मकतायाश्च गीतादिना सिद्धिः]

[9]यथोक्तं भगवता [9] -

'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' (भ.गी.7-6)

'मत्तः परतरं [10]नाऽन्यत् [10] किंचिदस्ति धनंजय' (भ.गी.7-7)

'अक्षराणा[11]मकारोऽस्मि' (भ.गी.10-33) इति[11],

'अ इति ब्रह्म' (ऐ त.आर.2-3-6) [12]इति[12] च श्रुतेः

'अकारो वै सर्वा वाक्' [13]इति च[13] वाचकजातस्य आकरप्रकृतित्वं, वाच्यजातस्य ब्रह्म[14]प्रकृतित्वं च[14] सुस्पष्टम् ।

अतः - ब्रह्मणः अकारवाच्यताप्रतिपादनात्, अकारवाच्यो नारायण एव महेश्वरः - इति सिद्धम् । तस्यैव,

'सहस्रशीर्षं देवम्' (तै.ना.उ.11-1)

इति केवल[15]परतत्त्व[15]विशेषप्रतिपादनपरेण नारायणानुवाकेन, सर्वस्मात् परत्वं प्रपंचितम् ।

वाच्यजातप्रकृतिभूत :-वाचकजातप्रकृतिभूतेन वाच्यः इति ज्ञापनम् 'प्रकृतिलीनस्य' इति वचनव्यक्तेः प्रयोजनम् । वाक्यजातप्रकृतिभूतस्य नारायणत्वं वाक्यान्तरावगतम् इति भावः ।

यथोक्तमित्यादि (अस्मिन्नर्थे) भगवद्वचनम् ।

'अक्षराणामकारोऽस्मि' इत्यनेन वाच्य-वाचकभावः सम्बन्धः ।

अनेनेति । 'विश्वाधिको रुद्रः' इत्यादिवाक्यान्यपि अन्यपरत्वात्, उक्तार्थानुगुणत्वेन

---

1. प्रणव उक्तः - क,ख,ग,ठ 2. प्रणवस्य - घ. 3. प्रणवः - घ. 4. तस्य - क,ख,ग. 5. भूताकारस्य - घ. 6. सः - घ. 7. शब्दजात - घ. 8. भूतः -घ. 9. यथोक्तम् - घ. 10. नाऽस्ति-घ. 11. मकारोऽस्मि - घ. 12. इति -घ. 13. इति - घ. 14. प्रकृतित्वं - ख,ग. 15. परत्व-घ, तत्त्व - घ.

[उक्तस्यार्थस्य ब्रह्मसूत्रतः सिद्धिः]

अनेन अनन्यपरेण प्रतिपादितमेव [1]परतत्त्वम्[1] । अन्यपरेषु [2]सर्वेषु वाक्येषु[2], [3]केनाऽपि[3] शब्देन प्रतीयमानं, तदेवेत्यवगम्यते - इति,

'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र.सू.1-1-31)

इति, सूत्रकारेण निर्णीतम् ।

[ब्रह्मशिवादेरपि प्राणाकाशादिवदेव परमात्मविभूतिता]

तदेतत् परं ब्रह्म, क्वचित् ब्रह्म-[4]शिवादि[4]शब्दा[5]वगत[5]मिति, केवलब्रह्म-शिवयोः, न [6]परत्वप्रसंग[6]ः । [7]अस्मिन्[7] अनन्यपरे अनुवाके, तयोः इन्द्रादितुल्यतया तद्विभूतित्वप्रतिपादनात्, क्वचित् आकाश- [8]प्राणादि[8]शब्देन परं ब्रह्म अभिहितमिति, भूताकाश-प्राणादेः [9]यथा न[9] परत्वम् ।

[व्योमातीतवाद निरासः]

यत्पुनरिदमाशंकितम् -

'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म, दहरोऽस्मि[10]न्नन्तर आकाशः[10], तस्मिन् यदन्तः, तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' ।

(छा.उ.8-1-1)

इत्यत्र, आकाशशब्देन जगदुपादानकारणं प्रतिपाद्य, तदन्तर्वर्तिनः [11]कस्यचित् तत्त्वविशेषस्य[11], अन्वेष्टव्यता प्रतिपाद्यते ; अस्य आकाशस्य नामरूपयोः [12]निर्वोढृत्वश्रवणात्[12], पुरुषसूक्ते पुरुषस्य नामरूपयोः कर्तृत्व-दर्शनाच्च । आकाशपर्यायभूतात् [13]पुरुषादन्यस्य[13] अन्वेष्टव्यतया उपास्यत्वं [14]प्रतीयते[14] - इति,

अनधीतवेदानाम् अदृष्टशास्त्राणां इदं चोद्यम् । यतः, [15]तत्र श्रुतिरेव, अस्य[15] परिहारमाह वाक्यकारश्च ।

अनधीतेति । दहरविद्यायाः पूर्वापरवाक्यमपि अनधीतम् । वाक्यकारग्रन्थादयश्च तैः अदृष्टाः - इति भावः ।

---

1. परत्वम्- घ. 2. सर्ववाक्येषु - क,ग,घ. 3. केन -घ. 4. शिव -घ. 5. दवगत - घ. 6. परत्वप्रसक्तिः -घ परतत्त्वप्रसंगः-घ. परतत्त्वत्वप्रसंग -ग. 7. तस्मिन् - घ. 8. प्राण - घ. 9. तत्त्वविशेषस्य यथा न-घ,न यथा - घ. 10. न्नन्तराकाशः - घ. 11. कस्यचित् तत्त्वस्य-घ,कस्यचित् - घ. 12. निर्वाहकत्व-श्रवणात् - क,ग, निर्वोढृत्वप्रतिपादनात् - घ. 13. पुरुषस्य अन्यत्र - घ. 14. च प्रतीयते, च प्रतिपाद्यते - घ. 15. तत्रैव श्रुतिरेवास्य -घ, तत्रैवास्य श्रुतिरेव - घ.

दहरोऽस्मिन्नन्तर आकाशः[1], *किं* [2]*तदत्र*[2] *विद्यते यदन्वेष्टव्यम्, यद्वाव विजिज्ञासितव्यम्'* (छा.उ.8-1-2) इति चोदिते, *'यावान्वा अयमाकाशः, तावानेषोऽन्तर्हृदय आकाशः'*, (छा.उ.9-1-3) इत्यादिना, अस्य आकाशशब्द-वाच्यस्य परमपुरुषस्य अनवधिकमहत्वं, सकलजगत्कारणतया सकलजगदा-धारत्वं च प्रतिपाद्य, [3]*'तस्मिन्*[3] [4]*कामाः*[4] *समाहिताः*,' (छा.उ.8-1-5) इति अपहत-पाप्मत्वादि, सत्यकामशब्देन सत्यसंकल्पत्व [5]पर्यन्त[5]गुणाष्टकं निहितमिति, परम[6]पुरुषव्यत्[6] परमपुरुषगुणाष्टकस्यापि, पृथक्विजिज्ञा [7][8]सितव्यता[8]-प्रति-पिपादयिषया, *तस्मिन् यदन्तः तदन्वेष्टव्यम्* (छा.उ. 8-1-1) [9]इत्युक्तमिति[9], श्रुत्यैव सर्वं परिहृतम् ।

[दहराकाशगताः अन्वेष्टव्याः गुणाः]

एतदुक्तं भवति -

'किं तदत्र विद्यते, यदन्वेष्टव्यम्'

[10]इत्यस्य[10] चोद्यस्य, '[11]तस्मिन्[11] [12]सर्वस्य जगतः स्रष्टृत्वम्, आधा[12]रत्वम्, [13]नियन्तृत्वम्[13] [14]शेषित्वम्[14], अपहतपाप्मत्वादयो गुणाश्च विद्यन्ते' इति [15]परिहारः - इति[15] ।

तथा च वाक्यकारवचनम् -

'तस्मिन् यदन्तः इति, कामव्यपदेशः' (ब्र.नं. वा.)

इति । काम्यन्त इति कामाः - अपहतपाप्मत्वादयो गुणाः, इत्यर्थः ।

अस्य 'आकाश' शब्दवाच्यस्य इति, 'वक्ष्यमाणगुणजातम् आकाशान्तर्वर्ति-स्वतन्त्रवस्त्वन्तरगतम् इति शंकाशमनाय । 'यावान्वा' इति वाक्यस्थाकाशशब्देन पर्यायोक्तः आकाशशब्दः स्पष्टं स्मारितः

एतदुक्तमिति उक्तद्युपृथिव्यादीनां स्रष्टृत्व-धारकत्वादिगुणगणः अपहतपाप्मत्वादि-गुणगणश्च विवक्षितः इत्यर्थः ।

कामा इति 'काम्यस्पृहा स्मराः कामाः' इति निघण्टुः ।

---

1. न्नन्तराकाशः - घ. 2. तत्र - क,ग. 3. अस्मिन् -(उ.पा) 4. कामाः सर्वे - घ. 5. त्वादि, पर्यन्त - घ. 6. पुरुषनिहितस्य - घ. 7. जिज्ञा - घ. 8. व्यत्व - क,ग. 9. इति - घ. 10. इति - घ. 11. अस्मिन् - घ. 12. स्रष्टृत्वं सर्वजगदाधा - घ. 13. सर्वनियन्तृ - घ. 14. सर्वशेषि - घ. 15 - परिहारः - घ.

[गुण-गुणिनोरुभयोरप्यन्वेष्टव्यता , तत्फलं च]

एतदुक्तं भवति - [1]यदेतत्[1] 'दहराकाश[2]शब्दाभिधेयं,[2] निखिल-जगदुदयविभवलयलीलं परब्रह्म, तस्मिन् यत् अन्तर्निहितम् अनवधिकाति-[3]शयम् अपहतपाप्मत्वादि [3]गुणाष्टकं, [4]तदुभयमपि[4] अन्वेष्टव्यं, विजिज्ञासितव्यम् -इति । यथाऽऽह-

'अथ य इहात्मानमनुविद्य व्रजन्ति एतांश्च सत्यान् कामान् तेषां सर्वेषु लोकेषु कामचारो भवति' (छां.उ.8-1-6) **इति ।**

[विष्णोः कार्यत्वश्रवणकृतपरत्ववैकल्यशंका - तत्परिहारश्च]

यः पुनः - कारणस्यैव ध्येयताप्रतिपादनपरे वाक्ये, विष्णोः अनन्य-परवाक्य प्रतिपादितपरतत्त्वभूतास्य, कार्यमध्ये निवेशः ; [5]सः स्वकार्य-[5]भूततत्त्व[6]संख्या[6] पूरणं कुर्वतः, स्वलीलया जगदुपकाराय स्वेच्छावतारः - इत्यवगन्तव्य[7]ः । यथा लीलया देवसंख्यापूरणं कुर्वतः उपेन्द्रत्वं परस्यैव, यथा च सूर्यवंशोद्भव-राजसंख्यापूरणं कुर्वतः ब्रह्मणः, दाशरथिरूपेण स्वेच्छावतारः, यथा च सोम[8]वंश[8]संख्यापूरणं कुर्वता भगवतः, [9]भूभारावत[9]रणाय स्वेच्छया वसुदेवगृहे अवतारः । सृष्टिप्रलयप्रकरणेषु, नारायण एव परमकारणतया [10]प्रतिपाद्यते[10] इति पूर्वमेवोक्तम् ।

एतदुक्तमिति, (इदम्) गुणिव्यतिरेकेण कथं गुणानामुपास्यत्वम् ? इति शंकायाम् । 'यः यत्' इति नपुंसकस्यैकशेषत्वम्, एकवद्भावश्चेति निश्चीयते । तस्मात् यच्छब्देन उभयं विवक्षितमिति । निखिलजगदुदयेत्यादिविशेषणम् 'आकाशो ह वै नामरूपयोर्निर्वहिता' इति श्रुत्युक्तस्मारणम् ।

यथाहेत्यादि । छान्दोग्ये, आकाशशब्दस्य परमात्मपरत्वमाक्षिप्य हि सर्वत्र आकाशशब्दानां परमात्मपरत्वमापाद्य, तदन्तर्वर्तिनः स्वतन्त्रवस्त्वपरत्वं व्योमातीतवादिभिरुच्यते । अत्र छान्दोग्यश्रुतिनिर्वाहादेव तेषां मूलघातः कृतः इत्यभिप्रायेण एतावता विरतिः । यत्र आकाशशब्दनिर्दिष्टस्य परमात्मासाधारणगुणश्रवणं ; तत्र स्वारस्यभंगेन आकाशशब्दस्य परमात्मपरत्वमाश्रीयते । अन्यत्र तु प्रसिद्धिप्राचुर्यात् स्वतः प्राप्त एवार्थः स्वीकृतः इत्यर्थः ।

यः पुनरित्यादि । (अनेन) 'ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे सम्प्रसूयन्ते' (अथ.शि.4) इति विष्णोः कार्यत्वश्रवणात् (जातां) परत्ववैकल्यशंकां निरस्यति । **स्वेच्छावतार इति** । भगवज्जन्मनो

---

1. तदेत् - घ. 2. पदवाच्यं - क,ग,घ. 3. शयासंख्येय, शयापहतपाप्मत्वादि - घ. 4. तदुभयम् - घ.
5. सः कार्य, स्वस्वकार्य - घ. 6. तत्संख्या- घ. 7. गन्तव्यम् - घ. 8. वंशराज, वंशोद्भव - घ.
9. भूभारणावत - ग. भूभारनिवा - घ. 10. पादितः- घ.

[अथर्वशिरउपनिषदुक्तेः निर्वाहः]

यत्पुनः - *अथर्वशिरसि रुद्रेण स्वसर्वैश्वर्यं प्रपंचितम् ; तत्* 'सोऽन्तरादन्तरं प्राविशत्' (अ.सा.) इति परमात्मप्रवेशादुक्तमिति, श्रुत्यैव व्यक्तम् ।

'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र.सू.1-1-31)

इति, सूत्रकारेण एवमादीनामर्थः [1] प्रतिपादितः । यथोक्तं प्रह्लादेनाऽपि -

'सर्वगत्वादनन्तस्य स एवाऽहमवस्थितः ।

मत्तः सर्वमहं सर्वं मयि सर्वं सनातने ।। (वि.पु.1-19-85)

इत्यादि । [2]अत्र[2] 'सर्वगत्वा[3]दनन्तस्य' इति हेतुरुक्तः ।

[परमात्मनः सर्वात्मत्वेन सर्वगतत्वात् सर्वशब्दाभिधेयता]

स्वशरीरभूतस्य [4]सर्वस्य चिद[4]चिद्वस्तुनः आत्मत्वेन, 'सर्वगतः परमात्मा' इति, सर्वे शब्दाः, [5]सर्वशरीरं[5] परमात्मानमेव[6] अभिदधति - इत्युक्तम् । अतः 'अहम्' इति शब्दः [7]स्वात्म[7]प्रकारिणं परमात्मानमेव आचष्टे ।

हेतुः प्रयोजनं च प्रमाणान्तरप्रतिपन्नमिति, तदविरोधेन अत्राऽपि प्रतिपाद्यमानं भगवतो जन्म, विलक्षणहेतुमत्, विलक्षणप्रयोजनवच्च अभ्युपेत्यम् । अन्येषां (ब्रह्मरुद्रादीनां) जन्मनो हेतु फले कर्मतत्फलानुभवौ । तस्मात् रामादिवत् स्वेच्छयालोकरक्षार्थमवतारः इत्यर्थः । **संख्यापूरणमिति।** (इदम्) त्रिमूर्तिसंख्यान्तर्भावमात्रं (भगवतः) न साम्ये प्रयोजकम् इत्यभिप्रायेण मुहुरुक्तम् । स्वलीलया इति हेतोः, जगदुपकाराय इति प्रयोजनस्य च वैलक्षण्यमुक्तम् । न तु कर्मणा तत्फलानुभवाय (जन्म) इत्यर्थः 'जगतामुपकाराय न सा कर्मनिमित्तजा' इति वचनात् । **पूरणं कुर्वत इति** । स्वसमान-गणनागण्यत्वरूपोत्कर्षं परेषां ददाति इत्यभिप्रायः । **इतिः** हेतौ । **प्रवेशात्** - अनुप्रवेशात् । परमात्मनः प्रवेशात् इति षष्ठीसमासः । परमात्मकर्तृकप्रवेशात्, परमात्मकर्मकप्रवेशाच्च इति भावः। 'सोऽन्तरादन्तरं प्राविशत्' इति श्रुतिवाक्यम् । अयमर्थः - 'सः रुद्रः, अन्तरादन्तरम् - जीवादन्तरं परमात्मानम्, प्राविशत् - बुद्ध्या अगाहत । स्वान्तर्यामिणं, सर्वपदार्थान्तर्यामिणं च परमात्मानं तच्छरीरकं बुद्ध्या अनुसंहितवान् इत्यर्थः । **श्रुत्यैवेति** । प्रतर्दनविद्यादिष्विव न केवलन्यायेन परमात्मानुप्रवेशः कल्प्यते ; अपि तु कण्ठोक्तः इत्यर्थः ।

सूत्रकारेणेति । कण्ठोक्तिरहितेषु प्रतर्दनविद्यादिष्वपि इन्द्रादीनां परमात्मात्मकत्वे सिद्धे, कण्ठोक्तिमत्सु अथर्वशिरः प्रभृतिषु, कैमुत्यनीत्या परमात्मानुप्रवेशः सिध्यति इत्यभिप्रायेण-सूत्रकारः प्रतर्दनविद्याविषयं सूत्रं प्रणीतवान् इत्यभिप्रायः । **यथोक्तमित्यादि** ।(इदं)

---

1. कारेणैवमादिना, कारेणैवायमर्थः - घ. 2. अत्र - घ. 3. गतत्वा - घ. 4. सर्वचिद, चिद - घ. 5. सशरीरं - घ. 6. त्मानम् - घ. 7. स्वात्मप्रकार ग.

[अहंग्रहोपासनस्य औचित्यम्]

अत इदमुच्यते -

'आत्मेत्येव तु गृहणीयात् सर्वस्य तन्निष्पत्तेः ' (ब्र.न.वा.)

इत्यादिना, अहंग्रहणोपासनं वाक्य कारेण[1] । कार्यावस्थः कारणावस्थश्च स्थूलसूक्ष्मचिदचिद्वस्तुशरीरः परमात्मैव इति, 'सर्वस्य तन्निष्पत्तेः' इत्युक्तम् ।

'आत्मेति तूपगच्छन्ति ग्राहयन्ति च ' (ब्र.सू.4-1-3) **इति, सूत्रकारेण च ।**

[ब्रहमणः शिवस्यापि नारायणात्मकता]

महाभारते च ब्रहम-रुद्रसंवादे ब्रहमा, रुद्रं प्रत्याह-

तवान्तरात्मा मम च ये चाऽन्ये देहि संज्ञिताः[2] (म.भा.शां.339-4) **इति, रुद्रस्य ब्रहमणश्च, [3]अन्येषा च देहिनां[3], परमेश्वरो नारायणः, अन्तरात्मतया अवस्थितः - इति । [4]तथा तत्रैव[4] -**

'विष्णुरात्मा भगवतो भवस्यामिततेजसः ।

तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वरः ।।' (म.भा.क.24-85) **इति ।**

तत्रैव -

'एतौ द्वौ [5]विबुध[5]श्रेष्ठौ प्रसादक्रोधजौ स्मृतौ ।

तदादर्शितपन्थानौ सृष्टिसंहारकारकौ ।। (म.भा.शां.2-328-17) **इति । अन्तरात्मतयाऽवस्थित [6]नारायणदर्शितपथौ [6] ब्रहम-रुद्रौ, सृष्टि-संहार्यकार्यकरौ इत्यर्थः ।**

सर्वसामानाधिकरण्यस्य परमात्मानुप्रवेशकृतत्ववैशद्याय । अत्रेति । (अनेन) उदाहृतश्लोके हेत्वंशं, तेन सर्वसामानाधिकरण्यसिद्धिं च दर्शयति ।

अत इति । 'इदम् अहंग्रहणोपासनं वाक्यकारेणोच्यते' इत्यन्वयः सर्वस्येति । (सूक्ष्मचिदचिद्) विशिष्टात् (स्थूलचिदचित्) विशिष्टस्योत्पत्तिः । सा च चिदचित्स्वरूपनित्यत्वेऽपि अवस्थाभेदेनोपपद्यते इत्यर्थः ।

महाभारते इति। (इदं) सामान्येन सर्वजीवानां परमात्मात्मकत्वे सिद्धेऽपि, ब्रहमशिवयोः

---

1. कारेण च - घ. 2. संज्ञकाः - घ. 3. अन्येषां देहिनां च, अन्येषा - घ. 4. तथा च - घ. 5. पुरुष - घ. 6. तान्नारायणाद्दर्शितपथौ - घ. तनारायणदर्शितपन्थानौ- ग,घ.

[निमित्तोपादानयोर्भेदवादिना वेदबाह्यता]

निमित्तोपादा नयोऽस्तु[1] भेदं वदन्तः, वेदबाह्या [2]एव स्युः[2];

'जन्माद्यस्य यतः ' (ब्र.सू.1-1-2)

'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (ब्र.सू.1-4-23)

इत्यादिवेदवित्प्रणीतसूत्रविरोधात्,

'सदेव सोम्येदमग्र आसीदेकमेवाऽ [3]द्वितीयम्[3] (छा.उ.6-2-1)

'ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतोद्यावापृथिवी निष्टतक्षुः -----

------ ब्रह्माध्यतिष्ठद्भुवनानि धारयन्' (तै.स.2-8-7-9)

'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि' (तै.ना.उ.1-8)

'न तस्येशे कश्चन तस्य नाम महद्यशः ' (तै.ना.उ.1-10)

'नेह नानास्ति किंचन ' (बृ.उ.6-4-19)

'सर्वस्य वशी सर्वस्येशानः ' (बृ.उ.6-4-22)

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् उतामृतत्वस्येशानः'

(तै.आर.पु.3-12-2)

'नाऽन्यः पन्था अयनाय विद्यते ' (तै.आर.पु.3-12-17)

इत्यादि सर्वश्रुतिगणविरोधाच्च ।

परमात्मात्मकत्वं विशेषतो दर्शयितुम् । **ब्रह्मरुद्रसंवादे** इति । 'तव मम' इत्युक्ते ब्रह्मशिवयोः अप्रतिपत्तिः स्यादिति, तत्प्रतिपत्त्यर्थमुक्तम् । **परमेश्वरशब्दः**, नारायणस्य आत्मान्तरव्यावृत्त्यर्थः।

निमित्तोपादानयोरिति । केचित् अवैदिकाः भगवत उपादानत्वं, रुद्रस्य निमित्तत्वं च वदन्ति ; उपादानं तु भगवान् निमित्तं तु महेश्वरः' इति । तन्निराकरोति (अनेन) । **जन्मादि** इत्यादिना, सूत्रश्रुतिविरोधाभ्यां वेदबाह्यत्वमुपपादयति । **सदेवेति**, (ब्रह्मण) उपादानत्वम् । 'अद्वितीयं ----- तदैक्षत' इत्यादिना तस्यैव निमित्तत्वम् । **ब्रह्म स वृक्ष** इति, उपादानता । **ब्रह्माध्यतिष्ठत्** इति, तस्यैव निमित्तत्वम् । 'सर्वे निमेषाः' इति, कालविशिष्टस्य निमेषादीन् प्रति उपादानत्वम् । 'न तस्येशे' इति निमित्तत्वम् । **नेह नानास्ति** इति, उपादानत्वम् ; सर्वस्य

---

1. नयोः - घ. 2. स्युः - घ. 3. तीयं ब्रह्म तदैक्षत बहु स्यां प्रजायेयेति -घ, तीयं ब्र्हम स ऐक्षत बहु स्यां प्रजायेयेति - ग.

[नारायणस्यैव परमकारणतायाः इतिहासादिसिद्धता]

इतिहासपुराणेषु च सृष्टि[1]-प्रलय[2]प्रकरणयो[2] 'इदमेव परतत्त्वम्' इत्यवगम्यते । यथा महाभारते -

[3]केन[3] सृष्टमिदं सर्वं जगत् स्थावरजंगमम् ।

प्रलये च कमभ्येति [4]तन्मे[4] ब्रूहि पितामह' ।। (म.भा.शा.180-1)

इति पृष्टः,

'नारायणो जगन्मूर्तिरनन्तात्मा सनातनः' (म.भा.शा.75-10)

[5]इत्यादि च वदन्, [5]

'ऋषयः पितरो देवा महाभूतानि धातवः ।

जंगमाजंगमं [6]चेदं[6] जगन्नारायणोद्भवम् ।।' (म.भा.शा.135-138) [7]इति च[7] ।

[सर्वशिष्टसम्प्रतिपन्नात् विष्णुपुराणात् परमकारणनिर्णयः]

प्राच्योदीच्यदाक्षिणात्यपाश्चात्यसर्वशिष्टैः, सर्वधर्मसर्वतत्त्वव्यवस्थायाम् इदमेव पर्याप्तमिति [8]अविगान [8]परिगृहीतं वैष्णवं [9]च पुराणम्[9],

जन्माद्यस्य यतः' (ब्र.सू.1-1-2)

इति, 'जगज्जन्मादिकारणं ब्रह्म इत्यवगम्यते, [10]तत् जन्मादि [10]कारणं किम् ? इति प्रश्नपूर्वकं,

---

ब्रह्मकार्यत्वेन अब्रह्मात्मकनिषेधात् । सर्वस्य वशी इति निमित्तत्वम् ।

पुरुष एवेदं सर्वम् इति, निमित्तत्वमुपादानत्वं च । उतामृतत्वस्यैशाः इति, तस्यैव मुक्तिदत्वम् । नाऽन्यः इति, व्यतिरिक्तोपायनिषेधः ।

इतिहासेत्यादिना, नारायणस्यैव परमकारणत्वे उपबृंहणवचनानि दर्शयति । महाभारत इति । तत्र (उपबृंहणवचस्सु) रजस्तमोमूलत्वात् श्रुतिविरोधाच्च कारणदोषबाधकप्रत्ययवतः प्रबन्धान् विहाय, सात्त्विकेषु प्रबन्धेषु सर्वलोकाविगान परिगृहीते महाभारते इत्यर्थः) ।

प्राच्येति, श्रीविष्णुपुराणे आप्तिं दर्शयति । प्राच्यादिग्रहणम्, क्वचित्परिग्रहव्यावृत्त्यर्थम् । सर्वशब्दः, कतिपयपरिग्रहव्यावृत्त्यर्थः । सर्व ---- व्यवस्थायामिति अनुष्ठाने तत्त्वस्थितौ च प्रमाणतया परिगृहीतमिदम् (इत्याशयः) ।

---

1. स्थिति - ग. 2. करणोः - ग. 3. कुतः - घ. 4. तन्नो - क,ग. 5.इत्यादिवदति-घ, इति वदति-घ, इत्यादि - घ. 6. चेवं, चैतत् - घ. 7. इति - घ. 8. अविगीत - क,ग,घ. 9. च पुराणं सामान्येन-घ, पुराणं - घ. 10. तत् जगज्जन्मादि-घ, जन्मादि - घ.

'विष्णोः सकाशादुद्भूतम्' (वि.पु.1-1-31)

इत्यादिना [1]ब्रह्मस्वरूपविशेष[1]प्रतिपादनैकपरतया प्रवृत्तमिति, सर्वसम्मतम् । [2]तथा[2] तत्रैव-

'प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी ।
पुरुषश्चाप्युभावेतौ लीयते परमात्मनि' ।। (वि.पु.6-4-39)
'परमात्मा च सर्वेषामाधारः परमेश्वरः ।
विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ।।' (वि.पु.6-4-40)

इति । [3]सर्व[3]वेदवेदान्तेषु, सर्वैश्शब्दैः परमकारणतया अयमेव गीयते - इत्यर्थः ।

[सर्वश्रुतीनामनन्यपरत्वविवरणम्]

यथा - सर्वासु श्रुतिषु केवलपर[4]ब्रह्मस्वरूप[4]विशेषप्रतिपाद[5]नायैव[5] प्रवृत्तो नारायणानुवाकः ; तथा - इदं [6]वैष्णवं च[6] पुराणम् -

[7]'सोऽहं[7]मिच्छामि धर्मज्ञ ! [8]श्रोतु[8] त्वत्तो यथा जगत् ।
बभूव भूयश्च यथा महाभाग ! भविष्यति ।।' (वि.पु.1-1-4)
'यन्मयं च जगद्ब्रह्मन् ! यतश्चैतच्चराचरम् ।
लीनमासीद्यथा [9]तत्र[9] लयमेष्यति यत्र च ।।'(वि.पु.1-1-5)

इति, परं ब्रह्म किम् ? इति प्रक्रम्य,

जन्माद्यस्येति । श्रुतवेदान्तस्य अनधीतशाखार्थबुभुत्सया प्रश्नः (इत्यर्थः)। प्रश्नपूर्वकमित्यादि । अयमभिप्रायः सामान्यविषयप्रश्नस्य विशेषविषयोत्तरमुखेन प्रवृत्तत्वं च प्रामाण्यहेतुः । अनन्यपरत्वं हि तद्विशेषविषयप्रश्नपूर्वकं चेत् ; प्रष्टुरभिमतार्थः उक्तः स्यात् । सामान्यविषयकप्रश्नपूर्वकत्वे तत्त्वस्थितिः प्रतिपादिता भवति । तस्मात् अत्रापि सामान्यविषयप्रश्नपूर्वकत्वात् प्रामाण्यम् - इति । सामान्यविषयप्रश्नपूर्वक-विशेषविषयत्वप्रदर्शनायोदाहृतेन 'विष्णोः सकाशात्' इति श्लोकेन प्रबन्धोपक्रमस्य भगवत्परत्वमुक्तं भवति । तथा तत्रैवेति, उपसंहारस्य भगवत्परत्वमाह । प्रकृतिर्या इति, परमकारणत्वमुक्तम् ।

---

1. विशेषतो ब्रह्मस्वरूप - घ. 2. यथा - घ. 3. सर्वेषु -घ. 4. ब्रह्म - घ. 5. नाथ, न परतयैव - घ. 6. वैष्णवं - घ. 6. श्रोतु - घ. 8. सोऽहं - घ. 9. यत्र - क,ग.

'विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम् ।
स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः ॥' (वि.पु.1-1-31)
'परः पराणां परमः परमात्माऽऽत्मसंस्थितः ।
रूपवर्णादिनिर्देशविशेषणविवर्जितः ॥' (वि.पु.1-2-10)
'अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः ।
वर्जितः शक्यते वक्तुं यः सदास्तीति केवलम् ॥' (वि.पु.1-2-11)
'सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ।
ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ॥' (वि.पु.1-2-12)
'तद्ब्रह्म परमं नित्यमजमक्षयमव्ययम् ।
एकस्वरूपं च सदा हेयाभावाच्च निर्मलम् ॥ (वि.पु.1-2-13)
'तदेव[1] सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत् ।
तथा पुरुषरूपेण कालरूपेण च स्थितम् ॥' (वि.पु.1-2-14)
'स सर्वभूतप्रकृतिं विकारान् गुणादिदोषांश्च मुने व्यतीतः ।
अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तराले ॥' (वि.पु.6-5-83)

परमात्मा च इति, स च (परमकारणभूतः) परमात्मा नारायणः इति वदति । **आधारः** इति शरीरात्मभावः । **परमेश्वरः** इति, परमात्मनः ईश्वरानतिरिक्तत्वम् । स च कः ? इत्यत्र (उक्तम्) विष्णुनामा इत्यादि । **सर्व ----- गीयत इत्यर्थः** इति । अग्न्यादिशब्दा अपि परमात्मभूतभगवत्पर्यन्ताः इत्यर्थः । **सोऽहम्** इति प्रश्नश्लोकेन सामान्यविषयप्रश्नपूर्वकत्वं दर्शयति । यतः इति निमित्तोपादानयोः सहप्रश्नः । श्रुतवेदान्तस्य प्रश्नत्वात्, तुच्छत्वविवर्तत्व - परिणामत्व सद्द्वारकत्वाद्द्वारकत्वादिप्रकारज्ञानार्थम्, यथा इति प्रश्नः । **बभूव --- भविष्यति** इति प्रश्नः, कालभेदेन सृष्टिकारणप्रकारभेदः अनधीतश्रुत्यन्तरोक्तः किम् ? इत्यभिप्रायेण । 'यतो बभूव' 'यथा बभूव' 'यतो भविष्यति' 'यथा भविष्यति' इति प्रश्नः । **लयेऽप्येवम्** । उत्पत्तिकारण - तत्प्रकारविषयप्रश्नानां मध्ये 'यन्मयम्' इत्यनेन व्यवधानम्, उत्पत्तिकारण - तत्प्रकारयोः पृथक्ज्ञातव्यत्वात् अन्तराकृतम् । 'यन्मयम्' इति स्थितिकारणप्रश्नोऽयम् । अन्तः प्रविश्य धारकतया हि स्थितिः क्रियते । मयट् प्राचुर्यार्थः । 'यतः' इति उपादानस्यापि पृष्टत्वात् । विकारार्थत्वम् अनपेक्षितम् । 'यन्मयं च' इति 'च'कारेण बाह्यस्थितिकारण प्रश्नो विवक्षितः । 'लयमेष्यति यत्र च' इति 'च'कारेण भूतभविष्यल्लयकर्तृप्रश्नद्वयमभिप्रेतम् ।

1.सदेव- ग,घ.

'समस्तकल्याणगुणात्मकोऽसौ स्वशक्ति [1]लेशोद्धृतभूतवर्ग[2]: ।
इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ ।।' (वि.पु.6-5-84)
'तेजोबलैश्वर्यमहा [3]वबोधसुवीर्य[3]शक्त्यादिगुणैकराशिः ।
परः पराणां सकला न यत्र क्लेशादयस्सन्ति परावरेशे ।।' (वि.पु.6-5-85)
'स ईश्वरो व्यष्टिसमष्टिरूपोऽव्यक्तस्वरूपः प्रकटस्वरूपः ।
सर्वेश्वरः सर्वदृक् [4]सर्ववेत्ता[4]समस्तशक्तिः परमेश्वराख्यः ।।' (वि.पु.6-5-86)
'संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम् ।
सन्दृश्यतेवाऽप्यधिगम्यतेवातज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ।। (वि.पु.6-5-87)

[5]इति परब्रह्म[5]स्वरूपविशेषनिर्णयायैव प्रवृत्तम् । अन्यानि [6]सर्वपुराणनि[6] [7]अन्य-परांणि एतदविरोधेन नेयानि[7] । अन्यपरत्वं च तत्तदारम्भप्रकारैः अवगम्यते । सर्वात्मना [8]विरुद्धांशः[8] तामसत्वात् अनादरणीयः ।

परं ब्रह्म किमिति । एवम् (अयं) सामान्यविषयप्रश्नः इत्यर्थः । **प्रक्रम्येति** । **प्रवृत्तम्** इत्युत्तरत्रान्वयः । **विष्णोरिति,** विशेषविषयसंक्षेपश्लोकमाह । **'सकाश'** शब्दः पंचम्यनतिरिक्तार्थः । चतुर्थ्यर्थे 'कृते' (कृष्णस्य कृते) इतिवत्, 'गुरुसकाशात्' इतिवच्च । यद्वा काशः - प्रकाशः ; संकल्परूपज्ञानसहितात् इत्यर्थः । यद्वा सकाशः पार्श्वः । शरीरैकदेशात् इत्यर्थः । विष्णु शब्दस्य रूढया देवता विशेषनिर्णयः । 'देवतापारमार्थ्यं च यथावद्वेत्स्यते भवान्' इति हि वरप्रदानम् । (अत्र) 'पारमार्थ्य' शब्देन धर्मिविपर्यासाभावः, 'यथावत्' शब्देन प्रकारविपर्यासाभावश्च विवक्षितः । रजस्तमःकालुष्यराहित्यं फलितमतेन । एवं वरप्रदानानुगुणदेवताविशेषनिर्णयः रूढया ; विष्णुशब्दस्य अवयवशक्त्या प्रकारप्रश्नस्य उत्तरमुक्तम् । अनेन, उपादानत्वं हि सद्वारकमित्युक्तं भवति । तत्रैव - विष्णावेव । लयस्थान-प्रश्नस्योत्तरमिदम् । अत्राऽपि विष्णुशब्देन लयस्थानत्वं सद्वारकमिति सिद्धम् । अविशेषेणोक्तत्वात् कालविशेषप्रश्नोऽपि दत्तोत्तरः । (अन्येषां श्लोकानां अर्थसांगत्यं तात्पर्यदीपिकायां द्रष्टव्यम् । विस्तरभिया नात्र योजितम् ।)

पर ---- यैव प्रवृत्तमिति । एवं सामान्यविषयप्रश्नपूर्वकं विशेष-विषयोत्तरवचनप्रवृत्तत्वात्, अनन्यपरम् (इत्यर्थः) । **आरम्भप्रकारैरिति** । विशेषविषयप्रश्नपूर्वकैः इत्यर्थः । तामसत्वात् अनादरणीय इति । *'विरोधेत्वनपेक्षं स्यात्'* (पू.मी.सू.1-3-3) इति न्यायात्

---

1. लेशावृत - घ. 2. सर्गः - घ. 3. बोधस्सुवीर्य - ख, बोधस्ववीर्य - ग. 4. सर्वविच्च - घ. 5. परब्रह्म - घ. 6. सर्वाणि पुराणानि-घ, सर्वाण्यपि - घ. 7. अविरोधेन वर्णनीयादि - घ. 8. विरुद्धस्तु - घ.

[पुराणवचनतः त्रिमूर्तिसाम्यशंका - परिहारौ]

ननु- अस्मिन्नपि,

'सृष्टिस्थित्यन्त [1]करणीं[1] ब्रह्मविष्णुशिवात्मिकाम् ।

स संज्ञां याति भगवानेक एव जर्नार्दनः ।।' (वि.पु.1-2-67)

इति त्रिमूर्तिसाम्यं प्रतीयते -

नैतदेवम् ; *'एक एव जर्नार्दनः'* (वि.पु. 1-2-67)

इति, जनार्दन स्यैव[2] ब्रह्म[3]-शिवादि [4]कृत्स्नप्रपंचतादात्म्यं विधीयते ।

[कृत्स्नप्रपंचस्य ब्रह्मतादात्म्योपपादनम्]

'जगच्च सः' इति पूर्वोक्तमेव विवृणोति -

'स्रष्टा सृजति चात्मानं विष्णुः पाल्यं च पाति च ।

उपसंह्रियते चान्ते संहर्ता च स्वयं प्रभुः ।।' (वि.पु.1-2-68)

[4]इति[4] स्रष्टृत्वेनाऽवस्थितं ब्रह्माणं सृज्यं च, संहर्तारं संहार्यं च युगपत् निर्दिश्य, सर्वस्य विष्णुतादात्म्योपदेशात्, सृज्य-संहार्यभूतात् वस्तुनः स्रष्टृ संहर्त्रोः जनार्दनविभूतित्वेन विशेषो दृश्यते । जनार्दन - विषुशब्दयोः पर्यायत्वेन, *'ब्रह्म-विष्णु-शिवात्मिकाम्'* (वि.पु.1-2-67) इति, विभूतिमत एव स्वेच्छया लीलार्थं विभूत्यन्तर्भाव उच्यते । यथेदम् अनन्तरमेवोच्यते -

'पृथिव्यापस्तथा तेजो वायुराकाश एव च ।

सर्वेन्द्रियान्तःकरणं पुरुषाख्यं [5]हि यज्जगत्[5] ।। (वि.पु.1-2-69)

'स एव सर्वभूतात्मा विश्वरूपो यतोऽव्ययः ।

सर्गादिकं ततोऽस्यैव भूतस्थमुपकारकम् ।।' (वि.पु.1-2-70)

'स एव सृज्यः स च सर्गकर्ता स एव पात्यत्ति च पाल्यते [6]च[6] ।

ब्रह्माद्यवस्थाभिरशेषमूर्तिर्विष्णुर्वरिष्टो वरदो [7]वरेण्यः ।।' वि.पु.1-2-71)

इति[7] ।

त्याज्यानीत्यर्थः । रजस्तमोमूलत्वात् श्रुतिविरोधाच्च, कारणदोषबाधकप्रत्ययत्वात् अयाथार्थ्यम् इत्यभिप्रायः ।

ननु ----- प्रतीयते इति । त्रिमूर्तिसाम्यप्रतीतेः, विष्णोरेव सर्वस्मात्परत्वम् अनुपपन्नम् इत्यर्थः । तादात्म्यं विधीयत इति । अस्मिन् प्रकरणे इत्यर्थः । विवृणोतीति । पूर्वं संग्रहेणोक्तस्य

---

1. करणाद् - घ. 2. स्यैकस्यैव - घ. 3. विष्णुशिवादि - ग. 4. इति च - क,ग,घ. 5. च यज्जगत् स्वयं जगत् - घ. 6. च इति - क,ग. 7. वरेण्यः - घ.

[हेयप्रत्यनीके ब्रह्मणि हेयप्रपंचतादात्म्यानुपपत्ति - तत्परिहारौ]

अत्र सामानाधिकरण्य[1]निर्दिष्टं हेय[1]मिश्रप्रपंचतादात्म्यं, निरवद्यस्य निर्विकारस्य समस्तकल्याण[3]गुणाकरस्य ब्रह्मणः, कथमुपपद्यते? - इत्याशङ्क्य,

[4]'स एव सर्व[4]भूतात्मा विश्वरूपो यतोऽव्ययः ' (वि.पु.1-2-70)

इति स्वयमेव उपपादयति । [5]स एव - 'सर्वेश्वरेश्वरः[5] परब्रह्मभूतो विष्णुरेव,[6] सर्वं जगत्[6]' इति प्रतिज्ञाय,

'सर्वभूतात्मा विश्वरूपो यतोऽव्ययः ' (वि.पु.1-2-70)

इति हेतुरुक्तः ; सर्वभूतानाम् अयमात्मा [7]विश्वशरीरः[7] ; यतः अव्ययः इत्यर्थः। वक्ष्यति च -

'तत्सर्वं वै हरेस्तनुः' (वि.पु.1-22-38) इति ।

एतदुक्तं भवति - [8]अस्य[8] अव्यय[9]स्यापि[9] परस्य ब्रह्मणो विष्णोः, विश्वशरीरतया तादात्म्यम् अविरुद्धम् - इति । आत्म[10]शरीरयोश्च[10] स्वभावाः व्यवस्थिता एव ।

[भगवदवतारे हेतुः तत्फलं च]

एवम्भूतस्य [11]सर्वेश्वरस्य[11] विष्णोः प्रपंचान्त [12]र्भूत[12]नियाम्यकोटिनि विष्टब्रह्मादिदेवतिर्य क्षु[13] मनुष्येषु[13] तत्तत्समाश्रयणीयत्वाय स्वेच्छावतारः पूर्वोक्तः

तादात्म्यस्य विवरणमपेक्षितम् इत्यभिप्रायः । स्रष्टुत्वेनेत्यादि, व्याहतिशंकापरिहारार्थम् । तादात्म्योपदेशादिति । 'जगच्च सः' इत्यस्य विवरणमत्र क्रियते इत्यर्थः । विष्णुः सृजति - स्रष्टा ब्रह्मा, विष्णुः इत्यर्थः । आत्मानं विष्णुः सृजति सृज्यं वस्तुजातं, विष्णुः इति शब्दार्थः । सृज्येति। सृज्यसामानाधिकरण्यात् सृज्यस्येव, स्रष्टृसामानाधिकरण्यात् स्रष्टुरपि विभूतित्वमित्यर्थः । एवं संहार्यसंहर्त्रोरपि विभूतित्वम् ।

अत्रेत्यादि । (इदं) सामानाधिकरण्येन स्वरूपैक्यप्रतीतिव्यावृत्त्यर्थम् ।

वक्ष्यति चेति । (इदं) रूपशब्दस्य शरीरपरत्वनिश्चयाय वचनान्तरम् ।

एतदुक्तमिति । 'विश्वरूपो यतोऽव्ययः' इत्यत्र 'अव्यय' शब्दः किमर्थः? इत्यत्रोत्तरम्। 'अव्यय' शब्दः विरोधशंकानुवादपरः इत्यर्थः । आत्मशरीरयोरिति । (इदं) भगवतो

---

1. निर्दिष्टहेय - ख. 2. परस्य - घ. 3. गुणात्म - क,ग,घ. 4. सर्व - ख. 5. स सर्वेश्वरः-घ, सर्वेश्वरः - घ. 6. जगत् - ख. 7. रूपः - क,ग,घ. 8. तस्य - घ. 9. यस्य - घ. 10. शरीरयोः - घ. 11. सर्वस्मात्परस्य - घ. 12. भूततया - घ. 13. मनुष्यादिषु - घ.

तदेतत् - ब्रह्मादीनां भावनात्रयान्वयेन कर्मवश्यत्वम्, भगवतः परब्रह्म [1]भूतस्य वासुदेवस्य[1], निखिलजगदुपकाराय, स्वेच्छया स्वेनैव रूपेण देवादिषु अवतारः- [2]इति च[2], षष्ठेंऽशे शुभाश्रय [3]प्रकरणे सुव्यक्तमुक्तम्[3] ।

[भगवतो विलक्षणविग्रहवत्त्वे महाभारतं प्रमाणम्]

'अस्य देवादिरूपेणावतारेष्वपि न प्राकृतो देहः' - इति, महाभारते - *'न भूतसंघसंस्थानो देहोऽस्य परमात्मनः'* (म.भा.शा.206-60)

इति प्रतिपादितः । श्रुतिश्च - *अजायमानो बहुधा विजायते । तस्य धीराः परिजानन्ति योनिम्'* (तै.आर.पु.3-12) इति कर्मवश्यानां ब्रह्मादीनाम् अनिच्छतामपि, तत्तत्क [4]र्मानुगुण [4]प्रकृति-परिणाम- [5]रूपभूतसंघ[5]-संस्थान-विशेषदेवादिशरीरप्रवेश [6]रूपं जन्म[6], अवर्जनीयम् ;

अयं तु सर्वेश्वरः सत्यसंकल्पो भगवान्, एवम्भूतशुभेतर [7]जन्म अकुर्वन्नपि [7], स्वेच्छया [8]स्वेनैव[8] निरतिशय[9]कल्याणरूपेण [9], स्वकल्याण-गुणानन्त्येन बहुधा [10]जायते[10] । तस्यै तस्य शुभेतरज्जन्म [11] [12]अकुर्वतोऽपि [12], स्वकल्याणगुणानन्त्येन [13]बहुधा[13] योनिम् -बहुविधजन्म, धीराः-धीमतामग्रेसराः, जानन्ति - इत्यर्थः ।

निरवद्यत्वाद्युपपत्त्यर्थम् । **पूर्वोक्त इति** । 'ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे सम्प्रसूयन्ते' इत्येतदर्थोपपादने प्रोक्तः इत्यर्थः ।

तदेतत् -------- सुव्यक्तमुक्तमिति । अत्रैव प्रबन्धे अयमर्थः स्पष्टः इत्याशयः । *'हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः'* (वि.पु.6-7-56) इत्यारभ्य, *'अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः'* (वि.पु.6-7-) इत्यन्तेन कर्मवश्यत्वमुक्तम् ; *'समस्ताः शक्तयश्चैताः'* (वि.पु. 6-7-70) इत्यारभ्य, *'जगतामुपकाराय न साकर्मनिमित्तजा'* (वि.पु.6-7-72) इत्यन्तेन स्वेच्छावतारः उक्तः इत्यर्थः ।

अस्येति । अनेन विग्रहवैलक्षण्ये प्रमाणं महाभारते दर्शयति । **कर्मवश्यानामिति** । (इदं) आपाततो व्याहतिशंकापरिहारार्थम् । **शुभेतरजन्म अकुर्वन्नपि** इत्यन्तेन 'अजायमानः' इति पदं व्याख्यातम् । **स्वेच्छयेत्यादिना** , 'बहुधा विजायते' इत्येतद्व्याख्यातम् । 'ब्रह्मादीनां जन्महेतु

---

1. भूतवासुदेवस्य - घ. 2. इति - घ. 3. प्रकरणेषु व्यक्तम् - घ. 4. रूप - घ. 5. रूपभूत, भूतसंघ संघात - घ. 6. रूपजन्म - ख. 7. जन्माद्यकुर्वन्नपि - घ. 8. स्वेनैवरूपेण - घ. 9. कल्याणेन - घ. 10. विजायते - घ. 11. कर्म - घ. 12. अकुर्वतः - घ. 13. बहुविध - घ.

[परस्य ब्रह्मणः सर्वस्मात्परत्वं शारीरकसूत्रसिद्धम्]

तदेतत्, निखिलजगन्निमित्तोपादानभूतात्,

'जन्माद्यस्य यतः' (ब्र.सू.1-1-2)

'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (ब्र.सू.1-4-23)

इत्यादिसूत्रैः [1] प्रतिपादितात्, परस्मात् ब्रह्मणः परमपुरुषात्, अन्यस्य कस्य चित् [2]परत्वम्, *'परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः'* (ब्र.सू.3-2-30) **इत्याशक्य,**

'सामान्यात्तु' (ब्र.सू.3-2-31)

'बुद्ध्यर्थः पादवत्' (ब्र.सू.3-2-32)

'स्थानविशेषात् प्रकाशादिवत्' (ब्र.सू.3-2-33)

'उपपत्तेश्च' (ब्र.सू.3-2-34)

'तथाऽन्यप्रतिषेधात्' (ब्र.सू.3-2-36) [3]

'अनेन सर्वगतत्वमायामशब्दादिभ्यः' (3-2-36) **इति सूत्रकारः[3] स्वयमेव निराकरोति[4] ।**

[नारायणस्य सर्वस्मात्परत्वं मनुस्मृति सिद्धम् ; हिरण्यगर्भादीनां क्षेत्रज्ञता च]

मानवे च शास्त्रे - *'प्रादुरासीत्तमोनुदः'* (म.स्मृ.1-6) 211

तत्फलवपूंषि यानि ; न तान्यस्य' इति 'अजायमान' शब्दस्यार्थः । हेतुः कर्म, तत्फलं तदनुभवः, प्राकृतं च वपुः तेषाम्; तद्विलक्षणहेतुफलवपुरन्वितः अवतार इति, 'बहुधा विजायते' इन्यस्यार्थः। हेतुः स्वेच्छा, फलं जगदुपकारः, वपुः अप्राकृतं चेति । **बहुविधजन्मेति** । योनिशब्दस्य उपादानकारणत्वव्यावृत्त्यर्थमुक्तम् । धीमतामग्रेसरा इति, 'धीर' शब्दस्य धैर्यगुणान्वित-परत्वव्यावृत्त्यर्थम् । धियम् ईरयन्ति इति व्युत्पन्नो 'धीर' शब्दः । अतो यथोक्त एवार्थः ।

तदेतदिति । कारणादन्यस्य प्राप्यत्वं निरस्यति । तदेतच्छब्दौ शब्दान्तरैः समस्तौ । तस्मादेतस्मात् इत्यर्थः। 'परमतः' इत्यादिसूत्रम्, पूर्वपक्षशंकापरम् । अन्यानि सिद्धान्तसूत्राणि । तेषामर्थो भाष्ये विस्तरेणाऽनुसन्धेयः । न जगत्कारणादन्यस्य प्राप्यत्वम् इत्यर्थः ।

मानवे चेति । पूर्वं श्रुतौ चतुर्मुखस्य कारणत्वशंका अपास्ता । अथ उपबृंहणे चतुर्मुखकारणत्वशंका निराक्रियते ।

प्रादुरासीत्तमोनुदः इति वाक्यम् 'यद्वै प्रोक्तं गुणसाम्यं प्रधानं तद्वै विप्राः प्रवदन्तेऽनिरुद्धम्' इति, अनिरुद्धः अव्यक्ताधिष्ठाता प्रादुरासीत् इति, दर्शयितुं, चतुर्मुखोत्पत्तेः पूर्वं अंडकारणत्वं प्रेरकत्वं च चतुर्मुखस्यानुपपन्नम् इति च दर्शयितुमुक्तम् ।

---

1. दिभिः - घ. 2. परतत्वम् - ग,घ. 3. इत्यादि - घ. 4. करोतीति - घ.

'सिसृक्षुर्विविधाः प्रजाः ।

'अप एव ससर्जादौ [1]तासु[1] वीर्यमवासृजत्' ।। (म.स्मृ. 1-8)

'तस्मिन् जज्ञे स्वयं ब्रह्मा' (म.स्मृ.1-9)

इति ब्रह्मणो जन्मश्रवणात्, [2]क्षेत्रज्ञत्वमेव अवगम्यते । तथा च स्रष्टुः परमपुरुषस्य, [3]तद्विसृष्टस्य[3] च ब्रह्मणः,

'अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः' (वि.पु.1-4-6)

'तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते' (म.स्मृ.1-11)

इति नाम[4]निर्देशाच्च [4] । [5]तथा[5] वैष्णवे पुराणे हिरण्यगर्भादीनां भावनात्रयान्वयात् अशुद्धत्वेन शुभाश्रयत्वा [6]नर्हत्वो[6]पपदानात् क्षेत्रज्ञत्वं निश्चीयते ।

['सिद्धेऽर्थे शब्दव्युत्पत्तेरभावः' इति प्राभाकरसंमतः पूर्वपक्षः]

यदपि कैश्चिदुक्तम् - [7]सर्वस्य शब्द[7]जातस्य विध्यर्थवादमन्त्ररूपस्य कार्याभिधायित्वेनैव प्रामाण्यं वर्णनीयम् । व्यवहारादन्यत्र [8]शब्दस्य[8]

सिसृक्षुर्विविधा प्रजाः इति । सृज्यस्य चतुर्मुखस्यस्वसृष्टौ सिसृक्षुत्वानुपपत्त्या न तस्य परमकारणत्वम् इत्यभिप्रायः। पूर्वश्लोकस्थ 'स्वयम्भू'शब्दोऽपि, अण्डोत्पन्नस्य चतुर्मुखस्य अण्डकारणत्व-स्रष्टृत्वानुपपत्त्या, नारायणपरः इत्यभिप्रयेण

अप एव, तस्मिन् जज्ञे इति वचनद्वयमुपात्तम् । **जन्मश्रवणादिति** । क्षेत्रज्ञत्वापवादकस्य अवतारूपत्वस्य अश्रवणे सति उच्यमानं जन्म, स्वव्यापककर्मसम्बन्धापेक्षत्वात्, क्षेत्रज्ञत्वसाधकम् इत्यभिप्रायः । **तथा इत्यादि**, मानवश्लोकार्थ- निर्णायकत्वेन । **भावनात्रयान्वयादिति** । अनुष्ठेयविषयः आन्तरः प्रयत्नः - **भावना** । सा त्रिविधा - 'त्रिविधा भावना भूप विश्वमेतन्निबोध ताम् । कार्याख्या ब्रह्मसंज्ञा च तथा चैवोभयात्मिका । कर्मभावात्मिकाह्येका ब्रह्मभावात्मिका परा । उभयात्मिका तथैवान्या त्रिविधा भावभावना । **निश्चीयत इति** । एवं हिरण्यगर्भादीनां भावनात्रयान्वयेन अशुद्धत्वात्, मुमुक्षुभिः ते अनुपास्याः इति श्रीविष्णुपुराणे प्रतिपादनात् क्षेत्रज्ञत्वनिश्चयः इत्यर्थः । एवं श्रुतिवाक्येषु स्वपक्षसाधन-प्रमाणोपन्यासपरमतशंकानिरासौ कृतौ । तथा उपबृंहणेष्वपि पूर्वं स्वपक्षसाधनवचनान्युपन्यस्य परमतशंकानिरासश्च कृतः । एवं प्रथमश्लोकोक्तं (अशेषचिदचिद्वस्तु) 'विष्णवे' इति पदं विवृतं भवति । अथ उक्तार्थं (स्य) स्थेम्ने

---

1. तस्मिन् - घ. 2. तत्क्षेत्रज्ञ - घ. 3. तस्य क्षेत्रज्ञ - क,ग,घ. 4. तत्सृष्टस्य - घ. 5. तथा च - क,ग, घ. 6. नर्हतो - क,ग. 7. सर्वस्य वेद -घ, 8. सर्वशब्द -घ.

बोधकत्वशक्त्यवधारणासम्भवात्, [1]व्यवहारस्य च[1] कार्य[2]बुद्धि[2]मूलत्वात्, कार्यरूप एव [3]शब्दार्थः [3], न परि[4]निष्पन्ने वस्तुनि [4], शब्दः प्रमाणम् - इति,

[व्युत्पत्तिक्रमप्रदर्शनपूर्वकम् उक्तपूर्वपक्षनिरासः]

अत्रोच्यते-प्रवर्तकवाक्य [5]व्यवहार एव शब्दा[5]नामर्थ[6]बोधकत्व[6]शक्त्यवधारणं कर्तव्यम् इति, [7]किमियं राजाज्ञा[7] ? सिद्धवस्तुषु शब्दस्य बोधकत्व[8]शक्तिग्रहणम् [8] अत्यन्तसुकरम् ।

तथा हि, केनचित्- हस्तचेष्टादिना 'अपवरके दण्डः स्थितः' इति देवदत्ताय ज्ञापय - इति प्रेषितः कश्चित्, तज्ज्ञापने प्रवृत्तः, 'अपवरके

सिद्धार्थे व्युत्पत्त्यभाववादं व्युदस्यति । तन्निरासश्च वेदान्त्यभिमतः । तत्र पूर्वपक्षमाह यदपीत्यादिना । सर्वस्येति, अर्थवादादिषु सिद्धार्थपरत्वव्याकृत्त्यर्थमुक्तम् । विधिभागस्य तावत् कार्यपरत्वं सुव्यक्तम् । अर्थवादभागस्य विधेयस्तुतिपरत्वेन, मन्त्रभागस्य अनुष्ठेयार्थप्रकाशनपरत्वेन च, तयोः कार्य-परत्वम् इत्यभिप्रायः। व्यवहारः-प्रवृत्तिः । 'गामानय' इति प्रयोजकवृद्धप्रयुक्त-वाक्यश्रवणसमनन्तरभाविनी प्रयोज्यवृद्धस्य प्रवृत्तिः इत्यर्थः । सामान्येन 'शब्दस्य कार्यरूपोऽर्थः' इति निश्चिते, आवापोद्वापभेदेन अनुवृत्त-शब्दस्य अनुवृत्तमर्थम्, व्यावृत्तशब्दस्य व्यावृत्तमर्थं च जानातीति, प्रातिस्विकव्युत्पत्तिः स्यात् ; विभक्त्यर्थव्युत्पत्तिश्च तथा । 'पुत्रस्ते जातः' 'नाऽयं सर्पो रज्जुरेषः' इत्यादिवाक्येषु हर्षभयवाचित्वावगमेऽपि हेतुविशेषनिर्धारणायोगात्, न तत्र सिद्धार्थविषया व्युत्पत्तिः । 'अस्य शब्दस्य अयमर्थः' इति व्युपत्तिश्च न प्रथमं सम्भवति ; व्युत्पन्नकतिपयशब्दस्यैव हि सा । तस्मात् प्रथम-व्युत्पत्तिः व्यवहारादेवेति, सा वाक्यार्थ विषया । तत्र वाक्यान्तरेष्वपि प्रथमव्युत्पत्तौ कार्यपरतयावगतकतिपयशब्दसमभिव्याहृतपदान्तरेषु तत्समभिव्याहारबलात् कार्यपरत्वं निश्चिनोति इत्याद्यभिप्रेतं विस्तरतया नोक्तम् ।

किमियं राजाज्ञेति । न हि प्रामाणिकमित्यभिप्रायः ।

अत्यन्तसुकरम् इति । यादृच्छिकव्युत्पत्तौ च सुकरम् इति भावः ।

केनचिदिति । (अनेन) प्रथमं यादृच्छिकव्युत्पत्तेः सिद्धार्थविषयत्वं दर्शयति । हस्तचेष्टादिकृत् तज्ज्ञश्च द्वौ पुरुषौ । चेष्टादिज्ञः व्युत्पित्सुरेकः । दण्डापेक्षीचैकः, इति चत्वारः

---

1. व्यवहारस्य - घ. 2. सिद्धि - घ. 3. वेदार्थः - ग,घ. 4. निष्पन्ने एव वस्तुनि -घ. निष्पन्नवस्तुनि - ख. 5. व्यवहारादेव सर्वशब्दा -घ. 6. बोधन - घ. 7. केयं राजाज्ञा, राज्ञामाज्ञा - घ. 8. शक्त्यवधारणम् - घ.

दण्डःस्थितः' इति शब्दे प्रयुक्ते । मूकवत् हस्त [1]चेष्टामिमा[1] जानन् पार्श्वस्थः अन्यः, प्राक् अव्यु त्पन्नोऽपि [2], एतस्यार्थस्य बोधनाय, 'अपवरके दण्डःस्थितः' [3]इत्यस्य[3] शब्दस्य प्रयोगदर्शनात्, 'अस्य अर्थस्य अयं शब्दोबोधकः' इति जानातीति, किमत्र दुष्करम् ?

तथा बालः - 'तातोऽयम्[4]इयम् अम्बा[4], [5]अयं मातुलः[5], अयं मनुष्यः, अयं मृगः, चन्दोऽयम्, अयं च सर्पः' इति माता-पितृप्रभृतिभिः शब्दैः, शनैः शनैः [6]अंगुल्या निर्देशेन [6], तत्र तत्र बहुशः शिक्षितः, तैरेव शब्दैः तेष्वर्थेषु स्वात्मनश्च [7]बुद्धयुत्पत्तिं[7] दृष्ट्वा, तेष्वर्थेषु तेषां शब्दानाम् [8]अंगुल्या [8] निर्देश[9]पूर्वक[9]प्रयोगः, सम्बन्धान्तराभावात् संकेतयितृपुरुषाज्ञानाच्च बोधकत्वनिबन्धनः-इति क्रमेण

पुरुषाः । तत्र व्युत्पित्सोः हस्तचेष्टादिज्ञानस्य कतिपयव्युत्पत्त्यपेक्षा नास्तीति दर्शयितुं मूकवत् इत्युक्तम् । आवापोद्धारभेदेन शब्दविशेषाणाम् अर्थविशेषव्युत्पत्तिरत्राऽपि तुल्या ।

तथेति । अथ बुद्धिपूर्वव्युत्पत्तिरेव लोके प्रचुरेति तां दर्शयति (अनेन) । तातादयः सम्बन्धशब्दाः ; न मनुष्यादयः । बालानां प्रथमं सम्बन्धिशब्दव्युत्पत्तिर्जायते - इति लोकसिद्धम् । सा च बुद्धिः पूर्वशिक्षयैवोपपद्यते । न हि प्रयोजकवृद्धः व्युत्पित्सुप्रतियोगिकमातुलादि-विषये मातुलादिशब्दं प्रयुक्ते ; अपि तु स्वप्रतियोगिकविषय एव । अतः बालस्य स्वप्रतियोगिकमातुलादि-विषये व्युत्पत्तिर्जायमाना वृद्धव्यवहारान्नोपपद्यते- इति, बुद्धिपूर्वक-व्युत्पत्तेः प्रथमभावित्वम् अभ्युपेत्यमिति, सम्बन्धिशब्दप्रयोगाभिप्रायः । अंगुल्येति । तस्मिन्नेवार्थे तस्यैव शब्दस्य अंगुलिनिर्देशपूर्वकं बहुशः प्रयोगेन बुद्धौ वासितत्वात्, तत्तच्छब्दप्रयोगे तत्तदर्थबुद्धिर्जायते । तस्मात् 'अस्यार्थस्य अयं बोधकः' इत्यभिप्रायेण अंगुलिनिर्देशः कृत इति बालो जानातीत्यर्थः ।

सम्बन्धान्तराभावादिति । प्रत्यक्षं सम्बन्धसत्तया ज्ञापकम् । लिंगशब्दौ ज्ञाततया ज्ञापकौ । तत्र लिंगम् जन्यजनकभावादिसम्बन्धान्तरज्ञानसापेक्षम् । शब्दस्य तु बोध्य बोधकभावसम्बन्धो ज्ञातव्यः । अतः बोध्य बोधकभावातिरेकेण सम्बन्धाभावात् इत्यर्थः । स्वयमपि

---

1. चेष्टां - घ. 2. त्पन्नः - ख. 3. इति - क,ग,घ. 4. इयं माता - क,ग,घ, अम्बैषा- घ. 5. मातुलः - घ. 6. हस्तचेष्टानिर्देशेन - घ. 7. बुद्धया व्युत्पत्तिं - घ. 8. अंगुल्यादि - घ. अंगुलि - क,ग,घ. 9. पूर्वकं -घ.

[1]निश्चित्य [1], पुनरपि 'अस्य शब्दस्य अयमर्थः' इति पूर्वं [2]वृद्धैः शिक्षितः [2], सर्वशब्दानाम् अर्थम् [3]अवगम्य[3], स्वयमपि [4]सर्वं वाक्य[4]जातं प्रयुङ्क्ते । एवमेव सर्वपदानां [5]स्वार्थाभिधायित्वं [5] [6]संघात[6]विशेषाणां च यथावस्थितसंसर्गविशेष-[7]बोधकत्वं [7]च-जानातीति, [8]कार्यार्थे[8] एव व्युत्पत्तिः इत्यादिनिर्बन्धः [9]निर्निबन्धनः [9] ।

अतः परिनिष्पन्ने वस्तुनि शब्दस्य बोधकत्वशक्त्यवधारणात्, सर्वाणि वेदान्तवाक्यानि, सकलजगत्कारणं सर्वकल्याणगुणाकरम् उक्तलक्षणं ब्रह्म, बोधयन्त्येव ।

[कार्य एवाऽर्थे व्युत्पत्तेरभ्युपगमेऽपि, वेदान्तानां सिद्धस्वरूपब्रह्मबोधकत्वोपपादनम्]

अपि च-कार्यार्थ एव व्युत्पत्तिरस्तु ; वेदान्त[10]वाक्यान्यपि [10]

- प्रयुङ्क्त इति । 'एतस्य व्युत्पादकोऽपि पुरुषः कार्यार्थे व्युत्पत्तिमान्' इति न वक्तव्यम् ; सिद्धाऽर्थे व्युत्पत्तिमद्भिः बालैः शब्दप्रयोगदर्शनात् । तद्व्युत्पादकः वाक्यप्रयोक्ता पुरुषोऽपि सिद्धाऽर्थे व्युत्पत्तिमान् इति दृष्टप्रकारेणाभ्युपगम्यताम्-इत्यभिप्रायः । **सर्वपदानामिति** । लौकिकवैदिकाविभागेनेत्यर्थः । **यथावस्थितेति** । सिद्धार्थपरं वाक्यं सिद्धपरमेव स्यात् ; कार्याभिधायिवाक्यं कार्यपरं स्यात् । न तु सिद्धार्थपराणां कार्यपरत्वं कल्पनीयम् इति भावः । **इत्यादिनिर्बन्ध इति** । आदिशब्देन सर्वशब्दानां कार्यपरत्वम् । कृत्स्नवेदस्य कार्याभिधायित्वं च गृह्यते ।

अपि चेति । एवं सिद्धाऽर्थे आद्या व्युत्पत्तिरुक्ता । तदभावेऽपि ब्रह्मणः सिद्धिमुपपादयति । अनेन । **उपासनविषयेति** । विशिंषन् 'विषयः' अवच्छेदकः । कार्यस्य अवच्छेदकाः, याग दानादयः । अत्र उपासनं विषयः । उपासनावच्छिन्नकार्याधिकृतः, तत्राधिकारी ; तत्र तादर्थ्यबोधनात् । तस्य विशेषणं फलम् । फलत्वेन सिद्धौ उदाहरणत्रयम् ।

1) **दुःखासम्भिन्नेति** । विधिवाक्यस्वरूपप्रतिपन्नस्य फलस्यापि अर्थवादोक्तविशेषणत्वाभ्युपगमे उदाहरणमिदम् । 2) **रात्रिसत्रेति** । फलस्वरूपस्यैव

1. निश्चितः - पा. 2. वृद्धशिक्षितः शिष्टैः शिक्षितः - घ. 3. इत्थमवगम्य - घ. 4. सर्ववाक्य - क, ग. 5. स्वार्थबोधकत्वं -घ, स्वार्थावबोधकत्वं - घ. 6. पदसंघात - घ. 7. वाचित्वं - क,ग,घ. 8. कार्ये - घ. 9. निर्बीजः - घ. 10. वाक्यानि - क,घ.

उपासनविषयकार्याधिकृत [1]विशेषणभूत [1]फलत्वेन दुःखासम्भिन्नदेशविशेण-रूप-स्वर्गादिवत्, रात्रिसत्र [2]प्रतिष्ठादिवत्[2], अपगोरण शतयातनासाध्यसाधन-[3]भाववच्च[3], कार्यो[4]पयोगितयैव[4] सर्वं बोधयन्ति । तथा हि -

'ब्रह्मविदाप्नोति [5]परम्[5] (तै.उ.आन.1-1) इत्यत्र-ब्रह्मोपासन-विषयकार्याधिकृत-विशेषणभूतफलत्वेन ब्रह्मप्राप्तिः श्रूयते, *'परप्राप्तिकामो ब्रह्म विद्यात्'* इति । अत्र प्राप्यतया प्रतीयमान ब्रह्म[6]स्वरूप, तद्विशेषण च सर्व, कार्योपयोगितयैव सिद्धं भवति ; तदन्तर्गतमेव [7]जगतः स्रष्टृत्वं[7] संहर्तृत्वम्, आधारत्वम्, [8]अन्तरात्मत्वम्- इत्यादि[8], उक्तमनुक्तं च [9]सर्वमिति, न किंचदनुपपन्नम्[9] ।

[मन्त्रार्थवादाद्यभिधेयस्यार्थस्य, यागोपासनादिकार्योपयोगितया सिद्धिः]

एवं च सति, मन्त्रार्थवादगता [10]हि[10] ! अविरुद्धाः अपूर्वाश्च अर्थाः सर्वे, विधिशेषतयैव सिद्धा [11]भवन्ति[11] । यथोक्तं द्रमिडभाष्ये -

---

अर्थवादप्रतिपन्नस्याभ्युपगमे उदाहरणम्-रात्रिसत्रप्रतिष्ठा । 3) अपगोरणेति । न केवल विहितफलस्यैव ; विधेयविरोधिफलस्यापि अर्थवादोक्तस्यागीकारे उदाहरणम् - अपगोरण शतयातनासाध्यसाधनभावः । श्रूयत इति । फलसम्बन्धश्रवणे विधिकल्पनस्य न्याय्यत्वात् इति भावः । अत्रेति । स्वर्गविशेषदुःखासम्भिन्नत्वादिवत् ब्रह्मस्वरूपेण सह तद्विशेषणस्यापि सिद्धिः इत्यर्थः । तदन्तर्गतमिति । ब्रह्मतद्विशेषणान्तर्गतमित्यर्थः । एवम् औपनिषदोपासनविधीना फलत्वेन ब्रह्मणः सिद्धिरुक्ता ।

एवं चेति । अथ (अनेन) सर्वविधिसाधारणोक्तिरुच्यते । अर्थवादानां स्तावकत्वसिद्ध्यर्थं, स्वार्थे तात्पर्यमत्रोच्यते, एवं च सतीति । विध्युपयोग्यर्थेषु अभ्युपगन्तव्येषु सत्सु इत्यर्थः । अविरुद्धा इति । प्रमाणान्तरसिद्धत्वे, तत् प्रतिपादयितुं न शक्नोति शास्त्रमिति (इदम्) उक्तम् । अपूर्वाश्चेति । प्रमाणान्तरसिद्धत्वेऽपि अनुवादः स्यादिति (इदम्) उक्तम् । ऋणमित्यादिना, विध्युपयोगित्वेन अर्थवादानामपि स्वार्थे प्रामाण्ये द्रमिडाचार्यग्रन्थमाह ।

---

1. विशेषण - घ. 2. प्रतिष्ठावत् - क,ग,घ. 3. भावादि - घ. 4. योगितया - घ. 5. परम्' इति, 'तस्मिन् यदन्तस्तदुपासितव्यम्' - घ. 6. मानब्रह्म - ख. 7. जगत्स्रष्टृत्व- क,ग,घ. 8. जगदन्तरात्मत्वादि - घ. 9. सर्वं सिद्धमिति - घ. 10. अपि -घ. 11. भवन्तीति - घ.

'ऋणं हि वै जायते इति श्रुतेः' (द्.भा.) इत्युपक्रम्य,

'यद्यपि - अवदानस्तुतिपरं वाक्यं, तथाऽपि - न असता स्तुतिरुपपद्यते' (द्.भा.) इति ।

[उक्तस्यार्थस्योपपादनम् ; प्राभाकरोक्तकार्यार्थानुपपत्तिस्फुटीकारश्च]

एतदुक्तं भवति - सर्वो हि अर्थवादभागः[2], देवताराधनभूतयागादेः सांगस्य, [3]आराध्यदेवतायाश्च, अदृष्टरूपान् गुणान् सहस्रशो वदन्, [4]कर्मणि [5]प्राशस्त्य[6]बुद्धिम् उत्पादयति ; तेषाम् असद्भावे, प्राशस्त्यबुद्धिरेव न स्यादिति कर्मणि [7]प्राशस्त्य[7]बुद्ध्यर्थं, गुणसद्भावमेव बोधयति - इति । अनयैव दिशा [8]सर्वे मन्त्रार्थवादगता ह्यर्थाः सिद्धाः ।

एतदुक्तमिति - असद्गुणकथनं हि स्तुतिः । तत् कथम् असता स्तुत्यनुपपत्तिः ? इत्यत्र, (समाधानमिदम्) । अयं न्यायः, न केवलम् अवदानस्तुतिमात्रविषयः ; अपि तु सर्वार्थवादसाधारणः - इति दर्शयितुम्, एतदुक्तमित्याद्यारम्भः । **अदृष्टरूपान् गुणानिति** । अनेन अनुवादरूपत्वं बाधितत्वं च व्यावृत्तम् । आराध्यदेवतास्तुतिद्वारा कर्मणः स्तुत्या च कर्मणि प्ररोचनां कुर्वन्तोऽर्थवादाः, गुणासद्भावे तत्कृतोत्कर्षोऽपि नास्तीति, कर्मणि प्ररोचनां जनयितुं न शक्ताः स्युः इत्यर्थः ।

अनयैव दिशेति । विध्यपेक्षितार्थसिद्धिन्यायात्, 'नाऽसतास्तुतिरुपपद्यते' इति न्यायाच्च इत्यर्थः । **मन्त्रार्थवादगता इति** । अर्थवादवत् मन्त्रगताः अर्था अपि सिद्धाः इत्यर्थः। *'छागस्य वपाया मेदसः'* (तै.ब्रा.3-6-23) इति मन्त्रोक्तच्छागः, 'पशुना यजेत' इति विधेरपेक्षि-तत्वादभ्युपगतो हि । स्तुतिपराणामपि मन्त्राणां, स्वार्थे तात्पर्यं न चेत् स्तावकत्वं न सिध्यति । अनुष्ठेयार्थ-प्रकाशकत्वमपि मन्त्राणां, स्वार्थे तात्पर्याभावे न सिध्यति । 'ईदृशदेवताकं कर्म' इति हि । तत्प्रकाशनम् । तच्च देवतास्वरूपादौ तात्पर्यादेव सिध्यति - इत्यर्थः । एवं सिद्धार्थे व्युत्पत्तिः तदभावेऽपि विधिशेषतया ब्रह्मणः सिद्धिश्चोक्ता ।

अपि चेति । अथ (अनेन) परोक्तं कार्यम्, अनुपपन्नम् इत्याह । (अत्र दूष्योऽशः) - धात्वर्थस्य (यज् धात्वर्थादेः) कर्मणोऽपि, कृतिसाध्यत्वमस्ति । स्वर्गादेः (यागादिफलभूतस्य)

---

1. सर्वोऽपि - घ. 2. वादः - घ. 3. आराध्यभूतः - घ. 4. सहस्रशः कर्मणि - क,ग. 5. प्रशस्त - घ. 6. प्रशस्त - घ. 7. प्रशस्त - घ. 8. सर्वमन्त्रा - ख.

[कार्यपदार्थशोधनम्]

अपि च, कार्यवाक्यार्थवादिभिः, - किमिदं कार्यत्वं नाम ? - इति वक्तव्यम् । कृतिभावभाविता, कृत्यु द्देश्यता च[1]-इति चेत् किमिदं कृत्युद्देश्यत्वम् ?

यदधिकृत्य कृतिः वर्तते, तत् कृत्युद्देश्यत्वम् - इति चेत्,

पुरुषव्यापाररूपायाः कृतेः, कोऽयम् अधिकारो नाम? यत्प्राप्तीच्छया कृतिम् उत्पादयति पुरुषः, तत् कृत्युद्दे[2]श्यत्वम्[2]-इति चेत् ; हन्त ! तर्हि[3]इष्टत्वमेव कृत्युद्देश्यत्वम् ।

[प्रेरकत्वं कृत्युद्देश्यत्वम्' इत्यभिप्रायस्य दूषणम्]

अथैवं मनुषे - इष्टस्यैव रूपद्वयमस्ति । इच्छाविषयतया स्थितिः, पुरुष प्रेरकत्वं च । [4]तत्र[4] प्रेरकत्वाकारः कृत्यु[5]द्देश्यम्[5] - [6]इति[6],

---

इष्टत्वमस्ति । तदुभयव्यावर्तकं कृतिप्राधान्यमिति तृतीयाकारः, कार्यस्य अभ्युपगम्यते परैः । तस्य प्राधान्यादेव कृत्स्नवेदतात्पर्यभूमित्वं चोच्यते । 'कृतिसाध्यं प्रधानं यत्, तत्कार्यमभिधीयते' इति च तत्प्रकरणम् । सः तृतीयाकारः, अत्र दूष्यते । (**किमिदमिति** इदं कार्यत्वं नाम किम्'? इति कार्यवाक्यार्थवादिभिः वक्तव्यम्-इत्यन्वयः **कृतिभावभाविता** इति, साध्यत्वदर्शनायोक्तम् । स्वर्गादिरपि सा (कृतिभावभाविता) अस्तीति तद्व्यावृत्त्यर्थं कृत्युद्देश्यता इत्युक्तम् । तां दूषयितुं, किमिदम् इति पृच्छति । **यदधिकृत्य इति** (तत्) परिहरति । यत् साध्यतया अवलम्ब्य इत्यर्थः । स्वप्रयोजनसाध्यत्वात् स्वकीयत्वबुद्धिर्हि अधिकारः । **पुरुषेति** । पुरुषबुद्धिरुपोऽधिकारः, पुरुषव्यापाररूपकृतेः न सम्भवति इत्यभिप्रायः ।

हन्त तर्हीति । (अनेन) कृतिमत्पुरुषेष्टत्वम् - इति फलितं (कृत्युद्देश्यत्वम्) दूषयति । एवं तृतीयाकारस्यपरोक्तस्य (कृत्युद्देश्यत्वस्य) तयोरन्यतरात्मकत्वे पर्यवसानमुक्तम् ।

सोऽयम् इति, सोपलम्भं परिहर्तुमुपक्रमते । **इच्छायाम् ------ न दृश्यते** इति । यदा इष्टस्य उपायान्तरेण सिद्धिः ; तदा न स्वयं प्रवर्तते । यदा स्वप्रयत्नादपि न सिध्यति ; तदापि न प्रवर्तते । यदा स्वयत्नादेव सिध्यति ; तदा प्रवर्तत इति, प्रेरकत्वं नाम कृतिसाध्यत्वान्तर्भूतम्

---

1. श्यता - क,ग. 2. श्यम् - घ. 3. कृतिमत्पुरुषेष्ट - घ. 4. अत्र - घ. 5. श्यम् - घ. 6. इति चेत् -घ.

सोऽयं, स्वपक्षाभिनिवेशकारितो वृथाश्रमः । तथा हि-इच्छाविषयतया प्रतीतस्य [1]स्वप्रयत्नोत्पत्ति[1]मन्तरेण [2]असिद्धिरेव[2], प्रेरकत्वम् ; तत एव प्रवृत्तेः । 'इच्छायां जातायाम्, इष्टस्य [3]स्वप्रयत्नोत्पत्ति[3]मन्तरेण असिद्धिः प्रतीयते [4]चेत्[4]; ततः चिकीर्षा जायते ; ततः प्रवर्तते पुरुषः' - इति तत्त्वविदां प्रक्रिया । तस्मा-दिष्टस्य कृत्यधीनात्म[5]लाभत्वातिरेकि[5], कृत्युद्देश्यत्वं नाम किमपि न [6]दृश्यते[6] ।

['पुरुषानुकूलत्वं कृत्युद्देश्यत्वम्' इत्यभिप्रायस्य दूषणम्]

[7]अथोच्येत[7]-इष्टताहेतुश्च पुरुषानुकूलता ; तत् पुरुषानुकूलत्वं कृत्यु[8]द्देश्यत्वम्[8] -[9]इति[9],

[10]नैवम्[10]; 'पुरुषानुकूलं, सुखम्' इति अनर्थान्तरम् ; तथा, [11]'पुरुषप्रति[11]कूलं दुःखपर्यायम् । अतः सुखव्यतिरिक्तस्य कस्याऽपि पुरुषानुकूलत्वं न सम्भवति ।

[सुखेतरस्यापि अनुकूलपदवाच्यत्वशंकातत्परिहारौ]

ननु च - दुःखनिवृत्तेरपि सुखव्यतिरिक्तायाः, पुरुषानुकूलता दृष्टा- नैवम्, 'आत्मानुकूलं सुखम्, आत्मप्रतिकूलं दुःखम्' इति हि [12]सुखदुःखयो[12]र्विवेकः ।

इत्यर्थः । तत्त्वविदामिति । न तु अभिनिविष्टानाम् इत्यर्थः ।

इष्टतेति । पुरुषानुकूलत्वं नाम तृतीयाकारः । स एव कृत्युद्देश्यत्वम् इत्यर्थः । (अनर्थान्तरमिति । 'अर्थान्तरं न भवति' इति वा, 'न अर्थान्तरम्' इति वा विग्रहः । यत् सुखमित्युच्यते; तदेव, पुरुषानुकूलम् । यत् पुरुषानुकूलमित्युच्यते ; तदेव सुखम् । तयोः न मिथो भेदः इत्यर्थः। तथा इत्यादिकं, दृष्टान्तार्थम् । कार्यं यथा दुःखव्यतिरिक्तत्वात् पुरुषप्रतिकूलं न भवति ; तथा सुखव्यतिरिक्ततया तदनुकूलत्वमपि तस्य नास्तीत्यर्थः ।

ननु चेति । सुखव्यतिरिक्तदुःखनिवृत्तौ अनुकूलत्वदर्शनात्, सुखव्यति-रिक्तकार्यस्यापि अनुकूलत्वमुपपद्यते इत्यर्थः । **भ्रम इति** । अनुकूलत्वात्, सुखम् इष्टम् । दुःखस्य प्रतिकूलत्वात्, तन्निवृत्तिरपि इष्टा । एवम् इष्टतासाम्यात् आनुकूल्यभ्रमः इत्यर्थः । **संसारिणः इति** । मुक्तस्य अनुकूलसंयोग एवेति, तद्व्यावृत्त्यर्थम्, (इदम्) उक्तम् । प्रतिकूलनिवृत्तेः अनुकूलत्वे, 'अन्यतरनिवृत्तिः अन्यतरसंयोगः' इत्युक्तं स्यात् । तदा सुषुप्तौ सुखदुःखयोर्द्वयोरपि

---

1. यपत्ति - ग. 2. सिद्धिरेव - घ. 3. प्रयत्नोत्पत्ति, स्वप्रवृत्ति - घ. 4. इति चेत् - घ. 5. लाभत्वादितरत्-घ, लाभातिरेकि - घ. 6. विद्यते - घ. 7. अथोच्यते - क,घ. 8. श्यम् - ग,घ. 9. इति चेत् - क,घ. 10. मैवम् - घ. 11. पुरुषाननु - ग,घ. 12. तयोः- घ.

तत्र-आत्मानुकूलं सुखम्, इष्टं भवति । तत्प्रतिकूलं दुखं च, अनिष्टम् । अतः दुःखसंयोगस्य [1]असह्य[1]तया तन्निवृत्तिरपि इष्टा भवति । तत एव इष्टतासाम्यात् अनुकूलताभ्रमः । तथा हि-प्रकृति [2]संसृष्टस्य संसारिणः[2] पुरुषस्य, 1) अनुकूल-संयोगः 2) प्रतिकूलसंयोगः 3) स्वरूपेणावस्थितिः, [3]इति च[3] तिस्रोऽवस्थाः । तत्र प्रतिकूलसम्बन्ध [4]निवृत्तिः[4] [5]अनुकूलसम्बन्धनिवृत्तिश्च, स्वरूपेणा [6]वस्थितिरेव । तस्मात् प्रतिकूलसंयोगे वर्तमाने, तन्निवृत्तिरूपा स्वरूपेणा [6]वस्थितिरपि[6] इष्टा भवति । तत्र इष्टतासाम्यात् अनुकूलताभ्रमः ।

अतः सुखस्वरूपत्वात् अनुकूलतायाः, [7]नियोगस्य[7] अनुकूलता [8]वदन्त[8], प्रामाणिकाः परिहसन्ति । इष्टस्य अर्थविशेषणस्य [9]निर्वर्तक[9]तयैव हि ! नियोगस्य नियोगत्वं, स्थिरत्वम्, अपूर्वत्वं च प्रतीयते । *'स्वर्गकामो यजेत'* (का.श्रौ.सू.4-47) इत्यत्र कार्यस्य क्रियातिरिक्तता, [10]स्वर्ग[10]कामपदसमभिव्याहारेण स्वर्गसाधनत्व-निश्चयादेव भवति ।

प्रसंगः ; प्रतिकूलनिवृत्तिः अनुकूलसंयोगः । अनुकूलनिवृत्तिः प्रतिकूलसंयोगश्च भवतीति । तस्मात् दुःखनिवृत्तेः अनुकूलत्वं नास्ति इत्यर्थः ।

अत इति । (सुखस्यैव अनुकूलत्वात्) सुखव्यतिरिक्तस्य नियोगस्य अनुकूलत्वमनुपपन्नम् (इत्यर्थः) । सुखविशेष एवेति, तस्य अनुकूलत्वं नाम तृतीयाकारः सम्भवति- इति शंकायाम्, सुखविशेषत्वं निराकरोति **इष्टस्येत्यादिना** । इष्टस्य - स्वत इष्टस्य इत्यभिप्रायः । स्वत इष्टत्वं च सुखस्य । 'स्वतः' शब्देन, साधनतयेष्टत्वव्यावृत्तिः । अत्र तृतीयाकारदूषणे क्रियमाणे, अर्थात् द्वितीयाकारश्च दूषितो भवति ; इष्टत्वनिरासात् । नियोगत्वम्- प्रेरकत्वम् । **स्थिरत्वम्** - स्थायित्वम् । अपूर्वत्वम् - प्रमाणान्तरागोचरत्वम् । एतत्सर्वम् इष्टस्यार्थस्य निर्वर्तकतयैव सिध्यति । इष्टसाधनत्वज्ञानात् प्रवृत्तिहेतुत्वम्; कालान्तरभाविस्वर्गसाधनत्वात् स्थिरत्वम् । लौकिकप्रत्यक्ष-सिद्धक्षणिक-धात्वर्थातिरिक्तस्थिरसाधनत्वात् अपूर्वत्वं च इत्यर्थः ।

स्वर्गकाम इति । इष्टसाधनतयैव नियोगत्व-स्थिरत्वापूर्वत्वप्रतीतिः कथम् ? इत्यत्र (उत्तरमिदम्) ।

न च ------ नियोगस्येति । ननु - भृत्यादीनामिष्टप्रदस्यापि राज्ञः यथा प्राधान्यम्;

---

1. अनिष्ट - घ. 2. संसृष्टसंसारिणः - ग. 3. इति - ख. 4. निवृत्तिश्च - ग,घ. 5. स्वरूपेणा घ. 6. स्थितिरेव , स्थितिः - घ. 7. यः नियोगस्य - घ. 8. वदति तं - घ. 9. निवर्तक - घ. 10. स्वसिद्धस्वर्ग - घ.

[नियोगस्य तदुक्तप्राधान्यादेः प्रतिक्षेपः]

न च वाच्यम् - 'यजेत' इत्यत्र, प्रथमं नियोगः स्वप्रधान[1]तयैव प्रतीयते ; स्वर्गकामपदसमभिव्याहारात्, स्वसिद्धये स्वर्गसिद्ध्यनुकूलता च नियोगस्य - इति । 'यजेत' इति हि ! धात्वर्थस्य पुरुषप्रयत्न[2]साध्यतैव प्रतीयते ; स्वर्गकामपदसमभिव्यहारादेव, धात्वर्थातिरेकिणः 'नियोगत्वं स्थिरत्वम् अपूर्वत्वं च [3]इत्याद्यव[3]गम्यते । तच्च स्वर्गसाधनप्रतीतिनिबन्धनम् । समभिव्याहृत-स्वर्गकामपदार्थान्वययोग्यं स्वर्गसाधनमेव कार्यं, लिङादयः अभिदधति - [4]इति हि[4] ! लोकव्युत्पत्तिरपि तिरस्कृता ।

[परोक्तस्य नियोगस्य तदुक्तानन्यार्थत्वस्य प्रतिक्षेपः]

एतदुक्तं भवति - समभिव्याहृतपदान्तर[5]वाच्या[5]न्वययोग्यमेव

तथा स्वप्रधानभूत एव प्रयोगः प्रतीयते ; स्वस्य अनुष्ठातुः इष्टप्रदश्च स्यात् राजवत् - इति, प्रथमं स्वप्रधानतयैव प्रतीतत्वात्, न स्वत इष्टत्वानुपपत्तिः । यथोक्तम् 'आत्मसिध्द्यनुकूलस्य नियोज्यस्य प्रसिद्धये । कुर्वत् स्वर्गादिकमपि प्रधानं कार्यमेव नः' इति शंकामनुभाष्य परिहरति (अनेन) ।

स्वर्ग------वगम्यते इति (नचेत्यादौ) धात्वर्थस्य प्रथमप्रतिपन्नस्यापि, वाक्यार्थानुपयोगिनः परित्यागे दृष्टान्तत्वं गर्भितम् । तत् कथम्? इति शंकायाम् (उत्तरमिदम्) इत्यादि इति आदि शब्देन प्राधान्यादि विवक्षितम् । तच्च - धात्वर्थातिरिक्तत्वं च । अतिरिक्तस्य कार्यस्य स्वर्गसाधनत्वप्रतीतिनिबन्धनम् 'न हि कामी अकामसाधने नियोक्तुं शक्यते' इति न्यायात् इत्यर्थः । समभिव्याहृतेति । स्वर्गसाधनत्वप्रतीतिनिबन्धनत्वं च कुतः? इत्यत्र (उत्तरमिदम्) । 'इतर-पदार्थान्वययोग्यस्यैव पदान्तरप्रतिपाद्यत्वम् इति हि लोकव्युत्पत्तिभंगेन अपूर्वस्य वाच्यत्वं कल्पितम् इत्यर्थः ।

एतदुक्तमिति । पदान्तरार्थान्वययोग्यस्यैव इतरपदप्रतिपाद्यत्वं युक्तम् ; अन्विताभि-धायित्वाद्वाक्यस्य इत्यर्थः । योग्यं च किम्? इत्यत्रोत्तरम् तच्चेति । अत इति साधनस्यैव-वाक्यार्थान्वयार्हत्वात् इत्यर्थः । यथा-प्रथमप्रतिपन्नाऽपि धात्वर्थभूता क्रिया, वाक्यार्थान्वया-योग्यत्वात् परित्यक्ता ; तथा-स्वप्रधानतया प्रथमं प्रतिपन्नमपि, वाक्यार्थान्वयायोग्यत्वात् त्याज्यम् इत्यर्थः ।

---

1. प्रधान - घ. 2. साध्यता - ख. 3. इत्यादि हि अव - क,ग,घ. 4. इति - घ. 5. वाच्यार्था - क, ग, घ.

इतरपदप्रतिपाद्यमिति, अन्विताभिधायिपदसंघातरूपवाक्यश्रवणसमनन्तरमेव प्रतीयते । तच्च स्वर्गसाधनरूपम् ; अतः क्रियावत्, [1]अनन्यार्थताऽपि [1] विरोधादेव परित्यक्ता - इति ।

अत एव 'गंगायां घोषः' इत्यादौ, [2]घोष[2]प्रतिवासयोग्यार्थोपस्थापनपरत्वं गंगापदस्य, आश्रीयते । प्रथमं गंगापदेन गंगार्थः [3]स्मृतः [3] इति, गंगापदा [4]र्थस्य[4] [5]पेयत्वं[5] न वाक्यार्था[6]न्वयि[6] भवति । एवम् अत्राऽपि 'यजेत' इत्येतावन्मात्रश्रवणे, कार्यम् अनन्यार्थं स्मृतमिति, वाक्यार्थान्वयसमये कार्यस्य अनन्यार्थता न अवतिष्ठते ।

[नियोगस्य पुरुषानुकूलतायाः प्रतिक्षेपः]

कार्याभिधायिपदश्रवणवेलायां, प्रथमं कार्यम् अनन्यार्थं [7]प्रतीतम्[7] - इत्येतदपि, न संगच्छते ; व्युत्पत्तिकाले गवानयनादिक्रियायाः दुःखरूपायाः, इष्टविशेषसाधनतयैव कार्यता [8]प्रतीतेः [8] । अतः नियोगस्य [9]पुरुषानुकूलत्वं [9] सर्वलोकविरुद्धम् । नियोगस्य [10]सुखरूपपुरुषानुकूलता [10] [11]वदतः [11], स्वानुभवविरोधश्च ।

'कारीर्या वृष्टिकामो यजेत' (तै.सं.सा.भा.2-4-7) - इत्यादिषु, सिद्धेऽपि नियोगे, वृष्ट्यादि [12]सिद्धिनिमित्तस्य वृष्टि[12]व्यतिरेकेण नियोगस्य अनुकूलता, न अनुभूयते ।

अत एवेति । प्रथमप्रतिपन्नस्यापि वाक्यार्थान्वयानर्हस्य त्याज्यत्वादेव इत्यर्थः ।

न संगच्छते इति एकपदश्रवणवेलायाम् अनन्यार्थतया प्रथमप्रतिपत्तिरेव नास्तीति, 'कार्यमनन्यार्थं प्रतीयते' इति गुरुवचनं न संगच्छते (इत्यर्थः) ।

अत इति । सुखस्यैव पुरुषानुकूलत्वात्, नियोगस्य च सुखनिमित्तत्वाच्च (सुखरूपत्वाभावात्) इत्यर्थः । नियोगस्य ----विरोधश्च इति योग्यानुपलम्भं दूषणमाह । यागादिजन्यपरमापूर्वस्य अन्त्येष्ट्यन्तरभावित्वात्, तद्व्यावृत्त्यर्थम्, कारीर्या वृष्टिकामो यजेतेत्युक्तम् ।

---

1. र्थता - घ. 2. घोषं - घ. 3. उपस्थितः - घ. 4. र्थस्यैव - ग. 5. पेयत्वात् - घ. उपेयत्वात् - ग. 6. न्वर्या - ग, न्वयो - घ. 7. प्रतीयते - घ. 8. प्रतीयते -घ. 9. सुखरूपपुरुषार्थानुकूलतां - घ. 10. पुरुषानुकूलसुखरूपतां - ग,घ. 11. वदतां - घ. 12. निमित्तपुष्टि, निमित्तसृष्ट्यदि -घ, निमित्तत्व घ.

यद्यपि - अस्मिन् जन्मनि वृष्ट्यादिसिद्धेः अनियमः ; अनियमादेव, नियोगसिद्धिः [1]अवश्याश्रय[1]णीया । तस्मिन् अनुकूलतापर्यायसुखानुभूतिः [2]न विद्यते[2] । एवम् उक्तरीत्या, कृति[3]साध्ये[3]ष्टत्वातिरेकि, कृत्युद्देश्यत्वं न [4]दृश्यते[4]।

[कृत्युद्देश्यत्वस्वरूपविवेचनम्]

कृतिं प्रति शेषित्वं, कृत्युद्देश्यत्वम् - इति चेत्,

किमिदं [5]शेषित्वम्[5]? किं च [6]शेषत्वम्[6] ? - इति वक्तव्यम् ।

कार्यप्रति [7]सम्बन्धी शेषः[7]; तत्प्रतिसम्बन्धित्वं शेषित्वम् - इति चेत्,

एवं तर्हि ! 'कार्यत्वमेव शेषित्वम्' इत्युक्तं भवति ; कार्य[8]त्वमेव हि[8] विचार्यते । [9]परोद्देश[9]प्रवृत्तकृति [10]व्याप्त्यर्हत्वं[10] [11]शेषत्वम्[11] - इति चेत्, कोऽयं परोद्देशो नाम इति? [12]अयमेव हि[12] विचार्यते । उद्देश्यत्वं नाम ईप्सितसाध्यत्वम् इति चेत् -

[13]किम्[13] ईप्सितत्वम् ? कृतिप्रयोजनत्वम् - इति चेत्,

पुरुषस्य कृत्यारम्भप्रयोजनमेव हि ! कृतिप्रयोजनम् ; स च इच्छाविषयः कृत्यधीनात्मलाभः इति, [14]पूर्वोक्त एव[14] ।

यद्यपीति । वृष्टयादिसिद्धयनियमात्, नियोगः अनुपपन्नः इति, तदनुकूलत्वाननुभवः- इति चेत्, न ; वृष्टयाद्यासिद्धिरपि नियमेन नास्तीति, कदाचित् नियोगः सिद्धयति ; तदानीम् नियोगसुखाननुभव इति, योग्यानुपलम्भः इत्यर्थः । **तस्मिन्** - नियोगे । **सुखानुभूतिः** - सुखत्वानुभूतिः ।

कार्य -------- शेषित्वम् इति । (अनेन) शेषशेषित्वलक्षणं पराभिमतम् आशंकते ।

एवं तर्हीति, कृत्युद्देश्यत्वं दूषयति । कार्यप्रतिसम्बन्धिप्रतिसम्बन्धित्वं हि । कार्यत्वमेवेत्यर्थः । **कार्यत्वमेवेति** । कार्यत्वं नाम कृत्युद्देश्यत्वम् । कृत्युद्देश्यत्वं च कृति-शेषित्वम् । कृतिशेषित्वं च कार्यत्वम् इत्युक्तं भवति । 'कृत्युद्देश्यत्वं -कृतिशेषित्वम्' इत्युक्ते, 'कृत्युद्देश्यत्वमेव कृत्युद्देश्यत्वम्' इत्युक्तं भवति - इत्यर्थः ।

परोद्देशेति । (अस्मिन्) पक्षेऽपि अयमेव दूषणप्रकारः । किंच 'कृतेः अशेषत्वप्रसंगः' इति भाष्येऽभिहितम् ।

पुरुषस्येति । न हि । कृतेः पुरुषव्यापाररूपायाः, प्रयोजनं नामास्ति । तस्मात्

---

1. आश्रय-घ. 2. नाऽस्ति -घ. 3. साध्यत्वे -घ. 4. विद्यते - क,ग,घ. 5. शेष - घ. 6. शेषि - घ. 7. सम्बन्धित्वं शेषत्वम् - घ. 8. मेव - क,ग. 9. परोद्देशेन - क,ग. 10. व्याप्त्यर्हत्वमेव - क,ग. 11. शेषि - घ. 12. इत्ययमेव -घ, इति हि -घ. 13. किमिदम् - ग,घ. 14. पूर्वमेवोक्तः - घ.

[शेषशेषिभावस्वरूपनिर्णयः]

अयमेव हि सर्वत्र शेष-शेषिभावः ; परगतातिशयाधानोच्छया [1]उपादेयत्व[1]मेव यस्य स्वरूपं स शेषः; परः शेषी । [2]फलोत्पत्तीच्छया [2] यागादेः, तत्प्रयत्नस्य च उपादेयत्वम् ; यागादिसिद्धीच्छया अन्यत्सर्वम् । [3]एवं गर्भदासा[3]दीनामपि पुरुषविशेषातिशयाधानेच्छया उपादेयत्वमेव स्वरूपम् ।

[सर्वस्यापि ईश्वरशेषता]

एवम् ईश्वरगतातिशयाधानेच्छया [4]उपादेय[4]त्वमेव, चेतनाचेतनात्मकस्य [5]नित्यस्यानित्यस्य [5] च सर्वस्य वस्तुनः स्वरूपमिति, सर्वम् ईश्वरशेषभूतम्; सर्वस्य च ईश्वरः [6]शेषी - इति[6], *'सर्वस्य वशी, सर्वस्येशानः'* (बृ.उ.6-4-22) ***'पतिं [7]विश्वस्य'*** (तै.ना.उ.11-3) **[8]इत्याद्युक्तम्[8] । *'कृतिसाध्यं प्रधानं यत् तत् कार्यमभिधीयते'*** (प्र.प.2) **इत्ययमर्थः, श्रद्दधानेष्वेव शोभते ।**

कृतिप्रयोजनं नाम कृतिमत्पुरुषस्य कृत्यारम्भप्रयोजनमेव । तच्च इष्टत्वे कृतिसाध्यत्वान्तर्भूतम् - इत्यर्थः ।

अयमेव हीति । कस्तर्हि शेषशेषिभावः ? इत्याकांक्षायाम्, *'शेषः परार्थत्वात्'* (पू.मी.सू. 3-1-1) इति सूत्रं व्याचष्टे (अनेन) परगतातिशयाधानस्य अयोगव्यवच्छेदश्चेत्, शेषिण्यतिव्याप्तिः । अन्ययोगव्यवच्छेदश्चेत्, असम्भव इति, तदुभयव्यावृत्त्यर्थम् 'परगतातिशयाधानेच्छया उपादेयत्वमेव यस्य स्वरूपम्' इत्युक्तम् । शेषभूतस्य स्वगतातिशयाधानमपि परगतातिशयाधानार्थम् इत्यर्थः । स्वेच्छा वा, परेच्छा वा, अन्येच्छा वा,न तत्र नियमः ; यथा सम्भवमेव । न हि । शेषभूतस्य व्रीह्यादेः, शेषिणो यागस्य च इच्छासम्भवः। तत्र अन्येच्छयैव हि उपादेयत्वम् । ततो यथोक्त एवार्थः । इदं (च) शेषित्वं पराभ्युपेतस्य कार्यस्य न सम्भवति ; फलोत्पत्तीच्छयैव उपादेयत्वात्, तस्याः शेषित्वमेव । **फलोत्पत्तीति** । (अनेन) उक्त (शेषशेषित्व) लक्षणस्य वैदिकोदाहरणं दर्शयति ।

अन्यत्सर्वम् - व्रीह्यादि । गर्भेति, लौकिकोदाहरणम् ।

एवम् ईश्वरेति, औपनिषदोदाहरणम् । **नित्यस्य अनित्यस्य च इति**, उभय-विभूतिरुच्यते

सर्वस्य वशी इति । (अनेन) 'ईश्वरस्य चिदचितोश्च शेषत्वं शेषित्वं च प्रामाणिकम्'

---

1. उपादान - घ. 2. फलोत्पत्तीच्छा -घ, फलप्राप्तीच्छा - घ. 3. एवं गर्भाधाना - ग,घ., गर्भदासा - घ. 4. उपादान - घ. 5. नित्यानित्यस्य च - घ. 6. शेषी - घ. 7. विश्वस्यात्मेश्वरम् - घ. 8. इत्युक्तम् - घ.

[प्राभाकरसंमतकार्यानुबन्ध्यर्थदूषणम्]

अपि च,

'स्वर्गकामो यजेत' (का.श्रौ.सू.4-3-47)

[1]इत्यादिषु[1] लकारवाच्यकर्तृविशेष [2]समर्पणपराणां स्वर्गकामादिपदानां नियोज्य-[3]विशेषसमर्पणपरत्वं [3] शब्दानुशासनविरुद्धं केन अवगम्यते?

साध्यस्वर्ग [4]विशिष्टस्य[4], स्वर्ग[5]साधने कर्तृत्वा[5]न्वयो न घटते - इति चेत्, नियोज्य[6]त्वान्वयोऽपि[6] न घटते [7]इति हि[7] ! स्वर्गसाधनत्वनिश्चयः । स तु शास्त्रसिद्धे कर्तृत्वान्वये, स्वर्गसाधनत्वनिश्चयः क्रियते । यथा - 'भोक्तुकामो देवदत्तगृहं गच्छेत्' इत्युक्ते, भोजनकामस्य देवदत्तगृहगमने कर्तृत्वश्रवणादेव, प्राक् अज्ञातमपि भोजनसाधनत्वं, देवदत्तगृहगमनस्य अवगम्यते ; एवम्, अत्राऽपि [8]भवति[8]। न क्रियान्तरं प्रति कर्तृतया श्रुतस्य, क्रियान्तरे कर्तृत्वकल्पनं युक्तम् । 'यजेत' [9]इति हि[9] यागकर्तृतया [10]श्रुतस्य[10], बुद्धौ कर्तृत्वकल्पनं क्रियते । [11]बुद्धेः[11] कर्तृत्व[12]कल्पनमेव[12] हि! नियोज्यत्वम् । यथोक्तम् -

---

इत्याह ।

अयमर्थः ----- शोभत इति । प्राभाकरोक्तार्थः निरूपकेषु न शोभते - इत्यर्थः ।

अपिचेत्यादि । (अनेन) कार्ये स्वकीयत्वबुद्धिमान् नियोज्यः । तत्साधने कर्मणि स्वकीय-सामान्यं प्रतिपन्नम् । 'स्वर्गकामा'दिपदैः नियोज्यविशेषः समर्प्यते - इति षष्ठाद्याधिकरणे प्राभाकरैः प्रपंचितं दूषयति । कर्तृवाचित्वं शब्दानुशासनसिद्धम्; न तु नियोज्यवाचित्वम् । अतः स्वर्गकामादि-पदान्यपि, न नियोज्यविशेष- समर्पणपराणि - इति दूषणशरीरम् । 'लकारवाच्यः ---- शासनविरुद्धम्' इत्यस्य अयमभिप्रायः - कर्तृवाचिनो लकारस्याऽपि, नियोज्यसमर्पणपरत्वं शब्दानुशासनविरुद्धम् - इति ।

साध्येति । 'न हि कामी, अकामसाधने नियोक्तुं शक्यते' इति न्यायात्, 'स्वर्गकामस्य अस्वर्गसाधने कर्तृत्वान्वयो न घटते' इतीयं पूर्वपक्षयुक्तिः, अगत्याशंकिता ।

नियोज्यत्वेति । स्वर्गकामस्य, अस्वर्गसाधने नियोज्यत्वान्वयोऽपि न सम्भवतीति,

---

1. इत्यादिलकार - घ, इत्येवमादिषु लकार - घ. 2. समर्पकाणां - घ. 3. समर्पकत्वं - घ. 4. विशिष्टस्यास्य - क,घ. विशेषस्य - घ. 5. साधनेन कर्तृत्वा - ग,घ. साधने कर्तृतया - घ. 6. तयान्वयोऽपि - घ. 7. इति - घ. 8. भवतीति - क,ग,घ. 9. इति - घ. 10. श्रुतस्य हि - ग. 11. बुद्धौ - ग,घ. 12. मेव - क.

'नियोज्यः स च कार्यं यः स्वकीयत्वेन बुद्ध्यते' (प्र.प. 2) इति ।

[1]यष्टृत्वानुगुणं [2]तद्बोद्धृत्वम्[2]- इति चेत्,

'देवदत्तः पचेत्' इति [3]पाक[3]कर्तृतया श्रुतस्य देवदत्तस्य पाकार्थगमनं पाकानुगुणमिति, गमने कर्तृत्वकल्पनं न युज्यते ।

[कर्मफलप्रदत्वेन परमात्मनः सिद्ध्या, अपूर्वस्यानुपयोगः]

किंच - लिङादिशब्दवाच्यं स्थायिरूपं किमिति अपूर्वमाश्रीयते ?

[4]स्वर्ग[4]कामपदसमभिव्याहारानुपपत्तेः - इति चेत्, का अत्र अनुपपत्तिः ?

सिषाधयिषितस्वर्गो हि स्वर्गकामः ;तस्य स्वर्गकामस्य कालान्तर-भाविस्वर्गसिद्धौ, क्षणभंगिनी यागादिक्रिया न समर्था - इति चेत्,

अनाघातवेदसिद्धान्तानाम् इयमनुपपत्तिः । [5]'सर्वैः कर्मभिः[5] आराधितः परमेश्वरो भगवान् नारायणः, तत्तदिष्टं फलं ददाति' इति वेदविदो वदन्ति । यथाऽऽहुः वेदविदग्रेसराः द्रमिडाचार्याः -

---

नियोज्यविशेषसमर्पणपरत्वमपि अयुक्तम्- (इति) तदुपपत्तये, स्वर्गसाधनत्वं कार्यस्य निश्चीयते चेत् ; कर्तृविशेषसमर्पकत्वोपपत्तये, स्वर्गसाधनत्वं निश्चीयताम् । नियोज्यत्वं कर्तृत्वं वा स्वर्गकामस्य, अस्वर्गसाधने नोपपद्यते । अतः उभयपक्षेऽपि, कार्यस्य स्वर्गसाधनत्व-निश्चयसापेक्षत्वम्, अविशिष्टम् । इयान् विशेषः कर्तुः लकारवाच्यत्वात्, स्वर्गकामादिपदानां कर्तृविशेषसमर्पणपरत्वं, शब्दानुशासनाविरुद्धम् नियोज्यस्य लकारवाच्यत्वाभावात् स्वर्गकामादिपदानां नियोज्यविशेषसमर्पणपरत्वम् शब्दानुशासनविरुद्धम् इत्यर्थः । एवमिति । स्वर्गकामस्य यागे कर्तृत्वश्रवणात्, प्राक् अज्ञातमपि यागस्य स्वर्गसाधनत्वम् अवगम्यते इत्यर्थः ।

किं चेति । पूर्वं ब्रह्मणः फलतया सिद्धिः, स्तावकत्वसिद्ध्यर्थं तत्सिद्धिश्चेत्युक्ते । अथ फलसाधनतया सिद्धिरुपपाद्यते ; अर्थात् कार्यस्य साधनतया सिद्धिश्च उपपाद्यते । न केवलं प्राधान्यासिद्धिः ; अपि तु साधनतया स्वरूपसिद्धिरपि, अनुपपन्नेत्यर्थः ।

सिषाधयिषित -------- न समर्था इति चेदिति । 'न हि कामी, अकामसाधने नियोक्तुं शक्यते' इति न्यायात्, सिषाधयिषितस्वर्गस्य विधीयमानं, तत्साधनमेव । तत्र कालान्तरभाविफलस्य, क्षणिकक्रियायाः साधनत्वायोगात्, अपूर्वक्लृप्तिः - इत्यर्थः ।

---

1. नियोगकर्तृ- घ. 2. तद्बोधत्वम् - घ, तद्बोधकत्वम् - घ, तद्बुद्धिकर्तृत्वम् -घ. 3. पाके - ग,घ. 4. पूर्वं स्वर्ग-घ.5. सर्वकर्मभिः - घ.

'फलसम्बिभन्त्सया कर्मभिरात्मानं पिप्रीषन्ति' ; *स प्रीतः, 'अलं [1]फलाय;* इति *[2]शास्त्र[2]मर्यादा'* (द्र.भा.) इति । फलसम्बन्धेच्छया, कर्मभिः - याग-दान-होमादिभिः, इन्द्रादिदेवतामुखेन तत्तदन्तर्यामिरूपेणावस्थितम्, इन्द्रादि-शब्दवाच्यं परमात्मानं भगवन्तं वासुदेवम्, [3]आरिराधयिषन्ति[3] ; स हि कर्मभिः आराधितः, तेषामिष्टानि फलानि प्रयच्छति - इत्यर्थः ।

[परमात्मनः कर्मफलप्रदातृतायाः श्रुतितः सिद्धिः]

तथा च श्रुतिः-

'इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः' (तै.ना.उ.11- 6) इति । 'इष्टापूर्तम्' इति, सकलश्रुति-स्मृतिचोदितं कर्म उच्यते । तत्, विश्वं, बिभर्ति-इन्द्राग्निवरुणादिसर्वदेवतासम्बन्धितया प्रतीयमानम्, तत्तदन्त-रात्मतया अवस्थितः परमपुरुषः, स्वयमेव बिभर्ति-स्वयमेव स्वीकरोति । भुवनस्यनाभिः-ब्रह्मक्षत्रादिसर्व [4]वर्णपूर्णस्य भुवनस्य[4] धारकः, तैस्तैः कर्मभि-राराधितः, [5]तदिष्ट[5]फलप्रदानेन भुवनानां धारक इति, 'नाभिः' [6]इत्युक्तः[6] ।

'अग्नि-वायुप्रभृतिदेवतान्तरात्मतया तत्तच्छब्दाभिधेयः, अयमेव' इत्याह -

---

भगवच्छब्दः, फलदानानुगुणज्ञानशक्त्यादिपौष्कल्यपरः । **नारायण शब्दः,** प्राप्तिपरः । **परमेश्वरशब्दः,** ईश्वरान्तरसापेक्षत्वव्यावृत्तिपरः । **इन्द्रादिदेवता मुखेन** इन्द्रादिशब्दवाच्यम् इत्यन्वयः । (अनेन) आत्मानम् इति पदं व्याचष्टे । परमात्मानम् इति, आत्मान्तरव्यावृत्त्यर्थम् । **भगवच्छब्दः** पूर्ववत् । **वासुदेवशब्दः** अन्तरात्मत्वे प्रमाणद्योतकः । *'सर्वत्रासौ समस्तं च'* (वि.पु. 1-2-12) इत्यादि ।

इष्टम् - श्रौतं कर्म । **पूर्तम्** - स्मार्तं कर्म । **इन्द्राग्नीति** । नानादेवताकत्वेन प्रतीयमानं कर्मजातम्, एकदेवताकम् इत्यर्थः । **नाभिरिति** । नाभिवत् नाभिः इति आधारत्वाभिप्रायेण । **तैस्तैरिति** । केन प्रकारेण धारकः ? इत्यत्र (उत्तरमिदम्) अपरिमितफलप्रदातृत्वमुखेन धारकत्वमित्यर्थः।

अग्निवायुविति । अग्न्यादिदेवताकत्वेन विधीयमानानाम् एकदेवताकत्वम्, तत्तदन्तरात्मभूतपरब्रह्माराधनरूपत्वात् इत्यर्थः । **यथोक्तमिति** । (इदम्) 'भुवनस्य नाभिः' इत्यनेन

---

1. अयं - घ. 2. फलशास्त्र - घ. 3. आराधयन्ति - घ. 4. वर्णपूर्णभुवनस्य, वर्णस्य भुवनस्य - घ. 5. तत्तदिष्ट - क,ग. 6. इत्युक्तम् - घ.

'तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः' (तै.ना. उ.1.7.) इति । यथोक्तं भगवता -

[उक्तस्यार्थस्य भगवद्वचनतः स्फुटीकरणम्]

'यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥' (भ.गी'7-21)
स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हि ; तान् ॥ (भ.गी. 7-22)

यां यां तनुम्-इन्द्रादिदेवताविशेषाः तत्तदन्तर्यामितयाऽवस्थितस्य भगवतः तनवः - शरीराणि, इत्यर्थः ।

'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' (भ.गी.9-24) इत्यादि । 'प्रभुरेव च' इति, सर्वफलानां प्रदाता च इत्यर्थः । यथा च,

'यज्ञैस्त्वमिज्यसे नित्यं सर्ववेदमयाऽच्युत' (वि.पु.5-20-65)
'यैस्स्वधर्मपरैर्नाथ ! नरैराराधितो भवान् ।
ते तरन्त्याखिलामेतां मायामात्मविमुक्तये ॥' (वि.पु. 5-30-16)

इति । सेतिहासपुराणेषु सर्वेष्वेव [1]वेदेषु [2]सर्वाणि [2] कर्माणि सर्वेश्वराराधन[3]रूपाणि [3], तैस्तैः कर्मभिः आराधितः पुरुषोत्तमः, तत्त [4]दिष्ट[4]फलं ददाति - इति तत्र तत्र प्रपंचितम् ।

तत्तदन्तरात्मभूतब्रह्माराधनरूपत्वात् इत्यर्थः । यथोक्तमिति । (इदम्) भुवनस्य नाभिः' इत्यनेन प्रतिपादितफलप्रदत्ववैशद्याय ; तदेवाग्निः' इत्यादिसामानाधिकरण्यस्य शरीरात्मभाव-निबन्धनत्ववैशद्याय च भगवद्वचनम् ।

यां यां तनुम् -----इत्यर्थः इति । (इदम्) अवतारशंकाव्यावृत्त्यर्थम् । शरीराणि इति । 'तनु' शब्दस्य अल्पार्थत्वव्यावृत्त्यर्थम् ।

अहमित्यादि, भोक्तृत्ववैशद्याय ।

---

1. च वेदेषु -क. 2. सर्वाण्यपि - घ. 3. भूतादि -घ. 4. दिष्टं - क,ग,घ.

[भगवत एव सर्वकर्मभोक्तृत्वं फलप्रदत्वं च]

एवमेव हि! [1]'सर्वज्ञं सर्वशक्ति[1] सर्वेश्वरं भगवन्तम्, इन्द्रादिदेवतान्तर्यामि-रूपेण यागदान-होमादिवेदोदितसर्वकर्मणां भोक्तारं, सर्वफलानां [2]प्रदातारं च[2], सर्वाः श्रुतयो वदन्ति-

'चतुर्होतारो यत्र सम्पदं गच्छन्ति देवैः' (तै.आर.11-3)

इत्याद्याः । चतुर्होतारः - यज्ञाः, यत्र - परमात्मनि देवेष्वन्त [3]र्यामितया[3]ऽवस्थिते देवैः सम्पदं गच्छन्ति-देवैः सम्बन्धं [4]गच्छन्ति [4] इत्यर्थः । अन्तर्यामि[5]रूपेण[5] अव[6]स्थितस्य[6]परमात्मनः शरीरतया अवस्थितानाम् इन्द्रा[7]दीनां[7] यागादि-सम्बन्धः- इत्युक्तं भवति । यथोक्तं भगवता -

'भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्' (भ.गी.5-29)

इति । तस्मात्, [8]'अग्न्यादि[8]देवतान्त[9]र्यामि[9]भूतपरमपुरुषाराधन[10]रूपाणि[10], [11]सर्वाणि कर्माणि[11]; स एव च अभिलषितप्रदायी[12]' इति, किमत्र अपूर्वेण व्युत्पत्तिपथ-दूरवर्तिना वाच्यतया अभ्यु[13]पगतेन कल्पितेन[13] वा प्रयोजनम् ?

सर्वज्ञपदेन आराधनप्रकारविशेष फलविशेषज्ञानवत्ता विवक्षिता । सर्वशक्तिमिति, तत्तत्फलदानशक्तिरभिप्रेता । सर्वेश्वरम् - सर्वशेषिणम् । अनेन प्राप्तिरुक्ता भवति । सम्पदं गच्छन्तीति । सम्पच्छब्दः प्राप्तिवाची । *'पद गतौ'* (पा.धा.1170) इति हि धातुः । सम्पच्छब्दस्य अवयवार्थः, अन्वयस्वारस्यानुगुणः रूढ्याश्रयेण व्याख्यातः । अन्तर्यामिरूपेणेति । देवानां कर्मभिः सम्बन्धः ; भगवच्छरीरत्वेन परतन्त्रतया । स्वातन्त्र्येण सम्बन्धः, परमात्मन एवेत्यर्थः ।

भोक्तारमित्यादि । स्वतन्त्रतया सम्बन्धे प्रमाणम् । तस्मादित्यादि । परमपुरुषस्यैव फलप्रदत्वात्, तस्य फलसाधनत्वं न कल्प्यम् । वाच्यपूर्ववादे तस्य वाच्यत्वमपि न कल्प्यम् ; व्युत्पत्ति सिद्धत्वाभावात् इत्यभिप्रायः । किं ---- प्रयोजनमिति । किमनुपपत्तिशमनं प्रयोजनम्? इत्यर्थः ।

---

1. सर्वशक्तिं सर्वज्ञं - क,ग. 2. च प्रदातारं - घ. 3. रूपेणा - क,ग. 4. गच्छन्ति यज्ञा - ग. 5. तया -घ. 6. स्थितपर -घ,स्थिते पर -घ. 7. दिदेवानां - घ. 8. इन्द्रादि - क,ग,घ. 9. रात्म -क,ग, घ. 10. भूतादि - ख. 11. कर्माणि- क,ग. 12. फलप्रदाता - क,ग. प्रदाता घ,प्रदः - घ. 13. गमेन कल्प्येन - घ, गतेन कल्प्येत - ग.

[लिङाद्यर्थविशदीकरणम्]

एवं च सति, लिङादेः कोऽयमर्थः परिगृहीतो भवति[1] ?

'*यज देवपूजायाम्*' (पा.धा. 1002)

इति देवताराधनभूतयागादेः प्रकृत्यर्थस्य, कर्तृव्यापारसाध्यता व्युत्पत्तिसिद्धा लिङादयः अभिदधतीति, न किंचिदनुपपन्नम् । कर्तृवाचिनां प्रत्ययानां, प्रकृत्यर्थस्य कर्तृव्यापारसम्बन्धप्रकारो हि वाच्यः, भूतवर्तमानतादि मन्ये वदन्ति, लिङादयस्तु कर्तृव्यापारसाध्यतां वदन्ति ।

अपि च, कामिनः कर्तव्यतया कर्म विधाय, कर्मणः देवताराधनरूपतां तद्द्वारेण[2] फलसिद्धिं च[3] तत्तत्कर्मविधिवाक्यान्येव वदन्ति -

'*वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति*' (तै.सं.2-1-1-1)

इत्यादीनि ।

कर्तृवाचिनामिति । कर्तृवाचिनः प्रत्ययाः, प्रकृत्यर्थस्य कर्तृव्यापारसम्बन्ध प्रकारम् अभिदधति । तत्र लट् वर्तमानतया तत्सम्बन्धम् । लिङादयः भूततया । लिङादयः कर्तृसाध्यतया सम्बन्धम् । एवमभिधानात्, लिङादयः प्रकृत्यर्थस्यैव कर्तृव्यापारसम्बन्धमभिदधति ; न तु प्रकृत्यर्थातिरिक्तस्य । यदिते अतिरिक्तस्य कर्तृव्यापारसाध्यतामभिदधति ; तर्हि लडादयोऽपि तदतिरिक्तस्य वर्तमानतादिकम् (अभिदध्युः न हि तथाऽस्ति) । एवम् उपनिषद्वाक्यैः सोपबृंहणैः, भगवत एव फलप्रदत्वात्, न अपूर्वक्लृप्तिः - इत्युक्तम् ।

अपिचेति । इदानीं, कर्मविधिवाक्यैरेव देवतानां फलप्रदत्वाभिधानात्, न अपूर्वक्लृप्तिः इत्याह (अनेन) । **कर्मविधिवाक्यान्येवेति** । *'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थत्वेन विधीनां स्युः'* (पू.मी.सू.1-2-7) इति न्यायात्, अर्थवादवाक्यस्याऽपि विधिशेषतया तदेकवाक्यत्वमभिप्रेत्य इदमुक्तम् । नात्रेति । कर्मणः देवताद्वारा फलप्रदत्वं श्रौतमिति, फलसाधनत्वं विध्याक्षेपसिद्धमिति वक्तुमयुक्तम् इत्यर्थः । **औपादानिकी** - उपादानप्रमाणसिद्धा । विध्याक्षेपसिद्धेत्यर्थः । अभिहितापर्यवसानम् - श्रुतार्थापत्तिः । (यथा) 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति । अभिधानापर्यवसानम् उपादानम् । इति तयोर्भेदः । **विध्यपेक्षितमित्यादि** । अर्थवादादेः

---

1. गृहीतः इति चेत् - क,ख,घ. 2. तद्द्वारा - क,ग,घ. 3. सम्भवं च - ग,घ.

[यागादेः फलसाधनत्वाचगमस्य, औपादानिकत्वशंकापरिहारौ]

नाऽत्र फलसिद्ध्यनुपपत्तिः [1]काऽपि[1] दृश्यते इति, फलसाधनत्वावगतिः औपादानिकी - इत्यपि न संगच्छते । विध्यपेक्षित यागादेः फल [2]साधनत्व[2]प्रकारं वाक्यशेष एव बोधयति - इत्यर्थः ।

'*तस्मात् ब्राह्मणाय नापगुरेत*' (तै.स.2-6-10-1)

इत्यत्र - अपगोरणनिषेध [3]विधिप[3]रवाक्य[4]शेषे श्रूयमाण, [4]निषेध्यस्य अपगोरणस्य शतयातनासाधनत्वं, निषेधविध्युपयोगि, - [5]इति हि[5] स्वीक्रियते । अत्र पुनः कामिनः कर्तव्यतया विहितस्य यागादेः, काम्यस्वर्गादिसाधनत्वप्रकारं वाक्य शेषावगतम् अनादृत्य, किमिति उपादानेन यागादेः फलसाधनत्वं [6]परिकल्प्यते[6]?

'हिरण्यनिधिम् अपवरके निधाय, याचते कोद्रवादि [7]लुब्धः[7] कृपण जनम्' इति श्रूयते ; तदेतत् युष्मासु दृश्यते ।

स्तुत्याद्यन्यपरत्वेन स्वार्थे तात्पर्याभावात्, कर्मणां देवताद्वारकं फलसाधनत्वं न सिध्यति इत्यत्र (उत्तरमिदम्) । अक्ताः शर्करा उपदधाति' इत्यादिषु, '*तेजो वै घृतम्*' इति वाक्यशेषाव-गतस्य विध्यपेक्षितस्य, स्वार्थे तात्पर्यमभ्युपगतम् - '*सन्दिग्धे तु वाक्यशेषात्*' (पू.मी.3-4-29) इति सूत्रेण ; प्रतिपन्नपरित्यागेन अप्रतिपन्नकल्पनायोगात् । एवमत्राऽपि, विध्यपेक्षितत्वेन देवता-स्वरूपे तात्पर्यमस्ति - इत्यभिप्रायः ।

अत्र पुनरित्यादि । विधेयविरोधिनः फलसाधनत्वम्, अर्थवादोक्तम्, विध्यपेक्षितत्वात् स्वीकृतम् । विधेयस्य फलसाधनत्वं विध्यपेक्षितं, ततोऽप्यन्तरंगतया अर्थवादोक्तं स्वीकार्यम् । तदनादृत्य, किमिति उपादानेन फलसाधनत्वक्लृप्तिः ? इत्यर्थः ।

हिरण्यनिधिमिति । (अनेन) लोकसिद्धभाषणानुस्मरणमुखेन परमुपालभते । '*हिरण्यनिधि निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुः*' (छा.उ.8-3-2) इति परमात्मनो हिरण्यनिधि-दृष्टान्तो हि श्रौतः । अत (इदमुक्तम्) । **कोद्रवः** - कोरदूषकनामा अयज्ञीयो धान्यविशेषः। केन वायुना द्रवति । पृषोदरादित्वात् पूर्वस्य ओत्वम् । कोद्रवः कोरदूषकः' इति अमरः। (शब्दकल्पद्रुमः)।

---

1. काचिदपि - क,ग,घ. 2. साधनत्वादि - घ. 3. विधि -घ. 4. शेषश्रूयमाणं निषे -घ., शेषश्रूयमाणनिषे - घ.5. इति - घ. 6. प्रकल्प्यते - ग, प्रकल्प्येत - क. 7. द्रव्यादिलब्ध -ग,घ, लिप्सुः-घ.

[चेतनस्य सुखदुःखादीनां परमपुरुषायत्तत्वम्, श्रुत्यादिसिद्धम्]

शतयातनासाधनत्वमपि, न अदृष्टद्वारेण । चोदि त्तान्यनुतिष्ठतः, विहित कर्म अकुर्वतः, निन्दितानि च कुर्वतः, सर्वाणि सुखानि दुःखानि च परमपुरुषानुग्रह - निग्रहाभ्यामेव भवन्ति ;

एष ह्येवानन्दयाति' (तै.उ.आन.7-1) ***'अथ सोऽभयं गतो भवति'*** (तै.उ.आन.7-2) ***'अथ तस्य भयं भवति'*** (तै.उ.आन.7-2) ***'भीषास्माद्वातः पवते । भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पंचम इति'*** (तै.उ.आन.8-1) ***'एतस्य वा अक्षरस्य प्रशासने गार्गि ! ददतो मनुष्याः, प्रशंसन्ति, यजमानं देवा दर्वीं पितरोऽन्वायात्ताः'*** (बृ.उ.5-8-8) **इत्याद्यनेकविधाः श्रुतयः [2] सन्ति । यथोक्तं द्रमिडभाष्ये -**

तस्याज्ञया धावति वायुः, नद्यः [3]स्रवन्ति,[3] तेन च कृतसीमानो जलाशयाः, [4]समदा इव मेषविसर्पितं [5]कुर्वन्ति' (द्र.भा.) **इति[8] ,**

'तत्संकल्पनिबन्धना हीमे लोकाः, न च्यवन्ते न स्फुटन्ते [6]स्वशासना[6]-ऽनुवर्तिनं ज्ञात्वा, कारुण्यात् [6]स भगवान्[6] वर्धयेत विद्वान् कर्मदक्षः' (द्र.भा.) **[7]इति च[7] ।**

[विहित - निषिद्धानुष्ठानयोः परमपुरुषनिग्रहानुग्रह द्वारा सुखदुःखादिहेतुत्वम्]

परमपुरुषयाथात्म्यज्ञानपूर्वकं तदुपासनादिविहितकर्मानुष्ठायिनः, तत्प्रसादात् तत्प्राप्तिपर्यन्तानि सुखानि, अभयं च यथाधिकारं भवन्ति ।

शतेति । अपगोरणस्य शतयातनासाधनत्वमपि, न कल्प्यापूर्वद्वारेण सम्भवति ; देवताद्वारकत्वश्रुतेः कल्पनायोगात् इत्यर्थः ।

ददतो --------- प्रशंसन्तीति । दानस्य प्रशस्यत्वं, भगवदाज्ञया - इत्यर्थः । **दर्वीमिति** । 'दर्वी'शब्दः पैतृककर्मोपलक्षणार्थः । **अन्वायत्ता** : - तत्प्रवणाः । पितृणां पैतृककर्मणा तृप्तिः, भगवदाज्ञया इत्यर्थः । **मेषविसर्पितम्** - उज्जृम्भणम्, जलोन्नतिः । **जलाशयाः** - समुद्राः कृतसीमान एव मेषविसर्पितं कुर्वन्ति ; न तु अतिलङ्घितसीमानः इत्यर्थः ।

---

1. तकर्माणि कुर्वतः - घ. 2. ह्यनेकश्रुतयः - घ. 3. प्रस्रवन्ति -घ, प्रवहन्ति -घ. 4. समुद्रा एव -घ, समुद्रा एव -घ, 5. कुर्वन्ति -घ. 6. शासना -ख. 7. स्वभावाच्च - घ. 8. इति -घ.

तज्ज्ञानपूर्वकं तदुपासनादि विहितं कर्म अकुर्वतः, निन्दितानि च कुर्वतः, तन्निग्रहादेव तदप्राप्तिपूर्वकापरिमितदुःखानि, भयं च भवन्ति । यथोक्तं भगवता -

'नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः' (भ.गी.3-8)

इत्यादिना कृत्स्नं कर्म, ज्ञानपूर्वकम् अनुष्ठेयं विधाय,

'मयि सर्वाणि कर्माणि संन्यस्य' (भ.गी.3-30)

इति सर्वस्य कर्मणः स्वाराधनताम्, आत्मना स्वनियाम्यतां च प्रतिपाद्य,

'ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥' (भ.गी.3-31)

'ये त्वेतदभ्यसूयन्तो नाऽनुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥' (भ.गी.3-32)

इति स्वाज्ञानुवर्तिनः प्रशस्य, विपरीतान् विनिन्द्य, पुनरपि स्वाज्ञानुपालनम् अकुर्वताम् आसुरप्रकृत्यन्तर्भावम् अभिधाय, अधमा गतिश्च उक्ता -

'तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥' (भ.गी.16-19)

'आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव[1] कौन्तेय ततो यान्त्यधमां गतिम् ॥' (भ.गी.16-20) इति,

'सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥' (भ.गी.18-56)

इति च स्वाज्ञानुवर्तिनां शाश्वतं पदं चोक्तम् ।

[कर्मकाण्डीयदेवताधिकरणतात्पर्यम् ऐक्यशास्त्रस्य वेदवित्संमतत्वं च]

'अश्रुतवेदान्तानां कर्मणि अश्रद्धा माभूत् ! इति, देवताधिकरणे अतिवादाः कृताः ; कर्ममात्रे यथा श्रद्धा स्यात् इति । 'सर्वम् एकशास्त्रम्' इति वेदवित्सिद्धान्तः[2] ।

अश्रुतेति । देवतायां प्रतिपाद्यमानायां, कर्मणि श्रद्धावैकल्यं स्यात् । तदनुत्पत्तये, कर्मणि श्रद्धाजननाय च अतिवादाः कृताः । अतो न तत्र तात्पर्यम् । देवतानिरपेक्षं कर्मैव,

---

1. अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि । मामप्राप्य च - घ. 2. वेदान्तविदां बोधायनटंकद्रमिडगुहदेवभारुचिप्रभृतीनां सिद्धान्तः - घ.

[परमात्मनः भोग्य-भोगोपकरण-भोगस्थानात्मकनित्यविभूतिमत्त्वम्]

तस्यैतस्य परस्य ब्रह्मणो नारायणस्य, अपरिच्छेद्यज्ञानानन्दामलत्वस्वरूपवत् ज्ञानशक्तिबलैश्वर्य [1]वीर्यतेजः[1] प्रभृत्यनवधिकातिशयासंख्येयकल्याण[2]गुणवत्[2] स्वसंकल्पप्रवर्त्यस्वेतरसमस्तचिदचिद्वस्तुजातवत्, स्वाभिमतस्वानुरूपैकरूप-[3]दिव्यरूप[3]-तदुचितनिरतिशयकल्याणविविधानन्तभूषण-स्वशक्तिसदृशा-परिमितानन्ताश्चर्यनानाविधायुधस्वाभिमत [4]स्वानुरूपस्वरूप [4]गुणविभव ऐश्वय[5]शीला [5]द्यनवधिकमहिममहिषी-स्वानुरूपकल्याणज्ञानक्रियादि अपरिमेय[6]गुणानन्त [6]परिजनपरिच्छद-स्वोचितनिखिलभोग्य-भोगोपकरणादि अनन्त[7]महाविभवा [7]वाङ्मनसगोचरस्वरूपस्वभाव-दिव्यस्थानादिनित्यता-निरवद्यतागोचराश्च सहस्रशः [8]श्रुतयः[8] सन्ति-

---

फलदानशक्तमिति श्रद्धातिशयजननमेव अभिप्रेतम् इत्यर्थः । (अतिवादाः - अन्यपरा उक्तयः) । **सर्वमिति** । ऐकशास्त्र्यं भगवद्बोधायनाद्यभिमतम् अंगीकृतम् । तत्र च विरुद्धार्थप्रतिपादने श्रुतिविरोधात्, तत् अनादरणीयं स्यात् । अविरोधे सम्भवति, विरुद्धार्थपरत्वेन व्याख्यानम्, अयुक्तमिति भावः । एवं सर्ववेदान्त्यभिमतः सिद्धार्थे व्युत्पत्त्यभावनिरासः कृतः ।

अथ - तैरपि अनभिमतां नित्यविभूतिं समर्थयते **तस्यैतस्येत्यादिना** । ब्रह्मस्वरूपसिद्धौ, तस्य नारायणत्वे प्रमाणं 'तस्य एतस्य' इति पदद्वयेन स्मारितम् । **स्वरूपशब्दः**, स्वरूपनिरूपकधर्मवाची । **अपरिच्छेद्येति**, स्वरूपमुक्तम् । **ज्ञानेति**, गुणा उक्ताः । **स्वसंकल्पेति**, विभूतिमत्त्वमुक्तम् । स्वरूप तद्गुण विभूतयः, दिव्यरूपादीनां प्रामाणिकत्वे दृष्टान्ततया उक्ताः। दिव्यविग्रहादयः साध्याः । **अनुरूपशब्दः**, अननुरूपेप्यभिमतिरस्तीति, तद्व्यावृत्त्यर्थम् । हेयप्रत्यनीकत्वं, कल्याणगुणास्पदत्वं (च) सर्वार्चस्थस्याप्यस्तीति **एकरूपत्वम्** । **तदुचितेत्यादि** भूषणविशेषणम् । **कल्याणत्वम्** -अप्राकृतत्वम् । **स्वशक्तिसदृशेत्यादि** आयुधविशेषणम् । **अनन्ताश्चर्यत्वम्** - अत्यन्तविस्मयनीयत्वम् ।

स्वाभिमतेत्यादि महिषीविशेषणम् । **स्वरूपरूपगुणेति** । रूप-तद्गुणेत्यर्थः । **ऐश्वर्यशीलशब्दौ** स्वरूपगुणप्रदर्शनार्थौ । स्वरूपस्य भगवदनुरूपत्वं, '*यथा सर्वगतो विष्णुः*' (वि.पु.1-8-17) इत्यवगम्यते । विग्रहस्य तदनुरूपत्वं, '*विष्णोर्देहानुरूपां वै*' (वि.पु.1-9-145) इति ज्ञायते । **महिमशब्दः** उत्कृष्टत्ववाची । महिषीशब्देन लक्ष्मीर्विवक्षिता । अन्यासामपि तच्छेषत्वेन

---

1. तेजः-घ. 2. गुणगणता - घ. 3. रूपं - घ. 4. रूपत्तघ. 5. लीला - ग. 6. विभवा -घ. 7. गतयश्च-घ. 8. श्रुतयश्च - घ.

[नित्यविभूतिदिव्यविग्रहादिविषयिण्यः श्रुतयः]

'वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसः परस्तात्' (तै.आर.पु.3-13-2)

'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः ----- तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी (छा.उ.1-6-6,7)

'स य एषोन्तर्हृदय आकाशः, तस्मिन्नयं पुरुषो मनोमयः, अमृतो हिरण्मयः (तै.उ.शी.6-1)

'मनोमयः' इति, मनसैव विशुद्धेन गृह्यते - इत्यर्थः ।

'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि' (तै.ना.उ.11-11)

विद्युद्वर्णात् पुरुषात् इत्यर्थः ।

'नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा' (तै.ना.उ.11-11)

मध्यस्थनील[1]तोयदा विद्यु[2]ल्लेखेव । सेयं दहरपुण्डरीकमध्यस्थाकाशवर्तिनी वह्निशिखा, स्वान्तर्निहितनीलतोयदाभपरमात्मस्वरूपा, स्वान्तर्निहित-नील[1]तोयदा विद्यु[2]दिव आभाति इत्यर्थः ।

'मनोमयः प्राणशरीरो [3]भारूपः[3] सत्यसंकल्पः आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः ' (छा.उ.3- 14-2)

सिद्धिः । **स्वानुरूपेत्यादि** परिजनपरिच्छदविशेषणम् । **क्रिया** - कैङ्कर्यम् । **परिजनाः** - शेषशेषाशनादयः । **परिच्छदाः** - कळाचिकाप्रभृतयः । **स्वोचितेत्यादि** परमपदविशेषणम् । **भोग्यशब्देन** स्रक्चन्दनादिः विवक्षितः । भोगोपकरणशब्देन स्रक्चन्दनादि विनियोगोपयोगिभाजनादयो विवक्षिताः । परिच्छेदशब्देन कळाचिकादिस्वरूपेण भोगोपकरण विवक्षितम् । **भोगोपकरण** शब्देन भोग्यवस्तुविनियोगसाधनपदार्थाः विवक्षिताः इति भिदा । **आदिशब्देन** दिव्योद्यानादि विवक्षितम् । **अवाङ्मनसगोचरम्** ; अपरिच्छेद्यत्वात् । **स्वभावशब्दः** जाज्वल्यमानत्वादिगुणपरः । **आदिशब्देन** तत्र तद्व्यापारादयोऽभिप्रेताः । **सहस्रशः श्रुतयः सन्तीति** । प्रत्यक्षश्रुतयः, उपबृंहणमूलभूताखिलश्रुतयश्च अभिप्रेताः ।

मनोमय इति मयट् प्रत्ययः प्राचुर्यार्थोऽयम् सम्बन्धपरो भवति । सम्बन्धश्च ग्राह्यग्राहकभावः । मनसा तु विशुद्धेन इत्यादि श्रुतेरित्यर्थः । **नीलतोयदमध्यस्था** इति समासो बहुव्रीहिः । पूर्वनिपातः छान्दसः (इत्यभिप्रायेण मध्यस्थनीलतोयदा इति व्याख्यानम्) ।

---

1. तोयदविद्यु - घ. 2. तोयदविद्यु - घ. 3. भारूपः सत्यकामः - ग.

[1]'माहारजनं [1] वासः' (बृ.उ.4-3-6) इत्याद्याः ।
'अस्येशाना जगतो विष्णुपत्नी' (तै.सं.4-4-12-14)
'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ' (तै.आर.पु.3-13-6)
'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' (सुबा.उ.6)
'क्षयन्तमस्य रजसः पराके' (तै.सं.2-2-12-18)
'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्' (तै.ना.उ.1-5)
'यो वेद निहितं गुहायां परमे व्योमन्' (तै.उ.आन.1-1)
'यो अस्याध्यक्षः परमे व्योमन्' (तै.ब्रा.2-8-9-6)
'तदेव भूतं तदुभव्यमा इदं तदक्षरे परमे व्योमन्' (तै.ना.उ.1-2)

इत्यादि श्रुतिशतनिश्चितः अयमर्थः ।

'तद्विष्णोः परमं पदम्' (सुबा.उ.6)

इति । [2]विष्णोः - परस्य[2] ब्रह्मणः, परमं पदं [3]सूरयः सदा पश्यन्ति[3] - इति वचनात् सर्वकालदर्शनवन्तः परिपूर्ण [4]ज्ञानाः केचन [4] सन्ति - इति [5]विज्ञायते[5] ।

['तद्विष्णोः परमं पदम्' इति श्रुतौ अनेकार्थविधानकृतवाक्यभेदशंकातत्परिहारौ]

'ये सूरयः, ते सदा पश्यन्ति' इति वचनव्यक्तिः ; 'ये सदा पश्यन्ति, ते सूरयः' इति वा ।

सेयमित्यादि । 'तस्य मध्ये वह्निशिखा' इत्यत्र 'तस्य' इति पदम्, सुषिरपरामर्शीत्यर्थः । **स्वान्त------ स्वरूपेति** । स्वरूपशब्दः विग्रहपरः । पूर्वपरामर्शात् नीलतोयदेत्यादिवाक्यस्य उक्त एवार्थ । महारजनं रागद्रव्यविशेषः । तेन रंजितम् - माहारजनम् । अस्येशाना इति पत्नीविषयं प्रमाणम् । तद्विष्णोः इति स्थान परिजनादौ प्रमाणम् । **क्षयन्तमिति** । *'क्षि-गति-निवासयोः'* (पा.धा.1408)। अनन्तरूपम् इति पदं दिव्यविग्रहपरम् । **तद्विष्णोः** इत्यादि स्थानविधिः, सूरिविधिः, सदादर्शनविधिश्चेत्यभिप्रायः ।

ये सूरयः इति, यच्छब्दान्वयः, वचनव्यक्तिकृतः । न अत्र उद्देश्यं किमप्यस्ति । सर्वार्थस्य अप्राप्तत्वात् । तस्मात् इयं वचनव्यक्तिः, न उद्देश्योपादेयविभागवती इत्यभिप्रायेण वचनव्यक्तिद्वयमुपात्तम् ।

---

1. तस्य माहारजनं - क, महारजतं - ख,ग. 2. परस्य - घ. 3. सदा पश्यन्ति सूरयः - घ. 4. ज्ञाताद्याः केचन - घ, ज्ञाः केचित् - घ. 5. ज्ञायते - ख.

उभयपक्षेऽपि अनेकविधानं न सम्भवति - इति चेत्,

[1]न ; अप्राप्त[1]त्वात् सर्वस्य, सर्वविशिष्टं [2]परमं स्थानं[2] विधीयते । यथोक्तम् - *'तद्गुणास्तु विधीयेरन्, अविभागाद्विधानार्थे, न चेदन्येन शिष्टाः'*

(पू.मी.सू.1-4-9) **इति । यथा**

'यदाग्नेयोऽष्टाकपालः' *(तै.सं.2-6-3-4)*

इत्यादिकर्मविधौ, कर्मणो गुणानां च अप्राप्तत्वेन, सर्वगुणविशिष्टं कर्म विधीयते; तथा - अत्राऽपि सूरिभिः सदा दृश्यत्वेन विष्णोः [3]परं स्थानम्[3] अप्राप्तं प्रतिपादयतीति, न कश्चिद्विरोधः ।

[मन्त्रार्थविषये वैदिकानामाशयः]

करणमन्त्राः क्रियमाणानुवादिनः, स्तोत्र-शस्त्ररूपाः, जपादिषु विनियुक्ताश्च,प्रकरणपठिताश्च अप्रकरणपठिताश्च, स्वार्थं सर्वं यथावस्थितमेव अप्राप्तम् [4]अविरुद्धं च ब्राह्मणवत् बोधयन्ति - इति हि वैदिकाः (प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं स्तोत्रम् ; अप्रगीतमन्त्रसाध्यगुणिनिष्ठ-गुणाभिधानं शस्त्रम् ।) विनियुक्तार्थप्रकाशिनां च देवतादिषु अप्राप्ताविरुद्ध-गुणविशेषप्रतिपादनं विनियोगानुगुणमेव ।

तद्गुणास्तु इति, विशिष्टविधौ जैमिनीयं सूत्रम् ।

करणमन्त्रा इति । ननु-विशिष्टविधिरस्तु ; तथाऽपि, मन्त्राणामनुष्ठेयार्थ-प्रकाशकत्वात्, *अत्र अन्यपरत्वेन*, स्वार्थे न तात्पर्यम् - इत्यत्र (उत्तरमिदम्) । होमादिसाधनतया विहितमन्त्राः ; न तु जप्यत्वेन विहिताः । क्रियमाणानुवादिनः - 'बर्हिर्देवसदनं दामि' इत्यादयः । **स्तोत्रम्** - गानविशिष्टमन्त्रोच्चारणम् । **शस्त्रम्**-गानरहितम् एक-श्रुतिरूपोच्चारणम् । जपादिषु इति 'आदि' शब्देन, अध्ययनं विवक्षितम् । जपः - उपांशूच्चारणम् । **अध्ययनम्** - उच्चैरुच्चारणम् । प्रकरणपठिताश्चाप्रकरणपठिताश्चेति । मोक्षप्रकरणानधीतत्वात् न परस्थानादौ तात्पर्यम् - इति चोद्यपरिहाराय (इदम्) उक्तम् । 'तद्विष्णोः' इत्यादिश्रुतिः मोक्षप्रकरणे पठिता च ; '*अण्डं भिनत्ति*' (सु.बा.11) इत्यादि प्रकरणे सुबालोपनिषदि अधीतत्वात् । **अप्राप्तमविरुद्धं चेति** । साधक बाधकप्रमाणरहितम् इत्यर्थः । **ब्राह्मणवत्** - विधिभागवत् (इदम्)

---

1. अप्राप्त - घ. 2. परमस्थानं - क,ग,घ. परस्थानं - घ. 3. परस्थानम्-घ, परमं स्थानम् - घ. परमस्थानम् - क,ग,घ. 4. अविरुद्धम् - क,ख,ग,घ.

['तद्विष्णोः' इति श्रुतेः मुक्ताविषयकत्वाशंकापरिहारौ]

न, इयं श्रुतिः मुक्तजनविषया ; तेषां सदा दर्शनानुपपत्तेः ।

नाऽपि मुक्तप्रवाहविषया ;

'सदा पश्यन्ति' (सुबा.उ.6)

इति [1]एकैककर्तृविषयतया [2]प्रतीतेः, श्रुति [2]भंगप्रसंगात् । मन्त्रार्थ [3]वादगता[3] ह्यर्थाः, कार्य[4]परत्वेऽपि[4] सिध्यन्ति-इत्युक्तम् । किं पुनः सिद्धवस्तुन्येव तात्पर्ये व्युत्पत्तिसिद्धे, इति सर्वमुपपन्नम् ।

['तद्विष्णोः' इति श्रुतेः अर्थान्तरपरत्वचोद्यं तत्परिहारश्च]

[5]ननु चात्र[5]-

'तद्विष्णोः परमं पदम्' (सुबा.उ.6) इति परस्वरूपमेव [6]'परमपद'[6] शब्देन अभिधीयते ;

'समस्तहेयरहितं विष्ण्वाख्यं परमं पदम्' (वि.पु.1-22-53)

इत्यादिषु अव्यतिरेकदर्शनात् ।

नैवम् ;

'क्षयन्तमस्य रजसः पराके' (तै.सं.2-2-12-18)

'तदक्षरे परमे व्योमन्' (तै.ना.उ.1-2)

'यो अस्याध्यक्षः परमे व्योमन्' (तै.ब्रा.2-8-9-6)

साधकान्तरसद्भावे, तदनुवादः स्यात् । बाधकसाधकाभावे, मन्त्राः स्वार्थप्रतिपादका एवेत्यर्थः । विनियुक्तेति । अनुष्ठेयार्थप्रकाशकत्वेऽपि, अनुष्ठेयं कर्म एवं विधदेवताकं भवतीति, कर्मविशेषण-भूतदेवताविशेषणस्थानपत्नीपरिजनादिप्रतिपादनम्, न विनियोगाननुगुणम् इत्यर्थः ।

नेति । नित्यविभूतिपरत्वस्थेम्ने मुक्तविषयत्वादिकमाशंक्य परिहरति (अनेन) ।

नापीति । एकैकं सदा दर्शनवन्तः अनेकेप्रतीता इति, श्रुतिभंगप्रसंगात्, प्रवाह विषयत्वमयुक्तम् इत्यर्थः ।

अव्यतिरेकदर्शनादिति । 'परमपद' शब्दवाच्यस्य भगवत्स्वरूपाव्यतिरेक- दर्शनात् इत्यर्थः ।

---

1. एककर्तृ - घ. 2. श्रुति - ख. 3. वादावगता - क,ग. 4. परत्वे - घ. 5. ननु च - घ. 6. परम - घ.

'यो वेदनिहितं गुहायां परमे व्योमन्' (तै.उ.आन.1-1) [1]इत्यादिषु परस्थानस्यैव [2]दर्शनात्[2], [3]'विष्णो[3]ः परमं पदम्' इति व्यतिरेकनिर्देशाच्च ।

'विष्णवाख्यं परमं पदम्' (वि.पु.1-22-53)

इति [4]विशेषणात्[4], 'अन्यदपि परमं पदम् विद्यते' इति, [5]तेनैव[5] ज्ञायते । तदिदं[6]परं स्थानं[6], सूरिभिः सदा दृश्यत्वेन प्रतिपाद्यते ।

[उक्तस्थले परमपदशब्दार्थविशदीकरणम्]

एतदुक्तं भवति - क्वचित् [7]परस्थानं[7] परमपद शब्देन प्रतिपाद्यते, [8]क्वचित्[8] प्रकृतिवियुक्तात्मस्वरूपम्, [9]क्वचित्[9] भगवत्स्वरूपम् ।

'तद्विष्णोः परमं [10]पदम्'[10] (सुबा.उ.6)

इति [11]परस्थानम्,[11].

'सर्गस्थित्यन्तकालेषु त्रिधैव सम्प्रवर्तते ।
गुणप्रवृत्त्या परमं पदं तस्यागुणं महत् ॥' (वि.पु.1-22-41)

इत्यत्र प्रकृतिवियुक्तात्मस्वरूपम् -

समस्तहेयरहितं विष्णवाख्यं परमं पदम् (वि.पु.1-22-53) इत्यत्र भगवत्स्वरूपम् । त्रीण्यपि एतानि, परम[12]प्राप्यत्वेन[12] 'परमपद'शब्देन प्रतिपाद्यन्ते ।

व्यतिरेकनिर्देशाच्चेति । विलक्षणस्थानस्य प्रमाणान्तरसिद्धत्वात्, अत्रापि 'विष्णोः' इति व्यतिरेकनिर्देशात्, 'परमपद' शब्दस्य च स्थानवाचिव्युत्पत्तिसम्भवाच्च इदं स्थानपरम् इत्यर्थः ।

विष्णवाख्यमिति । विशेषणानां व्यावर्तकत्वात्, 'विष्णवाख्यम्' इति विशेषणेन तद्व्यावृत्ततया अन्यस्यापि कस्यचित्, 'परमपद' शब्दवाच्यत्वं गम्यते इत्यर्थः ।

तदिदमिति । एकान्तिनः सदा ब्रह्मध्यायिनो योगिनो हि ये । तेषां तत् परमं स्थानं यद्वै पश्यन्ति सूरयः' । इति श्रीविष्णुपुराणवचनं स्मारितम् । परस्थानशब्देन अस्याः श्रुतेः स्थानपरत्वेन श्रीविष्णुपुराणे व्याख्यातत्वात्, इयं श्रुतिः स्थानपरा - इत्यभिप्रायः । 'स्थान' शब्दस्य स्वरसार्थविरोधाभावे हि अस्वरसं स्वरूपपरत्वं, न अंगीकार्यम् ।

एतदुक्तमित्यादि । भगवत्स्वरूपादन्यस्यापि 'परमपद' शब्दवाच्यत्वं दृष्टमिति, एतदेव विवक्षितमित्यर्थः । तद्विष्णोरिति । (अनेन) परमपदशब्दस्य अर्थत्रयवाचित्वेऽपि प्रयोगं दर्शयति ।

---

1. इत्यादिषु परम - क,ग. इत्यादिपर - घ. 2. प्रदर्शनात् - क,ग. निर्देशात्- घ. 3. तद्विष्णोः - क,ग. 4. निर्देशात् - घ. 5. च तेनैव - ग. च एतेनैव - ग. 6. परं स्थानं -ख, परमं स्थानं - क, ग,घ., परमस्थानं - घ. 7. परस्थानं च -ख, परमं स्थानं - क,ग,घ. 8. क्वचिच्च - घ. 9. क्वचिच्च - घ. 10. पदं सदापश्यन्ति सूरयः - क,ग. 11. परमं स्थानम् - क,ग. 12. प्रप्तत्वेन - ग.

[परमपदशब्दबोध्यार्थत्रयस्याऽपि प्राप्यतौचित्यम्]

कथं त्रयाणां परमप्राप्यत्वम् ? - इति चेत्,

भगवत्स्वरूपं, परमप्राप्यत्वादेव परमं पदम् ; इतरयोरपि, भगवत्प्राप्तिगर्भत्वादेव परमपदत्वम् । [1]सर्वकर्मविनिर्मुक्तात्मस्वरूपावाप्तिः भगवत्प्राप्तिगर्भा ;

'त इमे सत्याः कामाः अनृता [2]पिधानाः [2]' (छा.उ.8-3-1) 188

इति, भगवतो गुणगणस्य तिरोधायकत्वेन, अनृतशब्देन स्वकर्मणः प्रतिपादनात् ।

[अनृतशब्दस्य परमपदप्राप्तिविरोधिक्षेत्रज्ञकर्मवाचिता]

'अनृतरूपतिरोधानं क्षेत्रज्ञकर्म' - इति कथमवगम्यते ? - इति चेत्,

'अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते' (वि.पु.6-7-61) 214

'यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृपसर्वगा । 224

संसारतापानखिलानवाप्नोत्यतिसन्ततान् ॥' (वि.पु.6-7-62)

तया तिरोहितत्वाच्च ------ ' (वि.पु.6-7-63) 219

इत्यादिवचनात् । परस्थानप्राप्तिरपि [3]भगवत्प्राप्तिगर्भैव [3]-इति सुव्यक्तम् ।

[परमपदाख्यविष्णुस्थानस्य श्रुत्यन्तरात् सिद्धिः]

'क्षयन्तमस्य रजसः पराके' (तै.सं.2-2-12-18)

इति 'रजश्शब्देन, त्रिगुणात्मिका प्रकृतिः उच्यते ; केवलस्य रजसः

त्रीण्यपीति । एकावयवशक्त्या त्रिष्वपि मुख्यमित्यर्थः । **इतर ------ गर्भत्वात्**- भगवत्प्राप्तिसहितत्वादित्यर्थः । **सर्वकर्म ------- प्रतिपादनादिति** । तिरोधायकसर्वकर्मविनाशे हि आत्मप्राप्तिः । भगवद्गुणानामपि तिरोधायकं कर्मेति, तन्निवृत्तिपूर्वकात्मप्राप्तौ, भगवद्गुणतिरोधायकनिवृत्तेरपि सत्त्वात्, भगवत्प्राप्तिः सिध्यतीत्यर्थः । **सुव्यक्तमिति** । अर्चिरादिना स्थानविशेषप्राप्तिः, भगवत्प्राप्तिगर्भा इति स्पष्टमित्यर्थः ।

क्षयन्तमिति । *क्षि निवासगत्योः* (पा.धा.1408) इति धातुः । **पराके** - परस्तात् । **रजस इति** । अस्मिन् वाक्येऽपि निवासशब्दार्थोऽनुसन्धेयः इत्यर्थः ।

एकवाक्यत्वात् - एकार्थप्रतिपादकत्वात् ।

---

1. कर्मबन्ध - क,ग,घ. 2. भिधानाः -ख,ग. 3. भगवद्गर्भैव - घ.

अनवस्थानात् ; इमां त्रिगुणात्मिकां प्रकृतिम्, [1]अतिक्रम्य[1] स्थिते स्थाने, क्षयन्तम्-वसन्तम् इत्यर्थः। अनेन त्रिगुणात्मकात्, [2]क्षेत्रज्ञस्य भोग्यभूतात् वस्तुनः परस्तात्, विष्णोः वासस्थानम्-इति गम्यते ।

'वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसः परस्तात्'

(तै.आर.पु.3-13-2)

इत्यत्रापि, तमश्शब्देन सैव प्रकृतिः उच्यते ; [3]केवलस्य तमसः[3] अनवस्थानादेव । 'रजसः पराके क्षयन्तम्' इत्यनेन एकवाक्यत्वात्, 'तमसः परस्तात् वसन्तं, महान्तमादित्यवर्णं [4]पुरुषम्[4] अहं वेद' इत्ययमर्थः अवगम्यते ।

[अस्य परमपदस्य अक्षर परमव्योमादिशब्दाभिधेयता]

'सत्यं ज्ञानमनन्तं ब्रह्म, यो वेद निहितं गुहायां परमे व्योमन्'

(तै.उ.आन.1-1)

इति 'तत् स्थानम् [5]अविकाररूपं[5] परमव्योमशब्दाभिधेयम्' इति च गम्यते,

अक्षरे परमे व्योमन्' (तै.उ.आन.1-2)

[6]इति अस्य[6] स्थानस्य अक्षरत्वश्रवणात्, क्षररूपादित्यमण्डल [7]दयः न परमव्योमशब्दाभि [8]धेयाः[8] -

'यत्र पूर्वे साध्याः सन्ति देवाः' (तै.आ.पु.3-12-18)

'यत्रर्षयः प्रथमजा ये पुराणाः' (तै.सं.4-7-13-2)

इत्यादिषु च, 'त एव सूरयः' [9]इत्यवगम्यते[9] ।

'तद्विप्रासो [10]विपन्यवो[10] जागृवांसस्समिन्धते, विष्णोर्यत्परमं पदम्' (सुबा.उ.6) इत्यत्रापि, विप्रासः- मेधाविनः, [11]विपन्यवः[11] - स्तुतिशीलाः,

---

यत्रेति । अत्र यच्छब्दः, परमपदपरामर्शी । तद्धि 'नाक'शब्देन प्रकृतम् । *'नास्मा अकं भवति'* (तै.सं.5-3-31) इति हि श्रुतिः । अतः नाकशब्दः परमपदे एव मुख्यार्थः । प्रथमजाः-पूर्वमेव सन्तः ।

मेधाविन इति । अथर्वणे 'विष्णुक्रान्तं वासुदेवं विजानन् विप्रो विप्रत्वं गच्छते तत्त्वदर्शी' इति वचनात् । स्तुतिशीला इति । *'पन, पण - स्तुति व्यवहारयोः'* (पा.धा.439,440) इति

---

1. अक्रम्य - घ. 2. क्षेत्रज्ञभोग्य - घ. 3. केवलतमसः - घ. 4. तं पुरुषं - घ. 5. अव्यक्त - घ. 6. इत्य - घ. 7. दीनां घ. 8. धेयत्वम् -घ. 9. इति गम्यते - ख. 10. विपण्यवो - ग. 11. विपण्यवः - ग.

जागृवांसः - अस्खलित [1]ज्ञानाः[1], त एव अस्खलितज्ञानाः, तत् विष्णोः परमं पदं सदा स्तुवन्तः समिन्धते - इत्यर्थः ।

एतेषां परिजनस्थानादीनां,

'सदेव सोम्येदमग्र आसीत्' (छा.उ.6-2-1)

इत्यत्र ज्ञान[2]बलैश्वर्यादि [2]कल्याण [3]गुणगणवत् [3], परब्रह्मस्वरूपान्त [4]र्भूत[4]त्वात्

'सदेव---------एकमेवाद्वितीयम्' (छा.उ.6-2-1)

इति ब्रह्मान्तर्भावः[5] अवगम्यते ; एषामपि कल्याणगुणैकदेश [6]त्वादेव[6] ।

[हेयप्रत्यनीककल्याणगुणादीनां श्रुत्यादितो लाभः]

'सदेव सोम्येदमग्र आसीत्' (छा.उ.6-2-1)

इत्यत्र 'इदम्' इति शब्दस्य, कर्मवश्यभोक्तृवर्गमिश्रतद्भोग्यभूतप्रपंच-विषय[7]त्वाच्च[7];

'सदा पश्यन्ति सूरयः' (सुबा.उ.6)

इति सदादर्शित्वेन च तेषां कर्मवश्यानन्तर्भावात्,' *अपहतपाप्मा'* (छा.उ.8-1-5) इत्यादि, *'अपिपासः'* (छा.उ.8-1-5) इत्यन्तेन, [8]स्वलीलोप[8]करणभूत-[9]त्रिगुणात्मक-प्रकृतिप्राकृत [9]प्रकृत-तत्संसृष्टपुरुषगतं हेयस्वभावं सर्वं प्रतिषिध्य, *सत्यकामः'* (छा.उ.8-5) [10]इत्यनेन[10], स्वभोग्य-भोगोपकरणजातस्य सर्वस्य, [11]नि-त्यता[11] प्रतिपादिता । सत्याः कामाः यस्य,असौ सत्यकामः, काम्यन्त इति कामाः । तेन [12]परेणब्रह्मणा[12] स्वभोग्य-तदुपकरणादयः स्वाभिमताः

धातुः । *'महिमानं पनायत'* (तै.सं.4-6-28) इति श्रुतिप्रयोगः स्पष्टः ।

एतेषामित्यादि । 'सदेव' एकमेवाद्वितीयम्' इत्यादिशब्दैः नित्यविभूति विशिष्टं ब्रह्मैवावगम्यते इत्यर्थः । कल्याणगुणैकदेशत्वात् - अप्राकृत- विशेषणैकदेशत्वात् । 'गुण' शब्दो विशेषणवाची । ज्ञानादेरपि हि , द्रव्यत्वे सत्यऽपि गुणत्वम्, नित्यविशेषणत्वादेव । नित्यविभूतिरपि तथा इत्यर्थः । प्राकृतो हि प्रपंच इति तद्व्यावृत्तिः ।

अन्यस्येति । सत्यत्वं द्विविधम् । प्रमाणसम्बन्धार्हत्वम्, अविकारित्वं च । यत् सत्यत्वं प्रपंचस्य नास्ति ; तत् अत्राभिप्रेतम् इत्यर्थः ।

---

1. विज्ञानाः - क,ग,घ. 2. बलैश्वर्य - घ. 3. गुणगणस्येव -घ, गुणवत् - घ. 4. गर्त - क,ग,घ. 5. त्मभावः - घ. 6. त्वात् - घ. 7. त्वात् -घ. 8. सर्वलीलो - ग,घ, सलीलो - घ. 9. गुणात्मक - क, ग,घ. 10. इत्यन्तेन - घ. 11. सत्यता - क,ग,घ. 12. परब्रह्मणा - क,ग.

[1]ये[1] काम्यन्ते , ते सत्याः-नित्याः इत्यर्थः । अन्यस्य लीलोपकरणस्याऽपि वस्तुनः प्रमाणसम्बन्धयोग्यत्वे सत्यपि, विकारास्पदत्वेन अस्थिरत्वात्, तद्विपरीत स्थिरत्वम्, एणा सत्यपदेनोच्यते ।

'सत्यसंकल्पः' (छा.उ.8-1-5) इति, एतेषु भोग्य-तदुपकरणादिषु नित्येषु निरतिशयेषु अनन्तेषु सत्स्वपि, अपूर्वाणाम् अपरिमितानाम् अर्थानामपि, संकल्पमात्रेण सिद्धिं वदति ।

एणां च भोगोपकरणानां लीलोपकरणानां चेतनानामचेतनानां स्थिराणामस्थिराणां च, तत्संकल्पायत्तस्वरूपस्थितिप्रवृत्ति [2]भेदादि[2] सर्वं वदति, *'सत्यसंकल्पः'* (छा.उ.8-1-5) इति ।

[उक्तार्थानां वेदोपबृंहणतो लाभः]

इतिहासपुराणयोः वेदोपबृंहणयोश्च, अयमर्थ [3]उच्यते[3] -

'तौ तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ ।
वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ॥' (वा.रा.बा.4-6)

इति वेदोपबृंहण [4]तया प्रारब्धे[4] [5]श्रीरामायणे[5] -

'व्यक्तमेष महायोगी परमात्मा सनातनः ।
अनादिमध्यनिधनो महतः परमो महान् ॥' (वा.रा.यु.114-14)

'तमसः परमो धाता शङ्खचक्रगदाधरः ।
श्रीवत्सवक्षा नित्यश्रीर [6]जय्यः[6] शाश्वतो ध्रुवः ॥' (वा.रा.यु.114-15)

'शरा नानाविधाश्चापि धनुरायत विग्रहम् ।
अन्वगच्छन्त काकुत्स्थ सर्वे पुरुषविग्रहाः ॥' (उ.रा.109-7)

प्रपंचे, अचेतनाः - प्राकृतपदार्थाः । प्रपंचे, चेतनाः - बद्धाः । नित्यविभूतौ, अचेतनम् - शुद्धसत्त्वम् । नित्यविभूतौ, चेतनाः - नित्याः, मुक्ताश्च । प्रपंचे, स्थिरः - चिदंशः। प्रपंचे, अस्थिरः - अचिदंशः । नित्यविभूतावपि अस्थिराः - लीलाव्यापारादयः । अन्यत् सर्वं स्थिरम् । भेदादि इति 'आदि' शब्देन, तत्तत्पदार्थधर्माणामपि तत्संकल्पायत्तत्वं विवक्षितम् ।

तौ तु इति । काव्यत्वकंचुकितो हि वेदार्थः, तत्र प्रतिपादितः ; सर्वजनबुद्ध्यारोहणाय। यथोक्तं महाभारते - 'बिभेति गहनाच्छास्त्रात् नरस्तीव्रादिवौषधात् । भारतः शास्त्रसारोग्यम् अतः

---

1. ये च - घ. 2. भोगफदादि - घ. 3. अभ्युपगम्यते - घ. 4. पार्थाय आरब्धे - घ. 5. श्रीमद्रामायणे - ग,घ. 6. नेयः - ग.

'विवेश वैष्णवं [1]धाम[1] सशरीरसहानुगः ।' (उ.रा.110-12)

[2]श्रीमति वैष्णवे [2] पुराणे -

'समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ।
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥' (वि.पु.6-7-70)

'मूर्तं ब्रह्म महाभाग सर्वब्रह्ममयो हरिः ॥' (वि.पु.1-22-63)

'नित्यैवेषा जगन्माता विष्णोः श्रीरनपायिनी ।
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ॥' (वि.पु.1-8-17)

'देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ।
विष्णो [3]र्देहानु[3]रूपां वै करोत्येषाऽऽत्मनस्तनुम् ॥' (वि.पु.1-10-145)

'एकान्तिनस्सदा ब्रह्मध्यायिनो योगिनो हि ये ।
तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः ॥' (वि.पु.1-6-38)

'कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः' (वि.पु.4-1-38)

महाभारते च -

'दिव्यं स्थानमजरं चाप्रमेयं दुर्विज्ञेयं चागमैर्गम्य[4]मद्य[4] ।
गच्छ प्रभो रक्ष चास्मान् प्रपन्नान् कल्पे कल्पे जायमानः स्वमूर्त्या ॥'
(म.भा.मौ.5-27)

'कालः सम्पच्यते तत्र न कालस्तत्र वै प्रभुः (म.भा.शां.191-9)

[भगवद्दिव्यमंगलविग्रहादेः शारीरकसूत्रादितो लाभः]

परस्य ब्रह्मणः, रूपवत्त्वं सूत्रकारश्च वदति -

काव्यात्मना कृतः' इति । अनादिमध्यनिधन इति, स्वरूपस्य नित्यत्वम् । **शाश्वत** इति, गुण-विशिष्टाकारेण नित्यत्वम् । ध्रुव इति, विग्रह - विभूतिविशिष्टाकारेण नित्यत्वम् । **नित्यश्रीः** इति, पत्नीविधिः । **मूर्तमिति** । मूर्तं ब्रह्म यस्यास्ति सः हरिः । **सर्वब्रह्ममयश्चेति** । 'ब्रह्म' शब्दः जीवपरः। शुद्धजीवस्वरूपं च तच्छेषम् इत्यर्थः ।

नित्यैवेषेति श्रीपत्न्यां प्रमाणम् । **एकान्तिन** इति, परस्थाने वचनम् । **कलामुहूर्तादि** (इत्यनेन) तस्य नित्यत्वमाह ।

योऽसाविति । अनेन ('अन्तः' इति सूत्रीय) विषयवाक्यार्थपुरस्सरं तदर्थमाह । **'य**

---

1. तेजः - ग. 2. श्रीमद्वैष्णवे - क,ख,ग. 3. रेवा - ग. 4. माद्यम् - क,ग,घ.

'अन्तस्तद्धर्मोपदेशात्' (ब्र.सू.1-1-21)

इति । योऽसौ आदित्यमण्डलान्तर्वर्ती तप्तकार्तस्वरगिरिवरप्रभः, सहस्रांशुशतसहस्र-किरणः, गम्भीराम्भस्समुद्भू [1]सुमृष्ट[1]नालरवि-करविकसितपुण्डरीकदलामलायतेयक्षणः, सुभ्रूललाटः [2]सुनासः[2] सुस्मिताधरविद्रुमः, सुरुचिरकोमलगण्डः, कम्बुग्रीयः, समुन्नतांस [3]-विलम्बिचारु-रूपदिव्य [3]-कर्णकिसलयः, पीनवृत्तायतभुजः,चारुतराताम्रकरतलानुरक्तांगुलीभिरलंकृतः, तनुमध्यः, विशालवक्षस्स्थलः, समविभक्त-सर्वांगः, अनिर्देश्यदिव्यरूपसंहननः, स्निग्धवर्णः, प्रबुद्धपुण्डरीकचारु-चरणयुगलः, स्वानुरूप-पीताम्बरधरः, अमलकिरीटकुण्डलहारकौस्तुभकेयूरकटकनूपुरोदरबन्धनाद्यपरिमिताश्चर्यानन्तदिव्यभूषणः शंखचक्रगदासिशार्ङ्ग श्रीवत्सवनमालालंकृतः अनवधिकातिशय-सौन्दर्याहृता-शेषमनोवृत्तिः, लावण्यामृतपूरिताशेषचराचरभूतजातः, अत्यद्भुताचिन्त्यनित्ययौवनः, पुष्पहाससुकुमारः, पुण्यगन्धवासितानन्तदिगन्तरालः, त्रैलोक्याक्रमण-वृत्तगम्भीरभावः, करुणानुरागमधुरलोचनावलोकिताश्रितवर्गः पुरुषवरो [4]दृश्यते[4] ; [5]सः[5] निखिलजगदुदय-विभवलयलीलः, निरस्तसमस्तहेयः, समस्तकल्याण-गुणनिधिः ; स्वेतरसमस्तवस्तुविलक्षणः, परमात्मा [6]परं ब्रह्म[6] नारायणः इत्यवगम्यते ; तद्धर्मोपदेशात् -

---

एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' इत्यत्र आदित्यशब्दः, मण्डलवाची ; 'य एष एतस्मिन् मण्डले -------पुरुषः' इति बृहदारण्यके, तैत्तिरीयके च श्रवणात् इत्यभिप्रायेण आदित्यमण्डलान्तर्वर्ती इत्युक्तम् । (आवश्यकमधिकं तात्पर्यदीपिकायाम्) । **कर्णकिसलयः** कर्णपाशः । **रूपसंहनन** नाम सर्वांगानां संश्लेषौचित्यम् । अभिरूपविरूपाणामंगानां हि संश्लेषो नोचितः । सर्वांगानामपि अभिरूपत्वात्, अन्योन्यसंश्लेषः सदृशः इति संहननशब्दार्थः । अमलशब्देन अप्राकृतत्वं विवक्षितम् । **सौन्दर्यम्** अवयवशोभा । **लावण्यम्** - समुदायशोभा । नित्ययौवन इति । युवा - कुमारः, *'यः पूर्व्याय वेधसे नवीयसे'* (तै.ब्रा.2-4-29) इति श्रुतिः । ('पुरुषो दृश्यते' इत्यन्तेन) ' य एषोऽन्तरादित्ये' इति वाक्यस्यार्थ उक्तः । निखिलजगत् इति पदेन, आनन्दवल्ल्युक्तजगत्कारणत्वं विवक्षितम् । 'यश्चासावादित्ये' इति तत्र

---

1. सुमृष्टतर - घ. 2. सुनयनः - घ. 3. विलम्बितालकभारः - घ. 4. दरीदृश्यते - क, ग. 5. स च - क, ग. 6. परब्रह्म - क,ग.

'स एष सर्वेषां लोकाना[1]मीशः[1] सर्वेषां कामानाम्'

'स एष सर्वेभ्यः पाप्मभ्य उदितः' (छां.उ.1-6-7)

इत्यादिदर्शनात् । तस्यैते गुणाः -

'सर्वस्य वशी, सर्वस्येशानः' (बृ.उ.6-4-22)

'अपहतपाप्मा विजरः' (छा.उ.8-1-5)

इत्यादि, *'सत्यसंकल्पः'* (छा उ.8-1-5) इत्यन्तम्,

'विश्वतः परमं नित्यं विश्वं नारायणं हरिम्' (तै.ना.उ.11-2)

'पतिं विश्वस्यात्मेश्वरम्' (तै.ना.उ.11-3)

इत्यादिवाक्यप्रतिपादिताः ।

[भगवद्दिव्यमंगलविग्रहादेः वाक्यकार-भाष्यकारसंमतत्वम्]

वाक्यकारश्च, एतत् [2]सुस्पष्टमाह[2]-

'हिरण्मयः पुरुषो दृश्यते - इति प्राज्ञस्सर्वान्तरस्यात् , लोककामेशोपदेशात्

'तथोदयात् पाप्मनाम्' (ब्र.न.वा.)

इत्यादिना । तस्य च रूपस्य अनित्यतादि, वाक्यकारेणैव प्रतिषिद्धम् -

[3]*'स्याद्रूपं*[3] *कृतकमनुग्रहार्थम् ; [4]तच्चेतसा[4]मैश्वर्यात्'* (ब्र.न.वा.)

इति, 'उपासितुरनुग्रहार्थः परमपुरुषस्य रूपसंग्रहः' इति पूर्वपक्षं कृत्वा,

---

हि जगत्कारणस्य आदित्यान्तर्वर्तित्वमुक्तम् । निरस्तेति, 'सर्वेभ्यः पाप्मभ्य उदितः' इत्यस्यार्थो विवक्षितः । हेय-प्रतिभटत्वात्, कल्याणगुणवत्वाच्च 'स्वेतरसमस्तवस्तुविलक्षणः परमात्म परब्रह्म नारायण' शब्दाः सामान्यविशेषशब्दाः । एवं ('अन्तस्तद्धर्मोपदेशात्' इति) सूत्रस्य (अन्तः इति) प्रतिज्ञाखण्डो व्याख्यातः । **स एषः** (इत्यादिना) 'तद्धर्मोपदेशात्' इत्येतद्व्याचष्टे । **तस्यैत** इति । 'तस्यैते गुणाः ------ इत्यादिवाक्यप्रतिपादिताः' इत्यन्वयः ।

प्राज्ञशब्देन 'ब्रह्मणा विपश्चिता' इत्युक्तं विपश्चित्वमुक्तम् । **सर्वान्तरशब्देन** 'अन्योऽन्तर आत्माऽऽनन्दमयः' इत्युक्तार्थो विवक्षितः । **लोक-कामेशोपदेशात्** - लोक-कामेशत्वोपदेशात् । **तथोदयात् पाप्मनाम्** इति । 'स एष सर्वेभ्यः पाप्मभ्य उदितः' इत्युक्तात् इत्यर्थः एवम् आदित्यान्तर्वर्तिनः रूपवत्त्वात् जीवत्वमाशंक्य, रूपस्य अप्राकृतत्वात्, परमात्मत्वं सिद्धान्तितम् ; 'अन्तः' इत्यादिसूत्रे वाक्यकारग्रन्थे । **तस्य चेति**, रूपस्य अनित्यत्व

---

1. मीष्ठे - क,ग. 2. सर्वमाह -क,ग. 3. स्यात्तद्रूपं - ग,घ. 4. तच्चेतनाना - ग,घ.

'रूपं वाऽतीन्द्रियम् अन्तःकरण [1]प्रत्यक्षनिर्देशात्' [1] (ब्र.नं.वा.)

इति । यथा-[2]ज्ञाना[2]दयः, परस्य ब्रह्मणः स्वरूपतया निर्देशात्, स्वरूप [3]भूताः गुणा[3]: ; तथा - इदमपि रूपं, श्रुत्या स्वरूपतया निर्देशात्, स्वरूपभूतम् - इत्यर्थः।

भाष्यकारेण एतद्व्याख्यातम् -

'अंजसैव विश्वसृजो रूपम् ; तत्तु न चक्षुषा ग्राह्यम्, मनसात्वकलुषेण साधनान्तरवता गृह्यते ; 'न चक्षुषा गृह्यते नाऽपि वाचा, मनसा तु विशुद्धेन' इति श्रुतेः ; न ह्यरूपायाः देवतायाः रूपमुपदिश्यते, यथाभूतवादि हि ! शास्त्रम्, [4]'माहारजनं वासः[4]' 'वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णं तमसः परस्तात्' इति प्रकरणान्तरनिर्देशाच्च साक्षिणः' (द्र.भा.) इत्यादिना,

'हिरण्मयः' इति रूपसामान्यात् ; चन्द्रमुख[5]वत्[5] (ब्र.नं.वा.)

'न मयट् अत्र विकारमादाय प्रयुज्यते अनारभ्यत्वात् आत्मनः'(द्र.भा)

[6]इति[6] ।

यथा, - ज्ञानादिकल्याणगुणानन्त्यनिर्देशत्, 'अपरिमित-कल्याण [7]गुण[7]-विशिष्टं [8]परं ब्रह्म[8] इत्यवगम्यते ; एवम् 'आदित्यवर्णम्' 'पुरुषम्' इत्यादि-निर्देशात्, 'स्वाभिमत- स्वानुरूपकल्याणतमरूपः, परब्रह्मभूतः पुरुषोत्तमो नारायणः' - इति ज्ञायते ।

प्राकृतत्वशंकाव्यावृत्त्यर्थम् । स्यादूपमित्यादि । पूर्वपक्षवाक्यमिदम् । तच्चेतसाम् - उपासकानाम्, अनुग्रहार्थम्, ऐश्वर्यात् - स्वतन्त्रशक्त्या, रूपं कृतकं स्यात् इत्यर्थः ।

रूपं वा इत्यादि सिद्धान्तवाक्यम् । स्वरूपतया स्वरूपनिरूपकधर्मतया स्वाभाविकत्वेनेत्यर्थः।

भाष्यकारेण - द्रमिडाचार्यैः इत्यर्थः । अंजसा - अव्यवधानेन, स्वाभाविकमित्यर्थः। तत्त्विति । मिथ्याभूतं दुष्टेन्द्रियग्राह्यम् । अदुष्टकरणग्राह्यत्वश्रवणात्, परमार्थभूतम् इत्यभिप्रायः। वेदाहमेतमिति । 'आदित्यवर्णं इति पदे तात्पर्यम् ।

इत्यादिनेति । भाष्यकारेण व्याख्यातम् इत्यन्वयः ।

हिरण्मय इतीति । ('हिरण्यस्यविकारः - हिरण्मयः') इति विकारवाचिशब्द श्रवणात्,

---

1. प्रत्यक्षं तन्निर्देशात् - क,ग,घ. 2. ज्ञानानन्दा - घ. 3. भूतगुणाः - क,ग. 4. माहारजतं - पा. महारजतं - क,ख. 5. वदिति - घ. 6. इत्यन्तेन - क. 7. गुणगण - घ. 8. ब्रह्म - घ.

[भगवतः पत्नी-परिजनादेः श्रौतत्वम्, द्रमिडभाष्यसंमतिश्च]

तथा -

'अस्येशाना[1]' (तै.सं.4-4-12-14)

'ह्रीश्च ते [2]लक्ष्मीश्च पत्न्यौ'[2] (तै.आर.पु. 3-13-6)

'सदा पश्यन्ति सूरयः' (सुबा.उ.6)

'तमसः परस्तात्' (तै.आर.पु'3-13-2)

'क्षयन्तमस्य रजसः पराके' (तै.सं.2-2-12-18)

[3]इत्यादिना[3], पत्नीपरिजनस्थानादीनां निर्देशादेव, [4]तथैव सन्ती[4]त्यवगम्यते ।

[5]यथाह भाष्यकारः[5] -

'यथाभूतवादि हि ! शास्त्रम्' (द्र.भा.)

इति ।

एतदुक्तं भवति - यथा,

सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ.आन.1-1)

इति निर्देशात्, परमात्मस्वरूपं समस्तहेयप्रत्यनी[6]कानवधिकानन्दैकतान[6]तया, अपरिच्छेद्यतया च सकलेतरविलक्षणम् ; तथा,

---

कृतकं रूपम् - इति शंकाव्यावृत्त्यर्थं वाक्यम् । रूपम् - औज्वल्यम् ।

न मयडत्र इति तस्य (वाक्यस्य) भाष्यग्रन्थमाह । विकारमादाय - विकारार्थमंगीकृत्य । अनारभ्यत्वात् - विग्रहविशिष्टस्यात्मनः अनारभ्यत्वात् इत्यर्थः।

कल्याणतमरूपः इत्यनेन, 'तत्ते कल्याणतमं रूपं पश्यामि' इति श्रुतिः स्मारिता । 'आदित्यवर्णम्' इति श्रुतिः पुरुषविषया । अतः 'पुरुषोत्तम' शब्दः । 'स एव ब्रह्म' इति दर्शयितुं परब्रह्म शब्दः । यथा ज्ञानादिकल्याणगुणाः प्रामाणिकत्वात् अभ्युपगम्यन्ते ; तथा रूपमपि प्रामाणिकत्वात् अंगीकार्यम् - इत्यर्थः । तथेति । एवं वाक्यकार-भाष्यकारग्रन्थयोः दिव्यरूपसमर्थनं, पत्नीः परिजनादेरपि प्रदर्शनार्थम् ; तुल्यन्यायत्वात् इत्यभिप्रायः ।

एतदुक्तं भवतीति । प्रमाणसिद्ध त्वात्, ब्रह्मणः स्वरूपमभ्युपगम्यते ; सर्वज्ञत्व-सर्वशक्तित्व विश्वावभासकत्वादिसद्गुणाश्च अवगन्तव्याः ; प्रामाणिकत्वाविशेषात्, तथा रूपपरिजनादीन्यपि इत्यर्थः ।

---

1. शाना जगतो विष्णुपत्नी - ग. 2. लक्ष्मीश्च - ख. 3. इत्यादि - घ. 4. सन्ती - घ. 5. तथाह - घ. 6. कानन्दैकतान - ख, काकार - घ.

'यः सर्वज्ञः सर्ववित्' (मुण्ड.उ.1-1-10) *'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'* (श्वे.उ.6-8) *'तमेवभान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति'* (कठ.उ.5-15) **इत्यादिनिर्देशात्, निरतिशयासङ्ख्येयाश्च गुणाः, सकलेतरविलक्षणाः। तथा 'आदित्यवर्णम्' इत्यादिनिर्देशात्, रूपपरिजनस्थानादयश्च सकलेतर-विलक्षणाः स्वासाधारणाः अनिर्देश्यस्वरूप-स्वभावाः - इति।**

[वेदप्रामाण्यं कर्मकाण्डसंमतम्]

वेदाः प्रमाण चेत्, विध्यर्थवादमन्त्रगत सर्वम् अपूर्वम् अविरुद्धम् अर्थजातं, यथावस्थितमेव बोधयन्ति। प्रामाण्यं च वेदानाम्[1] -

'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः' (पू.मी.सू.1-1-7)

इत्युक्तम्। यथा - अग्निजलादीनाम् औष्ण्यादिशक्तियोगः स्वाभविकः ; यथा च - चक्षुरादीनामिन्द्रियाणां बुद्धिविशेषजननशक्तिः स्वाभाविकी ; तथा - शब्दस्याऽपि बोधकत्वशक्तिः [2] स्वाभाविकी।

[बोधकत्वशक्तेः शब्दस्वाभाव्यायत्तत्वम्]

न च - हस्तचेष्टादिवत्, संकेतमूलं शब्दस्य बोधकत्वम् - इति वक्तुं [3]शक्यम्[3]; अनाद्यनुसन्धानाविच्छेदेऽपि संकेतयितृपुरुषाज्ञानात्। यानि संकेतमूलानि ; तानि सर्वाणि साक्षाद्वा परम्परया वा ज्ञायन्ते।

सकलेतरविलक्षणाः इत्यनेन, प्रकृति-प्राकृतवैलक्षण्यम्। **स्वासाधारणा** इति। प्राकृतेषु पदार्थेषु चतुर्मुखादीनामपि अभिमानोऽस्तीति। तद्व्यावृत्त्यर्थम् इदमुक्तम्। **अनिर्देश्ये**त्यादिपदेन, इयत्ताराहित्यम् औज्ज्वल्यादिगुणोत्कर्षश्च।

वेदा इति। 'अर्थवादादेः स्वार्थे तात्पर्याभावात्, ब्रह्मस्वरूपमपि नाभ्युपगतम्' इति मीमांसकशंकायां, (समाधानार्थमिदमारब्धम्)। **अपूर्वविरुद्ध** - शब्दाभ्यां साधक-बाधकाभावोऽभिप्रेतः। **प्रामाण्यं चे**ति। 'चोदना सूत्रे' (पू.मी.1-1-2) अवधारणद्वयमस्ति ; चोदनैवप्रमाणम् प्रमाणमेव चोदना इति। प्रथमावधारणम् प्रत्यक्षसूत्रे (पू.मी.1-1-4) उपपादितम्। द्वितीयावधारणम्, 'औत्पत्तिकसूत्रे' (पू.मी.1-1-7) प्रतिपाद्यमित्यर्थः। **औत्पत्तिकः** - सत्ताप्रयुक्तः, नित्यः इत्यर्थः।

---

1. वेदनात् - ग, वेदानाम् औत्पत्तिकम् - घ. 2. बोधन - क,ग. 3. युक्तम् - क,ग,घ.

न च - देवदत्तादिशब्दवत् कल्पयितु - युक्तम् ; तेषु च साक्षाद्वा परम्परया वा संकेतो ज्ञायते । गवादिशब्दाना तु, अनाद्यनुसन्धानाविच्छेदेऽपि [1]संकेता[1]-ज्ञानादेव, बोधकत्वशक्तिः स्वाभाविकी । अतः अग्न्यादीनाम् [2]औष्ण्या[2]दि-शक्तिवत्, इन्द्रियाणा बोधकत्वशक्तिवच्च, शब्दस्याऽपि बोधकत्व [3]शक्तिः आश्रयणीया ।

ननु च - इन्द्रियवत् शब्दस्याऽपि बोधकत्व [4]स्वाभाविक (चेत्)[4], सम्बन्धग्रहण बोधकत्वाय किमित्यपेक्षते ?

[5]लिंगवत् - इत्युच्यते[5] । यथा ज्ञातसम्बन्धनियम धूमादि, अग्न्यादि विज्ञानजनकम् ; तथा ज्ञातसम्बन्धनियमः शब्दोऽपि, अर्थविशेषबुद्धि [6]जनकः[6] ।

[शब्दाख्यप्रमाणस्य अनुमानान्तर्भावशंकापरिहारौ]

एवं तर्हि ! शब्दोऽपि अर्थविशेषस्य लिंगमिति, अनुमानमेव स्यात् ;

[7]नैवम्[7] ; शब्दार्थयोस्सम्बन्धः बोध्यबोधकभाव एव ; धूमादीना तु सम्बन्धान्तरमिति, तस्य [8]सम्बन्धस्य[8] ज्ञानद्वारेण बुद्धिजनकत्वमिति विशेषः । एव गृहीतसम्बन्धस्य बोधकत्वदर्शनात्, [9]अनु[9]सन्धानाविच्छेदेऽपि संकेताज्ञानात्, बोधकत्वशक्तिरेव - इति निश्चीयते ।

अनादीति । हस्तचेष्टादिवत् शब्दस्य बोधकत्वात्, (तस्य) संकेतितत्वं स्यात् इत्यत्र (परिहारायेदमुक्तम्) । अनुसन्धानविच्छेदात् संकेतयितृपुरुषाज्ञानम् इति शंकापरिहारार्थम् । अविच्छेदेऽपि इत्युक्तम् । संकेतयितृपुरुषज्ञानं, संकेतमूलत्वे प्रयोजकम् ; न बोधकत्वे - इत्यर्थः । एवम्, बोधकत्वात् संकेतमूलत्वम् आशंक्य परिहृतम् ।

न च देवेत्यादि। (अनेन) शब्दत्वात् देवदत्तादिशब्दवत् सांकेतिकत्वमाशंक्य परिहरति । अत्र शंकामुखभेद एव । परिहारस्तुल्यः ।

एव गृहीतसम्बन्धस्येति । सम्बन्धग्रहणमपि सामग्रयन्तर्भूतम् । यथा चक्षुरादेः आलोकाद्यपेक्षत्वम्, न बोधकत्वशक्तिविरोधि । तस्मात् स्वाभाविकी बोधकत्वशक्तिरित्यर्थः । जन्यजनकभावसम्बन्धान्तरज्ञानसापेक्षं लिंगम् ; शब्दार्थयोः बोध्य बोधकभावसम्बन्ध एव ज्ञातव्यः - इति लिंग शब्दयोर्भेदः ।

---

1. संकेतयित्र- ग,घ. 2. दाहकत्वादि - क,ग. 3. शक्तिः अवश्यलश्रय, -घ, शक्तिरेव आश्रय - घ. 4. स्वाभाविकं - ख,ग. 5. लिंगादिवत् इत्युच्यते - घ, इति चेत् उच्यते - घ. 6. जनक एव - घ. 7. मैवम् - क,ग. 8. सम्बन्धस्याऽपि - घ. 9. अनाद्यनु - क,ग.

[शब्देषु पौरुषेयापौरुषेयविभागोपपत्तिः वेदनित्यत्वोपपादनं च]

एवं बोधकानां पदसंघातानां, संसर्गविशेष [1]बोधकत्वेन[1] वाक्य-शब्दाभिधेयानाम्, उच्चारणक्रमो यत्र पुरुषबुद्धिपूर्वकः, ते 'पौरुषेयाः शब्दाः' [2]इत्युच्यन्ते[2]। यत्र तु [3]उच्चारण[3]क्रमः पूर्वपूर्वोच्चारणक्रमजनितसंस्कारपूर्वकः, सर्वदा अपौरुषेयास्ते च, 'वेदाः' इत्युच्यन्ते ।

एतदेव वेदानाम् अपौरुषेयत्वं नित्यत्वं च यत् पूर्वपूर्वोच्चारण-क्रमजनितसंस्कारेण, तमेव क्रमविशेषं स्मृत्वा, तेनैव क्रमेण उच्चार्य [4]माणत्वम्[4]।

ते च आनुपूर्वीविशेषेण संस्थिताः अक्षरराशयो वेदाः, ऋग्यजुस्सामाथर्व-भेदभिन्नाः अनन्तशाखाः वर्तन्ते ; ते च विध्यर्थवादमन्त्र[5]रूपा वेदाः[5] परब्रह्मभूतनारायणस्वरूपं तदाराधनप्रकारम्, आराधि[6]तात्[6] फलविशेषं च बोधयन्ति ।

परमपुरुषवत् तत्स्वरूप-तदाराधन-तत्फल[7]ज्ञापक[7]वेदा[8]ख्यं शब्द[8]जातं नित्यमेव ।

एतदेवेति । स्मृतिपूर्वकत्वेऽपि उच्चारणस्य पुरूषाधीनत्वात्, कथं वेदस्य अपौरूषेयत्वम् ? इत्यत्र (उत्तरमिदम्) । **अपौरूषेयत्वम्** - पुरूषबुद्धिमूलकत्वाभावः । **नित्यत्वम्** - सर्वकाल-सम्बन्धित्वम् । पदनित्यत्वं, वर्णनित्यत्वं वा न अपौरूषेयत्वे प्रयोजकम् ; तथा सति कालिदासादिग्रन्थानामपि अपौरूषेयत्व प्रसंगात् । तस्मात् अनाद्यानुपूर्वीविशेषविशिष्टत्वेन पश्चादपि उच्चार्यमाणत्वम्, अपौरूषेयत्वं, नित्यत्वं च इत्यर्थः ।

अनन्तशाखा इति । आनन्त्येन दुर्ग्रहत्वात्, उपबृंहणापेक्षा ; न तु अनित्यतया । ऋग्यजुः सामादिकोटिचतुष्टयान्तर्भावेऽपि, एकैककोटौ शाखाद्वारा आनन्त्यम् - इत्यर्थः । **ते च विध्यर्थेति** । तत्र विधिभाग एव, अपौरूषेयाः ; अर्थवादादयः, पौरूषेयाः - इति विभागश्चेत्; अर्थवादादीनां स्वार्थेप्रामाण्यं न स्यात् । न च तथाऽस्ति । अतः अपौरूषेयतया प्रमाणत्वाविशेषात्, अर्थवादादयोऽपि स्वार्थप्रतिपादका इति, सर्वार्थसिद्धिः इत्यर्थः ।

परमपुरूषवदिति यथा जातिवाचित्वेन व्रीह्यादिशब्दानां जातेश्च नित्यत्वात् न तेषां नित्यत्वहानिः अभ्युपेता, एवं प्रतिपाद्य-प्रतिपादकयोः उभयोरपि अनादित्वमुपपन्नमित्यर्थः ।

---

1. बोधनेन -घ. 2. उच्यन्ते - घ. 3. तदुच्चारण - क,ग. 4. त्वम् - घ. 5. रूपवेदाः - घ. 6. धनात् - घ. 7. ज्ञानबीजं - घ. 8. ख्यशब्द - घ.

[वेदोपबृंहणप्रणयनहेतुः]

वेदानाम् अनन्तत्वात् दुरवगाहत्वाच्च, परमपुरुषनियुक्ताः परमर्षयः, कल्पे कल्पे निखिलजगदुपकारार्थं, वेदार्थं स्मृत्वा, विध्यर्थवादमन्त्रमूलानि धर्मशास्त्राणि, इतिहासपुराणानि च चक्रुः ।

[लौकिकवैदिकशब्दैक्यम्]

लौकिकाश्च शब्दाः, वेदराशेरुद्धृत्यैव तत्तदर्थविशेषनामतया पूर्ववत् प्रयुक्ताः, पारम्पर्येण प्रयुज्यन्ते ।

ननु च - वैदिका एव सर्वे वाचकाः शब्दाश्चेत्, 'छन्दस्येयम्, भाषायामेवम्' इति लक्षणभेदः, कथमुपपद्यते ?

उच्यते - तेषामेव शब्दानां, तस्यामेव आनुपूर्व्यां वर्तमानानां, तथैव प्रयोगः । अन्यत्र प्रयुज्यमानानाम्, अन्यथा - इति न कश्चिद्दोषः ।

[ग्रहणसौकर्यार्थम् उक्तानामर्थानां संगृह्य कथनम्]

एवम् - इतिहासपुराणधर्मशास्त्रोपबृंहितसांगवेदवेद्यः, परब्रह्मभूतो नारायणः, निखिलहेयप्रत्यनीकः, सकलेतरविलक्षणः, अपरि [1]च्छिन्न-ज्ञाना-नन्दैकस्वरूपः [1], स्वाभाविकानवधिकातिशयासंख्येय-कल्याण [2]गुण-गणा [2]-करः, स्वसंकल्पानुविधायि-स्वरूप-स्थिति-प्रवृत्तिभेद-चिदचिद्वस्तु-जातः, अपरिच्छेद्यस्वरूपस्वभावानन्तमहा-विभूतिः, नानाविधानन्तचेतना-चेतनात्मकप्रपंचलीलोपकरणः - इति प्रतिपादितम् ।

दुरवगाहत्वम् - अधीयमानशाखानामपि दुरवबोधार्थत्वम् । पूर्वभागोपबृंहणानि, धर्मशास्त्राणि । उपनिषदुपबृंहणानि, इतिहासपुराणानि ।

लौकिकाश्चेति । *'नामरूपं च भूतानां कृत्यानां च प्रपंचनम् । वेदशब्देभ्य एवादौ देवादीनां चकार सः'* (वि.पु.1-5-63) इत्यादिवचनात्, वेदशब्दा एव लोकेऽपि प्रयुज्यन्त इति, लौकिकवैदिकशब्दाभेदात्, बोधकाः इत्यर्थः ।

न कश्चिदिति । आनुपूर्विभेदकृतो लक्षणभेदः ; न तु शब्दभेदकृतः - इत्यर्थः ।

परब्रह्मनारायण शब्दौ, सामान्यविशेषशब्दौ । **निखिलेत्यादिना** उभयलिंगत्वमुक्तम् । **स्वसंकल्पेति**, विभूतिमत्त्वमाह । **अपरिच्छेद्येति**, नित्यविभूतिमत्त्वमाह । (अनेन) इयत्ताराहित्यम्,

---

1. च्छिन्नज्ञानानन्दस्वरूपः -घ, च्छिन्नानन्दस्वभावः - घ. 2. गुणा -ग,घ.

[ऐक्यश्रुत्यादेः उपपत्तिवर्णनम्]

'सर्वं खल्विदं ब्रह्म' (छा.उ.3-14-1)

ऐतदात्म्यमिदं सर्वम् तत्त्वमसि श्वेतकेतो' (छा.उ.6-8-7)

[1]'एन[1]मेके वदन्त्यग्निं [2]मरुतोऽन्ये [2]प्रजापतिम् ।

इन्द्रमेके [3]परे प्राणमपरे ब्रह्म शाश्वतम् [3] ।।' (म.स्मृ.12-123)

'ज्योतींषि [4]शुक्लाणि [4] च यानि लोके त्रयो लोका लोकपालास्त्रयी च । 218

त्रयोऽग्नयश्चाहुतयश्च पंच सर्वे देवाः देवकी पुत्र एव ।।' (वि.पु.6-5-72)

'त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः परन्तपः ' (वा.रा.यु.120-20) 220

[5]'ऋतः[5] धामा वसुः पूर्वः वसूनां त्वं प्रजापतिः' (वा.रा.यु.120-7) 215

'जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम् । 217

अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षणः ।।' (वा.रा.यु.120-26)

'ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च ।

नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य ।।' (वि.पु.2-12-38)

इत्यादिसामानाधिकरण्यप्रयोगेषु सर्वैः शब्दैः, सर्वशरीरतया सर्वप्रकारं ब्रह्मैव अभिधीयते - इति चोक्तम् ।

[सामानाधिकरण्यस्य स्वरूपैक्यनिबन्धनत्वनिरासः]

सत्यसंकल्पं परं ब्रह्म स्वयमेव बहु प्रकारं स्याम्' इति संकल्प्य, अचित्समष्टिरूप-महाभूत [6]सूक्ष्मं वस्तु, भोक्तृवर्गसमूहं च स्वस्मिन् प्रलीनं,

---

औज्वल्यादि-गुणोत्कर्षश्च विवक्षितः। अनन्तशब्देन नित्यत्वं, तद्गत-पदार्थानन्त्यं वा विवक्षितम्। महाविभूतिरिति, भोगविभूतिरुच्यते। *'शुद्धे महाविभूताख्ये'* (वि.पु.6-5-72) इति वचनात्। नानाविधेति , लीलाविभूतिमत्त्यमाह। एवं सर्वविलक्षणत्वमुक्तम्।

जगत्सर्वमिति। 'त्वं यज्ञः' इति श्लोकानन्तरभावित्वात् 'जगत्सर्वं शरीरं ते' इति श्लोक उदाहृतः। अनेन सामानाधिकरण्यस्यार्थः स्पष्टो भवति।

सत्येति । कारणावस्थायामेकत्वावधारणात्, तदानीं शरीरात्मभावो नोपपद्यत इति, स्वरूपैक्य निबन्धनमेव सामानाधिकरण्यम् - इत्यत्र उत्तरमिदम्। न हि सत्यसंकल्पं ब्रह्मस्वरूपमेव,

---

1. एत - पा. 2. मनुमन्ये-पा. 3. परंब्रह्म शाश्वतं परमेश्वरम् - घ. 4. शुक्लानि - क,ग. 5. ऋतु- ग. 6. सूक्ष्मवस्तु - क,ग.

स्वयमेव विभज्य, तस्मात् भूतसूक्ष्माद्वस्तुनः महाभूतानि सृष्ट्वा, तेषु च भोक्तृवर्गम् आत्मतया प्रवेश्य, तैः चिदधिष्ठितैः महाभूतैः अन्योन्यसंसृष्टैः, कृत्स्नं जगत् विधाय, स्वयमपि सर्वस्य आत्मतया प्रविश्य, परमात्मत्वेनावस्थित सर्वशरीरं बहुप्रकारम् अवतिष्ठते ।

[प्रकृति-पुरुषौ ; तयोः परमात्मप्रकारता च]

यदिदं महाभूतसूक्ष्मं वस्तु, तदेव 'प्रकृति' शब्देन अभिधीयते । भोक्तृवर्गसमूह एव, 'पुरुष' शब्दे नोच्यते[1] । तौ च प्रकृति-पुरुषौ, परमात्मशरीरतया परमात्मप्रकारभूतौ । तत्प्रकारः परमात्मैव, प्रकृतिपुरुष-शब्दाभिधेयः,

***'सोऽकामयत, बहु स्यां प्रजायेयेति------तत्सृष्ट्वा तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्, निरुक्तं चाऽनिरुक्तं च, निलयनं चाऽनिलयनं च, विज्ञानं चाऽविज्ञानं च, सत्यं चाऽनृतं च सत्यमभवत्'* (तै.उ.आन.6-2,3) इति पूर्वोक्तं सर्वम्, अनयैव श्रुत्या व्यक्तम्**

स्वर्ग नरकादिभागभवति । अतः, विलक्षणमेव ब्रह्म इति 'सत्यसंकल्पशब्दाभिप्रायः । **बहुप्रकारं स्याम्** इत्यनेन 'बहु स्याम्' इत्येतद्व्याख्यातम् । **अचिदिति** । महदाद्यपेक्षया प्रकृतिः समष्टिः । सैव महाभूतसूक्ष्मम् इति व्याख्यानव्याख्येयभावः । **भोक्तृवर्गे**त्यनेन, 'यतः प्रधानपुरुषौ' इत्यत्र पुरुष-शब्दो व्याख्यातः । पुरुषशब्दः न एकजीवपरः ; अपि तु जीवसमष्टिपरः इत्यर्थः । **स्वस्मिन्निति** । एकीभूतम् अव्यक्तावस्थं व्यक्तं कृत्वेत्यर्थः । **तस्मात्-----सृष्ट्वा** इति, समष्टितत्त्वसृष्टि-रुक्ता । **आत्मतयेति** । जीवानाम् अचित्संसर्गस्यानादितया, तद्व्यावृत्त्यर्थम्, इदमुक्तम् । व्यष्टिदेहाभिमानितया इत्यर्थः ।

तैः ----विधायइति, व्यष्टिसृष्टिरुच्यते । **चिदधिष्ठितैरिति** । चित्संसृष्टैरित्यर्थः । 'पुरुषाधिष्ठितत्वाच्च' (वि.पु.1-2-54) इत्यस्य, चित्संसृष्टतापरत्वज्ञापनायोक्तम् । **अन्योन्यसंसृष्टैः** इति, पंचीकरणं विवक्षितम् । **कृत्स्नं जगत्** इति, ब्रह्माण्ड-तदन्तर्गतभोग्य-भोगोपकरण-भोगस्थान-देवमनुष्यादि व्यष्टिजातमुच्यते । **प्रविश्येति**, तदवस्थचिद-चिन्नियन्तृतया अवस्थानमुच्यते । **प्रवेश्य- प्रविश्य** इति पदाभ्यां ; जीवप्रवेशस्य पराधीनत्वम्,

---

1.न च उच्यते - क,ग.

[भगवत्प्राप्त्युपायविषये वक्तव्यार्थस्फुटीकरणम्]

ब्रह्मप्राप्त्युपायश्च, शास्त्राधिगततत्त्वज्ञानपूर्वकस्वकर्मानुगृहीतभक्तिनिष्ठा-साध्यानवधिकातिशयप्रियविशदतमप्रत्यक्षतापन्नानुध्यानरूपपरभक्तिरेव-इत्युक्तम् । भक्तिशब्दश्च प्रीतिविशेषे वर्तते ; प्रीतिश्च ज्ञानविशेष एव ।

[सुखस्य ज्ञानरूपता, ब्रह्मणः सुखरूपता च]

ननु च - 'सुखं प्रीतिः' इति अनर्थान्तरम् ; सुखं च ज्ञानविशेषसाध्यं पदार्थान्तरम् - [2]इति[1] लौकिकाः.

नैवम् ; येन ज्ञानविशेषेण तत् साध्यमित्युच्यते ; [3]स एव ज्ञानविशेषः[3] सुखम् ।

एतदुक्तं भवति - विषयज्ञानानि सुखदुःखमध्यस्थसाधारणानि । तानि च विषयाधीनविशेषाणि तथा भवन्ति ; [4]येन च[4] विषयविशेषण विशेषितं ज्ञानं, [5]सुखस्य जनकम्[5] इत्यभिमतम्, [6]तद्विषय[6]ज्ञानमेव सुखम् ; तदतिरेकि पदार्थान्तरं नोपलभ्यते ; तेनैव [7]सुखित्व[7]व्यवहारोपपत्तिश्च । एवं विधसुखरूपज्ञानस्य विशेषकत्वम्, ब्रह्मव्यतिरिक्तस्य वस्तुनः सातिशयमस्थिरं च ; ब्रह्मणस्तु अनवधिकातिशयं स्थिरं चेति, '*आनन्दो ब्रह्म*' (तै.उ.भृ.6-1) [8]इत्युच्यते[8] । विषयायत्तत्वात् ज्ञानस्य सुखरूप[9]तया[9], ब्रह्मैव सुखम् । तदिदमाह -

---

परमात्मप्रवेशस्य स्वेच्छाकृतत्वं च दर्शितम् । तत्र 'प्रवेश्य विधाय प्रविश्य' इति ल्यबन्तपदानां न पौर्वापर्यविवक्षा ; अपि तु भेदमात्रविवक्षैव । **परमात्मस्वरूपेणावस्थितम्** - अप्रच्युतस्वरूप-मवस्थितम् इत्यर्थः । **सोऽकामयतेत्यादि**, ब्रह्मणः चिदचिद्विलक्षणत्वे, तयोरपि भेदे, ब्रह्मणः तदनुप्रवेशकृततत्तन्नामभाक्त्वे च श्रुतिमाह । एवं सिद्धवस्तुविषयसंग्रहः कृतः ।

ब्रह्मप्राप्त्युपायश्चेति । अथ उपायविषयं वक्तव्यमाह । **भक्तिनिष्ठा** - भक्ति-योगाभ्यासः। तेन साध्या परभक्तिः प्राप्तिपूर्वावस्था **प्रीतिविशेष** शब्देन, स्वामिनि भृत्यस्यानुरागो विवक्षितः । **सुख दुःखमध्यस्थ**शब्दाः, अनुकूलप्रति-कूलानुभयरूपविषयवाचिनः। तेषां साधारणानीत्यर्थः । **तथा भवन्ति** - सुखं दुःखम् अनुभयं च भवन्तीत्यर्थः । **तद्विषयज्ञानमेव** - स्रक्चन्दनादिविषयज्ञानमेव । **तेनैव** - विषयविशेषितज्ञानेनैव । **एवं विशेषकत्वम्**-

---

1. इति हि - क,ग,घ. 2. सः - क,ग. 3. विशेष एव - घ. 4. ये न - क. 5. सुखजनकम् घ. 6. तद्विषयम् - क,ग.घ. 7. सुखित्वदुःखित्व - घ, सुखीति-घ, सुख - घ. 8. इति हि उच्यते -घ. 9. तायाः - क.

'रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति' (तै.उ.आन.7-1) इति । 'ब्रह्मैव सुखम्' इति, ब्रह्म लब्ध्वा सुखी भवतीत्यर्थः । परमपुरुषः स्वेनैव स्वयम् अनवधिकातिशय [1]सुखः सन्[1] परस्याऽपि [2]सुखं भवति[2]; सुखरूपत्वाविशेषात्, ब्रह्म यस्य ज्ञान[3]विषयो भवति[3]; सः सुखी भवतीत्यर्थः।

[सर्वशेषिणो भगवत एव स्वप्रापकत्वम्]

[4]तदेव[4] परस्य ब्रह्मणः अनवधिकातिशयासंख्येयकल्याण [5]गुणा[5]करस्य, निरवद्यस्य, अनन्तमहाविभूतेः, अनवधिका [6]तिशयसौशील्यसौन्दर्य [6]जलधेः सर्वशेषित्वात्, आत्मनः [7]शेषत्वात्, प्रति [7]सम्बन्धितया अनुसन्धीयमानम् अनवधिकातिशयप्रीति [8]विषय[8] सत् पर[9]ब्रह्मैव[9], एनम् आत्मानं प्रापयति- इति।

[आत्मनां भगवच्छेषतायाः अपुरुषार्थत्वशंकापरिहारौ]

ननु च - अत्यन्तशेषतैव आत्मनः, अनवधिकातिशयं सुखम्- इत्युक्तं भवति; तदेतत् सर्वलोकविरुद्धम् । तथा हि; सर्वेषामेव चेतनानां स्वातन्त्र्यमेव इष्टतमं दृश्यते; [10]पारतन्त्र्यं[10] दुःखतरम् । स्मृतिश्च -

'सर्वं परवशं दुःखं सर्वमात्मवशं [11]सुखम्'[11] (म.स्मृ.4-160)

[12]तथा च[12] -

'सेवा श्ववृत्ति [13]राख्याता[13] तस्मात्तां परिवर्जयेत्' (म.स्मृ.4-6) इति ।

अनुकूलत्वम् । **स्थिरं चेति** । अनुकूलत्यमित्यर्थः। विषयायत्तत्वादिति । अयमर्थः - 'आत्मानुकूलं सुखम्' इति, आनुकूल्यं हि सुखशब्दप्रवृत्तिनिमित्तम् । तच्च ज्ञानस्य विषयानुकूल्यप्रयुक्तमिति, विषयस्य स्वतोऽनुकूलस्य सुखशब्दवाच्यत्वं युक्तम् - इति ।

ब्रह्मैवेति । 'रसो वै सः' इति तच्छब्दः, कारणतया प्रकृतब्रह्मपरामर्शी इत्यर्थः । **स्वयम्** - स्वस्मै इत्यर्थः । सुखरूपत्वाविशेषादिति । स्वपरविभागरहितं 'आनन्दो ब्रह्म' इति अविशेषेण आनन्दत्वकथनात् इत्यर्थः । **ब्रह्म यस्येति** । ब्रह्म परस्य ज्ञानविषयश्चेत्, तस्य सुखं भवति । स्वस्य ज्ञानविषयत्वे स्वस्य सुखं भवति । अतः यस्य ज्ञानविषयभूतं ब्रह्म, अविशेषेण तस्य तत् सुखमिति, जीवस्यापि सुखरूपं भवतीति तस्याः श्रुतेरर्थः इत्यर्थः । **महाविभूतेः** इत्यन्तेन परत्वोपयोगि-गुणजातमुक्तम् । **अनवधिके**त्यादिना सौलभ्योपयोगिगुण उक्तः । **प्रीतिविषयमिति**

---

1. सुखी -घ. 2. सुखाय भवतीत्यर्थः - घ. 3. विषयः - क. 4. तदेव - क. 5. गुणगण -क,ग. 6. सौशील्यसौन्दर्यवात्सल्य - क,ग, सौशील्यवात्सल्यसौन्दर्य - ख. 7. शेषत्व(ता) प्रति -क,घ. 8. विषयभूतं - घ. विषयः - ग. 9. ब्रह्म -घ. 10. पारतन्त्र्यं तु - घ. 11. सुखम् इति - घ. 12. तदेतत्- क,ग. 13. व्याख्याता-ग.

[1]तदिदम्[1] अनधिगतदेहातिरिक्तात्मस्वरूपाणां, शरीरात्माभिमान-विजृम्भितम् । तथाहि - [2] शरीरं हि[2] ! मनुष्यत्वादि-जातिगुणाश्रयपिण्डभूतं स्वतन्त्रं प्रतीयते । तस्मिन्नेव, 'अहम्' इति संसारिणां [3]प्रतीतिः[3] । आत्माभिमानो यादृशः ; तदनुगुणैव पुरुषार्थ[4]प्रतीतिः[4]। सिंह-व्याघ्र-वराह-मनुष्य-यक्ष-रक्ष-पिशाच-देव-दानव-स्त्रीपुंस-व्यवस्थितात्माभि [5]मानानां[5] सुखानि व्यवस्थितानि । तानि च परस्परविरुद्धानि । तस्मात् आत्माभिमानानुगुणपुरुषार्थव्यवस्थया, सर्वं समाहितम् ।

[पुरुषार्थप्रतीतिवैविध्यस्य सहेतुकत्वोपपादनम्]

आत्मस्वरूपं तु - देवादिदेहविलक्षणं ज्ञानैकाकारम् ; तच्च परशेषतैक-स्वरूपम् । यथावस्थितात्माभिमाने तदनुगुणैव पुरुषार्थप्रतीतिः ।

'आत्मा ज्ञानमयोऽमलः' (वि.पु.6-7-22)

इति स्मृतेः ज्ञानैकाकारता [6] प्रतिपन्ना [6] ।

पतिं विश्वस्य' (तै.ना.उ.11-3)

इत्यादि श्रुतिगणैः, परमात्मशेषतैकाकारता च [7] प्रतिपादिता [7] । अतः सिंह [8]व्याघ्रादि [8] शरीरात्माभि[9]मान[9]वत्, [10]स्वतन्त्रा[10]भिमानोऽपि कर्मकृत-[11]विपरीतात्म[11] ज्ञानरूपो वेदितव्यः ।

स्वदास्यानुसन्धानगर्भा प्रीतिर्विवक्षिता । एवंविध प्रीतिरूपज्ञानविषयभूतं ब्रह्म स्वप्राप्त्युपायभूतमित्यर्थः ।

परस्परविरुद्धानीति । परस्परविरुद्धेषु सुखदुःखेषु, तत्तदसाधारणं प्रयोजकं न भवति ; व्यभिचारात् । तस्मात् अनुयायि प्रयोजकं, विपरीतात्माभिमानरूपम् इत्यभिप्रायः । **तस्मादिति** । 'आत्मानुकूलं सुखम् । आत्मप्रतिकूलं दुःखम्' इति सुखदुःखलक्षणम् । तस्मात् स्वतन्त्रतया आत्माभिमाने प्रतिकूलत्वात्, पारतन्त्र्यं दुःखं भवति ; न तु पारतन्त्र्यात् इत्यर्थः ।

आत्माज्ञानमयः इति, ज्ञानैकाकारत्वे परशेषतैकस्वरूपत्वे च प्रमाणम् ।

पतिं विश्वस्येति, परशेषतैकस्वरूपत्वे प्रमाणतया भाष्यकारेणाभिप्रेतम् ।

---

1. तदेतत् - क,ग. 2. शरीरम् - क. 3. प्रतिपत्तिः - घ. 4. प्रतिपत्तिः - घ. 5. मानिनां - घ. 6. पुरुषार्थता प्रति - ग. 7. प्रतीता - क,ग,घ. 8. व्याघ्रवराहादि -घ, व्याघ्र - घ. 9. भिमान - घ. 10. स्वातन्त्र्या - क,ग. 11. विपरीत - घ.

[परमात्मनः विषयाणां च जीवान् प्रति सुखरूपतायां वैलक्षण्यम्]

अतः कर्मकृतमेव परमपुरुषव्यतिरिक्तविषयाणां सुखत्वम् । अत एव तेषाम्[1]अल्पत्वमस्थिरत्वं च । परमपुरुषस्यैव, स्वत एव[3] सुखत्वम् । अतः तदेव स्थिरम् अनवधिकातिशयं च ;

'कं ब्रह्म खं ब्रह्म' (छा.उ.4-10-3)

'आनन्दो ब्रह्म' (तै.उ.भृ.6-1)

'सत्यं ज्ञानमनन्तं ब्रह्म' ; (तै.उ.आन.1-1)

इति श्रुतेः ।

ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य वस्तुनः स्वरूपेण सुखत्वाभावः, कर्मकृतत्वेन च अस्थिरत्वं, भगवता पराशरेणोक्तम् -

'नरक-स्वर्गसंज्ञे वै पाप-पुण्ये द्विजोत्तम ।

वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च ।।' (वि.पु.2-6-44)

'कोपाय च यतस्तस्मात् वस्तु वस्त्वात्मकं कुतः' (वि.पु.2-6- 45)

सुखदुःखाद्येकान्त रूपेण[4] वस्तुनो वस्तुत्वं कुतः ? तदेकान्तता, पुण्यपापकृता इत्यर्थः। एवम् अनेकपुरुषापेक्षया, कस्यचित् सुखमेव, कस्यचित् दुःखं भवतीति [5]अनवस्था [5] प्रतिपाद्य, एकस्मिन्नपि पुरुषे न व्यवस्थितम् इत्याह -

'तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते' (वि.पु.2-6-45)

'तदेव कोपाय यतः प्रसादाय च जायते ।

तस्माद्दुःखात्मकं नास्ति न च किंचित्सुखात्मकम् ।।' (वि.पु.2-6-46)

[6]इति । सुखदुःखात्मकत्वं सर्वस्य वस्तुनः कर्मकृतम् ; न वस्तुस्वरूपकृतम् । अतः कर्मावसाने, तत् अपैति - इत्यर्थः ।

अतः कर्मकृतमेवेति । इतरसुखानां कर्मकृतत्वात्, तत्तारतम्यानुगुणे तदल्पत्वास्थिरत्वे । स्वाभाविकसुखरूपत्वात् ब्रह्मणः, अनन्तस्थिरत्वे इत्यर्थः । कं ब्रह्मेत्यादि श्रुतिः ब्रह्मणः अपरिमितसुखत्वे प्रमाणम् ।

पाप-पुण्ये - पापपुण्यकृते, इत्यर्थः ।

---

1. परमेश्वर घ. 2. ऐतेषाम् - घ, तेषाम् -घ. 3. स्वतः - घ. 4. रूपिणो -ग. 5. अव्यवस्था - क,घ. व्यवस्थां - ग. 6. सुख-घ.

[पारतन्त्र्यस्य, दुःखात्मकत्वाशंकापरिहारौ]

यत्तु- 'सर्वं परवशं दुःखम्'[1] इत्युक्तम् ; तत् परमपुरुषव्यतिरिक्तानां परस्परं शेषशेषिभावाभावात्, तद्व्यतिरिक्तं प्रति शेषता, दुःखमेव इत्युक्तम् ।

'सेवा [3]श्ववृत्तिराख्याता' इत्यत्रापि[3], असेव्यसेवा श्ववृत्तिरेव इत्युक्तम् ।

स ह्याश्रमैः [4]सदोपास्यः[4] समस्तैरेक एव[5]तु[5] (भा.)

इति सर्वैः आत्मयाथात्म्यवेदिभिः[6] सेव्यः, पुरुषोत्तम एक एव । यथोक्तं भगवता -

'मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।

स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ।।' (भ.गी.14-26)

इति ।

[परमपुरुषसेवायाः परमपुरुषार्थत्वम्]

इयमेव भक्तिरूपा सेवा,

'ब्रह्मविदाप्नोति परम्' (तै.उ.आन.1-1)

'तमेवं विद्वानमृत इह भवति' (तै.आर.पु.3-12-17)

[7]'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड.उ.3-2-9)

इत्यादिषु[7] 'वेदन' शब्देन[8] अभिधीयते - इत्युक्तम् ।

[ज्ञानिभक्तानां भगवत्प्रियतमत्वविशदीकरणम्]

'यमेवैष वृणुते तेन लभ्यः' (मुण्ड.उ.3-2-3)

इति विशेषणात् ।

सुखदुःखादीति । एकान्तसुखतया वस्तुत्वम्, एकान्तदुःखतया वस्तुत्वं च निषिद्धम् इति भावः । न व्यवस्थितमिति कालभेदेनेत्यध्याहारः ।

शेषशेषिभावाभावात् इति । स्वभावतोऽभावात् इत्यर्थः ।

इयमेवेति । 'भज इत्येष धातुर्वै सेवायां परिकीर्तितः । तस्मात् सेवा बुधैः प्रोक्ता भक्तिशब्देन भूयसी' इति भगवद्बोधायनवचनम् । 'सेवा भक्तिरुपास्तिः' इति निघण्टुः । तस्मात् भक्तिरूपा सेवा, वेदनादिशब्दवाच्या इत्यर्थः ।

---

1. परवशः - ख. 2. परस्परं - क. 3. श्ववृत्तिरित्यपि -घ, श्ववृत्तिव्याख्याता इत्यत्रापि - ख,ग. 4. सदा सेव्यः -घ. 5. च - क,ग. 6. वेदिभिः - क,ग,घ. 7. इत्यादि षु - घ. 8. नादिशब्देन - घ.

'यमेवैष वृणुते' इति भगवता वरणीयत्वं प्रतीयते । वरणीयश्च प्रियतमः । यस्य भगवति अनवधिकातिशया प्रीतिर्जायते ; स एव भगवतः प्रियतमः । तदुक्तं भगवतैव[1] -

'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' (भ.गी.7-17)

इति । तस्मात्, परभक्तिरूपापन्नमेव वेदनं, तत्त्वतो भगवत्प्राप्तिसाधनम् । यथोक्तं भगवता द्वैपायनेन[2] मोक्षधर्मे, सर्वोपनिषद्व्याख्यानरूपम्[3] -

'न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
भक्त्या च [4]धृत्या[4]च समाहितात्मा ज्ञानस्वरूपं परिपश्यतीह ।।' (म.भा.शा.21-62)

तस्मादिति । पुत्रत्वादिरूपेण भगवत्प्राप्तिः दशरथादेरप्यस्तीति तद्व्यावृत्त्यर्थं 'तत्त्वतः' इति । यथावदनुभवसाधनम् इत्यर्थः । **न सन्दृश इति** । श्रुत्युपबृंहण रूपत्वात् **सर्वोपनिषद्व्याख्यानरूपम्** इत्युक्तम् । ' न सन्दृशे' इत्यादिपूर्वार्धं, वेदे महाभारते च तुल्यम् । **भक्त्या** इत्यनेन उत्तरार्धगतहृच्छब्दो व्याख्यात इति ज्ञायते । स्थानप्रमाणात् धृतिः इन्द्रियाणां विषयवैमुख्यकरणम् । अनेन शमदमादयः उपलक्षिताः । 'हृदा मनीषा मनसाऽभिक्लृप्तः' भक्त्या, शमदमादिना चान्वितेन मनसा, सम्पद्यते इति तस्य वाक्यस्यार्थः ।

भक्तिश्च ज्ञानविशेष एवेति । भक्तिः-प्रीतिविशेषः । प्रीतिश्च ज्ञानादनर्थान्तरम् इति पूर्वमेवोक्तम् । तस्मात् प्रीतिरूपा भक्तिः ज्ञानविशेष इति । **सर्वमुपपन्नमिति** । स्वपक्षसाधन परपक्षप्रतिक्षेपयोः यत् प्रमाणं जातमुक्तम्, तेनैव अनुक्तम् अन्यदपि च वक्तव्यं सर्वं निर्वाह्यम् । अत्रैव कृत्स्नान्तर्भावात् इत्यर्थः ।

सारासारेति । अस्य प्रबन्धस्य अतिगम्भीरता प्रदर्शनार्थम् । अनेन सर्वजनापरिग्रहो न दोषः । अशिष्टपरिग्रह एव दोषः । तस्मात् विशिष्टपरिग्रह एव श्लाघ्यताहेतुः इति चोक्तं भवति । **'सारासारविवेकज्ञाः'** - परस्परविरुद्धानेकार्थेषु प्रतिपन्नेषु प्रमाणतर्कैः प्राबल्य-दौर्बल्यादि विभागविदः। **गरीयासः** - बहुश्रुताः । न बहुश्रुतत्वाभावे तत्तच्छास्त्रोक्तानां प्राबल्य दौर्बल्य विभागः उपपद्यते । **विमत्सरा** इति । एवमुभयस्मिन् सत्यपि, अस्मत्सवयसा अनेनोक्तं कथं

---

1. वता - क,ग. द्वैपायनेन - घ. 2. रूपेण - घ. 3. पश्यन्ति धीराः - घ. 4. धृत्या - क,ख,ग.

इति । धृत्या समाहितात्मा, भक्त्या पुरुषोत्तमं पश्यति - साक्षात्करोति, प्राप्नोति इत्यर्थः ;

'भक्त्या त्वनन्यया शक्यः ' (भ.गी.11-54)

इत्यनेन ऐकार्थ्यात् । भक्तिश्च ज्ञानविशेष एव - इति सर्वम् उपपन्नम् ।

सारासारविवेकज्ञाः गरीयांसो विमत्सराः ।

प्रमाणतन्त्राः सन्तीति कृतो वेदार्थसंग्रहः ।।

।। इति श्रीभगवद्रामानुजविरचितः श्री वेदार्थसंग्रहः समाप्तः ।।

।। श्रीमते रामानुजाय नमः ।।

वयमंगीकुर्मः ? इति मत्सरोपहताश्चेत्, उभयमपि विफलमिति, तद्व्यावृत्त्यर्थमिदम् । **प्रमाणेति** । ये प्रमाणानुसारिणः तदनुगुणैस्तर्कैः अर्थं निरूपयन्ति ; न तु स्वापेक्षितार्थे प्रमाणजातं क्लेशेन योजयन्ति **ते - 'प्रमाणतन्त्राः '**। यत्र कुत्रचित्, यदा कदाचित् एवं विधाः पुरुषा अपि सम्भविष्यन्तीति मत्वा **'वेदार्थसंग्रहः** कृतः' इत्यर्थः ।

वेदार्थसंग्रहसुधां वेदान्ताब्धेर्य आहरत् ।

रामानुजाय मुनये तस्मै भगवते नमः ।।

।। श्रीमते रामानुजाय नमः ।।

॥ श्रीः ॥

अ नु ब न्धाः

1. प्र मा णा र्थ को षः

2. प दा र्थ को षः

3. सि द्धा न्तो क्त यः

4. प्र मे य सं ग्र हः

श्रीः

श्रीमते रामानुजाय नमः

1. प्रमाणार्थकोषः

वेदार्थसंग्रहे उदाहृतानां प्रमाणानाम् आकरनिर्देशार्थानुवादाभ्यां सहितः

अकाराद्यनुक्रमेण संग्रहः

अ. उपनिषत्प्रमाणानि

पृ.सं.

1. **'अ इति ब्रह्म '** (ऐत.आ. 2-3-8) 113

'अ'काराख्यैकवर्णात्मकः शब्दः, नारायणाख्यस्य परस्य ब्रह्मणः पुरूषोत्तमस्य वाचकः । वाच्य-वाचकयोः भेदस्य अविवक्षया, अकार एव ब्रह्म ।

2. **'अकारो वै सर्वा वाक्'** (ऐत.उ. 2-3-6) 113

'वाक्' इति कण्ठताल्वाद्यभिघातेन प्रादुर्भाव्यमाना या या वर्तते सा सर्वाऽपि, अकार एव-'अ'इत्ययं वर्ण एव 'अ' इति स्वराविर्भावाधीनत्वात् सर्वस्याः वाक्प्रवृत्तेः।

3. **'अक्षरे परमे व्योमन्'** (तै.ना.उ. 1-2) (प्र. सं. 55 द्रष्टव्यः) 157

4. **'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् ।** 73
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः।।

(श्वे.4-5, तै.ना.उ.10-5)

तेजो-जल-पृथिवीलक्षणविकारगतैः लोहित-शुक्ल-कृष्णाख्यैः रूपैः युक्तां, समानरूपविविधभूतभौतिककार्यस्रष्ट्रीम्, उत्पत्तिरहितां कांचित् प्रकृतिं, जननरहित एव अविद्वान् कश्चित् चेतनः, अहम्बुद्ध्या सेवमानः सन् अनुसृत्य तिष्ठति, भुंक्ते वा । अपरो विद्वान् चेतनस्तु इमां पूर्वोपभुक्तां प्रकृतिम्, लब्धवैराग्यः सन् परित्यजति ।

5. **'अजायमानो बहुधा विजायते । तस्य धीराः परिजानन्ति योनिम्'** 126

(तै.आर. पु.3-13-3)

परमात्मा जन्मपदवाच्यकर्मायत्तशरीरसम्बन्धरहितोऽपि, बहुविधाविर्भाववान् भवति । तदाविर्भावग्रहणोपायम्, आविर्भावनिदानं वा कुशलधिषणाः योगिवर्या एव ग्रहीतुं ग्राहयितुं वा समर्था भवेयुः ।

पृ.सं.

6. **'अथ तस्य भय भवति'** (तै.उ.आन.7-2) 148

निरन्तरध्यानपरस्य उपासकस्य, ध्यानविच्छेदानुपदमेव महद्भयं जायते ।

7. **'अथ नामधेय सत्यस्य सत्यमिति, प्राणा वै सत्यं, तेषामेष सत्यम्'** 40

(बृ.उ.4-3-6)

प्रकृतिवत् स्वरूपविकाररहिततया 'सत्यं' शब्दवाच्येभ्यः 'प्राण' शब्दनिर्दिष्टेभ्यः चेतनेभ्योऽपि कदाचिदपि ज्ञानादिसंकोचाभावात्, परमात्मा 'सत्यम्' निर्विकारम् इत्यतः, तस्य 'सत्यस्य सत्यम्' इति नामधेयं भवति । (अतः चेतनाचेतनाभ्यां परः स एवेति, न ततोऽप्यन्यः परः इत्यर्थः ।)

8. **'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान् तेषा सर्वेषु** 116
लोकेषु कामचारो भवति' (छा.उ.8-1-6)

ये पुनः - आत्मानम्, तत्सम्बन्धिनः अपहतपाप्मत्वादींश्च काम्यमानान् कल्याणगुणान् उपास्य, परलोकं व्रजन्ति देहादुत्क्रान्ताः सन्तः, ते ब्रह्मणो विभूतिभूतान् विकारात्मकान् प्राकृतान् लोकान् अनुभवन्ति । तेषां च तदनुभवेन यथाकामं तृप्तानां, कर्मवश्यतां विना सर्वेषु लोकेषु देहेषु, स्वसंकल्पायत्तः संचारः सम्पद्यते ।

9. **'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर** 114
आकाशः तस्मिन्यदन्तः तदन्वेष्टव्यं, तद्वाव विजिज्ञासितव्यम्

(छा.उ.8 1-1)

अस्माभिरपि दृश्ये, उपास्यस्य ब्रह्मणः आवासस्थानभूते, अत एव 'ब्रह्मपुर' शब्दवाच्ये अस्मिन् देहे, किंचित् पुण्डरीकाकारमत्यन्तसूक्ष्मं स्थानं वर्तते । तदेव हृदयनामकम् । तस्मिंश्च सूक्ष्मे स्थाने, ततोऽपि सूक्ष्मः कश्चनाकाशो वर्तते । तस्य च 'दहराकाश' इति नाम । सः आकाशरूपोऽर्थः, तदन्तर्वर्ति च यत् (तदीयं कल्याणगुणजातं) तदुभयमपि उपासकेन श्रवण मननाभ्यामवगन्तव्यं, ध्यातव्यमपि।

10. **'अथ सोऽभयं गतो भवति'** (तै.उ.आन.7-2) 148

(चक्षुराद्यगोचरे, अशरीरे, जातिगुणादिवाचिदेवादिपदावाच्ये, आधारशून्ये, परमात्मनि अभयसाधनभूतां प्रतिष्ठां निरन्तरस्मृतिलक्षणां निष्ठां यो लभते) सः भयरहितो भवति ।

पृ.सं.

11. **'अथात आदेशो नेति नेति'** (बृ.उ.4-3-6) 40

(ब्रह्मणः मूर्तामूर्तरूपवत्त्वकथनानन्तरं, मूर्तामूर्तशरीरकत्वप्रयुक्तायाः इयत्तायाः प्रसक्तत्वात्, तन्निवारणाय अयमुपदेशः क्रियते)। मूर्तामूर्तशरीरकत्वेन ब्रह्मणः इयत्ता नैव प्रसज्यते। 'इति' शब्देनोक्त्यर्हा इयत्ता नैव सम्भाव्यते।

12. **'अदभ्यः सम्भूतो हिरण्यगर्भ इत्यष्टौ'** (तै.ना.उ.1-12) 107

'अद्भ्यः सम्भूतः पृथिव्यै रसाच्च' इति उत्तरानुवाकः (तथा) 'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्' इत्यादयः अष्ट ऋचश्च एकवाक्यतया पठितव्याः।

13. i. **'अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि'** 19

(छां.उ. 6-3-2)

ii. **'अनेन जीवेनाऽऽत्मना'** (प्र.175.द्रष्टव्यः) 18, 66

14. **'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा'** (तै.आर.3-11-3)

(परब्रह्मभूतः परमात्मा) सृज्यकोटिनिविष्टानां सर्वेषां भूतानामन्तरनु- 18,65,88
प्रविष्टः सन्, तेषां सर्वेषामात्मभूतः तन्नियन्ता वर्तते।

15. i. **'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः'** (छां.उ.8-1-5) 87

ii. **'अपहतपाप्मा विजरः'**

iii. **'अपहतपाप्मा'** 162

दहराकाशशब्दवाच्यः परमात्मा, अश्लिष्टसुकृतदुष्कृतः, जरामरणवर्जितः, शोक तद्धेतुकर्मसम्बन्धरहितः, बुभुक्षा-पिपासाविदूरः, अक्षरपरमव्योमविशिष्टः, अप्रतिहतसंकल्पश्च।

16. **'अपिपासः'** (छां.उ.8-1-5) (प्र. 15. द्रष्टव्यः)

17. **'अयमात्मा ब्रह्म'** (बृ.उ.6-4-5) 158

देवादिविविधविचित्रशरीरपरिग्रहवान् अयं जीवः, अपहतपाप्मत्वादि- 4
ब्राह्मरूपयुक्तः।

18. **'असदेवेदमग्र आसीत्'** (छां.उ.3-19-1) 36

सृष्टयनन्तरकाले विभक्तनामरूपं सत् विविधविचित्ररूपं यत् जगत् परिदृश्यते; तत् सृष्टेः प्राक्काले अनिष्पन्ननामरूपविभागमेव आसीत्।

पृ.सं.

26. 'एकः सन् बहुधा विचारः' (तै.आर.3-11-2) 88

परमात्मा हि ! ब्रह्मादिस्थावरान्तेषु सर्वत्र, एक एव आत्मतया अन्तःप्रविश्य नियन्ता सन्नपि, बहुप्रकारेण वैविध्येन तत्र तत्र विचरतीव अनुभूयते ।

27. 'एकमेव अद्वितीयं ' (छा.उ.6-2-1) 13

सृष्टेः प्राक्काले, सच्छब्दवाच्यं (परब्रह्मात्मकं वस्तु) अविभक्तनामरूपतया एकत्वावस्थापन्नमेव अधिष्ठात्रन्तरशून्यमासीत् ।

28. 'एको देवो बहुधा निविष्टः. (तै.आर.3-14-1) 77

एक एव परमात्मा स्वयं ज्योतिर्मयविग्रहः चेतनाचेतनात्मकनानाप्रकारान् प्रति प्रकारितया आत्मत्वेन अवस्थितिं प्राप्तः ।

29. 'एको ह वै नारायण आसीन्न ब्रह्मा नेशानो ------ नेमे द्यावा पृथिवी न नक्षत्राणि'(महो.1-1) 106

सृष्टेः पूर्वं, नारायणपदवाच्यः परमात्मैक एव अवर्तत । किमप्यन्यत् ब्रह्मेशानद्यावापृथिवीनक्षत्रादिरूपं चेतनाचेतनजातं नैव अवर्तत ।

30. 'एतस्य वा अक्षरस्य प्रशासने गार्गि । ददतो मनुष्याः प्रशंसन्ति, यजमानं देवा दर्वीं पितरोऽन्वायत्ताः' (बृ.उ.5-8-8) 148

हे गार्गि ! सर्वचेतनान्तर्यामिभूतं क्षरणरहितत्वेनाक्षरशब्दवाच्यं यत् परं ब्रह्म, तत्प्रशासनरूपया आज्ञया निमित्तभूतया, ये दानादिरूपं कर्म कुर्वन्ति, दानपरान् तादृशाश्चेतनान् तदीयकर्मणा आकृष्टान्तःकरणाः मनुष्याः, ईदृशं भगवत्प्रीतिकरं कर्म अनुष्ठितवानयं जनः' इति मुक्तकण्ठं श्लाघन्ते । भगवदाज्ञारूपान् श्रुत्यादीननुरुध्य ये चेतनाः यागादीननुतिष्ठन्ति ; तान् चेतनान्, तत्कृतेन यागादिना आकृष्टस्वान्ताः देवाः अभिनन्दन्ति । भगवदाज्ञामनुसृत्य स्वधाकारवत् पैतृकं कर्म अनुष्ठितवन्तं जनं, तत्कृतस्वधाकारादिना आकृष्टहृदयाः पितरः ससन्तोषं सत्कीर्तिमन्तं कुर्वन्ति ।

31. 'एतस्य वा अक्षरस्य प्रशासने गार्गि ! सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' 148

(बृ.उ.5-8-8)

हे गार्गि ! पूर्वोक्तस्य सर्वान्तर्यामिणः परस्य ब्रह्मणः, क्वचिदप्यप्रतिहतया आज्ञया आदित्य-निशाकरौ द्यावा-पृथिव्यादि सर्वेऽपि च स्वे स्वे स्थाने स्वे स्वे कर्मणि च अप्रच्यवं प्राप्ताः धृतस्वरूपा अवस्थिता भवन्ति ।

पृ.सं.

32. एष एव ह्येवैनं साधुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति। 94

एष एवासाधु कर्म कारयति तं यमधो निनीषति ।।'

(कौषी.उ.3-64,65)

यं चेतनं केवलकर्मफलानुभवयोग्येभ्यो मर्त्यादिलोकेभ्यस्सकाशात् उन्नतं भगवल्लोकं प्रापयितुं स्वयं संकल्पयति ; तम् एष परमात्मैव तदुपायभूतानि साधुकर्माणि कारयति । यं तु चेतनं प्राप्तेभ्य एभ्यो मर्त्यादिलोकेभ्योऽपि अधस्तनान् आत्मानन्दतिरोधायकान् लोकान् गमयितुमिच्छति, तम् उपासनप्रतिबन्धकानि कर्माणि कर्तुं प्रेरयति ।

33. 'एष त आत्मान्तर्याम्यमृतः' (बृ.उ.5-7-7) (प्र.114 दृष्टव्यः) 88

34. 'एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः' 4

(सुबा.उ.7)

'योऽक्षरमन्तरे संचरन्' इत्याद्युक्तः एष परमात्मा, निखिलचराचरान्तर्यामी, अश्लिष्टसुकृत दुष्कृतः, दिव्ये परमे व्योम्नि विराजमानः, निस्समाभ्यधिकः भगवान् नारायणः ।

35. 'एष ह्येवानन्दयाति' (तै.उ.आन.7-1) 88, 148

आनन्दमयः परमात्मैव खलु ! सर्वानप्यानन्देन योजयति ।

36. i. 'ऐतदात्म्यमिदं सर्वम् -----तत्त्वमसि श्वेतकेतो' (छा.उ.6-8-7) 169

ii. 'ऐतदा --------- तत्सत्यम्' 17

iii 'ऐतदात्म्यमिदं सर्वम्' 17

इदं सत्यम् प्रमाणप्रतिपन्नं चेतनाचेतनात्मकं सर्वं जगत्, उपादानभूतेन अन्तर्यामिभूतेन च अनेन ब्रह्मणा व्याप्तम् । स परमात्मा सर्वस्य नियन्ता । अतः हे श्वेतकेतो ! त्वं तादृशब्रह्मात्मकोऽसि ।

37. 'कं ब्रह्म खं ब्रह्म' (छा.उ.4-10-5) 174

(यः सर्वस्य जगतः प्राणयिता स ब्रह्म ।) आनन्दस्वरूपं ब्रह्म, अपरिच्छिन्नस्वरूपं ब्रह्म । (यद्वा निरतिशयापरिच्छिन्नानन्दस्वरूपं ब्रह्म ।)

38. 'कथं नु भगवः स आदेशः ?' (छा.उ.6-1-3) 12

स्वज्ञानेन अश्रुतस्य सर्वस्य श्रुतत्वापादकः, अमतस्य मतत्वापादकः, अविज्ञातस्य विज्ञातत्वापादकश्च आदेष्टृरूपोऽर्थः कीदृशप्रकारापन्नो भवेत् ?

पृ.सं.

39. 'कथमसतः सज्जायेत?' (छां.उ.6-2-2) 36

असतः द्रव्यस्य सत्ता - उत्पत्तिः कथं वा भवितुमर्हति ? नैव ; अपि तु सत एव द्रव्यस्य प्रथमक्षणावच्छिन्नावस्थान्तरसम्बन्ध एव उत्पत्तिः (इत्यर्थः) ।

40. 'कश्च ध्येयः' (अ.शिखा.1-2) 109

(मुमुक्षुभिः संसारमोचनपूर्वकम् अमृतत्वार्थी) को वा देवताविशेषः ध्यातव्यः ?

41. i. 'कारण तु ध्येयः सर्वैश्वर्यसम्पन्नः सर्वेश्वरः शम्भुराकाशमध्ये (ध्येयः)' (अ.शिखा.2-17) 104

ii. 'कारण तु ध्येयः' 109

यत्तु परमकारणं तदेव च मुमुक्षुभिः मोक्षार्थमुपास्यम् । तच्च वस्तु, सर्वविभूतिसम्पन्नः सर्वनियन्ता सर्वमंगलप्रदः भगवान् नारायण एव । अत एव सः मुमुक्षुभिः हृदयाकाशमध्ये ध्येयः ।

42. 'किं तदत्र विद्यते यदन्वेष्टव्यम्' (छां.उ.8-1-2) (प्र 71 द्रष्टव्यः) 115

43. 'किं स्विद्वन क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा पृच्छतेदुतद्यदध्यतिष्ठद्भुवनानि धारयन् ।' 35

(तै.ब्रा.2-8-9-15)

हे मननशीलाः विवेचकाः ! लोके हि ! गृहं चिकीर्षुः पुमान् वनं गत्वा, तत्र कंचित् वृक्षं छित्वा, तदीयैः काष्ठैः (दारुभिः) गृहं निर्मिमीते । तद्दृष्टान्तेन 'अत्राऽपि कस्माद् वनजन्यात् वृक्षात् द्युलोकभूलोकौ लोकनिर्माता निर्मितवान्, तादृशवृक्षाधिकरणभूतं वनं किं वा भवेत् ? तादृशवनवृत्तिः दारुप्रकृतिभूतो वृक्षः तादृशः को वा स्यात्, येन लोकभवनं निर्मितं भवेत् ? यच्च कर्तृभूतं वस्तु सर्वान् लोकान् स्वात्मनि धारयत् नियमनमकरोत्, तादृशमहामहिमयुक्तं वस्तु किम् ?' इतीमं विचार्यमर्थं (गुरुसकाशं गत्वा) पृष्ट्वा जानीत ।

44. 'कुतस्तु खलु सोम्यैवं स्यात्' (छां.उ.6-2-2) 36

हे सोमार्ह ! 'असतः हेतुभूतात् सद्वस्तु जायते' इत्येतत् (नाम) असत उत्पत्तिः, केन वा प्रमाणेन प्रतीयेत ? असम्भावितमिदम् इत्यर्थः ।

45. 'क्षयन्तमस्य रजसः पराके' (तै.सं.2-2-12-18) 152,154, 156,164

अस्य त्रिगुणात्मकस्य प्रकृतिमण्डलस्य परस्ताद्विद्यमाने परमव्योमात्मके स्थाने वैकुण्ठधामनि वसन्तं परमात्मानम् (उपास्महे) ।

पृ.सं.

चरात्मकं चेतनाऽचेतनरूपं जगत् सृष्ट्वा, तावन्मात्रेऽपर्यवस्यन् सर्वत्र अनुवृत्ततया प्रतिवस्तु प्रवेशं कृतवान् । अनुप्रवेशं कृत्वा च निर्विकारतया सततैकचेतनरूपि, तथा पूर्वावस्थापरित्यागरूपविकारास्पदाचेतनरूपि च सत् ब्रह्मैव, चेतनाऽचेतननाम- रूपभाक् अभवत् ।

54. 'तदक्षरे परमे व्योमन्' (तै.ना.उ.1-2) (प्र.55.दृष्टव्यः) 84, 154

55. 'तदेव भूतं तदु भव्यमा इदं, तदक्षरे परमे व्योमन्'(तै.ना.उ.1-2) 152

सर्वस्य जगतः प्रलयस्थानभूतं, सर्वेषां देवानामाश्रयभूतं च ब्रह्म, भूत भविष्यदात्मकनिखिलप्रपंचशरीरकं सर्वात्मभूतं, परमव्योमशब्दिते क्षरणशून्ये परम-धामनि विराजते ।

56. 'तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः' (तै.ना.उ.1-7) 144

पूर्वोक्तः सर्वकर्मसमाराध्यः परमात्मैव, अग्नि-वायु-सूर्य-चन्द्रात्मकः ।

57. i. 'तदैक्षत बहु स्यां प्रजायेय' (छा.उ.6-2-3) 8,14, 27

ii. 'तदैक्षत बहु स्यां' 18

तत् सच्छब्दवाच्यं परं ब्रह्म, 'विचित्रानन्तचिदचिन्मिश्रव्यष्टिजगद्रूपेण अहमेव बहु स्यां, (तदर्थं तेजोबन्नादिसमष्टिरूपेण प्रकर्षेण जायेय' इति) संकल्पं कृतवत् ।

58. 'तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम्' 157

(सुबा.उ.6)

विष्ण्वाख्यस्य परस्य ब्रह्मणः, यत् त्रिगुणातीतं, सत्यलोकाख्यात् विरिंचिस्थानादपि अतिशयिततरं स्थानं, तस्मिन् विप्रपदाभिधेयाः मेधाविनो नित्यसूरयः, अस्खलितनिरन्तरब्रह्मानुभवसम्पन्नाः सतताऽनुवृत्तभगवत्स्तुति-परायणाः विराजन्ते ।

59. i. 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' (सुबा.उ.6) 152,

ii. 'तद्विष्णोः परमं पदम्' 154,155

अमृतत्वस्याश्रयभूतम् अप्राकृतं सर्वव्यापनशीलस्य महाविष्णोः सर्वाधिकं स्थानं, सर्वोत्कृष्टं स्वरूपं वा परमं पदम् । तत् निरस्ततिरोधानतया अप्रतिहत-प्रसरणशीलज्ञानवन्तः सूरिपदाभिधेयाश्चेतनाः निरन्तरायतया निरन्तरं साक्षात्कुर्वते ।

पृ.स.

60. 'तमसः परस्तात्' (तै.आर.पु.3-13-2) (प्र.149. दृष्टव्यः) 164

61. 'तमादेशमप्राक्ष्यः येनाऽश्रुतं श्रुतं भवति' (छां.उ.6-1-3) 14

(प्र136. दृष्टव्यः)

62. 'तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम्'(श्वे.उ.6-7) 88

ईशितृत्ववतां ब्रह्मादीनां मध्येऽत्यन्तं श्रेष्ठम्, अत एव महत्त्वविशिष्टम् ईश्वरम्, आराध्यत्ववताम् अग्नीन्द्रादीनां मध्ये श्रेष्ठम् आराध्यम् (परमात्मानं परज्ञानेन साक्षात्कुर्मः) ।

63. 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ.उ.6-4-22) 4

ज्ञेयत्व-प्राप्यत्वाद्युपयोगिसर्वेश्वरत्वादिगुणविशिष्टं परमात्मानं, गुरुमुख-गृहीतानां वेदशाखाविशेषाणां नियमयुक्तेनाध्ययनेन, देवताराधनरूपेण द्रव्ययज्ञादिना कर्मणा, न्यायार्जितस्य धनस्य सत्पात्रेषु समर्पणरूपेण दानेन, फलाभिसन्धिरहिततया अनुष्ठीयमानेन कृच्छ्रचान्द्रायणादिरूपेण तपसा, अनशनेन च उपासनोपयोगिना प्राप्तुं, त्रैवर्णिकाः तीव्रमभिलषन्ति ।

64. i. 'तमेवं विद्वानमृत इह भवति । नाऽन्यः पन्था अयनाय विद्यते' (तै.आर.पु.3-12-17) 98

ii. 'तमेवं ----------- भवति' 175

पुरुषसूक्तप्रतिपाद्यं तं परमपुरुषं यः उक्तया रीत्या उपास्ते, साक्षात्करोति च ; स इहैव जन्मनि मुक्तभोग्यं परमात्मानमनुभवति । भगवत्प्राप्तये उक्तादन्यः उपायो नैवास्ति ।

65. 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' (कठ.उ.5-15) 165

चन्द्रादित्यनक्षत्रविद्युदग्निरूपाणां सर्वेषां तेजसां छादकम् (अभिभावकम्) उक्तानां निखिलानां तेजसां कारणभूतमनुग्राहकं च अंगुष्ठप्रमितस्य परमात्मनो ज्योतिर्दृश्यते ।

66. 'तमेव विदित्वाऽतिमृत्युमेति नाऽन्यःपन्था विद्यतेऽयनाय' (श्वे.उ.3-8) 110

प्रकृतिमण्डलस्य त्रैगुण्यमयस्य परस्तात् - ऊर्ध्वं विराजमानं परमपुरुषं ज्योतिर्मयविग्रहं विदित्वैव उपासकश्चेतनः अतिक्रान्तसंसारो भवति । भगवत्प्राप्तये उक्तादन्यः उपायो नैवास्ति ।

पृ.सं.

पृ.सं.

यतः व्यष्टिसमष्टिरूपनिखिलचेतनाऽचेतनात्मकं जगत्, तन्निर्वाहकदेवजातं च परिच्छिन्नवैभवं सत्, न परमकारणम् ; अतः न तत् मुमुक्षुभिर्ध्यातव्यम् ।

75. 'न चक्षुषा गृह्यते नाऽपि वाचा' (मुण्ड.उ.3-1-8) 163

परमात्मा चाक्षुषज्ञानेन, तथा वाग्जन्यज्ञानेन - शाब्दज्ञानेन च न साक्षात्कर्तुं शक्यते ।

76. i. 'न तस्येशे कश्चन तस्य नाम महद्यशः' (तै.ना.उ.1-10) 106,119

ii. 'न तस्येशे कश्चन' (प्र.92.दृष्टव्यः) 107,109,

77. 'न मेधया' (मुण्ड.उ.3-2-3) (प्र.82.दृष्टव्यः) 112

78. 'न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाऽभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति ।।'
(तै.ना.उ.1-11) 98

अस्य परमात्मनो दिव्यं रूपं यतः इन्द्रियाग्राह्यम्, अत एव न कोऽपि साक्षात्कर्ता पुरुषः, चक्षुर्नामकेन इन्द्रियेण एनं द्रष्टुं प्रभवति, एषः, भक्तिधृतिभ्यां सहितेन शुद्धेन मनसैकेनैव ग्राह्यः । तादृशमेनं ये उपासकाः साक्षात्कुर्वन्ति ; ते मुक्तिभाजो भवन्ति ।

79. 'न सन्न चाऽसच्छिव एव केवलः' (श्वे.उ.4-18) (प्र.126. दृष्टव्यः) 106

80. 'नाऽन्यः पन्था अयनाय विद्यते' (तै.आर.पु.3-12-17) (प्र.64. दृष्टव्यः) 83, 119

81. 'नामरूपे व्याकरवाणि' (छां.उ.6-3-2) (प्र.13.दृष्टव्यः) 21

82. 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ।।'
98
(मुण्ड.उ.3-2-3)

प्रस्तुत एष परमात्मा तत्प्रसन्नतायामपर्यवसितैः केवलैः श्रवण मनन निदिध्यासनैः अतिशयेन कृतैरपि नैव लब्धुमर्हः । स एव परमात्मा यादृशमुपासकं स्वसायुज्यं प्रापयितुमिच्छुः सन् स्वीकरोति ; तस्यैव सः स्वात्मानं स्वीयस्वरूपगुणविग्रहादिभिः सह अनुभवविषयतां नयति । प्रीतिरूपापन्नेन ध्यानेनैव लभ्यो भवति परमात्मा।

83. 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्'
(कठ.उ. 5-13) 66

परमात्मा हि स्वयं नित्य एक एव सन्नपि, नित्यानाम् असंख्यातानां

पृ.सं.

चेतनानामपेक्षितानर्थान् अनायासेनैव प्रयच्छति । (तत्साक्षात्कारः परमशान्तिहेतुः)।

84. 'निदिध्यासितव्यः' (बृ.उ.6-5-6) 98

(हे मैत्रेयि !) परमात्मैव दर्शनसमानाकारेण ध्यानेन विषयीकार्यः ।

85. 'निरवद्यं निरंजनम्' (श्वे.उ.6-19) 87

उक्तं परं ब्रह्म आश्रितपराङ्मुखत्वाद्यवद्यरहितम्, निर्लिप्तम् असंगस्वभावम्।

86. 'निर्गुणः' (श्वे.उ.6-11) 10. 87

सकलप्रपंचनिर्मातृत्वेऽपि गुणत्रयवश्यत्वाभाववान् परमात्मैक एव ।

87. 'निर्विकारम्' (यो.शिर.3-21) 87

उक्तं परं ब्रह्म विकाररहितम् ।

88.i. 'निष्कलं निष्क्रियं शान्तम्' (श्वे.उ.6-19) 87

ii. 'निष्कलम्' 10

निरवयवं, कृतकृत्यत्वात् निष्क्रियम्, अशनायाद्यूर्मिषट्करहितम् ; असंगस्वभावं च परं ब्रह्म ।

89. 'निष्क्रियम्' (श्वे.उ.6-19) (प्र.89.दृष्टव्यः) 10

90. 'नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा' (तै.ना.उ.11-11) 151

सेऽयं दहरपुण्डरीकमध्यस्थाकाशवर्तिनी वह्निशिखा, स्वान्तर्निहित नीलतोयदाभपरमात्मस्वरूपा, स्वान्तर्निहितनीलतोयदा विद्युदिव आभाति ।

91. i. 'नेह नानाऽस्ति किंचन, मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ.उ.6-4-19) 87

ii. 'नेह --------- किंचन' 41, 119

दृष्टव्यतया पूर्वप्रस्तुते परे ब्रह्मणि सर्वाधारे सर्वशरीरके, (सर्वान् प्रति आत्मत्वे आधारत्वे वा) अल्पोऽपि भेदो नैवाऽस्ति । सर्वांश्चेतनाचेतनान् प्रति एकरूपे तस्मिन्नात्मनि (अत एव परमात्मनि) अत्यल्पमपि भेदं यः स्वबुद्ध्याचिन्तयति, सः नैव मुक्तो भवति ; अविरतमेव संसारं प्राप्नोति ।

92. 'नैनमूर्ध्वं न तिर्यंच न मध्ये परिजग्रभत् ।

न तस्येशे कश्चन तस्य नाम महद्यशः ।।' (तै.ना.उ.1-10) 106

पूर्वोक्तनिमेषकलाकाष्ठादिसर्वविधकालस्रष्टारम् एनं परमात्मानम्, तदीय-शुद्धस्वरूपसाक्षात्कर्ता यः कोऽपि पुरुषः, ऊर्ध्वाधोदेशव्याप्ताकारमिति वा,

पृ.सं.

तद्विलक्षणतिर्यग्देशव्याप्ताकारमिति वा, ऊर्ध्वतिर्यगुभयविलक्षणमिति वा नैव जानाति; (अनन्तत्वात् एतत्स्वरूपस्य) । तस्य परमात्मन ईशिताऽपि न कश्चन विद्यते । ईदृशमहामहिमरूपं यशः तस्यैकस्य परमात्मन एव, न अन्यस्य कस्याऽपि ।

93. i. 'पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्' (तै.ना.उ.11-3) 109

ii. 'पतिं ------------- त्मेश्वरम्' 162

iii. 'पतिं विश्वस्य ------------' 140,173

चेतनाचेतनात्मकसर्वजगन्नियन्तारं, सर्वेषां मातापितृवत् वात्सल्येन पालकं, स्वशासकव्यक्त्यन्तररहितम् स्वाधीनसर्वैश्वर्यं नारायणाख्यं परं ब्रह्म उपजीव्य सर्वं विश्वम् वर्तते ।

94. 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'

(श्वे.उ.6-17) 24, 165

'न तस्य ------------ दृश्यते' इत्युक्तस्याऽस्य भगवतः सर्वातिशयिता स्वभावायत्ता ज्ञानबलैश्वर्यादिरूपा अनन्तापरिमिताश्चर्यकरी शक्तिः श्रुत्यादिप्रमाणेषु श्रूयते ।

95. 'पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः'

(तै.आर.पु.3-12-2) 119

लोके विद्यमानम् अतीतानागतात्मकं कार्यजातं पुरुष एव ; सर्वस्य पुरुषोपादानकत्वात् । अयमेव च पुरुषः मुमुक्षूणाम् उपासनादिना प्रीतः, मोक्षान्तैश्वर्यप्रदानस्याऽपि प्रभुः ।

96. 'पुरुषम्' (तै.आर.पु.3-13-2) (प्र.149. दृष्टव्यः)

97. i. 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनाऽमृतत्वमेति'

(श्वे.उ.1-6) 66,91

ii. 'पृथगात्मानं ------ मत्वा' 88

संसारचक्रे बंभ्रम्यमाणं जीवरूपं स्वात्मानं, तत्र भ्रमयितारं परमात्मानं च, भ्राम्यमाणत्व- भ्रामयितृत्वाभ्यां तत्तद्गताभ्यां धर्माभ्यां पृथक्त्या श्रवण मननादिना निश्चित्य, तत्प्रभवोपासनतः सुप्रीतेन परमात्मना प्रीतिविषयीकृतो जीवात्मा, मुक्तो भवति ।

पृ.सं.

98. **'प्रजापतिरकामयत प्रजाः सृजेयेति'** (तै.सं.उ.1-1-1) 88

सृष्टिकार्यनिर्वहणाधिकारे नियुक्तः प्रजापतिः 'भगवदाज्ञामनुरुध्य, प्रजानां सृष्टिं कुर्याम्' इति इच्छां संकल्पात्मिकां कृतवान् ।

99. **'प्रधानक्षेत्रज्ञपतिर्गुणेशः'** (श्वे.उ.6-16) 66

परमात्मा हि ! प्रकृति-पुरुषयोः शेषिभूतः, सत्त्व-रजस्-तमसां नियन्ता, संसारप्रवृत्तेः, तन्मोक्षस्य संसारानुवृत्तेश्च यथायोग्यं कारणभूतो भवति ।

100. i. **'प्राण मनसि सह करणैः नादान्ते परमात्मनि सम्प्रतिष्ठाप्य, ध्यायीतेशान प्रध्यायितव्यम्'** (अ.शिखा.2-14) 104

ii. **'प्राण ------ करणैः'** 108

मनसि विलयं प्रापितैः इन्द्रियैः सह 'प्राण' पदवाच्यं जीवमपि अर्धमात्रावसाने परमात्मनि तच्छेषतैकप्रवणतया स्थापयित्वा, प्रकर्षेण ध्यातव्यतया श्रुतिप्रतिपन्नम् 'ईशान' पदाभिधेयं सर्वनियन्तारं परमात्मानं निरन्तरया चिन्तनया विषयीकुर्यात्।

101. **'बहु स्यां प्रजायेय'** (छां.उ.6-2-3) (प्र.57. दृष्टव्यः)

102. **'ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद्भुवनानि धारयन् ।।'** (तै.ब्रा.2-8-9-15) 35, 119

यदुक्तं मनीषिणां प्रश्नत्रयं, तस्य आचार्यः उत्तरं ब्रूते । यस्माद्वनजन्याद्वृक्षात् द्यावापृथिव्यौ निर्मिमीतें, तादृशवनस्थानीयं च ब्रह्मैव ; तस्य सर्वशक्तित्वात् यस्योत्पाद्यस्य या सामग्री अपेक्षिता, सा सर्वा तस्मिन् ब्रह्मण्येव विद्यते ।

103. **'ब्रह्म वा इदमेकमेवाग्र आसीत्'** (बृ.उ.3-4-11) 105

सृष्टेः पूर्वम्, इदं ब्रह्मैकमेवासीत् ; विविधनामरूपापन्नं जगत् नासीत् । 4, 98,

104. **'ब्रह्मविदाप्नोति परम्'** (तै.उ.आन.1-1) 108,132

निरतिशयबृहत्त्वाश्रयब्रह्मोपासकः सर्वोत्कृष्टं स्वोपास्यं ब्रह्मैव प्राप्नोति ।

105. **'ब्रह्म वेद ब्रह्मैव भवति'** (मुण्ड.उ.3-2-9) 175

य उपासकः प्रीतिरूपापन्नदर्शनसमानाकारध्यानेन ब्रह्म साक्षात्करोति ; सः आविर्भूतब्राह्मरूपो भवति । असंकुचितज्ञानाद्याविर्भाववान् भवति ।

106. **'भगवांस्त्वेव मे तद्ब्रवीतु'** (छां.उ.6-1-7) 13

सर्वज्ञानकारणभूतज्ञानविषयम् आदेष्टृरूपं वस्तु, ज्ञानैश्वर्यसम्पन्नो भवानेव,

पृ.सं.

करुणया मह्यमुपदिशतु ; गुरुकुलं प्रति पुनः मा प्रेषयतु ।

107. **'भीषास्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पंचम इति'** (तै.उ.आन.8-1) 148

अस्य परमात्मनः शासनातिक्रमणे अत्यन्तं भयेन वायुदेवः स्वीये कर्मणि जागरूकः सन् वाति । सूर्योऽपि भीतः सकाले उदयकर्मणि सक्तो भवति । तथा अग्नीन्द्रमृत्यवोऽपि स्वस्वकर्मनिर्वाहार्थं सम्भ्रमेण त्वरितगत्या चलन्ति ।

108. i. **'भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्'** (श्वे.उ.1-12) 66

ii. **'भोक्ता -------- मत्वा'** 88, 92

उपास्यं परमात्मानं, भोक्तृशरीरकत्वेन, भोग्यशरीरकत्वेन, तदुभयप्रेरकसत्य ज्ञानादिस्वरूपत्वेन च त्रिधा उपास्य, चेतनः मुक्तो भवति ।

109. **'मनोमयः, प्राणशरीरो, भारूपः, सत्यसंकल्पः, आकाशात्मा, सर्वकर्मा, सर्वकामः, सर्वगन्धः, सर्वरसः, सर्वमिदमभ्यात्तोऽवाक्यनादरः'** (छांउ.314-2) 151

परमात्मा हि ! विवेकाद्यनुगृहीतोपासननिर्मलीकृतान्तः करणमात्रग्राह्यः, आधेय-विधेयशेषभूतप्राणशब्दितजीवशरीरकः नित्यनिरतिशयदीप्तिमद्दिव्यमंगलविग्रह-सम्पन्नः, येन केनाऽपि यदा कदाप्यप्रतिहतस्वसंकल्पः, आकाशवत् सूक्ष्मस्वच्छस्वरूपः, अव्याकृताकाशपदवाच्यस्य प्रधानस्याऽपि आत्मभूतः, (सर्वजगन्निर्माता, सर्वकर्मसमाराध्यः,) अत्यन्तपरिशुद्धभोग्यभोगोपकरणसमृद्धः, अप्राकृतस्वासाधारणगन्धादिमान् सर्वमपि कल्याणगुणं स्वीकृत्य, अवाप्तसमस्त-कामतया गाम्भीर्येण तूष्णीमवस्थितः ।

110. **'महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः'** (श्वेउ.3-12) 112

पूर्वप्रस्तुतः पुरुष एव, महान् प्रभुः मोक्षाख्यमहाफलप्रदानसमर्थः, तथा मोक्षार्थ- ज्ञानहेतुभूतसत्त्वगुणोन्मेषकारणकटाक्षविशेषशालितया शास्त्रसिद्धश्च ।

111. **'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'** (श्वे.उ.4-10) 73

ईश्वराधिष्ठितां विचित्रार्थसर्गकरीं प्रकृतिमेव, मायापदाभिधेयां जानीयात् । तदधिष्ठातारं तु महेश्वरं जानीयात् ।

पृ.सं.

112. 'माहारजन (तं) वासः'(बृ.उ.4-3-6) 152

मूर्तामूर्तचिदचिच्छरीरकस्य तस्यैतस्य ब्रह्मणो दिव्यविग्रहस्य रूपं, हरिद्रारंजितस्य वाससः प्रकाशमानं रूपमिव वर्तते ।

113. 'यः पृथिवीमन्तरे संचरन्, यस्य पृथिवी शरीरं, यं पृथिवी न वेद'

(सुबा.उ.7)ह 65

यः परमात्मा पृथिव्यामन्तः तिष्ठन्, पृथिवी यं परमात्मानं प्रति आधेयत्व विधेयत्व शेषत्ववती, यं च स्वान्तरेवाऽवस्थितमपि पृथिवी नैव वेदितुं शक्नोति ।

114. 'यः पृथिव्या तिष्ठन्, पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयति, एष त आत्माऽन्तर्याम्यमृतः'

(बृ.उ.5-7-7) 65

यः परमात्मा अन्तः पृथिव्यां तिष्ठन्, यस्यैव च पृथिवी आधेयत्व विधेयत्व शेषत्ववती, यं च स्वान्तरेवाऽवस्थितमपि पृथिवी नैव वेदितुं शक्नोति, यः पृथिवीमन्तः प्रविश्य तत्प्रवृत्तिनिवृत्तिनियमनं करोति, निरुपाधिकामृतत्वशाली स परमात्मैव, तवाऽप्यात्मा ।

115. i. 'यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः' (मुण्ड.उ.1-1-10) 87

ii. 'यः --------- सर्ववित्' 24, 165

भूतयोनित्वेन प्रस्तुतो योऽर्थः, असंकोचेन सर्ववस्तु-तद्‌गतसर्वप्रकारविषयकज्ञानवान्, यस्य सृष्ट्युपकरणतया संकल्पातिरिक्तं यत्किंचित् नापेक्षितं, संकल्पमात्रेण सृष्ट्युन्मुखात्तस्माद्ब्रह्मणः अव्याकृताख्यं ब्रह्म, तद्द्वारा नामरूपपरिष्वक्तम् अन्नशब्दनिर्दिष्टभोग्यभोक्तृरूपं जगच्च जायते ।

116. 'य आत्मनि तिष्ठन् आत्मनोऽन्तरो यमात्मा न वेद, यस्याऽऽत्मा शरीरं, य आत्मानमन्तरो यमयति, स त आत्माऽन्तर्याम्यमृतः'

(बृ.उ.मा.पा.5-7-26) 4

यादृश आत्मा, सर्वस्मिन् जीवात्मनि स्थितः, तदन्तर एव सन्नपि तदवेद्यः, तच्छरीरकश्च सन्, तदन्तःप्रविश्य तत्प्रवृत्ति-निवृत्तिरूपव्यवहारनियमनं करोति, स एव निरुपाधिकामृतत्वशाली परमात्मा, तवान्तर्यामी ।

117. 'य एतद्विदुरमृतास्ते भवन्ति, अथेतरे दुःखमेवाऽपियन्ति' (श्वे.उ.3-10) 111

(प्र50. दृष्टव्यः)

पृ.सं.

118. **'य एनं विदुरमृतास्ते भवन्ति'** (तै.ना.उ.1-11, कठ.उ.6-9) (प्र.78.दृष्टव्यः) 98

119. **'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः ।**
तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी' (छां.उ.1-6-6,7) 151

ध्यानपरैर्योगिभिः, आदित्यमण्डलात्मकाधिष्ठानस्यान्तरवस्थिततया यः पुरुषः, ध्यानदशायां हितरमणीयाकृतिः, उज्वलः साक्षात्क्रियते ; सः रमणीयश्मश्रुकेशः, नखमारभ्य शिखान्तं सर्वावयवेषु रमणीयाकृतिः गम्भीराम्भस्समुद्भूतसुमृष्टनालरविकरविकसितपुण्डरीकदलामलायतेक्षणः, 'उत्' इति शब्दवाच्यः ।

120. **'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति,**
यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व । तद्ब्रह्म' (तै.उ.भृ.1-2) 105

प्रमाणसिद्धानि सर्वाणि भूतानि निमित्तोपादानभूतात् यस्मादेव वस्तुनः लब्धात्मस्वरूपाणि भवन्ति, स्वात्मतयावस्थितयद्वस्त्वधीनसकलप्रवृत्तिनिवृत्तिमन्ति भवन्ति, कार्यावस्थातः कारणावस्थां प्राप्नुवन्ति च सन्ति, यदेव वस्तु लयाधारतया प्रविशन्ति ; तदेव सर्वभूतसृष्टिस्थितिलयकारणं ब्रह्मशब्दवाच्यं वस्तु । (अतः तदेव श्रवणमनननिदिध्यासनैः उपास्व) ।

121. **यत्र त्वस्य सर्वमात्मैवाभूत् तत् कं पश्येत्, तत्केन कं विजानीयात्**
(बृ.उ. 4-4-14) 87

यदा तु अस्य जीवस्य निखिलमपि वस्तु परमात्मापृथक्सिद्धम् एकात्मकमेव भासते;तस्यामवस्थायां भिन्नात्मकमेन केन कारणेन, कं वा भिन्नात्मकं विषयं, को वा भिन्नात्मकः कर्ता स्वतन्त्रः साक्षात्कुर्यात्, कथंचित् जानीयाद्वा ? सर्वथा अशक्यं तु तत् ।

122. **'यत्र पूर्वे साध्याः सन्ति देवाः'** (तै.आर.पु.3-12-18) 157

यस्मिन् स्थाने पुराणाः साध्या नाम देवविशेषाः नित्याः सूरयः - अवृत्तसंसाराः चेतनविशेषाः, अप्रच्युतभगवदनुभवसिद्धिमन्तः नित्यं वसन्ति ; तत् दुःखसम्बन्धवर्जितं वैकुण्ठाख्यं स्थानम् ।

123. **'यत्रर्षयः प्रथमजा ये पुराणाः'** (तै.सं.4-7-13-2) 157

ये अनादिसिद्धाः महर्षयः, ये च सृष्ट्यादावेव उत्पन्नाः महर्षयः, ते चैते यस्मिन् दुःखासम्भिन्ने स्थानविशेषे वसन्ति, (तं लोकं वयं गच्छेम) ।

पृ.सं.

124. i. 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् ; वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां.उ.6-1-4) 13

ii. 'यथा------मृत्पिण्डेन' 33

एकमेव मृद्द्रव्यं स्वैकदेशेन नानाव्यवहारास्पदत्वाय घटशरावादिनाना-संस्थानावस्थारूपविकारापन्ननानानामधेयमपि, मृत्तिकासंस्थानविशेषत्वात्, मृद्द्रव्यमेव इत्थमवस्थितम् ; न वस्त्वन्तरमिति, यथा मृत्पिण्डविज्ञानेन तत्संस्थानविशेषघ टशरावादिरूपं सर्वं विज्ञातमेव भवति तथा ।

125. 'यदाग्नेयोऽष्टाकपालः' (तै.सं.2-6-3-4) 153

'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति' इति पूर्णं वाक्यम् ।)

अंगिरो नामभिः ऋषिभिः, 'इन्द्राद्यर्थं त्वां दास्यामः त्वमवतिष्ठस्व' इत्युक्तः पुरोडाशाभिमानी देवः अतिष्ठन्नपि, 'अग्न्यर्थं दास्यामः तिष्ठ' इत्युक्तिमात्रेण स्थितः इति यत्, तस्मात् अग्निदेवतोद्देश्यकः अष्टसु कपालेषु संस्कृतः पुरोडाशः च्युतिरहितः दर्श पूर्णमासयोः उभयोरपि अवश्यं कर्तव्य एव ।

126. 'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चाऽसच्छिव एव केवलः । तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी' ।।

(श्वे.उ.4-18) 104

यस्मिन् महाप्रलयकाले, अद्यत्वे इव अहोरात्रविभागो नैव वर्तेते । तथा सत्पदाभिधानार्हमूर्तप्रपंचः, असत्पदाभिधानार्हामूर्तप्रपंचश्च नैव वर्तेते ; तदा विकारापुरुषार्थगन्धशून्यः मंगलानां च मंगलभूतः परमपुरुष एक एव विराजते । तदेव च क्षरणविदूरं वस्तु । तदेव सर्वप्रेरकस्य परमात्मनः, मोक्षार्थं वरणीयं दिव्यं ज्योतिर्मयं स्वरूपम् । तस्मादेव परब्रह्मणः, सृष्टिस्थितिसंहाराद्युपयोगिनी, सर्वचेतनगता च ज्ञानरूपा शक्तिः संकुचितावस्थातः विकसितावस्थां प्राप्ता विजृम्भते ।

127. 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्' (तै.ना.उ.1-5) 152

यत् परं ब्रह्म सृष्टेः प्राक् प्रलयदशायां सूक्ष्माविभक्तनामरूपचिदचिच्छरीरकतया एकमेव वर्तमानम्, अव्यक्तपदवाच्याव्याकृतशरीरम्, अत एव निखिलचराचर-शरीरकम्, अनादिप्रकृतिमण्डलात् उपरिस्थिते परमव्योमनि विराजमानम् ; (तदेव, मुनयः ऋतं सत्यं चेति योगप्रभवया प्रज्ञया वर्णयन्ति) ।

पृ.सं.

128. 'यमन्तः समुद्रे कवयो वयन्ति' (तै.ना.उ.1-3) 106

यं परमात्मानं क्रान्तदर्शिनो ज्ञानिनः, समुद्रे - समुद्रवत् दुष्प्रवेशे, अत्यन्तमगाधे गूढे च हृदयमध्यप्रदेशे साक्षात्कुर्वन्ति ।

129. i. 'यमेवैष वृणुते तेन लभ्यः' (मुण्ड.उ.3-2-3) 175

ii. 'यमेवैष------वृणु ते' 176

'नाऽयमात्मा श्रुतेन' इत्युक्तः परमात्मैव यादृशमुपासकं स्वसायुज्यं प्रापयितु-मिच्छुः सन् स्वीकरोति ; (तस्यैव सः स्वीयस्वरूपगुणविग्रहादिभिः सह अनुभवविषयतां नयति) ।

130.i. 'यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्' ।।
(श्वे.उ.3-9) 104

ii. 'यस्मात-----------किंचित्' 110

यस्मादन्यत् सर्वोत्कृष्टं वस्तु नास्ति, यदपेक्षया अतिशयेनान्तः प्रवेशयोग्यं सूक्ष्मतमं वस्तु नाऽस्ति, यस्माच्च अधिकं विवृद्धं किमपि वस्तु नाऽस्ति, यश्च अप्राकृते लोके अवाप्तसमस्तकामतया ब्रह्मादिकमपि तृणीकृत्य (गगनचुम्बी ऋजुर्दीर्घो वृक्ष इव) अप्रणतस्वभावः तिष्ठति, तेनानेन 'पुरुष' शब्दितेन भगवता वासुदेवेन इदं सर्वं व्याप्तम् ।

131. 'यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्' (श्वे.उ.3-9) 110
(प्र130. द्रष्टव्यः)

132. 'यस्य पृथिवी शरीरं यस्यापः शरीरं यस्य तेजः शरीरम्'(सुबा.उ.7) 88

यं पुरुषं प्रति पृथिव्यप्तेजोरूपा अर्थाः आधेयत्व-विधेयत्व-शेषित्ववन्तः (स एषः समस्तभूतनियन्ता, निरस्तसमस्तवृजिनः, परमव्योमस्थाने प्रकाशमानः, समाभ्यधिकद्वितीयरहितः भगवान् नारायणः) ।

133. 'यस्यात्मा शरीरम्' (बृ.उ.मा.पा.5-7-26) (प्र. 116. द्रष्टव्यः) 16,89

134. 'यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यस्य मृत्युः शरीरम्'(सुबा.उ.7) 88

अव्यक्तशब्दवाच्यं, अक्षरशब्दवाच्यं, मृत्युशब्दवाच्यं च वस्तु यं प्रति आधेयत्व विधेयत्व शेषत्ववन्ति (एष सर्वभूतनियन्ता नारायणः) ।

135. 'यावान्वा अयमाकाशः, तावानेषोऽन्तर्हृदय आकाशः'
(छा.उ.8-1-3) 115

पृ.सं.

हृदयपुण्डरीकमध्यवर्ती आकाशशब्दनिर्दिष्टोऽर्थः 'इदं' पदनिर्देश्य-भूताकाशवद्विपुलः।

136. i. 'येनाऽश्रुतं श्रुतं भवति, अमतं मतमविज्ञातं विज्ञातम्' (छा.उ.6-1-3) 11

ii. 'येनाऽश्रुतं श्रुतम्' 33

(हे श्वेतकेतो ! गुरुकुलान्निवृत्तः त्वम् ज्ञानार्जनविषये निर्व्यापारः सन् जडीकृतमना असि !) श्रवणविषयीकृतेन येनैकेन वस्तुना, श्रवणाविषयीकृतं सर्वमपि श्रवणगोचरतापन्नमेव भवेत्, मननविषयीकृतेन येनैकेन वस्तुना मनना-विषयीकृतं सर्वमपि मननगोचरापन्नमेव भवेत्, निदिध्यासनविषयीकृतेन येनैकेन वस्तुना, निदिध्यासनाविषयीकृतं सर्वमपि निदिध्यासनगोचरतापन्नमेव भवेत् (तादृशं सर्वप्रशासितृपरं वस्तु आदेशपदाभिधेयं गुरुसन्निधौ प्रश्नपूर्वकं किं ज्ञात-वानसि ? तस्मिन् वस्तुनि ज्ञाते सत्येव, इयं स्तब्धता पूर्णत्वनिमित्ता युज्येत) ।

137. 'यो अस्याध्यक्षः परमे व्योमन्' (तै.ब्रा.2-8-9-6) 152, 154

यः खलु परमात्मा, अस्य चेतनाऽचेतनमिश्रस्य संसारचक्रस्य अध्यक्षः नाभिस्थानापन्नः सर्वाधारोऽपि, परमे व्योम्नि विराजते ।

138. 'योऽक्षरमन्तरे संचरन् यस्याक्षरं शरीरं यमक्षरं न वेद, यो मृत्युमन्तरे संचरन्, यस्य मृत्युः शरीरं, यं मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः' (सुबा.उ.7) 65

(इदानीम् उपलभ्यमाने उपनिषत्पुस्तके क्रमवैपरीत्यं दृश्यते) ।

यः परमात्मा, अक्षराख्ये चिद्गर्भे अचेतनरूपे वस्तुनि अन्तस्तिष्ठन्, तथा मृत्युपदवाच्ये अचित्समष्टिरूपे अचेतने तमोरूपे अन्तस्तिष्ठन्, अक्षर-तमसी यस्य आधेयत्व-विधेयत्व-शेषत्ववन्तौ, तथा स्वान्तर्वर्तिनमेव यम् अक्षर-तमसीनैव जानीतः, स एषः सर्वेषां भूतानामन्तःप्रविश्य नियन्ता, सर्वदोषविदूरः, अक्षरपरमव्योमनिलयः स्वयंज्योतिः निस्समाभ्यधिकः नारायणपदवाच्यः ।

139. 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' (श्वे.उ.6-18) 102

यः परमात्मा, सर्वजगत्स्रष्टारं चतुर्मुखमपि, स्वयम् आदौ सृष्ट्वा, तदनन्तरं च तस्मै चतुर्मुखाय, सर्वजगत्सृष्ट्युपयोगिज्ञानाधायकान् सर्वान् वेदानपि स्वयमेव

पृ.सं.

प्रयच्छति, (तम् आदिस्रष्टुरपि स्रष्टारं, सर्वज्ञस्याऽपि ज्ञानप्रदं परमकारणं परमात्मानं, मोक्षमाकांक्षमाणः शरणमुपगतोऽस्मि) ।

140. 'यो वेद निहितं गुहायां परमे व्योमन्' (तै.उ.आन. 1-1) 84, 152, 154

यः खलूपासकः सत्यत्व ज्ञानत्व अनन्तत्वगुणकं परं ब्रह्म स्वीयहृदय-गुहानिहितत्वप्रकारेण उपास्ते ; सः अप्राकृताकाशशब्दाभिधेये परमपदे, (परं ब्रह्म, तद्गुणांश्च सहैव अनुभवति) ।

141. 'रसो वै सः, रसं ह्येवाऽयं लब्ध्वाऽऽनन्दी भवति' (तै.उ.आन.7-1) 172

'यद्वै तत्सुकृतम्' इति सुकृतशब्देन निर्दिष्टं ब्रह्म, रसः - आनन्दः । तं च रस- पदवाच्यम् आनन्दरूपिणं परमात्मानं लब्ध्वैव खलु ! अयं जीवः आनन्दवान् भवति ।

142.i. 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छा.उ.6-1-4) 31

ii. 'वाचारम्भणम्' (प्र.124. दृष्टव्यः)

143. 'वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता, वायुमेव स्वेनभागधेयेनोपधावति, स एवैनं भूतिं गमयति' (तै.सं.2-1-1-1) 146

भूत्यात्मकं फलमपेक्षमाणो यागाधिकृतः पुरुषः, वायुदेवतामुद्दिश्य श्वेतपशुकरणकं यागं कुर्यात् । यतो वायुरूपा यागोद्देश्यत्वेन विवक्षिता देवता, वेगवत्सु सर्वेषु मध्ये अत्यन्तं वेगवत्तमा । अतः ईदृशं यागं कुर्वन्, स्वीयेन भाग्येन वायुरूपाम् उपसम्पन्नो भवति । ततश्च स एव - वायुरेव एनं यष्टारं प्राप्तैश्वर्यं करोति शीघ्रमेव ।

144. 'विज्ञातारमरे केन विजानीयात्' (बृ.उ.4-4-14) 24

तादृशं सर्वज्ञं परमात्मानं प्रकृतोदितध्यानं विना, केवलेन यज्ञ दानादिना केनोपायेन ज्ञातुं शक्नुयात् ? न केनाऽपि इत्यर्थः ।

145. 'विज्ञानम्' (तै.उ.भृ.5-1) 10,87

ब्रह्म ज्ञानानन्दस्वरूपं ज्ञानानन्दधर्मकं च ।

146. 'विद्यां चाऽविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।' (ईश.उ.11) 97

य उपासकः भगवदुपासनात्मिकां विद्यां, तदंगत्वेन चोदितकर्मात्मिकामविद्यां च मिथोऽविरुद्धतया अनुष्ठेयं जानाति ; सः उक्ताभ्यां विद्याऽविद्याभ्यां सम्पन्न-

पृ.सं.

पुरुषार्थो भवति ।) अविद्यया विहितकर्मात्मिकया ज्ञानसंकोचलक्षणं मृत्युं दूरीकृत्य, विद्यया चोपासनात्मिकया सर्वदोषातिगम्, अत एवामृतम् उपास्यं ब्रह्म लभते ।

147. 'विश्वतः परम नित्य विश्व नारायण हरिम्' (तै.ना.उ.11-2) 162

उक्तं नारायणाख्यं परं ब्रह्म जगद्रक्षणाद्यधिकृतेभ्यः प्रजापतिभ्यः सर्वेभ्योऽपि परमम्, एवमेव नित्यतया विराजमानं, विश्वस्य स्वामिभूतं, नरसमूहानामयनं प्राप्यम्, आश्रितसमस्तदुःखापहं, सर्वसंहर्तृ वा ।

148. 'विष्णोः परम पदम्' (सुबा.उ.6) (प्र.59. दृष्टव्यः) 152

149. 'वेदाहमेत पुरुष महान्तमादित्यवर्ण तमसः परस्तात्' 151,

(तै.आर.पु.3-13-2) 157

पुरुषसूक्तप्रतिपाद्यं सर्वत्र व्याप्तम्, तेजसा सूर्यवर्चसम्, प्राकृतात् सर्वस्मात् लोकात् उत्तरस्मिन् स्वासाधारणे परमे व्योम्नि विराजमानम् एतं परमपुरुषम् अहं वेद्मि ।

150. 'शाश्वत शिवमच्युतम्' (तै.ना.उ.11-3) (प्र.93. दृष्टव्यः) 111

151. ' स एष सर्वेभ्यः पाप्मभ्य उदितः' (छां.उ.1-6-7) 162

'उत्' इति नाम्ना निर्दिष्टः परमात्मा, सुकृत दुष्कृताख्यसर्वविधपापसम्बन्धविदूरः।

152. 'सत्य चाऽनृत च सत्यमभवत्' (तै.उ.आन.6-3) 66

सत्यशब्दवाच्यचेतनगतानि तथाह्व जातिगुणाद्याश्रयचेतनाश्रितजड-भूतानृतशब्दवाच्याचेतनगतानि च यानि यानि नामरूपाणि, तेषाम् अन्ततः स्वयमेवाश्रयभूतो भवन्नपि, निर्विकारत्वात्मकस्वकीयस्वभावाप्रहाणेन सत्यमेवाऽभवत् ।

153. i. 'सत्य ज्ञानमनन्त ब्रह्म, यो वेद निहित गुहाया परमे व्योमन्'

(तै.उ.आन.1-1) 157

ii. 'सत्य ----- ब्रह्म' 9, 40,

निरुपाधिकसत्तायोगि, नित्यासंकुचितज्ञानैकाकारं, त्रिविधपरिच्छेदातीतं, 164, निरतिशयबृहत् परमात्मभूतं वस्तु, यः स्वीयहृदयगुहानिहितमुपास्ते ; सः 174 परमव्योमपदाभिधेये परमपदे (ब्रह्म, तदीयान् कल्याणगुणांश्च अनुभवति)

154. 'सत्यकामः' (छां.उ.8-1-5) (प्र.15. दृष्टव्यः) 158

पृ.सं.

155. 'सदा पश्यन्ति सूरयः' (सुबा.उ.6) (प्र.59. द्रष्टव्यः) 154,158, 164

156. i. 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां.उ.6-2-1) 9, 13, 33, 105, 119, 158

ii. 'सदेव--------आसीत्' 35, 158

इदं बहुत्वावस्थं, विभक्तनामरूपं, प्रत्यक्षतया दृश्यमानं जगत्, सृष्टेः प्राक् निमित्तान्तरशून्यम्, अविभक्तनामरूपतया एकं सच्छब्दितं ब्रह्मैवाऽऽसीत् ।

157. 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठिताः' (छां.उ.6-8-4) 8, 17

सर्वमचित्संसृष्टं चेतनजातं, सच्छब्दवाच्यब्रह्माधीनोत्पत्तिमत् ब्रह्मैकधार्यं, ब्रह्मण्येव लीयमानं च ।

158. 'स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्' (तै.ना.उ.11-12)ह 107

पूर्वप्रस्तुतः परमपुरुष एव, सर्वस्रष्टृब्रह्मशरीरकः । सर्वसंहर्तृरुद्रशरीरकः, तथाह्य त्रिलोकेश्वरदेवेन्द्रशरीरकश्च । स एव च नित्यमुक्तशरीरकः । सर्वोत्कृष्टः अकर्मवश्यश्च अयमेव ।

159. 'स य एषोऽन्तर्हृदय आकाशः, तस्मिन्नयं पुरुषो मनोमयः । अमृतो हिरण्मयः'(तै.उ.शी.6-1) 151

हृदयाख्यस्य देहान्तःप्रदेशस्य अन्तः यः आकाशो वर्तते, तत्र अयं पुरुषविशेषो विराजते ; यः असंसारी दिव्यकमनीयविग्रहः विशुद्धेनैव मनसा ग्राह्यः । स च उपासितव्यः ।

160. 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति'(मुण्ड.उ.3-2-9) 98

यः खलु परात्परपुरुषात्मकं परं ब्रह्म, वेद उपास्ते, परमप्रीतिरूपापन्नदर्शन-समानाकारध्यानगोचरीकरोति ; सः निष्पन्नोपासनो ब्रह्मवित्, आविर्भूत-स्वाभाविक ब्राह्मरूपः सन् परमात्मना सह अविलक्षणस्वरूपो भवति ।

161. i. 'सर्वं खल्विदं ब्रह्म तज्जलानिति' (छां.उ.3-14-1) 87

ii. 'सर्व-------------ब्रह्म' 169

सर्वस्य जगतः ब्रह्मणो जातत्वात्, ब्रह्मणि लीयमानत्वात्, ब्रह्माधीन-जीवनत्वाच्च 'इदं सर्वं ब्रह्मात्मकम्' इति शान्तः सन् उपासीत ।

पृ.सं.

162. **'सर्वस्य यशी सर्वस्येशानः'** (बृ.उ.6-4-22) 41, 88, 119, 140, 162

सर्वशेषित्वरूपसर्वात्मत्ववान्, सर्वधारकत्वरूपसर्वात्मत्ववान्, सर्वनियन्तृत्वरूपसर्वात्मत्ववान् ; साध्वसाधुकर्मकृतोत्कर्षापकर्षशून्यः, एष परमात्मैव सर्वनिरूपितेश्वरत्ववान् ।

163. **'सर्वाणि रूपाणि विचित्यधीरः, नामानि कृत्वाऽभिवदन् यदास्ते'** (तै.आर.पु.3-12-16) 87

स्वीयया विद्यात्मिकया धिया, अथवा धीपदवाच्यया विद्याभिमानिन्या वाग्देव्या स्वापृथक्सिद्धया विहरन्, विद्याविहारः परमपुरुषः, स्वेन सृष्टानां चेतनाचेतनात्मकानां जंगमस्थावरात्मकानां च भूतानां निरवशेषेण तत्तद्योग्यानि रूपाणि, तथा तदर्हाणि च नामानि आधिकारिकान् प्रजापतीन् अभिमुखीकृत्य तत्सर्व विवृण्वन् यः परमपुरुषः स्वे स्थाने वर्तते ; तम् अहं वेद - जानामि ।

164. **'सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।**
सर्वव्यापी स भगवान् तस्मात् सर्वगतः शिवः।' (श्वे.उ.3-11) 104

पुरुषतत्त्वभूतः परमात्मा, सर्वैः शरीरिभिः, सर्वैः तत्तच्छरीरैश्च सशरीरः तस्मात् सर्वाण्यपि आननानि शिरांसि ग्रीवाश्च, अस्य पुरुषस्यैव आननानि, शिरांसि, ग्रीवाश्च भवन्ति । अत एव च सर्वभूतानामपि हृदयाख्या गुहा, एतस्य पुरुषस्य शयनस्थानम् । अत एव च अनेनाकारेण स पुरुषः सर्वत्र असंकोचेन व्याप्तः, ज्ञानादिषड्गुणैश्वर्यसम्पन्नः सन्, सर्वगतोऽपि, विकाराऽपुरुषार्थादिहेयसम्बन्धरहित एव राजते ।

165. **'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि'** (तै.ना.उ.1-8) 87, 119, 151

विद्युद्वर्णतेजोमयविग्रहसम्पन्नात् परमपुरुषादेव स्थूल-सूक्ष्माद्यात्मकाः कालतदवयवाः अजायन्त ।

166. **'सर्वे वेदा यत्पदमामनन्ति'** (कठ.उ.2-15) 76

ऋगादयः सर्व एव वेदाः सांगाः यागादिकर्मभिराराध्यं यत्स्वरूपं सर्वचेतनप्राप्यतया प्रतिपादयन्ति (तादृशं भगवतः स्वरूपं संक्षिप्तेन 'ओम्' इत्यनेन प्रणवात्मकेन शब्देनोपदिशामि) ।

167. **'सर्वे वेदा यत्रैकं भवन्ति'** (तै.आर. 3-11-2) 76

परब्रह्मवाचकभूतप्रणवप्रकृतिकाः सर्वे वेदा अपि, परब्रह्मण एकस्यैव वाच्यत्वात्, एकार्थवाचिनो भवन्ति ।

पृ.सं.

168. **'सर्वैश्वर्यसम्पन्नः सर्वेश्वरः शम्भुराकाशमध्ये ध्येयः'** (अ.शिखा.2-1-7) 109

(प्र.41. दृष्टव्यः)

169. **'सहस्रशीर्षं देवम्'** (तै.ना.उ.11-1) 107, 113

सहस्रपदोपलक्षितासं ख्यातशिरोमत्तया पुरुषसूक्तादिप्रसिद्धः स्वयंज्योतीरूपः परमात्मा ।

170. **'सहैव सन्तं न विजानन्ति देवाः'** (तै. आर. 3-11-2) 77

(देवमनुष्यादीनाम् अन्तर्यामितया आत्मत्वेन प्रविश्य) स्वेन सहैव एकस्मिन् देहे वर्तमानमपि परमात्मानं, तेषामिन्द्रियाणि मनःपर्यन्तानि नैव जानन्ति ।

171. **'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्'** (तै. ना.उ.1-44) 22

(लब्धसत्ताकस्य जगतो नियन्ता चतुर्मुखः अहोरात्रविधानाय) पूर्वकल्पे इव अस्मिन्नपि कल्पे दिवाकरनिशाकरौ पृथिव्यन्तरिक्षद्युलोकान् सुवश्च लोकं सृष्टवान् ।

172. **'सोऽकामयत बहु स्यां प्रजायेयेति तत्सृष्ट्वा, तदेवानुप्राविशत्, तदनुप्रविश्य । सच्च त्यच्चाऽभवत्, निरुक्तं चाऽनिरुक्तं च, निलयनं च, विज्ञानं चाविज्ञानं च, सत्यं चाऽनृतं च सत्यमभवत्'** (तै. उ.आन.6-2-3) 170

आनन्दमयः परमात्मा देव-मनुष्यादिरूपेण बहु स्याम्, तदर्थम् आकाशादि-रूपेण प्रजायेय' इति व्यष्टि-समष्टिरूपचेतनाचेतनसृष्टिविषयकसंकल्पमकरोत् । स परमात्मा स्रष्टव्यालोचनरूपं तपः कृतवान् । तपश्च कृत्वा, चेतनाचेतनात्मक-मखिलं जगत् सृष्टवान् । स्थूलसूक्ष्मात्मकं चराचरात्मकं जगत् उत्पाद्य, तत्र सर्वत्र अनुवृत्ततया अनुप्रविष्टवान्, तथा प्रविश्य च निर्विकारचेतनरूपं सविकाराचेतनरूपं च ब्रह्मैव अभवत् । तदेव च ब्रह्म जातिगुणाद्यनाश्रयाचेतनवर्गाधाराजडसत्य-शब्दवाच्यचेतनगतानि, जातिगुणाद्याश्रयचेतनाश्रितजडानृतशब्दवाच्याचेतन-गतानि यानि यानि नामरूपाणि ; तेषाम् अन्ततःस्वयमेवाश्रयभूतो भवन्नपि, निर्विकारत्वात्मक- स्वीयस्वभावाप्रहाणेन सत्यमेवाऽभवत् ।

173. **'सोऽन्तरादन्तरं प्राविशत्'** (अ.सा.) 117

स परमात्मा, अन्तरादन्तरम्- शरीरादन्तरस्य प्राणादेरपि अन्तरं जीवं प्राविशत् । (वे.सं.ता.दी.)

पृ.सं.

अथवाह जीवभूतो रुद्रः, देहाद्यपेक्षया सूक्ष्मात् जीवात् सूक्ष्मतरं परमात्मानं प्रविष्टवान्-परमात्मविषयकस्वान्तरात्मत्वधीसम्पन्न आसीत् । (उ.र.भा)

174. **'स्तब्धोऽसि, उत तमादेशमप्राक्ष्यः'** (छां.उ. 6-1 -3) (प्र.136 द्रष्टव्यः) 10

175. **'हन्ताहमिमास्तिस्रोदेवताः अनेन जीवेनाऽनुप्रविश्य, नाम-रूपे व्याकरवाणि'** (छां.उ.6-3-2) 15, 78

अहं स्वस्वाभिमानिदेवताधिष्ठितानि तेजोजलपृथिवीरूपाणि त्रीणि भूतानि, मदात्मकेन जीवेन अनुप्रवेशं कृत्वा, नाम्नां रूपाणां च व्याकर्ता भवेयम् इति सच्छब्दितायाः परस्याः देवतायाः संकल्पः ।

176. **'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ'** (तै.आर.पु. 3- 13- 6) 107, 152,

ह्रीपदाभिधेया भूः, तथा श्रीपदवाच्या लक्ष्मीश्च भगवतस्तव नारायणस्य 164
पत्नीत्वमाश्रिते स्तः ।

आ. स्मृतिब्रह्मसूत्रादिप्रमाणानि

177. **'अनेन सर्वगतत्वमायामशब्दादिभ्यः'** (ब्र.सू. 3- 2- 36) 127

परब्रह्मणा सर्वस्य जगतः व्याप्तत्वम्, सर्वव्याप्तिवाचिना तेनेदं पूर्णपुरुषेण सर्वम् इत्यादिना श्रुतिवाक्येन तथा 'ब्रह्मैवेदं सर्वम्' इत्यादिना च विज्ञायते ।

178. **'अन्तस्तद्धर्मोपदेशात्'** (ब्र.सू. 1 - 1 - 21) 160

अक्ष्यादित्ययोरन्तर्वर्तितया श्रुतिप्रतिपाद्यः पुरुषः, जीवात् भिन्नः परमात्मैव। परमात्मासाधारणानाम् अपहतपाप्मत्वादिधर्माणां 'स एष सर्वेभ्यः पाप्मभ्यः उदितः' इति श्रुतौ ज्ञापनात् ।

179. **'अप एव ससर्जादौ तासु वीर्यमपासृजत्'** (म.स्मृ 1 - 8) प्र.210 द्रष्टव्यः 128

180. **'आत्मेति तूपगच्छन्ति ग्राहयन्ति च'** (ब्र. सू. 4 - 1 - 3) 118

उपासकाः स्वोपास्यं परब्रह्म, 'स्वस्मात् अभिन्नम्' इत्येव - अहम् इत्येव उपासते, तथा 'य आत्मनि तिष्ठन्' इत्यादीनि शास्त्राण्यपि ग्रहीतॄन् इममर्थं सम्यक् बोधयन्ति च ।

181. **'उपपत्तेश्च'** (ब्र.सू. 3 - 2 - 34) 127

('अमृतस्यैष सेतुः' इति प्राप्य-प्रापकभावात्मकस्य अतिरिक्तताज्ञापकत्वाभिमतस्य सम्बन्धस्य व्यपदेशोपि, स्वस्यैव स्वं प्रति प्रापकत्वस्य 'यमेवैष वृणुते' इति

पृ.सं.

श्रुतिज्ञाप्यस्य) एकस्मिन्नेव अबाधेन सम्भवादपि हेतोः युज्यत इति, सः न अतिरिक्तत्वज्ञापकः ।

182. एनमेके वदन्त्यग्निं मरुतोन्ये प्रजापतिम् ।

इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ।। (म.स्मृ.12 - 123) 78, 169

पूर्वप्रस्तुतं परमात्मानं केचित् वेदशाखाविशेषाः 'अग्नि'रिति वदन्ति । अन्ये च केचन मरुत् इति बोधयन्ति । अपरे च शाखाविशेषाः 'प्रजापतिं' घोषयन्ति । इतरे च 'इन्द्रः' इति । तथा अन्ये केचन 'प्राणः' इति, इतश्चान्ये केचन 'शाश्वतम् ब्रह्म' इति च बोधयन्ति । यतः सर्वेषामन्तर्यामी सन् सर्वेषां शासकः सर्वैः शब्दैः अयमेव वाच्यः ।

183. 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः' (पू.मी. सू. 1 - 1 -5) 165

('औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः, तस्य ज्ञानमुपदेशः, अव्यतिरेकश्चार्थेऽनुपलब्धे तत् प्रमाणं, बादरायणस्यानपेक्षत्वात् 'इति पूर्णं सूत्रम्)

पदस्य स्ववाच्येन सह वाच्य-वाचकभावरूपः सम्बन्धः स्वाभाविकः, नित्य एव ; न तावत् संकेताद्यधीनः। प्रत्यक्षाद्यगोचरस्य तस्य धर्मस्य हिताहितप्राप्ति-परिहारोपायविषयः चोदनात्मा नित्यः परमात्मोपदेशः ज्ञानकरणम् (ज्ञायते अनेनेति ज्ञानम्) । प्रतीयमानाकारात् विरुद्धाकारान्तरयोगित्वमपि न प्रमाणान्तरतः सिद्धम् । (ज्ञानं) परमात्मोपदेशरूपं च शास्त्रम्, प्रत्यक्षादिभिरन्यैः प्रमाणैः असिद्धे विषये अबाधितप्रामाण्यवदेव भवतीति, न गृहीत-ग्राहित्वायत्ताप्रामाण्यशंकास्पदम्; प्रामाण्योत्पत्तेः तज्ज्ञप्तेश्च परानपेक्षत्वात् । (इदं च गुरोर्बादरायणस्य सम्मतम् ।)

184. 'कारीर्या वृष्टिकामो यजेत' (तै.सं.सा.भा.2-4-7) 138

कारीरीनामकेन यागविशेषेण स्वाभीप्सितां वृष्टिं सम्पादयेत् ।

185. 'क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता' (या.स्मृ. 3-34) 47

शरीराधिष्ठातुरात्मनो जीवस्य, सर्वात्मना पूर्णा विशुद्धिः, ईश्वरस्य सर्वनियन्तुः पुरुषोत्तमस्य साक्षात्काररूपात् ज्ञानात् भवति-इति ज्ञानिनां मतम् ।

186. 'जन्माद्यस्य यतः' (ब्र.सू.1-1-2) 105, 119,

विविधविचित्रभोक्तृभोग्यपूर्णस्य जगतः सृष्टि-स्थिति-लयाः यद्वस्त्वधीनाः, 120,

127

तत् 'ब्रह्म' इति ब्रह्मलक्षणम् ।

पृ.सं.

187. 'तथाऽन्यप्रतिषेधात्' (ब्र.सू.2-3-29) 127

जगत्कारणतया प्रतिपादितात् ब्रह्मणोऽन्यस्याऽधिकस्य 'यस्मात्परं नाऽपरमस्ति' इत्यादिना अभावबोधनात्,' ब्रह्मणः परं नाऽस्ति ; ब्रह्मैव परम्' इत्येव सम्यक् ।

188. 'तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्' (ब्र.सू.2-3-29) 24

जीवात्मनः प्रधानभूतज्ञानाख्यगुणवत्त्वादेव 'विज्ञानमिति पदेन जीवस्य शास्त्रेषु व्यवहारः युज्यते ; न तु ज्ञातृ-ज्ञानयोः अभेदात् । प्राज्ञे परमात्मनि आनन्दात्मक-गुणप्राधान्यात् 'आनन्दः' इति, ज्ञानगुणप्राधान्यात् 'स त्वं ज्ञानम्' इति च व्यवहार इव ।

189. 'तद्गुणास्तु विधीयेरन् अविभागाद्विधानार्थे, न चेदन्येन शिष्टाः (पू.मी.सू.1-4-9) 153

('यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां वाऽच्युतो भवति' इति वाक्यस्थेन 'आग्नेय'पदेन तद्गुणाः- धात्वर्थभूतो यागः, तत्र त्यज्यमान-हविरुद्देश्यभूता देवता चेत्यादयो गुणा अपि , विधीयेरन् तु- अप्राप्ताः सन्त एव ज्ञाप्यन्ते, विधानार्थे-कर्मविधानप्रयोजनके तद्धितान्ते 'आग्नेय'पदे, अविभागात्-द्रव्यदेवतासम्बन्धस्य यागेन साकम् अविनाभूततया प्रतीयमानत्वात्, (द्रव्य-देवतयोः यागीयरूपत्वात्) चेत्-हि, यतः, अन्येन प्रमाणान्तरेण,न शिष्टाः- न विहिताः इमे । (अतः आग्नेयपदं न नामधेयम् ; अपि तु क्रियातद्गुणयो-र्विधायकमेव) ।

190. 'तद्विसृष्टस्स पुरुषो लोके ब्रह्मेति कीर्त्यते' (म.स्मृ.1-11) 128

सर्वेषामादिकारणभूतात् सदसदात्मकात् नित्यादव्यक्तात् प्रादुर्भूतः पुरुषः, 'ब्रह्मा' इति तत्त्वज्ञलोके कथ्यते ।

191. 'तस्मिन् जज्ञे स्वयं ब्रह्मा' (म.स्मृ.1-9) 128

सहस्रसूर्यसदृशे तस्मिन् सुवर्णमये अण्डे सर्वलोकस्रष्टा ब्रह्मा उत्पन्नः ।

192. 'न कर्माविभागादिति चेत् नानादित्वादुपपद्यते चाप्युपलभ्यते च' (ब्र.सू.2-1-35) 72

'सृष्टिप्राक्काले जीवस्य ब्रह्मणा सह अविभागश्रुतेः ; विषमसृष्टिप्रयोजकं तत्तज्जीवीयं कर्म न स्थातुमर्हति' इत्येवं शंकनं न संगतम् ; यतः वैषम्यहेतुभूतानां

पृ.सं.

जीवानां तत्कर्मणां च सृष्टेः प्राक् सत्त्वेऽपि, अविभागश्रुतिः नामरूपविभागाभावमात्रादेव युक्ता भवति । (जीवानां तत्कर्मणां च सत्ताया अपि) अनिदंप्रथमत्वात्, 'जीवानामनादित्वमपि 'न जायते म्रियते वा' इत्यादिभिः श्रुतिभिः ज्ञायत एव ।

193. 'नाऽऽत्मा श्रुतेर्नित्यत्वाच्च ताभ्यः' (ब्र.सू.2-3-18) 72

जीवः न जन्यते ; 'न जायते' इति श्रुत्या जन्माभावप्रतिपादनात्, तथा 'अजोनित्यः' इत्यादिश्रुतिभ्यः नित्यत्वस्य स्पष्टमवगमादपि ।

194. 'परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः' (ब्र.सू.3-2-30) 127

शास्त्रारम्भतः एतदन्तं परमकारणतया निर्णीतात् अस्मात् परस्मात् ब्रह्मणोऽपेक्षया, उत्कृष्टमपि किंचित् तत्त्वम् अस्ति ; 'एतं सेतुं तीर्त्वा' इति परमात्मनः सेतुत्वव्यपदेशपूर्वकं तरितव्यत्वज्ञापनात्, 'चतुष्पात् ब्रह्म' इति पादचतुष्टयात्मक-प्रमाणपरिमितत्वव्यपदेशपूर्वकम् अपरिमितवस्त्वन्तरसत्तायाः ज्ञापनात्, जीवात्मनः प्राप्यं स्थानान्तरं प्रति प्रापयितृत्वस्य 'अमृतस्यैष सेतुः' इति सेतुत्वस्य कथनेन जीवेश्वरयोः जीवप्राप्यामृतत्वप्रापकत्व-रूपसम्बन्धकथनपूर्वकम् एतदितरस्य प्राप्यत्वज्ञापनात्, सर्वत्र पूर्णवस्त्वपेक्षया अन्यस्मिन् वस्तुनि भेदस्य 'ततो यदुत्तरतरम्' इत्यादिना व्यपदेशादपि ज्ञापकाच्च । इति पूर्वपक्षसूत्रमिदम् । 47

195. 'पूः प्राणिनः सर्व एव गुहाशयस्य' (आप.ध.सू.22-4)

प्राणभृतः सर्वे एव देहिनः, गुहाशयस्य परमात्मनः वासयोग्यपुरात्मकाः भवन्ति । 72, 119, 127

196. 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (ब्र.सू.1-4-24)

परं ब्रह्म जगतो निमित्तकारणमिव, उपादानकारणमपि ; 'यस्मिन्नु खलु विज्ञाते सर्वमिदं विज्ञातं भवति' इत्युक्तायाः ब्रह्मणि अभिमतार्थसाधनपरायाः वाचः, तथा 'यथा सोम्यैकेन मृत्पिण्डेन' इति निदर्शनोक्तेश्च तथात्वे एव अविरोधसिद्धेः। 40

197. 'प्रकृतैतावत्त्वं हि प्रतिषेधति, ततो ब्रवीति च भूयः' (ब्र.सू.3-2-21)

यतः मूर्तामूर्तरूपात्मकपूर्वप्रक्रान्तविशेषवत्तया कृता या इयत्ता ; तावन्मात्रं 'नेति नेति' इति श्रुतिः निषेधति, तदपेक्षया अधिकगुणयोगित्वमपि 'न ह्येतस्मादिति' इत्यादिना श्रुतिरपि प्रतिपादयत्येव खलु ।

पृ.सं.

198. i. 'प्रशासितारं सर्वेषामणीयांसमणीयसाम्' । रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम् ।।' (म.स्मृ.12-122) 47,78

ii. 'प्रशासितारं ... मणीयसाम्' 11

iii. 'प्रशासितारं सर्वेषाम्' 127

ब्रह्मादीनां स्तम्बान्तानां चेतनाचेतनानां नियन्तारं - सर्वस्वरूपस्वभाव-व्यवस्थानां कर्तारं, सर्वाचेतनान्तःप्रवेशनसमर्थेभ्यः अत्यन्तं सूक्ष्मेभ्यो जीवेभ्योऽपि सूक्ष्मं, जीवेष्वप्यन्तःप्रविष्टम्, सुवर्णवत् देदीप्यमानदिव्यविग्रहम्, स्वप्नवत् उपरतबाह्येन्द्रियावस्थाविशेषे ध्यानात्मके विषयीक्रियमाणं परं पुरुषं निरन्तरमुपासीत।

199. 'प्रादुरासीत्तमोनुदः' (म.स्मृ.1-6)

('ततः स्वयम्भूर्भगवान् अव्यक्तो व्यंजयन्निदम् । महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ।।' इति पूर्णः श्लोकः)

यदा सर्वं तमोभूतं सत् प्रसुप्तमिव आसीत् ; तदा आन्तर-बाह्येन्द्रियागोचरस्वरूपः, अविभक्तमश्शरीरकः, स्वसंकल्पमात्रायत्तदिव्य-विग्रहादिधारणसमर्थः, सत्यसंकल्पात्मकासदृश-सामर्थ्यवान्, स्वाधीनाविर्भावः परमात्मा सुप्तमिव स्थितम् आकाशादिमहाभूतजातं प्रकटीकर्तुकामः, तमश्शब्दवाच्यायाः प्रकृतेः सृष्ट्युन्मुखीकरणप्रवृत्तः सन् आविरभूत् ।

200. 'बुद्ध्यर्थः पादवत्' (ब्र.सू.3-2-32) 127

'चतुष्पाद् ब्रह्म' इत्यादिषु ब्रह्मणः यत्किंचित्प्रमाणपरिमितत्वव्यवहारः; 'वाक् पादः' इत्यादिना ब्रह्मणि अखण्डे वागादीनां पादत्वव्यवहार इव उपासनफलकः न तु परिच्छिन्नत्वद्योतनफलकः ।

201. 'यज देवपूजायाम्' (पा.धा. 1002) 146

'यज्' इत्ययं धातुः देवपूजारूपेऽर्थे वाचकतया वर्तते ।

202. 'यावदात्मभावित्वाच्च न दोषः' (ब्र.सू.2-3-30) 24

('यावादात्मभावित्वाच्च न दोषः तद्दर्शनात्' इति पूर्णं सूत्रम् ।)

ज्ञानात्मकस्य धर्मस्य, आत्मनः सत्तामव्यभिचर्य विद्यमानत्वात्, (तथा) स्वप्रकाशत्वादपि च आत्मनः, धर्मिणो जीवस्य, धर्मवाचकेन ज्ञानशब्देन व्यपदेशकृतदोषस्याभावः ; खण्डमुण्डादिव्यक्तीः अव्यभिचर्य, वर्तमानगोत्वादि धर्माश्रयेषु खण्डादिधर्मिषु गवादिशब्दव्यपदेशस्य लोके दृष्टत्वात् ।

पृ.सं.

203. 'ये यजन्ति पितॄन् देवान् ब्राह्मणान् सहुताशनान् ।
सर्वभूतान्तरात्मानं विष्णुमेव यजन्ति ते ।।' (द.स्मृ.) 79

ये पुनर्यागपराः अग्निं मुखीकृत्य देवान् ऋषीन् पितॄंश्च तत्तत्प्रीतिकरैः यागादिकर्मभिः प्रीणयन्ति । ते सर्वेऽपि विहितानुष्ठानतत्पराः, सर्वेषु भूतेषु अन्तःप्रविश्य नियन्तारं परमात्मानं विष्णुमेव प्रीणयन्ति ।

204. 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्' (ब्र.सू.2-1-34) 72

('वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति' इति पूर्णं सूत्रम् ।)

'देवमनुष्यादिरूपेण सुखदुःखादिबहुलतया च जगत् सृजतः परस्य ब्रह्मणः सर्वेषु जीवात्मसु समताराहित्यम्, तथा दुःखिषु दयाशून्यत्वं च प्रसज्यते' इति तु आक्षेपः नाऽऽपतति ; सृष्टिवैषम्यस्य तत्तत्क्षेत्रज्ञानां कर्मविशेषानुबन्धित्वात् । देवादिदेहयोजनं तत्तज्जीवकर्मसापेक्षमिति श्रुतिरेव बोधयति खलु ।

205. 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र.सू.1-1-31) 114,

जीवभूतेन्द्रकर्तृकः 'मामुपास्व' इति स्वात्मकर्मकोपास्यत्वोपदेशः, 117
वामदेवकृतः स्वात्मनि परमात्माभेदव्यवहार इव, 'सर्वात्मा' 'तत्त्वमसि' इत्यादिशास्त्रपरिदृष्टार्थस्य जीव-परयोः शरीरात्मभावकृताभेदस्य अनुसन्धानेनैव प्रवृत्तः ।

206. i. 'सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्' (म.स्मृ.4-160) 172
ii. 'सर्वं परवशं दुःखम्' 172

(स्वस्य परमप्राप्यभूतो यो देवः तदन्य) स्वेतरव्यक्तिपरतन्त्रसिद्धिकं यद्यत्, तत्सर्वं (सुखाधायकत्वयोग्यतावदपि वस्तु) विवेकिनो दुःखाधायकमेव । यच्च स्वायत्तं परानपेक्षं तत्सर्वं (किंचिदिव दुःखाधायकमपि) सुखाधायकमेव ।

207. 'सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।। ' (मनु.1-21) 22

सः स्रष्टा, स्वसृष्टानां चेतनानामचेतनानां च सर्वेषां वस्तूनाम्, पूर्वकल्पस्थतया स्मृतानां वेदानां शब्दानेव चिन्तयित्वा, तदानुगुण्येन योग्याः संज्ञाः, योग्यानि कर्माणि, योग्यानि अवयवसंस्थानानि च परस्परासांकर्यावहं

पृ.सं.

यथा भवति ; तथा निर्मितवान् ।

208. 'सामान्यात्तु' (ब्र.सू.3-2-31) 127

परमात्मनि 'स सेतुः' इति सेतुव्यवहारः ; विधृतिरूपात् सेतुसादृश्यादेव, (असांकार्येण सर्वपदार्थस्वभावसंरक्षणकृतसेतुसाम्यवत्वात्) ।

209. 'सिसृक्षुः विविधा प्रजाः' (म.स्मृ.1-8) 128

('सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमपासृजत् ।।' इति पूर्णः श्लोकः)

परमात्मा सनातनः, जगत्सृष्टयुपयोगि संकल्पं कृत्वा स्वकीयात् देहात्, विविधविचित्रानन्तप्रकाराः प्रजाः स्रष्टुमिच्छुः सन्, प्रथमतः जलतत्वमेव सृष्टवान्, तत्र च स्वीयं वीर्यं विमुक्तवान् ।

210. 'सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ' (म.स्मृ.4-6) 172

'सेवा----- ख्याता' 172

('सत्यानृतं तु वाणिज्यं तेन चैवाऽपि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ।। ' इति पूर्णः श्लोकः')

(परमप्राप्यपरमात्मेतरोद्देशेन प्रवृत्ता) सेवा -व्यक्तिप्रीतिजनको व्यापारः, श्ववृत्तिः -शुनकस्य तत्पालके, तद्गृहरक्षण-तद्द्वारनिरन्तरावस्थान-तद्दर्शनानन्तरपुच्छचालनादि-रूपव्यापारसदृशः इति, प्राज्ञैः व्यवह्रियते । ततो हेतोः श्ववृत्तिरूपां सेवां सर्वथा दूरीकुर्यात्; नैवाचरेत् ।

211. 'स्थानविशेषात् प्रकाशादियत् ' (ब्र.सू.3-2-33) 127

अखण्डस्य परमात्मनः वागादिस्थानानां कल्पनेन परिच्छिन्नत्व-व्यपदेशः, वागादिस्थानविशेषात्मकोपाधिसम्बन्धात् सम्भवति ; सर्वत्र विततस्याऽपि आकाशप्रकाशादेः यथा वातायनघटादिस्थानसम्बन्धः तद्वत् ।

212. 'स्वर्गकामो यजेत ' (का.श्रौ.सू. 4-3-47) 136, 141

('दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ' इति पूर्ण सूत्रम्) स्वर्गपदवाच्य-सुखविशेषलिप्सावानधिकारी, 'दर्शपूर्णमास' संज्ञकेन प्रत्येकं यागत्रयघटित-समुदायद्वयात्मकेन यागषट्केन इष्टं सुखविशेषं सम्पादयेत् ।

**213. 'अग्नेः शिवस्य माहात्म्यं तमसेषु प्रकीर्त्यते ।
राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः ।।'** (म.पु.290-14,15) 102

पृ.सं.

तमोगुणप्रचुरब्रह्मकल्पप्रवृत्तेषु पुराणेषु अग्नि-शिवयोर्माहात्म्यं स्पष्टीक्रियते । जगत्सृष्टिकर्मणि प्राप्ताधिकारस्य चतुर्मुखस्य माहात्म्यं रजोगुणप्रचुरेषु ब्रह्मकल्पेषु, इति पुराणतत्त्वज्ञाः जानन्ति ।

214. **'अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः ।**
वर्जितः शक्यते वक्तुं यः सदास्तीति केवलम् ।।' (वि.पु. 1-2-11) 122

परमात्मा हि ; जन्म-तदधीनस्थिति-विपरिणाम-वृद्धि-अपक्षय-विनाशाख्यैः, भावसामान्यगततया उपलभ्यमानैः षड्विधैरपि विकारैरसंस्पृष्टः; अत एव स्वरूपाधीनसत्तामात्राश्रयः इति वक्तुमर्हः ।

215. **'अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः'** (वि.पु.1-4-6) 128
('आपो नारा इति प्रोक्ता आपो वै नरसूनवः' इति पूर्वार्धम् ।)

अविनाशी भगवान् 'नरः',तत्सृष्टाः आपः नाराः । तदुपलक्षितानि सर्वाण्यपि तत्त्वानि नारा एव । ताः आपः तद्विश्रान्तिस्थानत्वात् अयनम् । तदयनः- नारा एव अयनं यस्य, तादृशः 'नारायणः' इति इतिहास-पुराणादिषूच्यते ।

216. **'अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते '** (वि.पु.6-7-61) 48,
विष्णुपदवाच्यपरमात्मसम्बन्धिपरापराख्यद्विविधशक्तिविलक्षणा 156
तृतीया शक्तिः, अविद्यापदेन कर्मपदेन च शास्त्रेषु व्यवह्रियते ।

217. **'अव्यक्तादिविशेषान्त परिणामर्द्धिसंयुतम् ।**
क्रीडा हरेरिदं सर्वं क्षरमित्युपधार्यताम् ।। ' (म.भा.शां.206-58) 46

अव्यक्तपदवाच्यं प्रधानमारभ्य, विशेषपदवाच्यभूत-भौतिककार्य-पर्यन्तं वृद्धिक्षयभाक् सर्वमिदं, भगवतो हरेः लीलया सृष्टं ' क्षर' पदवाच्यमेव ।

218. **'आत्मा ज्ञानमयोऽमलः'** (वि.पु.6-7-22) 173
अयं चेतनः स्वभावतः नित्यनिर्मलज्ञानानन्दस्वरूप एव ।

219. **'इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः ।**
ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया ।। ' (वि.पु.6-6-12) 97

राजा केशिध्वजोऽपि, पूर्वम् आगमजन्यं ज्ञानमाश्रित्य स्थितः, अनन्तरं मोक्षसाधनतया वेदान्तविहितं 'ब्रह्म' विद्यापदवाच्यमुपासनमवलम्ब्य,ततः 'मृत्यु'पदाभिधेयं प्राक्तनं कर्म निर्मूलयितुं,विद्यांगम् 'अविद्या' पदवाच्यं विविधं यज्ञादिकर्म अनुष्ठितवान् ।

पृ.सं.

220. **'ऋतधामा वसुः पूर्वो वसूना त्वं प्रजापतिः '** (वा.रा.यु. 120-7) 169

भो श्रीरामचन्द्र ! भवान् वसूनाम् अष्टसंख्यानाम् आदिमः ऋतधामाख्यः प्रजानां स्वामिभूतो वसुः ।

221. **'ऋषयः पितरो देवा महाभूतानि धातवः ।**
जंगमाजंगमं चेदं जगन्नारायणोद्भवम् ।। ' (म.भा.अनु. 254-140) 120

धर्मानुष्ठान-तदुपदेशपराः ऋषयः, एवं धर्मात्मकैर्यागादिभिः आराध्याः देव-पितरः, आकाशादिरूपाणि पंचमहाभूतानि, देहद्वारा देहिधारणहेतुभूताः रक्तादयः, सप्तसंख्याकाः धातवः, आहत्य जंगमस्थावरात्मकं सर्वं जगदपि, नारायणाद्भगवत एवोत्पन्नम् ।

222. **'एक एव जनार्दनः '** (वि.पु.1-2-67) प्र.304 द्रष्टव्यः) 124

223. **'एकान्तिनः सदा ब्रह्मध्यायिनो योगिनो हि ये ।**
तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः '।।(वि.पु.1-6-38) 160

अव्यभिचरितान्तःकरणाः सन्तः, सततं नैरन्तर्येण ब्रह्मचिन्तन-पराः योगिनो ये वर्तन्ते तेषां, नित्यसूरिसेव्यं परमं पदमेव परमप्राप्यं स्थानम् ।

224. **'एते वै निरयास्तात स्थानस्य परमत्मनः '** (म.भा.शां.196-6) 45

विरिंचस्थानादारभ्य अधस्तनाः सर्वा भोगभूमयः परमात्मस्थान-दृष्ट्या दुःखभूमय एव भवेयुः ; यतः परमानन्दभूमिः भगवतः स्थानम् ।

225. **'एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ ।**
तदादर्शितपन्थानौ सृष्टिसंहारकारकौ ।। ' (म.भा.शां.350-19) 118

'चतुर्मुखः रुद्रः ' इतीमौ देवानामुत्तमौ, यथाक्रमं भगवतः प्रसादेन क्रोधेन च प्रादुर्भूतौ स्मृतिषु प्रतिपन्नौ । तेनैव भगवता कर्तव्यविषये सम्यक् स्पष्टीकृतमार्गौ सन्तौ, सृष्टि-संहारकर्मणोः निर्वाहकौ भवतः ।

226. **'एवं प्रकारममलं नित्यं व्यापकमक्षयम् ।**
समस्तहेयरहितं विष्ण्वाख्यं परमं पदम् ।।' (वि.पु.1-22-53) 47

मुक्तात्मवर्तित्वेन पूर्वमुक्ताः ये ये प्रकारविशेषाः तद्विशिष्टं, सर्वहेयप्रतिभटम्, शाश्वतं, सर्वत्र पूर्णं, स्वरूपतो धर्मतश्च अविकारि, अखिलहेयविदूरम्,'विष णु' संज्ञकं भगवत्स्वरूपं चेतनानां परमप्राप्यम् ।

पृ.सं.

227. 'एवमेष महाबाहो मैत्रेय भगवानिति ।
परमब्रह्मभूतस्य वासुदेवस्य नाऽन्यगः ।।' (वि.पु.6-5-76) 46

हे मैत्रेय ; 'भगवान्' इत्ययम् उत्कृष्टः शब्दः, उक्तावयवार्थयोगेन बृहत्त्वबृंहणत्ववतः परस्य ब्रह्मणो वासुदेवस्यैव वाचकत्वात्, नान्यस्य देवस्य वाचकः।

228. 'कथयामि यथा पूर्वं दक्षाद्यैर्मुनिसत्तमैः ।
पृष्टः प्रोवाच भगवानब्जयोनिः पितामहः ।।' (वि.पु.1-2-10) 103

दक्षमरीच्यादिभिः ब्रह्मणो मानसैः पुत्रैः मुनिश्रेष्ठैः प्रजापतिभिः,पूर्वं कृतप्रश्नः, जगत्सृष्ट्याद्यर्थापरोक्ष्यवान् कमलसम्भवो ब्रह्मा प्रत्युत्तरं यादृशं दत्तवान्, तत् भवते विवृणोमि ।

229. 'कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः' 47,
(वि.पु.4-1-38) 160

कला-काष्ठा-मुहूर्ताद्यात्मकः अयं कालः, भगवतो नित्यविभूति-भूतस्य परमव्योम्नः, परिणामस्य (जीर्णतायाः) हेतुः न भवति ।

230. 'कालं स पच्यते (कालः सम्पच्यते) तत्र न कालस्तत्र वै प्रभुः' 45,
(म.भा.शां.196-9) 160

नित्यविभूत्याख्ये भगवतः अक्षरे परमे व्योमनि, स परमात्मा अन्यत्र सर्वजीर्णताहेतुभूतं कालं स्वयं जरयति ; भगवानेव तत्र प्रभुः , न कालः ।

231. 'कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः ।
कृष्णस्य हि कृते भूतमिदं विश्वं चराचरमिति ।।'
(म.भा.स.38-23) 46

कृष्णरूपो भगवानेव खलु सर्वेषां लोकानां सृष्टि-स्थिति-लयकारणम्। इदं जंगमाजंगमात्मकं सर्वं जगत् भगवतः कृष्णस्य शेषभूतं सदेव सृष्टम् ।

232. 'केन सृष्टमिदं सर्वं जगत् स्थावरजंगमम् ।
प्रलये च कमभ्येति तन्नो ब्रूहि पितामह ।। ' (म.भा.शां. 180-1) 120

हे सर्वपितामह ! ब्रह्मन् ! इदं चराचरात्मकं सर्वं जगत् केन वा सृष्टिगोचरतामापादितम् ? अन्ते च पुनः कं वा गच्छति लीयमानम् ? तत्सर्वम् अस्माकं सम्यग्बोधय ।

पृ.सं.

233. 'कोपाय च यतस्तस्मात् वस्तु वस्त्वात्मकं कुतः ' (वि.पु.2-6-45) 174

अन्नपानादिकं सर्व वस्तु, कदाचिद्यथा प्रीतये भवति; तथैव कदाचित् कोपायाऽपि भवति यतः, तस्मात् कथमपि किंचिदपि वस्तु सुखैकान्तवस्तुतां दुःखैकान्तवस्तुतां वा नैव भजते ।

234. 'क्रीडतो बालकस्येव चेष्टा (ः) तस्य निशामय' (वि.पु.1-2-20) 47

लीलार्थं प्रवृत्तस्य बालकस्य चेष्टा बालकप्रीतिमात्रार्था तद्वत् जगत्सृष्टि-स्थिति-लया अपि भगवतो लीलाप्रयुक्ताः चेष्टाः केवलं भगवत्प्रीतिमात्रार्थाः ताः श्रृणु ।

235. 'जगच्च सः ' (वि. पु.1-1-3) 169

('स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः ' इति)

परमात्मैवास्य जगतः प्राणयिता चेति जगत्सृष्टि-स्थिति-संहारत्वात्, 'स एव जगत्' इत्यभेदेनोच्यते ।

236. i. 'जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम् ।
अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षणः'
(वा.रा.यु.120-26) 169

ii. 'जगत्सर्व----तलम्' 66

चेतनाचेतनात्मकं सर्वं जगत्, भगवतः परमात्मभूतस्य आधेयं विधेयं शेषभूतं च सत् शरीरतां प्रतिपन्नम् । अतः त्वच्छरीरभूतवसुधातलगतं स्थैर्यमपि भवदीयमेव । त्वदीयः यः कोपरूपो धर्मः, स एव अग्नौ परिदृश्यमानः तापः। त्वदीयवक्षोविराजमानश्रीवत्साख्यलांछनरूपः सकलजनमनोनयनानन्दकरश्चन्द्रः, त्वदीयः प्रसन्नतारूपो धर्म एव ।

237. 'जगदेतन्महाश्चर्यं रूपं यस्य महात्मनः ।
तेनाश्चर्यवरेणाहं भवता कृष्ण संगतः ।। ' (वि. पु. 5-19-7) 86

हे कृष्ण ! परिदृश्यमानम् उच्चावचरूपेणावस्थितं विविधविचित्रानन्तरूपं जगत्, महामहिमसम्पन्नस्य यस्य भवतः अपृथक्सिद्धं धार्यं नियाम्यं शेषभूतं च , तादृशेन अत्यन्तविस्मयनीयदिव्यस्वरूपेण भवता सह अहं समागमं प्राप्तवानस्मि ।

238. 'ज्ञानशक्तिबलैश्वर्यवीर्यतेजास्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः।। (वि. पु. 6-5-79) 46

पृ.सं.

त्याज्यैः गुण-तत्कृतक्लेशादिभिः साकम् असहभावीनी ज्ञानादीनि समस्तान्येकत्र विद्यन्ते चेत् ! तादृशः तेषामेक आश्रय एव 'भगवान्' इति शब्दस्य मुख्योऽर्थः।

239. **'ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च।**
नद्यस्समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य ।।'
(वि.पु.2-12-38) 169

हे विप्रवर्य ! आदित्यादिज्योतींषि, भूरादयो लोकाः, तथा गिरि-नद्यादीनि च भावाभावात्मकानि यानि यानि, तानि सर्वाण्यपि विष्णवात्मकान्येव ।

240. **'ज्योतींषि शुक्राणि (शुक्लानि) च यानि लोके त्रयो लोका लोकपालास्त्रयी च ।**
त्रयोऽग्नयश्चाहुतयश्च पंच सर्वे देवा देवकीपुत्र एव ।।'
(म.भा.अनु.18-10) 169

स्वयंप्रकाशरूपाणि सोमसूर्याग्न्याख्यानि यानि ज्योतींषि यानि लोके विद्यन्ते, भूर्भुवस्सुवर्लोकाख्यं च यत् लोकत्रयम् , तादृशलोकानां पालकाश्च ये इन्द्रादयः, ऋग्यजुःसामाख्यं च यत् तत्त्वहितपुरुषार्थविदकं वेदरूपं शास्त्रं, दक्षिणाग्नि-आहवनीय-गार्हपत्याख्याश्च वेदोक्तकर्माधारभूता अग्नया, तत्र दीयमानाश्च याःपंचविधाः आहुतयः, तथा एतैः कर्मभिराराध्याः देवाः एते सर्वेऽपि देवकीपरमानन्दः कृष्ण एव ; नाऽन्यत् ।

241. **'तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः ।**
शब्दोऽयं नोपचारेण त्वन्यत्र ह्युपचारतः ।।' (वि.पु.6-5-77) 47

भगवान्' इत्ययं शब्दः, यौगिक्या रुढ्या च वृत्त्या निरवधिक-पूज्यतावति वासुदेवे परमात्मनि मुख्यवृत्तः, तद्भिन्ने जीवादौ प्रयुज्यमानश्चेत् अमुख्यवृत्तः ।

242. **'तत्सर्वं वै हरेस्तनुः'** (वि.पु.1-22-38) 125

तत्र तत्र यस्यकस्यचिदर्थस्य उत्पत्तौ निमित्ततया उपलभ्यमानं सर्वमपि वस्तुजातम्, परमात्मनो हरेः अधिष्ठानं सत् शरीरभूतमेवेति, तच्छरीरकः परमात्मैव निमित्तभूतः ।

243. **'तदेव कोपाय यतः प्रसादाय च जायते ।**
तस्माद्दुःखात्मकं नास्ति न च किंचित्सुखात्मकम् ।।'
(वि.पु.2-6-46) 125

पृ.स.

एकमेव अन्नपानादिकं वस्तु, यथा अनेकपुरुषापेक्षया व्यवस्थितरूपं विहाय प्रीतिजनकं दुःखजनकं च भूत्वा, 'इदमित्थम्' इति अनिर्देश्यं भवति, तथा एकैकपुरुषापेक्षयाऽपि काल-देशसन्निवेशादिभेदं निमित्तीकृत्य, प्रीतिदुःखयोः कारणं भवति । कोप-प्रसादयोश्च कारणं भवति। अतः सर्वस्याऽपि वस्तुनः सुखात्मकत्वं वा दुःखात्मकत्वं वा न स्वरूपायत्तम्; किन्तु कर्मकृतमेवेति कर्मावसाने तत् सुखदुःखात्मकत्वम् अपगच्छति ।

244. 'तदेव सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत् ।
तथा पुरुषरूपेण कालरूपेण च स्थितम् ।।' (वि.पु.1-2-14) 174

स्थूल-सूक्ष्माचेतनात्मकं प्रमाणप्रतिपन्नं सर्वमपि, पूर्वोक्तपरब्रह्म-शरीरभूतमेवेति, सर्वं ब्रह्मैव । तथैव तद्ब्रह्म समष्टि-व्यष्टिजीवात्मस्वरूपेण कालात्मना च स्थितमिति, सर्वमपि तद्ब्रह्मैव ।

245. 'तद्ब्रह्म परमं नित्यमजमक्षयमव्ययम् ।
एकस्वरूपं च सदा हेयाभावाच्च निर्मलम् ।।' (वि.पु.1-2-13) 122

तत् वासुदेवाख्यं परं ब्रह्म, जन्म-मृतिविदूरम्, अत एव परिणाम-वृद्ध्यादिविकारशून्यम्, स्वरूपविपर्यासाभाववत्, कालपरिच्छिन्नम्, कामादिना अष्टविधेन (काम-क्रोध-मोह-हर्ष-मान-मद-मति-विषादाः) सत्त्वादिना (सत्त्वं, रजः, तमः)इह त्रिविधेन च मलेन रहितम् ।

246. 'तमसः परमो धाता शङ्खचक्रगदाधरः ।
श्रीवत्सवक्षा नित्यश्रीरजय्यः शाश्वतो ध्रुवः ।।'
(वा.रा.यु.114-15) 159

प्रकृतिमण्डलस्य परस्तात् अप्राकृते वैकुण्ठाख्ये धामनि विराजमानः, जगद्धारणपोषणार्थं धृतशङ्खचक्रगदादिदिव्यायुधः, श्रीवत्साख्येन दिव्येन लांछनेन वक्षःस्थलगतेन प्रकाशमानः, नित्यानपायि महालक्ष्मीसंश्लेषवान्, अत एव नित्यश्रीसम्पन्नतया कदापि केनापि कुत्रापि जेतुम्-अभिभवितु-मसाध्यः, नित्यमुक्तैर्नित्यं सेव्यः अविकारस्वरूप एषः श्रीरामचन्द्रः प्रभुः ।

247. i. 'तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसञ्ज्ञिता ।
सर्वभूतेषु भूपाल तारतम्येन वर्तते (वि.पु.6-7-63) 156

ii. 'तया-------- त्वाच्च' 118

पृ.सं.

हे राजन् ! अविद्याख्यया तृतीयया विष्णुशक्त्या आवृतत्वादेव, जीवात्मरूपा विष्णुशक्तिः ब्रह्मादिस्तम्बान्तेषु तेषु तेषु न्यूनाधिकभावापन्नज्ञानानन्दादियुक्ता सती अवतिष्ठते ।

248. 'तवान्तरात्मा मम च ये चाऽन्ये देहिसंज्ञिताः' (म.भा.शा.361-4) 123

हेरुद्र ! भगवान् नारायणः, भवतः (रुद्रस्य)ह्व मम ब्रह्मणःह्व अन्येषां सर्वेषां देहिनामपि अन्तरात्मभूतः ।

249. 'तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः ।
परःपराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ।।'
(वि.पु.6-5-85) 48

यस्मिन् परमात्मनि सकलजगतामीश्वरे, क्लेशकर्मविपाकाशयाख्याः ये केऽपि दोषाः नैव सन्ति ; सः तेजोबलादीनां निरवधिकानां महागुणानां वारिधिरिव एकैक आश्रयोऽस्ति ; तथा सर्वातिशायी च ।

250. 'तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश ।
एकादशं मनश्चात्र देवा वैकारिकाः स्मृताः ।।' (वि.पु.1-2-47) 59

ज्ञान-कर्मेन्द्रियाणि सर्वाणि, राजसाहंकारकार्याणि इति केचिद्वदन्ति। अन्ये च केचन मनस्सहितानि ज्ञान-कर्मेन्द्रियाणि सर्वाणि, सात्त्विकाहंकारकार्याणीति च वदन्ति । वस्तुतस्तु इन्द्रियाणि सात्त्विकाहंकार-प्रभवाण्येव ।

251. 'तौ तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ ।
वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ।।' (वा.रा.बा.4-6) 159

सांगसरहस्येषु सर्वेषु वेदेषु अत्यन्तं शिक्षितां मतिं प्राप्तौ, वेदार्थदर्शनोपयोगिमेधाख्यविशिष्टबुद्धिसम्पन्नौ, तौ कुशलवौ ज्ञात्वा, अज्ञातानेकवेदशाखागतार्थविशेषव्यक्तीकरणाय तौ स्वीकृतवान्, उपबृंहणसमर्थः भगवान् वाल्मीकिः ।

252. 'त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः परन्तपः' (वा.रा.यु.120-20) 169

भगवन् श्रीरामचन्द्रप्रभो ! त्वमेव यज्ञनिर्वाहकपशुहविराज्य-स्रुक्-स्रुवादिशरीरकः, यज्ञाराध्येन्द्रादिशरीरकश्च यज्ञनिर्वाहकदैहिक-मानसिक-सर्वसम्पत्प्रदश्च । तथा आश्रुत-प्रत्यश्रुत-यज-येयजामह-वषट्काराख्यं यज्ञसम्बन्ध्यपि सर्वं, तथा प्रणवाख्यं वाचकं सर्ववेदवैदिकानां परमप्रधानभूतम् त्वमेव ।

पृ.सं.

253. 'दिव्यं स्थानमजरं चाप्रमेयं दुर्विज्ञेयं चागमैर्गम्यमाद्यम् ।
गच्छ प्रभो रक्ष चास्मान् प्रपन्नान् कल्पे कल्पे जायमानं
स्वमूर्त्या ।।' (म.भा.मौ.5-32) 160

सर्वयोगैश्वर्यसम्पन्न हे कृष्ण ! त्वम् यत् स्थानं, द्युनामके परमव्योमनि विराजमानं, कालकृतपरिणामशून्यम्, प्रमाणतया लोकसिद्धैश्चक्षुरादिभिः 'ईदृशम्, एवं प्रकारम्' इति निर्णेतुमशक्यम्, ध्यानादिभिरपि विशेषतः इयत्तया ज्ञातुमनर्हम्, श्रुत्यादिभिरागमैरेव केवलं गम्यमानम्, आदिभूतं श्रीवैकुण्ठाख्यं भवदीयं वर्तते, तत् प्राप्नुहि। प्रति कल्पं स्वसंकल्पायत्तया लोकानुग्रहैकलक्ष्यया भवदीयया दिव्यया शुभाश्रयभूतया तन्वा अवतरन् भवदेकशरणान् सर्वानस्मान् देवादीन् निर्दुःखान् आनन्दपूर्णानापादय ।

254. 'देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ।
विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनुम् ।।' (वि.पु.1-9-145) 160

भगवतो नित्यापृथक्सिद्धस्वरूपा इयं महालक्ष्मीः, भगवतो विष्णोः देवशरीरपरिग्रहे सति स्वयमपि देवलक्षणलक्षितशरीरसम्पन्ना, मनुष्याकारपरिग्रहे सति, मानुषाकारसम्पन्ना च भूत्वा, स्वीयां मूर्तिमपि स्वपतिदेहानुगुणामापाद्य, तद्धर्मैः धर्मिणी भवति ।

255. 'देवा वैकारिकाः स्मृताः' (वि.पु.1-2-47) (प्र.251 द्रष्टव्यः) 59

256. 'नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती' (वि.पु.1-14-23) 77

सर्वेषामपि वाचकानां शब्दानां, यस्मिन् (अनादिमध्यनिधने)ह्न परमात्मन्येव पर्यवसानतः स्थितिरूपा अनौपाधिकी अन्यत्रागामिनी स्थिरा अवस्थितिः, तं सर्वशब्दानां वाच्यभूतं परमात्मानं, प्रह्वीभावेन संगता भवामः।

257. 'न भूतसंघसंस्थानो देहोऽस्य परमात्मनः' (म.भा.शां.206-60) 126

अस्य प्रकृतस्य भगवतः, यः शास्त्रागमादिसिद्धः भक्तानुग्रहार्थावतारादिकालिकः, तपोगम्यसाक्षात्कारादिकालिको वा दिव्यो विग्रहः सः, देवादिस्थावरान्त-चतुर्विधदेहवत् पृथिव्यादिभूतजातसम्मेलनायत्तसंन्निवेशविशेषसम्पन्नो नैव भवति ; किन्तु अप्राकृतैः अभौतिकैः स्वसंकल्पायत्तैः सत्त्वमयैः अंशैराविर्भूतः ।

258. 'नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम ।
वस्त्वेकमेव दुःखाय सुःखाये (र्ष्योद्भवा)र्ष्यागमाय च ।।'
(विपु2-6-44) 174

पृ.सं.

हे ब्राह्मणश्रेष्ठ ! यौ द्वावर्थौ यथाक्रमं दुःखसाधनतया सुखसाधनतया च शास्त्रवेद्यौ, पापपुण्यात्मकौ, अन्ततो गत्वा तावेव नरकशब्देन स्वर्गशब्देन च अभिधीयेते । पापमेव नरकम्, पुण्यमेव स्वर्गः । एकमेव हि वस्तु अनियमेन व्यक्तिभेदं कालदेशादिभेदं वा अनुरुध्य दुःखं प्रति सुखं प्रति ईर्ष्याख्यामक्षमां प्रति च हेतुर्भवति ।

259. 'न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
भक्त्या च धृत्या च समाहितात्मा ज्ञानस्वरूपं परिपश्यतीह ।।'
(म.भा.शां229-69) 176

अस्य पुरुषोत्तमस्य परस्य ब्रह्मणः दिव्यमप्राकृतं वर्ष्म, इन्द्रियाग्राह्यम्; अत एव यः कोऽपि एनं महापुरुषं चक्षुषा बाह्येन द्रष्टुं न शक्नुयात् । धृत्या-इन्द्रियाणां विषयवैमुख्यकरणेन शमदमादिना च समाहितमनस्कः, पूर्वोक्तज्ञानविशेषरूपया भक्त्या पुरुषोत्तमं साक्षात्करोति ।

260. 'नाम रूपं च भूतानां कृत्यानां च प्रपंचनम् ।
वेदशब्देभ्य एवादौ देवादीनां चकार सः ।।' (वि.पु.1-5-63) 22

सुर-नर-तिर्यक्-स्थावराख्यानां चतुर्विधानामपि देहिनां, देव-मनुष्य-मृगवृक्षादिजात्यभिधानं नाम, एवम् अनिमेषत्व-द्विपात्त्व-चतुष्पात्त्व-शाखित्वादिकं रूपं, हविर्भागयज्ञाद्यनुष्ठानादिरूपाणां कर्तव्यानां विस्तरणं च (तथा) स्रक्स्रुवादेः शमीमयत्वादिकम्, अग्न्याधानादेः ब्राह्मणादि-कर्तृकत्वादिकम्, यूपादेः खदिर-प्रकृतिकत्वादिकम् इत्यादिसर्वं वेदगतेभ्यः शब्देभ्य एव ज्ञापकभूतेभ्यः सृष्ट्यारम्भे निर्मितवान्, स्रष्टृत्वेन नियुक्तो ब्रह्मा ।

261. 'नारायणो जगन्मूर्तिरनन्तात्मा सनातनः' (म.भा.शां.75-10)

अनाद्यनन्तो भगवान् नारायणः, यतः सर्वजगच्छरीरकः, अतः परिच्छेदातीतस्वरूपवान् ।

262. 'नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी ।
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ।।' (वि.पु.1-8-17) 160

जगतः मातृभूता एषा महालक्ष्मीः, विष्णोः नित्यानपायिन्येव । विष्णुः यत्स्वभावः ; इयमपि तत्स्वभावा । विष्णोः सर्वगतत्वसत्यज्ञानादि-स्वरूप-कल्याणगुणानाम् अस्याम् अतिदेशः । (अथवा) भगवान् विभुत्वेन सर्वगतः, इयं च सर्वगता । (विष्णुचित्तीयव्याख्या)

पृ.सं.

263. 'निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः ।
दुःखाज्ञानमला धर्मा प्रकृतेस्ते न चात्मनः ।। ' (वि.पु.6-7-22) 81

स्वरूपतो मलप्रत्यनीकः अयं चेतनः, स्वरूपत एव आनन्दात्मकः ज्ञानात्मकश्च । 'अहं दुःखी, अहम् अज्ञानी, अहं मलिनः,' इत्येवम् एतत्सम्बन्धितया भासमानाः दुःखाज्ञानमलाः वस्तुतः प्रकृतिसम्बन्धिन एव धर्माः ; न आत्मसम्बन्धिनः ।

264. 'परः पराणां परमः परमात्मात्मसंस्थितः ।
रूपवर्णादिनिर्देशविशेषणविवर्जितः ।।' (वि.पु.1-2-10) 122

स्वरूप-रूप-गुणविभवैः सर्वातिशायी, स्वं प्रति नियन्त्रन्तररहितः, स्वयं च सर्वनियन्ता, निराधारः, स्वयं सर्वाधारः परमात्मा, काल्पनिकैः जातिवर्ण-क्रिया-संज्ञाभिः वर्जितः ।

265. 'परमात्मा च सर्वेषामाधारः परमेश्वरः ।
विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ।।' (वि.पु.6-4-40) 121

स एव परमात्मा, स्वायत्तनिखिलचेतनाचेतनस्वरूप-स्थिति-प्रवृत्ति-भेदः, निस्समाभ्यधिकः, सर्वनियन्ता, वेद-वेदान्तवेद्यः, विष्णुनाम्ना प्रथितः ।

266. 'पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
सर्वेन्द्रियान्तःकरणं पुरुषाख्यं हि यज्जगत् ।। ' (वि.पु 1-2-69) 124

पृथिवी , जलं, तेजः, वायुः, आकाशः, इतीमानि पंच भूतानि , पंच ज्ञानेन्द्रियाणि, पंच कर्मेन्द्रियाणि, उभयोरपि प्राधान्येन सहकारि अन्तःकरणम् , इमानि सर्वाण्यपि, (तथा) चेतनाचेतनात्मकं निखिलं जगच्च,सर्वात्मभूतं परमपुरु षाख्यं तत्त्वमेव ।

267. 'प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी ।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ।। ' (वि. पु. 6-4-39) 121

हे मैत्रेय ! मया (पराशरेण) स्थूल-सूक्ष्मरूपा तमश्शब्दवाच्या या प्रकृतिः पूर्वं प्रतिपादिता, सा (तथा) समष्टि-व्यष्ट्यात्मकः चेतनश्चेति एतावुभावपि प्रकृतिपुरुषौ प्रलयकाले परब्रह्मणि अविभागेन तिष्ठतः।

पृ.सं.

268. 'प्रधानपुंसोरजयोः कारण कार्यभूतयोः' (वि. पु.1-9-37) 75

स्वरूपतः उत्पत्तिरहितयोरपि प्रकृति-पुरु षयोः, स्वरूपान्यथाभाव-स्वभावान्यथाभावाख्यावस्थान्तरापत्तिरूपकार्यत्ववतोः, स्थूलावस्था-तत्तत्स्वरूपसिद्धौ सूक्ष्मावस्थतत्तच्छरीरकः परमपुरुष एव कारणम् ।

269. 'ब्रह्मविष्णुशिवात्मिकाम्' (वि. पु. 1-2-67) (प्र.304 द्रष्टव्यः)

270. 'मूर्तं ब्रह्म महाभाग सर्वब्रह्ममयो हरिः' (वि. पु.1-22-63) 124

मूर्तं ब्रह्म दिव्यं शरीरं यस्य अस्ति स हरिः , सर्वब्रह्ममयश्च (ब्रह्म-जीवः) शुद्धं सर्वं जीवस्वरूपं हरेः शेषभूतमिति, हरिः सर्वब्रह्ममयः ।

271. 'यत्किंचित्सृज्यते येन सत्त्वजातेन वै द्विज ।
तस्य सृज्य (सत्त्व)स्य सम्भूतौ तत्सर्वं वै हरेस्तनुः ।।'
(वि.पु.1-22-38) 66

हे द्विज ! येन पदार्थसमूहेन सृज्यमानं वस्तु यत्किंचित् लोके व्यवहारसिद्धम्, तस्य तस्य सृज्यवस्तुनः सर्गकार्ये निमित्ते तत्तत्कारणस्य अधिष्ठानेन हरिकृतेन, कारणीभूतं सर्वमपि हरेः शरीरभूतमेव । अतः तस्य शरीरादेव सर्वमुत्पद्यते ; न अन्यस्मात् ।

272. 'यज्ञैस्त्वमिज्यसे नित्यं सर्वदेवमयोऽच्युत' (वि.पु.5-20-97) 144

सर्वदेवतामय ! हे भगवान्! त्वं तत्तद्देवताराधनरूपैः सर्वैः यज्ञैः नित्यमपि आराध्यसे ।

273. 'यन्मयं च जगद्ब्रह्मन् यतश्चैतच्चराचरम् ।
लीनमासीद्यथा तत्र (यत्र) लयमेष्यति यत्र च ।।(वि.पु.1-1-5) 121

हे ब्रह्मज्ञ! इदं स्थावजजंगमात्मकं जगत् यदात्मकं, यदुपादानकं, सृष्टेः पूर्वं यस्मिन् अविभागेन संश्लिष्टमासीत्, तथा अन्तेऽपि यत्रैव वस्तुनि संश्लिष्टं भविष्यति, तत्सर्वं भवतः सकाशात् श्रोतुमिच्छामि ।

274. 'यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा ।
संसारतापानखिलानवाप्नोत्यतिसन्ततान् ।।' (वि.पु.6-7-63) 156

हे नृप! ब्रह्मादिपिपीलिकापर्यन्तसकलदेहाधिष्ठिता, विष्णोः तृतीयशक्ति-रूपया अविद्यया आवृता, असंख्याता क्षेत्रज्ञाख्या अपरा या विष्णोः शक्तिरस्ति, सैव संसरणजन्यानविरतान् अखिलान् क्लेशानपि प्राप्नोति ।

पृ.सं.

275. 'यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा ।
तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते ।।' (म.पु.290-15,16) 102

पूर्वं हि ब्रह्मणा स्रष्ट्रा, यद्यत् पुराणं यस्मिन् यस्मिन् कल्पे प्रवर्तितं ऋष्यादिद्वारा, तत्तत्कल्पगतसत्त्वादिगुणवद्देवतामाहात्म्यमेव तत्तत्स्वरूपेण विव्रियते ।

276. 'यैः स्वधर्मपरैनाथ नरैराराधितो भवान् ।
ते तरन्त्यखिलामेतां मायामात्मविमुक्तये ।।' (वि.पु.5-30-16) 144

सर्वशरण्य ! स्वस्वधर्मप्राधान्यवद्‌भिः यैर्यैः जनैः स्वविहितधर्मद्वारा भवान् आराधितः - प्रीतिमापादितः, ते सर्वे भवदीयामिमां मायाम् आत्मनो विमुक्तिफलाय अनवशेषेण तरन्ति ।

277. 'वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नाऽन्यस्तत्तोषकारकः ।।' (वि.पु.3-8-9) 100

श्रुति-स्मृतिबोधितचातुराश्रम्यसम्बन्ध्याचारसम्पन्नेन अधिकारवता पुरुषेण, तत्तदाचारद्वारा परमपुरुषो हरिः प्रीतिमान् भवति । एतदन्यो मार्गः भगवत्प्रीतिसंजननहेतुभूतो नैव विद्यते ।

278. 'विवेश वैष्णवं धाम सशरीरः सहानुगः ' (उ.रा.110- 12) 160

श्रीरामचन्द्रः स्वीयेन विग्रहेण अविकृतेन, (तथा) स्वीयैः अनुचरैः सह च वैष्णवं तेजोमयं स्वकीयं स्वाभाविकं स्थानं प्रविष्टवान् ।

279. 'विष्णुरात्मा भगवतो भवस्यामिततेजसः ।
तस्माद्धनुर्ज्यासंस्पर्शं स विशेहे महेश्वरः ।।' (म.भा.क.24-85) 118

महामहिमसम्पन्नस्य अपरिमिततेजस्समृद्धस्य शिवस्य, विष्णुरेव आत्मभूतः । अतः आत्मायत्तात् बलात्, महेश्वरः शिवः, तसय वैष्णवस्य धनुषः 'ज्याम्' आकर्षणरज्जुं स्पृष्ट्वाऽपि, न महान्तं श्रममवाप । तं सोढवान् ।

280. i. 'विष्णोः सकाशादुदभूत जगत्तत्रैव च स्थितम् ।
स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः ।।' (वि.पु.1-1-3) 122

ii. 'विष्णोः सकाशादुदभूतम्' । 121

अभिन्ननिमित्तोपादानभूतात् स्वसंकल्पसहकृतात् परमात्मनो विष्णोः इदं जगदुत्पन्नम् । प्रलये पुनस्तत्रैव अविभागेनावस्थितम् । अतः परमात्मैवास्य

पृ.सं.

जगतः प्राणयिता चेति स्वायत्तजगत्सृष्टि, स्थिति, संहारत्वात् 'स एव जगत्' इत्यभेदेनोच्यते ।

281. 'विष्णवाख्यं परमं पदम्' (वि.पु.1-22-53) 155

282. 'व्यक्तं विष्णुस्तथाऽव्यक्तं पुरुषः काल एव च' (वि.पु.1-2-20) 74

अव्यक्तपदाभिधेयं प्रधानं, व्यक्तपदाभिधेयं महदादिविशेषान्तं, पुरुषपदवाच्यो जीवः, तथा सर्वेषां कलनहेतुभूतः कालः इत्येते सर्वे, परमपुरुषाधीनस्वरूपस्थितिप्रवृत्तिकाः, परमपुरुषशरीरभूताश्चेति, तच्छरीरकस्य परमात्मनः कारणत्वं नाऽनुपपन्नम् ।

283. 'व्यक्तमेष महायोगी हरिर्नारायणः प्रभुः ।
अनादिमध्यनिधनो महतः परमो महान् ।।' (वा.रा.यु.114-14) 159

एषः श्रीरामचन्द्रः, लोकरक्षणोपायचिन्तारूपमहायोगवान्, अन्ते सर्वसंहर्ता सर्वसमर्थो नारायणः । आदिमध्यान्तरहिततया षड्भावविकाररहितः । महत्तया शास्त्रसिद्धेभ्यः इन्द्रादिभ्योऽप्युत्कृष्टात् ब्रह्मणो परमः सर्वोत्कृष्टः ।

284. 'शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तासु सर्गाद्या भावशक्तयः ।।
भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता' (वि.पु.1-3-2,3) 85

हे द्विजश्रेष्ठ ! लोकपरिदृष्टतत्तत्सर्ववस्तुगतानां तत्तद्वस्तूत्पादनकारणीभूतानां विविधानां शक्तिविशेषाणां दिव्यज्ञानमात्रगोचरत्वेन इन्द्रियागोचरत्वात् ताः सर्वा अपि शक्तयः, सर्वज्ञसर्वशक्तब्रह्मासाधारणाः । यथा हि लोके औष्ण्यं यत्र कुत्रचिदनुभूतमपि वह्निसम्बन्ध्येव, न इतरतत्तद्वस्तुसम्बन्धि ; तद्वत् ।

285. 'शरा नानाविधाश्चापि धनुरायतविग्रहम् ।
अन्वगच्छन्त काकुत्स्थं सर्वे पुरुषविग्रहाः ।।' (उ.रा.109-7) 159

(अप्राकृततत्त्वरूपाः) बहुप्रकाराः बाणाः, (तथा) अप्राकृततत्त्वात्मकं धनुश्च, तत्तदभिमानिदेवतानुगुणमूर्तिमत्, सर्वमपि परमपुरुषाकारतां स्वीकृत्य, श्रीरामचन्द्रस्य परमपदप्रयाणमनुसृत्य, स्वयमपि तेन सह प्रयाणमकुर्वन् ।

286. 'शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते ।
मैत्रेय भगवच्छब्दः सर्वकारणकारणे ।।' (वि.पु.6-5-72) 46

पृ.सं.

हे मैत्रेय ! समस्तहेयविरोधिनि, अचिन्त्याश्चर्यकरविभूतियुक्ततया महाविभूतिपदेनैवाभिधातुं योग्ये, सर्वजगत्स्रष्टुर्ब्रह्मणोऽपि स्रष्टरि परब्रह्मभूते वासुदेवे, 'भगवान्' इत्ययं शब्दः प्रवृत्तिनिमित्तपौष्कल्येन वाचको वर्तते ।

287. 'संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम् ।
संदृश्यते वाप्यधिगम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ।।'
(वि.पु6-5-87) 123

दोषसंस्पर्शानर्हं, दोषप्रतिभटं, च (तथा) स्वरूपतः स्वभावतश्चाविकारम्, आश्रितानां संरक्षणे बद्धदीक्षं वा, विष्ण्वाख्यं परं ब्रह्म, येन आगमाधीनज्ञानेन प्रथमं विषयीक्रियते, येन च ध्यानेन अपरोक्षीक्रियते, येनपरभक्तिपदाभिधेयेन ज्ञानेन प्राप्तिपूर्वकमनुभूयते च एतत् त्रिरूपमेव वस्तुतः अनुपचरितज्ञानपदबोध्यम्, इतरदज्ञानमेवेति निर्णीतम् ।

288. 'स ईश्वरो व्यष्टिसमष्टिरूपोऽव्यक्तस्वरूपः प्रकटस्वरूपः ।
सर्वेश्वरः सर्वदृक् सवरवेत्ता समस्तशक्तिः परमेश्वराख्यः ।।'
(वि.पु.6-5-86) 123

पूर्वोक्तः ईश्वराभिधानो वासुदेवः, समष्ट्यात्मकवासुदेवादिव्यूहरूपैः, व्यष्ट्यात्मकरामकृष्णादिविभवरूपैश्च सम्पन्नः, स्वीयेन पररूपेणागोचरः, स्वीयेनैव व्यूहादिरूपेण प्रकटरूपश्च सन्, अप्रतिहतदृष्टिः, सर्वज्ञः अचिन्त्यसर्वशक्तिः सर्वनियन्ता चेति परमेश्वरसंज्ञो भवति ।

289. 'स एव क्षोभको ब्रह्मन् ! क्षोभ्यश्च परमेश्वरः' (वि.पु.1-2-33) 74

प्रकृतिपुरुषशरीरकः परमात्मैव प्रकृतिपुरुषयोः सर्गोन्मुख्यसम्पादकः; सृज्यप्रकृतिपुरुषशरीरकत्वेन, क्षोभ्यश्चगुणवैषम्यात्मकस्य, प्रवृत्त्युन्मुखत्वात्मकस्य च क्षोभस्य प्रकृतिपुरुषद्वारा आश्रयभूतोऽपि भवति ।

290. i. 'स एव सर्वभूतात्मा विश्वरूपो यतोऽव्ययः ।
सर्गादिकं ततोऽस्यैव भूतस्थमुपकारकम् ।।' (वि.पु.1-2-70) 124

ii. 'स एव------------------ ऽव्ययः' 125

यतः अयं परमात्मभूतो विष्णुः, सर्वेषां ब्रह्मादिस्थावरान्तानां चेतनोचेतनानामात्मभूतः, विश्वं चाऽस्य शरीरत्वात् रूपं भवतिः, अतः अविकारोऽप्ययं, पृथिव्यादिसर्वजगदात्मक एव । ततश्च ब्रह्मादिषु भूतेषु

पृ.सं.

विद्यमानं सृष्ट्यादिकं कर्म, अस्य भगवतो लीलारसावहतया प्रीतिरूपोपकाराधायकं भवति ।

291. **'स एव सृज्यः स च कर्मकर्ता स एव पात्यत्ति च पाल्यते च ।**
ब्रह्माद्यवस्थाभिरशेषमूर्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः ।। ' (विपु 1-2-71) 124

चेतनाचेतनात्मकनिखिलजगच्छरीरकः परमात्मभूतो विष्णुरेव, स्वगताभिः कार्यकारणावस्थात्मिकाभिः ब्रह्मादिस्तम्बपर्यन्ताभिः अवस्थाभिः चेतनाचेतनद्वारिकाभिः, सृज्यमानतां, स्रष्टृतां, रक्षकतां चेति सर्वानिमान् प्रकारान् भजते । अयं परमात्मा सर्वातिशायित्वात् प्राप्यभूतः, अभीप्सितसर्वार्थदः , उपायत्वेन उपेयत्वेन च वरणीयश्च ।

292. **'संकीर्णाः सात्त्विकाश्चैव राजसास्तामसास्तथा '** (म.पु.290-13) 101

ब्रह्मणो दिवसरूपाः कल्पाः, अन्योन्यमिश्रत्रैगुण्यवन्तः शुद्धसत्त्वमयाः केवलरजोमयाः केवलतमोमया इति त्रिविधा भवन्ति ।

293. **'समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशाद्धृतभूतवर्गः ।**
इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ ।। ' (विपु6-5-84) 123

अयं परमात्मा अनवधिकमंगलगुणराशिः अत एव अनन्तायाः स्वीयशक्तेः लेशमात्रेण निखिलं भूतजातं धारकपोषकभोग्यार्थप्रदानेन पितेव रक्षन् (तथा) समस्तजगतां हितं साधयितुं कृतसंकल्पः, असंख्यानि ज्ञानमयानि दिव्यानि शरीराणि स्वीकुर्वंश्च विराजते ।

294. **'समस्तहेयरहितं विष्ण्वाख्यं परमं पदम्'** (वि.पु. 1-22-53) 154, 155
(प्र 227 द्रष्टव्य)

295. **'समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ।**
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ।।' (वि.पु.6-7-70) 160

हे राजन् ! 'विष्णोः परा शक्तिः, (तथा) क्षेत्रज्ञाख्या अपरा शक्तिः, (एवमेव) श्रुत्युक्तयज्ञदानादिरूपा अविद्यापदवाच्या शक्तिः' इति सर्वा अपि शक्तयः, भगवतो यादृग्विधे स्वरूपे स्वाभिमानिदेवताद्वारा सुस्थिताः, तत् जगद्विलक्षणसन्निवेशं, मुमुक्षुणा ध्यानयोग्याकारवत् , स्वरूपतो गुणतश्चापरिच्छेद्यं वा, 'आदित्यवर्णम्' इत्यादि श्रुतिसिद्धदिव्यस्वप्रकाशरूपवत्,

पृ.सं.

शुभाश्रयदिव्यमंगलविग्रहरूपं च , अन्यदेव द्रव्यम्

296. 'सर्गस्थित्यन्तकालेषु त्रिधैव सम्प्रवर्तते ।
गुणप्रवृत्त्या परमं पदं तस्यागुणं महत् ।।' (वि.पु.1-22-41) 155

जनार्दन एव हि! जगतः सृष्टि-स्थिति-संहारकालेषु सत्त्वरजस्तमोरूपाणां त्रयाणां गुणानां प्रवृत्त्या तत्तद्गुणाधिष्ठातृभूत-ब्रह्मविष्णुशिवाख्यशरीरभेदत्रयवान्, तथा विरिंचादिपदापेक्षया उत्कृष्टं यत् गुणमयप्रकृत्यसंस्पृष्टं परं स्वरूपं तद्वांश्चेति भेदचतुष्टाश्रयभूतो वर्तते ।

297. i. 'सर्वगत्वादनन्तस्य स एवाहमवस्थितः ।
मत्तः सर्वमहं सर्वं मयि सर्वं सनातने ।। (वि.पु.1-19-85) 117

ii. 'सर्वगत्वादनन्तस्य'

परमात्मनः त्रिविधपरिच्छेदरहितत्वेन (कालतो देशतो वस्तुतश्च) अनन्तपदाभिधेयस्य, स्थूल-सूक्ष्मात्मकं सर्वं व्याप्य स्थितत्वात्, अहम् (प्रह्लादः) अवस्थाविशेषं प्राप्तवान् परमात्मैव इति, अत एव प्राप्तावस्थाविशेषमदात्मकादेव परमात्मनः सृष्टं सर्वं जगत्, तादृशोऽहमेवसर्वं जगत्, तादृशे शाश्वते सर्वाधारभूते मय्येव सर्वं जगत् इति च अध्यवसायः मम सम्पद्यते ।

298. 'सर्वत्राऽसौ समस्तं च वसत्यत्रेति वै यतः ।
ततस्स वासुदेवेति विद्वद्भिः परिपठ्यते ।।' (वि.पु.1-2-12) 122

चेतनाऽचेतनात्मके सर्वस्मिन् परिदृश्यमाने जगति, परमात्मनोऽन्तर्यामितया अवस्थानात्, (तथा) अस्य च जगतः परमात्मनि आधेयत्वव्याप्यत्वनियाम्यत्वैः अवस्थानाच्च, तत्त्वज्ञैः परमात्मनः 'वासुदेवः' इति अन्वर्थनाम परिपठितमास्ते ।

299. 'सर्वभूतात्मा विश्वरूपो यतोऽव्ययः' (वि.पु.1-2-70) 125

(प्र 291 द्रष्टव्यः)

300. 'स सर्वभूतप्रकृतिं विकारान् गुणादिदोषाश्च मुने व्यतीतः ।
अतीत सर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तराले ।।'
(विपु6-5-83) 122

हे मुने ! स परमात्मा, समस्तजगत्सृष्टिहेतुभूतां मूलप्रकृतिं, तज्जन्यान् महदादीन्, सत्त्वादिगुण-तज्जन्यक्लेशादींश्च अतिक्रम्य, तेषामवशो वर्तते ।

पृ.सं.

स्वयमपि संह्रियमाण इव भाति । एवमपि अयं क्षेत्रज्ञानाम् अनादिकर्मानुगुणलीलामात्रप्रवृत्तत्वात् कर्मपरतन्त्रो जीव इव न सुखदुःखयोर्भोक्ता ; किन्तु स्वयं प्रभुः ।

306. **'अक्षराणामकारोऽस्मि'** (भ.गी.10-33) 113

अक्षराणां मध्ये 'अकारो वै सर्वावाक्' इति श्रुतिसिद्धः सर्ववर्णानां प्रकृतिः अकारः अहमेव ।

307. **'अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता ।**
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ।।' (भ.गी.18-32) 103

पार्थ ! चेतनगताबुद्धिः तादात्विकतमोनिरुद्धप्रसरा सती, अधर्मं 'धर्मं' इति, धर्मं च 'अधर्मम्' इति, सन्तमर्थम् 'असन्' इति, असन्तं च 'सन्' इति, परं तत्त्वम् 'अपरम्' इति, अपरं च 'परम्' इति, आहत्य सर्वानपि ज्ञेयानर्थान् वैपरीत्येन गृह्णाति चेत् ; सा 'तामसी' इति जानीहि ।

308. **'अपरेयमितस्त्वन्या प्रकृतिं विद्धि मे पराम् ।**
जीवभूतां महाबाहो ययेदं धार्यते जगत् ।।' (भ.गी.7-5) 73

हे महाबाहो ! 'भूमिरापः' इति पूर्वोक्ता इयं मम अपरा प्रकृतिः । इतः अचेतनायाः चेतनभोग्यभूतायाः प्रकृतेः विसजातीयाकारां, जीवाभूतां परांप्रकृतिम् - तस्या अचेतनभूतायाः, प्रकृतेः भोक्तृत्वेन प्रधानभूतां चेतनरूपां मदीयां प्रकृतिं विद्धि। यया इदम् अचेतनं कृत्स्नं जगत् धार्यते ।

309. **'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ।**
मत्तः परतरं नाऽन्यत् किंचदस्ति धनंजय ।।' (भ.गी.7-7) 113

हे धनंजय! ब्रह्मादिस्थावरान्तस्य उच्चावचरूपेणावस्थितस्य चिदचिन्मिश्रस्य, मद्योनित्वेन मदीयत्वेन च स्थितस्य जगतः, उत्पत्तिप्रलयहेतुभूतः शेषी अहमेव । अहमेव ज्ञानबलादिगुणयोगेन परतरः । मद्यतिरिक्तं च ज्ञानबलादिगुणान्तरयोगि किंचिदपि परतरं नाऽस्ति ।

310. **'अहं हि सर्वयज्ञाना भोक्ता च प्रभुरेव च ।।'** (भ.गी.9-24) 144

कौन्तेय ! अहमेव सर्वेषां यज्ञानामारध्यः, आराधकानां फलप्रदाता च।

311. **'अहमात्मा गुडाकेश सर्वभूताशयस्थितः'** (भ.गी.10-20) 66

हे गुडाकेश ! जितनिद्र अर्जुन ! अहं मच्छरीरभूतानां सर्वेषां भूतानां हृदये अवस्थितः सर्वात्मना आधारो नियन्ता शेषी च ।

पृ.सं.

312. 'आसुरी योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ।।' (भ.गी.16-20) 149

हे कौन्तेय ! मदानुकूल्यप्रत्यनीकजन्मापन्नाः, पुनरपि जन्मनि मद्विपरीत-ज्ञानाः, 'अस्ति भगवान् सर्वेश्वरो वासुदेवः' इति मद्विषयकं ज्ञानमलब्ध्वैव, तस्माज्जन्मनोऽप्यधमामेव गतिं यान्ति - प्राप्नुवन्ति ।

313. 'इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ।।' (भ.गी.5-19) 82

येषां चेतनानां मनः सर्वेष्वात्मसु ज्ञानैकाकारत्वकृते साम्ये स्थितं - निरूपाधिकात्मस्वरूपविषयकदृढाध्यवसाययुक्तम्, तैः समदर्शिभिः, संसाररूपः सर्गः (सृज्यत इति सर्गः) साधनानुष्ठानदशायामेव जितः । यतः प्रकृतिसंसर्गदोषवियुक्ततया समम् आत्मवस्त्वेव ब्रह्म । आत्मसाम्ये स्थिताश्चेत् ब्रह्मणि स्थिता एव ते । ततश्च मुक्ता एव ।

314. 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।।' (भ.गी.15-17) 45

पूर्वोक्ताभ्यां क्षराक्षरपदाभिधेयाभ्यां बद्ध-मुक्तावस्थचेतनाभ्यां विलक्षणोऽर्थान्तरभूत आत्मा, पुरुषोत्तमपरमात्मशब्दाभ्यां शास्त्रेषु व्यवह्रिय-माणो वर्तते । स एव च, पृथिव्यन्तरिक्षद्युनामनि त्रीण्यपि भुवनान्यन्तःप्रविश्य नियन्तृतयाऽवस्थाय, अविनाशी सन् धारयति पोषयति च ।

315. 'तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । 96,
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ।।' (भ.गी.16-19) 149

हे अर्जुन ! उक्तया रीत्या सर्वलोकहितैषिणं सर्वान्तर्यामितया सर्वाधारमपि मां ये द्विषन्ति, आत्मघातित्वेन अत्यन्तं क्रूरान् , स्थितं नरत्वमपि विस्मृत्य आसुरभावमापन्नान् शुभचिन्ताशून्यान् तान् चेतनविशेषान्, जन्मजरामरणादिरूपेण परिवर्तमानेषु संसाराख्येषु सन्तानेषु, तत्रापि मदानुकूल्यविरोधिष्वेव जन्मसु-तत्तज्जन्मप्राप्त्यनुगुणप्रवृत्तिहेतुभूतासु क्रूरासु बुद्धिषु, अहमेव संयोजयामि ।

316. 'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।।' (भ.गी.10-10) 95

मय्येव सततयोगमाशंसमानानां, मामेवोपासीनानां चेतनानां,

पृ.सं.

योगपदव्यपदेश्यं, विपाकदशापन्नं बुद्धिविशेषं मदीयप्रीत्यात्मकज्ञाना-प्यायितम्, अहं वासुदेव एव अनुगृह्णामि । येन च बुद्धियोगेन उपासितारः, मां प्राप्नुयुरेव ।

317. **'तेषमेवानुकम्पार्थमहमज्ञानजं तमः ।**
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ।।' (भ.गी.10-11) 95

हे अर्जुन ! ये मयि सततयोगमाशंसमानाः चेतनाः, तेषामेव अनिष्ट-निवृत्तिपूर्वकेष्टप्राप्तिहेतुभूतदीयप्रसादविशेषसम्पादनार्थम्, अनुग्रहौपयिक-ज्ञानशक्तिकारुण्यदिव्यमंगलविग्रहादिविशिष्टः अहं तेषां मनोवृत्तौ विषयतया अवस्थितः, मत्स्वरूपरूपगुणादीन् तस्मै आविष्कुर्वन्, मद्विषयज्ञानाख्येन भास्वता दीपेन, ज्ञानविरोधि प्राचीनकर्मरूपाज्ञानजं, मद्यतिरिक्तपूर्वाभ्यस्त-विषयकप्रावण्यरूपं तमः नाशयामि ।

318. **'दैवी ह्येषा गुणमयी मम माया दुरत्यया ।**
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।।' (भ.गी.7-14) 82

हे अर्जुन ! मम कृष्णस्य, एषा सत्त्वरजस्तमोरूपगुणत्रयप्रचुरा विचित्रकार्याविर्भावकारणत्वात् मायापदाभिधेया क्रीडाप्रवृत्तेन देवेन मया प्रवर्तिता एषा माया, अनुपासकानां मत्स्वरूपतिरोधानकरी । अतः यैः कैरपि दुरतिक्रमणीया । ये पुनः मायाप्रवर्तकं मामेव परमकारुणिकं शरणंगता भवन्ति, ते मत्तिरोधायिकमपीमां मायाम् उत्सृज्य, मामेव उपासते ।

319. **'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।**
क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।।' (भ.गी.15-16) 45

सर्ववस्तुयाथात्म्यज्ञानसाधनभूते श्रुत्यादौ प्रमाणजाते, द्वौ पुरुषौ सिद्ध्यतः । 'क्षरः' इत्येकः, 'अक्षरः' इति च अपरः, तयोराद्यः क्षरः पुरुषो नाम, क्षरणस्वभावानि जीवशब्दाभिलपनीयब्रह्मादिस्तम्बपर्यन्तानि अचित्संसृष्टानि सर्वाणि भूतानि द्वितीयः अक्षरशब्दनिर्दिष्टः पुरुषस्तु कूटस्थः - अचित्संसग-वियुक्तः स्वेनरूपेणावस्थितो मुक्तात्मा। कूटवत् - लोहपरिष्करणसाधनाधार-भूतायःपिण्डवत् निर्विकारतया तिष्ठतीति ।

320. **'न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।**
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ।।' (भ.गी.18-40) 102

पृ.सं.

पृथिवीगतेषु मनुष्यादिषु, द्युस्थानवर्तिषु देवादिषु वा, आहत्य प्रकृतिसंसृष्टेषु ब्रह्मादिषु स्थावरान्तेषु वा यत्र कुत्राऽपि, प्राकृतैः सत्त्वरजस्तमोरूपैरेभिः त्रिभिः गुणैः असंस्पृष्टं 'शुद्धम्' इति निर्देष्टुमर्हं प्राणिजातं नैवाऽस्ति ।

321. **'नियतं कुरुकर्म त्वं कर्म ज्यायो ह्यकर्मणः'** (भ.गी.3-8) 149

हे अर्जुन ! त्वम् प्रकृतिसंसृष्टेन त्वया अनादिवासनया स्वभावतो व्याप्तम्, अत एव सुशकम् असम्भावितप्रमादं च कर्मयोगमेव अनुतिष्ठ । यतः, अनभ्यस्तपूर्वतया अनियतत्वेन, दुश्शकत्वात्, सप्रमादत्वाच्च, ज्ञाननिष्ठाधिकारिणोऽपि ज्ञाननिष्ठापेक्षया कर्मनिष्ठैर्वा श्रेष्ठतरा भवति ।

322. **'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया'** (भ.गी.8-22) 98

हे पार्थ ! मुमुक्षुप्राप्यः स परमपुरुषः, निरन्तरध्यानसन्ततिरूपया भक्त्यैव लभ्यः ।

323. **'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि'** (भ.गी.13-19) 73

पुरुष-प्रधानात्मकौ चेतनाचेतनावुभावपि, अनुत्पत्तिकावेवेति दृढं !

324. **'प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः'** (भ.गी.9-8) 73

विविधविचित्रपरिणामिनीम् आत्मीयां प्रकृतिमधिष्ठाय, स्वयमस्वतन्त्रं देवादिरूपं सावान्तरभेदः व्यष्टिजीवस्तोमं, गुणमय्याः प्रकृतेः स्वभावमेव निमित्तीकृत्य, सर्गकाले पुन पुनः विविधनामरूपभाजं करोमि ।

325. **'प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।**
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ।।'
(भ.गी.18-30) 103

(पुरुषसम्बन्धिनी) अभ्युदयसाधनभूतं धर्मम्, मोक्षसाधनभूतं धर्मम्, प्रवृत्ति-निवृत्त्यन्यतराख्ये धर्मे प्रसक्तानां सर्वेषां वर्णानां देशविशेषे कालविशेषे अवस्थाविशेषे च कर्तव्याकर्तव्यनिर्णयम्, शास्त्रनिवृत्तिरूपं भयस्थानम्, शास्त्रातिवृत्तिरूपम् अभयस्थानम्, तथा संसारतद्विगमयोर्याथात्म्यं च या बुद्धिः विषयीकरोति ; सा सात्त्विकीबुद्धिः इति जानीहि पार्थ !

326. **'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः'** (भ.गी.7-17) 176

आत्मस्वरूपं भगवच्छेषतैकरसत्वेन जानतः ; (तथा) आत्मना

पृ.सं.

भगवन्तमेव परमप्राप्यत्वेन च मन्वानस्य चेतनस्य, अहमत्यर्थप्रियः, सोऽपि ममात्यर्थप्रियः ।

327. i. **'भक्त्या त्वनन्यया शक्यः अहमेवंविधोऽर्जुन ।**
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप '।। (भ.गी.11-54) 98

ii. **'भक्त्या-----शक्यः'** 177

हे शत्रूणां तापकर ! अर्जुन ! त्वया दिव्यचक्षुषा दृष्टविधः अहम्, मल्लाभानतिरिक्तप्रयोजनया प्रीतिरूपापन्नया धिया साधनभूतयैव, तत्वतो ज्ञेयः, साक्षात्कार्यः, सयुग्भावेन प्रवेष्टव्यश्च ।

328. **'भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।**
ततो मां तत्त्यतो ज्ञात्वा विशतो तदनन्तरम् ।।' (भ.गी.18-55) 99

स्वरूपतः स्वभावतश्च योऽहं, गुणतो विभूतितोऽपि यावांश्चाहं तं मां एवंरूपया भक्त्या तत्त्वतः अभिजानाति । पूर्वोक्त्या अनवधिकातिशयया भक्त्या तत्त्वतः स्वरूप-स्वभाव-गुणविभूतिदर्शनोत्तरकालभाविन्या, मां प्राप्नोति ।

329. **'भूमिरापोऽनलो वायुः खं मनोबुद्धिरेव च ।**
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ।।' (भ.गी.7-4) 73

अस्य विविधविचित्रानन्तप्रकारस्य जगतः प्रसूतिकारणभूता मूलप्रकृतिः, अष्टप्रकारभेदभिन्ना - गन्धतन्मात्रयुता पृथिवी, रसतन्मात्रयुताः आपः, रूपतन्मात्रयुतं तेजः, स्पर्शतन्मात्रयुतो वायुः, शब्दतन्मात्रयुतः आकाशः, पंचभिः ज्ञानेन्द्रियैः, पंचभिश्च कर्मेन्द्रियैः सहितं मनः, महत्तत्त्वं बुद्ध्यपरपर्यायम् अहंकारतत्वं चेति इयं मदीया (अपरा) प्रकृतिः ।

330. **'भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्'** (भ.गी.5-29) 145

(सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति' इत्युत्तरार्धम्)

यज्ञानां तपसां च आराध्यं, सर्वेषां लोकानां महान्तमीश्वरं, सर्वभूतानां सुहृदं मां ज्ञात्वा, कर्मयोगानुष्ठाने एव सुखम् ऋच्छति ; 'मदाराधनरूपः कर्मयोगः' इति सुखेन तत्र प्रवर्तते ।

331. **'मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।**
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ।।
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्' (भ.गी.9-4,5) 83

पृ.सं.

चेतनाचेतनात्मकं कृत्स्नं जगत्, अन्तर्यामिभूतेन (अत एव) अप्रकाशित-स्वरूपेण मया, धारणार्थं नियमनार्थं च शेषित्वेन व्याप्तम् । ततः सर्वाण्यपि भूतलनि, अन्तर्यामिणि मयि अवस्थितानि । अहं तु न तदायत्तस्थितिः ; किन्तु मत्संकल्पेनैव धृतानि । अन्यत्र कुत्रापि असम्भावनीयं मदसाधारणम् आश्चर्यं योगं पश्य ।

332. 'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्' (भ.गी.9-10) 73

हे कुन्तीसुत ! सर्वद्रष्टा सत्यसंकल्पेन च मया कारणभूतेन ईक्षिता इयं प्रकृतिः जंगमस्थावरात्मकमिदं जगत्, निरवग्रहं सृजति ।

333. 'मयि सर्वाणि कर्माणि सन्यस्य ' (भ.गी.3-30) 149

सर्वेश्वरे सर्वान्तरात्मभूते मयि स्वकृतानि गुणकृतानि च सर्वाणि कर्माणि अध्यात्मचेतसा सन्यस्य (निराशीः निर्ममश्च विगतज्वरः युद्धादिकं सर्वं चोदितं कर्म कुरुष्व) ।

334. 'मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ।।' (भ.गी.14-26) 175

परमकारुणिकं सत्यसंकल्पं च वासुदेवं माम्, ऐकान्त्यविशिष्टेन भक्तियोगेन यः सेवते ; सः एतान् सत्वादीन् दुरत्ययान् गुणान् अतीत्य अतिक्रम्य, ब्रह्मत्वाय कल्पते- ब्रह्मभावयोग्यो भवति ।

335. 'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।।' (भ.गी.18-46) 100

त्रिविधानां चेतनाऽचेतनाख्यभूतानां प्रवृत्तिः - सर्वविधोऽपि व्यापारः, यदधीनः, येन च सर्वनियन्त्रा परमात्मना, परिदृश्यमानं निखिलं जगत् व्याप्तम्, तादृशम् इन्द्राद्यन्तरात्मतयाऽवस्थितं माम् स्ववर्णाश्रमानुगुणेन विहितकर्मणा सम्यगाराध्य, मत्प्रसादात् मानवः मत्प्राप्तिरूपां सिद्धिं लभते ।

336. 'यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ।।' (भ.गी.18-31) 103

हे पार्थ ! पूर्वोक्तं प्रवृत्तिनिवृत्त्याख्यं द्विविधं धर्मं, तद्विपरीतम् अधर्मं, तथा तन्निष्ठानां देशविशेष-कालविशेषावस्थाविशेषेषु कर्तव्यं (तथा) अकर्तव्यं च, यथावत् निर्धारयितुं यादृश्या बुद्ध्या न शक्नोति ; तादृशी

पृ.सं.

यथार्थज्ञानाजननी बुद्धिः 'राजसी बुद्धिः' इति जानीहि ।

337. **'ये त्वेतदभ्यसूयन्तो नानुतिष्ठति मे मतम् ।**
सर्वज्ञानविमूढास्तान् विद्धि नष्टानचेतसः ।।' (भ.गी.3-32) 149

ये ते पुरुषाः, 'सर्वम् आत्मवस्तु, मच्छरीरतया मदाधारं, मच्छेषभूतं, मदेकप्रवर्त्यम्' इत्येवंरूपं मदीयमाशयम् अनुसन्धाय, श्रौतानि स्मार्तानि च सर्वाणि कर्माणि न कुर्वते, येऽपि च अस्मिन् मदीये आशये श्रद्धां न कुर्वते, ये च पुनः आशयं मदीयम् अभ्यसूयन्तो वर्तते ; तान् पुरुषान्, सर्वेषु ज्ञातेषु विशेषेण मूढान्, अत एव नष्टान् - पुरुषार्थायोग्यात्, अचेतसः - चेतः कार्यवस्तुयाथात्म्यनिश्चयविदूरांश्च जानीहि ।

338. **'ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।**
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ।।' (भ.गी.3-31) 149

ये मानवाः शास्त्राधिकारिणः, 'अयमेव शास्त्रार्थः' इति एतत् मे मतं निश्चित्य तथा अनुतिष्ठन्ति, ये च अननुतिष्ठन्तोऽपि अस्मिन् शास्त्रार्थे श्रद्दधाना भवन्ति, ये च अश्रद्दधाना अपि, 'एवं शास्त्रार्थो न सम्भवति' इति न अभ्यसूयन्ति - अस्मिन् महागुणे शास्त्रार्थे दोषमनाविष्कुर्वन्तो भवन्ति, ते सर्वे, बन्धहेतुभिः अनादिकालारब्धैः सर्वैः कर्मभिः मुच्यन्ते ।

339. **'यो मामजमनादिं च वेत्ति लोकमहेश्वरम्'** (भ.गी.10-3) 45

यः उपासकः, वासुदेवं माम्, अचेतनात् तत्संसृष्टाच्चेतनाच्च विलक्षणं, हेयप्रत्यनीकतया मुक्तविलक्षणं, लोकेश्वराणां सर्वेषामीश्वरं च असम्मूढः सन् वेत्ति ; सः सर्व पापविमुक्तो भवति ।

340. **'यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।**
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ।।' (भ.गी.7-21) 144

पुरुषार्थसम्पादने प्रवृत्तः यो यः पुरुषः, वस्तुतो मच्छरीरभूतां यां यां देवतारूपां तनुं, मच्छरीरत्वेन अजानन्नपि, श्रद्धाख्यां विशिष्टां मनोवृत्तिमवलम्ब्य पूजितुमिच्छति, तस्य तस्य तथा पूजनोद्युक्तस्य, पुरुषस्य, तादृशी श्रद्धामेव, निर्विघ्नां अहमेव वर्धयामि ।

341. **'विद्याविनयसम्पन्ने ब्राहमणे गवि हस्तिनि ।**
शुनि चैव श्वपाके च पण्डितास्समदर्शिनः ।।' (भ.गी.5-18) 81

पृ.सं.

पुरुषार्थसाधनीभूतोपायवेदनेदम्परया विद्यया तदध्यनकृतेन च विनयपदवाच्येन सुशिक्षणेन, कर्मज्ञानेन्द्रियाणां परिष्कृतेन वर्तनेन च सम्पन्नः यो मनुष्यविशेषः, तस्मिन् केवले ब्राह्मणे, गो-हस्ति-श्व-श्वपचादौ च मिथोऽत्यन्तविषमाकारतया प्रतीयमानबाह्यस्वरूपवति, वस्तुनि आत्मस्वरूपयाथात्म्यविदो विशिष्टाः अधिकारिणः, अविषमं ज्ञानैकाकारतयैव सुस्पष्टं पश्यन्ति ।

342. 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' (भ.गी.10-42) 83

परमात्मभूतोऽहं वासुदेवः, कार्यकारणावस्थं स्थूलसूक्ष्मरूपं चेतनाचेतनात्मकमिदं जगत् मन्महिम्नः अयुतायुतांशेनाधिष्ठाय, तदीयं स्वाच्छन्द्यं प्रतिरुद्ध्यावस्थितोऽस्मि ।

343. 'वेदैश्च सर्वैरहमेव वेद्यः' (भ.गी.15-15) 77

यथा देवमनुष्यादिशब्दैः जीवात्मा वाच्यः, तथा अग्नि-सूर्य-सोमेन्द्रादीनां मदन्तर्यामिकत्वेन मदात्मकत्वात् तत्प्रतिपादनपरतया भासमानैः समस्तैः वेदैरपि अपर्यवसानया वृत्त्या अहमेव वासुदेवो वेद्यः ; न केवलाग्नीन्द्रादिर्देवः ।

344. 'स तया श्रद्धया युक्तः तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हि तान् ।।' (भ.गी.7-22) 144

मच्छरीरभूतेष्विन्द्रादिदेवाकारेषु मदाहितयैव निर्विघ्नया मनोवृत्तिदार्ढ्यात्मिकया श्रद्धया सम्पन्नः सन्, मत्तनुभूतस्य इन्द्रादेः प्रीतिकरं कर्मविशेषमनुतिष्ठति; तादृशाराधनतः प्रीतिविशेषं प्राप्तवता इन्द्रादिशरीरिणा मयैव सानुग्रहं दत्तान् तांस्तान् स्वाभिलषितान् फलविशेषान् मच्छरीरभूतेन्द्रादिद्वारैव लभते ।

345. 'सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ।।' (भ.गी.14-17) 103

आधिक्यं प्राप्तात् सत्त्वाख्यात् गुणात्, आत्मयाथात्म्यापरोक्षरूपं ज्ञानं जायते । (तथा) प्रवृद्धात् रजोनामकात् गुणात् स्वर्गादिरूपक्षुद्रफललोभो जायते । (तथैव) प्रवृद्धात् तमो नाम्नो गुणात् अनवधाननिमित्तासत्कर्मणि प्रवृत्तिः, तेन विपरीतज्ञानम्, ततोऽप्यधिकतरं तमः, ततश्च आत्मयाथात्म्यावगाहिज्ञानानुदयः, एतानि भवन्ति ।

पृ.सं.

346. 'सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ।।' (भ.गी.18-56) 149

नित्यनैमित्तिक-काम्याख्यानि श्रुति-स्मृतिप्रतिपन्नानि सर्वाणि कर्माण्यपि कर्तृत्व-फलसंगो मयि वासुदेवे भगवति विन्यस्य निर्ममतया निरन्तरम् अनुतिष्ठन् कर्माधिकृतः पुरुषः, मदनुग्रहादेव शाश्वतम् अनपायिनं नित्यप्राप्यं माम् अविकलं प्राप्नोत्येव । कर्मसम्बन्धनैरन्तर्यम् एनं नैव बध्नाति संसारे ।

347. 'सर्वस्य चाहं हृदि संनिविष्टः मत्तः स्मृतिर्ज्ञानमपोहनं च' (भ.गी.15-15) 66

पूर्वप्रस्तुतयोः सोम-वैश्वानरयोः, सर्वस्य च भूतजातस्य, सकलप्रवृत्तिनिवृत्तिमूलज्ञानोदयदेशे हृदि मत्संकल्पेन नियच्छन् अहम्, आत्मतया सन्निविष्टः । अतः मत्त एव सर्वेषामपि, पूर्वानुभूतविषयम् अनुभवसंस्कारमात्रजं ज्ञानं, स्मृतिपदाभिधेयम्, इन्द्रियलिंगागमयोगजो वस्तुनिश्चयः, ज्ञाननिवृत्तिः प्रमानुग्राहकं ज्ञानं वेति सर्वं मदधीनमेव ।

348. 'स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु' (भ.गी.18-45) 100

स्वस्ववर्णाश्रमादिकर्माधिकृत्य विहितेषु श्रौतस्मार्तादिरूपेषु कर्मसु श्रद्धया अस्खालित्येन प्रवृत्तः येन प्रकारेण परमपदलाभात्मिकां सिद्धिं प्राप्नोति, तत् उत्तरत्र मयैवोच्यमानं श्रृणु ! अवधानेन ।

349. 'अजसैव विश्वसृजो रूपम् । तत्तु न चक्षुषा ग्राह्यम् । मनसा तु अकलुषेण साधनान्तरवता गृह्यते ; ' न चक्षुषा गृह्यते नाऽपि वाचा 'मनसा तु विशुद्धेन' इति श्रुतेः। न हि ! अरूपायाः देवतायाः रूपमुपदिश्यते । यथा - भूतवादि हि ! शास्त्रम् । 'माहारजनं वासः' 'वेदाहमेतं पुरुषं महान्तम्'। । आदित्यवर्णं तमसः परस्तात्' इति प्रकरणान्तर-निर्देशाच्च साक्षिणः' (द.भा) 163

विश्वस्रष्टुः जगत्कारणस्य परमात्मनः दिव्यं शरीरम्, (उपाधि) मायेन्द्रजालादि व्यवहितं न ; स्वाभाविकमेव । तच्च रूपं दुष्टेन अदुष्टेन वा केवलेन चक्षुरादिना इन्द्रियेण न ग्राह्यम् ; किन्तु विवेक-विमोकादि-साधनान्तरवता निर्मलेनैव मनसा ग्राह्यमिति, श्रुत्या प्रतिपादनात् परमार्थ-भूतमेव । शास्त्रं यतः यथार्थमेव सर्वमावेदयति ; अतः रूपरहितं, रूपवत्तया न

पृ.सं.

बोधयति । अत्र च साक्षितया ज्ञापकम् - प्रकरणान्तरगतं निर्देशनम् ; हरिद्राचूर्णरंजितवस्त्रगतवर्णसादृश्यप्रतिपादकम् आदित्यवर्णताप्राप्तिकं च श्रौतं वाक्यद्वयम् ।

350. 'अधिकारोऽनुपायत्वात् न वादे शून्यवादिनः' (कु.वा.5) 55

('सर्वदा सदुपायानां वादमार्गः प्रवर्तते' इति पूर्वार्धम् ।)

सर्वस्मिन्नपि काले समीचीनोपायावलम्बिनामेव वादमार्गसिद्धिः । शून्यवादावलम्बिनां तु उपायस्यैव कस्याप्यभावात्, वादप्रवृत्तौ अधिकार एव नास्ति ।

351. 'आत्मेत्येव तु गृहणीयात् सर्वस्य तन्निष्पत्तेः' (ब्र.न.वा) 118

उपासको जीवः स्वोपास्यं परमात्मानं, स्वाभिन्नतयैव उपासीत ; सर्वस्यापि जगतः उपादानभूतात्परमात्मन एव निष्पन्नत्वात्, उपादेयस्य च उपादानाभिन्नत्वात् ।

352. 'उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगलभ्यः'

(आ.सि) 97

कर्म-ज्ञानयोगाख्ययोगद्वयेन पवित्रीकृतान्तःकरणस्य चेतनस्य, ऐकान्तिकेन भगवदन्यास्पर्शिना, आत्यन्तिकेन - परमावधिं प्राप्तेन च भक्ति-योगपदवाच्येन उपायेन प्राप्यः परमात्मा ।

353. 'ऋणं हि वै जायते इति श्रुतेः' (द्र.भा) 133

फलसम्पादनेच्छया कर्मभिराराधिता देवता, आराधकस्य अभिलषितं फलं यदि न प्रयच्छेत्, तदा फलमप्रदायैव पूजामात्रस्वीकारतः देवतायाः ऋणं नाम दोषः जायेतैव यतः, अतः आराधिता देवता अर्थवादाधि-गतानि फलानि प्रयच्छत्येव ; नान्यथा । (इत्यर्थः स्यात्, इति चिन्त्यते) ।

354. 'एकत्वे सति नानात्वं नानात्वे सति चैकता ।

अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हति ।।' (?) 83

परस्य ब्रह्मणः यद्रूपं ब्रह्मादिभिरपि चिन्तयितुमशक्यं तत्, स्वयं प्रशासितृत्वेनैक एव सन् विचित्रचिदचिद्वस्तुषु अन्तरात्मतया प्रविश्य तत्तद्रूपेण विचित्राकारः विचित्रकर्मकारयन् नानारूपतां भजते । एवं नानात्वेन अवस्थितोऽपि सन् ----- श्रुतिसिद्धः एक एव अवतिष्ठते - इति, तत्तत्वं को वा 'इदमित्थम्' इति सम्यक् ज्ञातुं शक्नुयात् ? न कोऽपि इत्यर्थः ।

पृ.सं.

355. 'कार्याणा कारण पूर्व वचसा वाच्यमुत्तम्' (जि.स्तो.7-4) 77

हे पुण्डरीकाक्ष ! त्वम्, लोके कार्यतया परिदृश्यमानानां कार्यभूतानां सर्वेषां वस्तूनामपि अत्यन्तमादिमं कारणम् । तथा सर्वेषां वाचकानां शब्दानामपि वाच्यार्थपर्यवसानभूमिरूपम् उत्तमं वाच्यमपि त्वमेव; इतरत्सर्वं न पूर्णं वाच्यम् ।

356. 'कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयते' (प्र.प.2) 140

यागादिसम्पादिकया कृत्या यागादिद्वारा निष्पाद्यं, स्वर्गादिरूप-काम्यार्थजनने अत्यावश्यकं यत् आन्तरालिकम् अपूर्वाख्यं वस्तु, तदेव (कार्यव्युत्पत्तिवादिभिः प्राभाकरैः) 'कार्य' पदेन व्यवह्रियते ।

357. 'तत्संकल्पनिबन्धना हि ! इमे लोकाः न च्यवन्ते, न स्फुटन्ते । स्वशासनानुवर्तिनं ज्ञात्वा, कारुण्यात् स भगवान् वर्धयेत विद्वान् कर्मदक्षः' (द्र.भा) 148

सर्वहितैषिणो भगवतः समीचीनसंकल्पायत्तस्वरूपस्थितिप्रवृत्ति-भेदाः खलु ! इमे सर्वे जंगमस्थावरात्मकाः लोकाः, न स्वरूपच्युतिं प्राप्नुवन्ति । न च शीर्णस्वरूपा भवन्ति ।

स च भगवान् परमपुरुषः स्वकीयामाज्ञामनुरुध्य नित्यनैमित्तिकादि-कर्म अनुतिष्ठन्तं चेतनं मत्वा, तदीयसांसारिकदुःखापनोदनकामनया तदीयं हितं स्वयमेव चिन्तयन् तं स्वप्राप्तिपर्यन्तपरमफलभागिनं स्वयमेव कुर्यादेव; नाऽत्र संशयावकाशः।

358. 'तस्मिन् यदन्तः इति कामव्यपदेशः' (ब्र.न.वा) 115

छान्दोग्यदहरविद्यायां 'तस्मिन् यदन्तस्तदन्वेष्टव्यम्' इति, अन्वेष्टव्यात् दहराकाशादतिरिक्तस्य तदन्तःस्थितस्यैव कस्यचन अन्वेष्टव्यत्वं विहितम् । तच्च किम् ? इति सन्दिह्य, 'तस्मिन् कामाः समाहिताः' इत्युक्तेः, अन्तरन्वेष्टव्यत्वेन व्यपदेशः कामपदाभिधेयानां कल्याणगुणानामेव इति निर्णयः कृतः - इति ।

359. 'तस्याज्ञया धावति वायुः, नद्यः स्रवन्ति, तेन च कृतसीमानो जलाशयाः समदा इव मेणविसर्पितं कुर्वन्ति' (द्र.भा) 148

तस्य भगवतः पुरुषोत्तमस्य सर्वनियन्तुः नियममनुसृत्यैव, वायुः निरन्तरं स्वीयं सदागमनरूपं कर्म अनुतिष्ठन्नेव वर्तते । सरितोऽपि अविरतं स्यन्दन्त्य एव वर्तन्ते; समुद्रादिरूपाः जलाशया अपि तेनैव सर्वनियन्त्रा

पृ.सं.

भगवता प्राप्तमर्यादाः सन्त एव उज्जृम्भणं जलौन्नत्यं प्राप्ता भवन्ति; न तु उल्लंघितसीमानो भवन्ति ।

360. 'नियोज्यः स च कार्यं यः स्वकीयत्वेन बुद्ध्यते' (प्र.प.2) 142

श्रुतिविहितं स्वर्गादिसाधनतया प्रतिपन्नं यागादिरूपं कार्यं स्वकर्तृकतया स्वीयतया यः अवगच्छति ; स पुरुषः नियोज्यः (अथवा यागादिकार्यं स्वर्गादिकं फलं वा) इत्युच्यते ।

361 'फलसम्बिभन्त्सया हि कर्मभिरात्मानं पिप्रीषन्ति । स प्रीतोऽलं फलायेति शास्त्रमर्यादा' (द्र.भा) 143

पुरुषार्थकामिनश्चेतनाः, अभीप्सितफलसम्बन्धेच्छया यागदान-होमाद्यात्मकैः श्रुतिस्मृतिविहितैः कर्मभिः, इन्द्रादिदेवतान्तर्यामिरूपेणावस्थितम् । अत एव इन्द्रादिशब्दवाच्यं परमात्मानं भगवन्तं वासुदेवं, तत्तनुभूतेन्द्रादि देवतामुखेन आरिराधयिषन्ति । स हि कर्मभिराराधितः परमपुरुषः, तेषामिष्टानि फलानि प्रयच्छति - एवं शास्त्रीया प्रक्रिया ।

362 'भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम्' (कै.वृ.) 26

('सामानाधिकरण्यं शब्दयोरेव केचिदिच्छन्ति । द्वाभ्यां शब्दाभ्यां भिन्नप्रवृत्तिनिमित्ताभ्याम् एकस्याभिधेयस्य प्रतिपादनात्, विशेषणविशेष्यार्थ-प्रतिपादनाच्च विशेषणविशेष्यत्वम् । अन्ये तु 'नीलोत्पलम्' इति प्रवृत्ति-निमित्तयोः जातिगुणयोः एकम् अधिकरणं आश्रयः इति , सामानाधिकरण्यं विशेषणविशेष्यभावाच्च अर्थयोरेव मन्यन्ते' इति प्रदीपव्याख्यायां 'वृद्धिरादैच्' इति सूत्रे दृश्यते ।)

विशेषणतो भिन्नार्थत्वे सति, विशेष्यत एकार्थत्वं, पदद्वयप्रवृत्ति-निमित्तयोः एकाश्रयवृत्तित्वम् - सामानाधिकरण्यम् । (वृत्तिः - विशेष्यीभूत-प्रधानार्थविषयः शब्दव्यापारः । निमित्तम् - प्रवृत्तिनिमित्तं जातिगुणादिकम् । समानम् - एकम् । अधिकरणम् - विशेषणानाम् आधारभूतं विशेष्यम् । एकविशेष्यगतधर्मद्वय-प्रवृत्तिनिमित्तकसमानविभक्तिकपदद्वयवत्त्वम् ।)

363. 'यथाभूतवादि हि शास्त्रम्.' (द्र. भा) (प्र. 350 द्रष्टव्यः) 133

364. 'यद्यपि-अवदानस्तुतिपरं वाक्यम् ; तथाऽपि न असता स्तुति-रुपपद्यते' (द्र.भा) 164

पृ.सं.

इदं वाक्यं वस्तुतः यागीयहविषः अवदानाख्ये कर्मणि प्राशस्त्य-बुध्युत्पादनोपयोगिस्तुतितात्पर्यकम् ; ततश्च स्तुत्यंशे एव प्रामाण्यमिति, न केवलं स्वार्थे इति वक्तुं शक्यम् । एवं स्थितेऽपि, धर्मिण्यविद्यमानं धर्ममादाय स्तुतौ क्रियमाणायां, सर्वस्याऽपि स्तोतव्यत्वसम्भवात् स्तुतिर्मिथ्याभूतैव स्यात् ; न वास्तविकीत्यापतेत् । अतः धर्मिणि विद्यमानं गुणमादायैव स्तुतिकर्तव्यतायां सिद्धायां सत्याम्, स्वार्थांशेऽपि तात्पर्यं ततश्च प्रामाण्यम् अपरिहार्यम् । प्राशस्त्यांशे परमतात्पर्यमास्तां नाम को दोषः ? तस्य स्वार्थतात्पर्या-विघटकत्वात् (इति भावः) ।

365. 'यद्यपि सच्चित्तो न निर्भुग्नदैवतं गुणगणं मनसाऽनुधावेत्, तथाऽप्यन्तर्गुणामेव देवतां भजत इति, तत्राऽपि सगुणैव देवता प्राप्यते' (द्र.भा) 93

यद्यपि सद्विद्यानिष्ठोऽपि दहरविद्यानिष्ठ एव, उपास्यगतमपहत-पाप्मत्वादिकम् उपास्याद्दैवतात् पृथग्भावेन न स्मरेत् ; तथाऽपि उपास्या देवता, वस्तुस्वरूपानुबन्धिसर्वकल्याणगुणविशिष्टैवोपास्यत इति, तत्राऽपि सगुणं ब्रह्मैव प्राप्यम् ।

366. 'युक्तं तद्गुणकोपासनात्' (ब्र. नं. वा) 93

वस्तुतः तत्तद्गुणविशिष्टस्यैव परमात्मनः उपासनात्, तत्क्रतुन्यायेन च यथोपासनमेव फलप्राप्तेश्च, सगुणं ब्रह्मैव प्राप्यम् ; न निर्गुणम् ।

367. 'रूपं वाऽतीन्द्रियमन्तःकरणप्रत्यक्षनिर्देशात्' (ब्र.न.वा) 163

उपासकानुग्रहार्थं, सम्पादितं भगवतो दिव्यं रूपं, चक्षुरादीन्द्रिया-ग्राह्यमेव ; 'विशुद्धचेतसा ग्राह्यः' इति परिशुद्धेनान्तःकरणेनैव ग्राह्यतायाः श्रुतिस्मृत्यादिभिः निश्चित्य वर्णनात् । तच्च रूपं ज्ञानाद्यात्मकगुणवत्, स्वरूपतया श्रुतिप्रतिपन्नत्वात् स्वरूपभूतमेव ; न कृतकम् ।

**368. 'वेदवित्प्रवरप्रोक्तवाक्यन्यायोपबृंहिताः ।
वेदाः साङ्गा हरिं प्राहुर्जगज्जन्मादिकारणम् ।। '** (?) 105

वेदविदग्रेसरैः द्वैपायनपराशरादिभिः प्रोक्तानि यानि वाक्यानि स्मृतीतिहासपुराणादिरूपाणि, ये च व्यासादिभिः आविष्कृताः वेदार्थ-व्युत्पादकाः न्यायाः तैश्च विशदीकृतार्थाः सर्वे वेदाः शिक्षाद्यङ्गयुताः सन्तः, जगज्जन्मस्थितिलयहेतुभूतं परमात्मानमेव प्रतिपादयन्ति ।

पृ.सं.

369. 'स एष सर्वेषां लोकानामीष्टे (मीशः) सर्वेषां कामानाम्'(?) 162

आदित्यमण्डलान्तर्वर्ती अक्ष्यन्तर्वर्ती वा पुरुषः हिरण्मयत्वादिधर्मेण लक्षितो य एषः, आदित्यमण्डलादूर्ध्वाधोवर्तिनाम् अक्षिस्थानादूर्ध्वाधोवर्तिनां वा सर्वलोकानां, तथा देवभोग्यभोगोपकरणभोगस्थानानां, मनुष्यभोग्य-भोगोपकरणभोगस्थानानां च सर्वेषां नियन्ता भवति। (इदं वाक्यं न औपनिषदं स्यात्; किन्तु भाष्यकारीयं वाक्यं वा वाक्यकारीयं वा स्यादिति तर्क्यते।)

370. 'सर्वस्य तन्निष्पत्तेः' (ब.नं.वा) 118

चेतनाचेतनात्मकस्य सर्वस्य जगतः, सर्वात्मभूतात् परमात्मन एव निमित्तोपादानभूतात् निष्पन्नत्वेन, (सर्वोऽपि परमात्मानम् 'स्वस्य आत्मा' इत्येव उपासीत; न तु भिन्नतया)।

371. 'स्याद्रूपं कृतकमनुग्रहार्थं तच्चेतसामैश्वर्यात्' (ब्र.नं.वा) 162

भगवदनन्यचेतसां साधकानामनुग्रहमुद्दिश्य भगवता सम्पादितम्, भगवत्स्वभावात्मकैश्वर्यायत्तम् रूपम्- अवान्तरकालिकं शरीरं, कृतकम् - उत्पन्नत्वात् अनित्यम्। (पूर्वपक्षः)।

372. 'हिरण्मयः' इति रूपसामान्यात्; चन्द्रमुखवत्। न मयट् अत्र विकारमादाय प्रयुज्यते; अनारभ्यत्वात् आत्मनः' (द्र.भा) 163

भगवद्रूपे 'हिरण्मय' शब्दः'हिरण्यस्य विकारः' इति विकारार्थमंगीकृत्य न प्रत्युक्तः; किन्तु हिरण्यगतरूपे भगवद्रूपे च औज्ज्वल्याख्यस्य धर्मस्य समानत्वात्। यथा चन्द्रमुखादिशब्देषु हि! चन्द्रगतौज्ज्वल्यस्य मुखगतौ-ज्ज्वल्यस्य च समानत्वात् प्रयोगः, तद्वत्। विग्रहविशिष्टस्य भगवत्स्वरूपस्य सृज्यमानत्वाभावेन अविकाररूपतया विकारार्थमयटो बाधात्।

373. 'हिरण्मयः पुरुषो दृश्यते' इति प्राज्ञः सर्वान्तरःस्याल्लोक-कामेशोपदेशात्, तथोदयात् पाप्मनाम्' (ब.नं.वा) 162

अन्तरादित्यविद्यायाम् ' आदित्यान्तर्वर्तितया पुरुषः सुवर्णवर्णः सन् योगिभिः साक्षात्क्रियते' इति श्रुत्यर्थभूतः पुरुषः, सर्वान्तर्यामी प्राज्ञपदाभिधेयः परमात्मैव भवितुमर्हति; न जीवः। सर्वलोकाधिपत्य-अवाप्तसमस्तकामत्वयोः तथैव सर्वपापोत्तीर्णतायाश्च भगवदसाधारणानां धर्माणां श्रुत्या स्पष्ट-मुक्तत्वात्।

* * * * *

श्रीः

श्रीमते रामानुजाय नमः

2. पदार्थकोषः

अ. वेदार्थसंग्रहे संगृहीतपदार्थकोषः

	पृ.सं.
अचित्समष्टिः - महाभूतसूक्ष्मरूपं वस्तु।	169
अणीयसामणीयान् - तेषामपि (आत्मनामपि) व्यापकत्वात् तेभ्योऽपि आत्मभ्योऽपि सूक्ष्मतरः (परमात्मा)	78
अणीयस्त्वम् - सूक्ष्मत्वम्।	110
अणीयांसः - कृत्स्नस्य अचेतनस्य व्यापकतया सूक्ष्मभूताः आत्मानः।	78
अनृतम् - भगवतो गुणगणस्य तिरोधायकं स्वकर्म।	156
अन्तःप्रविश्य - अन्तर्यामितया प्रविश्य।	78
अपौरुषेयाः शब्दाः - वाक्यशब्दाभिधेयानां पदसंघातानां उच्चारणक्रमः पूर्वपूर्वोच्चारणक्रमजनितसंस्कारपूर्वकः, ते वेदाः।	167
अविद्या - विद्येतरत् वर्णाश्रमादिविहितं कर्म।	97
आकारः - सर्वात्मना आधेयतया नियाम्यतया शेषतया च अपृथक्सिद्धं प्रकारभूतम्।	76
आत्मशरीरभावः - पृथक्सिद्ध्यनर्हाधाराधेयभावः, नियन्तृनियाम्यभावः, शेषशेषिभावश्च।	76
आत्मा - (सर्वात्मना आधारतया नियन्तृतया शेषितया च आप्नोति इति)।	143
आत्मा - परमात्मा भगवान् वासुदेवः।	10
आदेशः - प्रशासनम्।	10
आदेशः - प्रशासिता (आदिश्यते अनेन इति)	143
इष्टापूर्तम् - सकलश्रुतिस्मृतिचोदितं कर्म।	72
उपादानकारणत्वम् - परिणामास्पदत्वम्।	
उभयपरिकर्मितस्वान्तः - ज्ञानयोगकर्मयोगसंस्कृतान्तःकरणः।	96
कर्म - (जीवात्मनः) अनाद्यविद्यासंचितपापरूपम्।	3

पृ.सं.

परभक्तिः - शास्त्राधिगततत्त्वज्ञानपूर्वकस्वकर्मानुगृहीतभक्तिनिष्ठासाध्या-नवधिकातिशयप्रियविशदतमप्रत्यक्षतापन्नानुध्यानम् । 171
परमपदम् - परस्थानम् । 153
परमपदम् - प्रकृतिवियुक्तात्मस्वरूपम् । 155
परमपदम् - भगवत्स्वरूपम् । 155
परमव्योम - तमसः परस्तात् (स्थितम्) अविकाररूपं स्थानम् । 157
पिप्रीषन्ति - आरिराधयिषन्ति । 143
पुरुषः - भोक्तृवर्गः । 170
पुरुषस्य स्वरूपेणावस्थितिः- अनुकूलसम्बन्धनिवृत्तिः प्रतिकूलसम्बन्ध - निवृत्तिश्च । 136
पूः - पुरम्, शरीरम् । 47
पौरुषेयाः शब्दाः - वाक्यशब्दाभिधेयानां पदसं घातानाम् उच्चारणक्रमः यत्र पुरुषबुद्धिपूर्वकः, सः । 167
प्रकृतिः - महाभूतसूक्ष्मं वस्तु । 170
प्रभुः - सर्वफलानां प्रदाता । 144
प्रलयः - जगतः तदापत्तिः(कारणावस्थब्रह्मणि लयः) 75
प्रशासिता - नियन्ता । 78
प्रीतः - आराधितः । 143
प्रीतिः - ज्ञानविशेषः 171
प्रेरकत्वम् - इच्छाविषयतया प्रतीतस्य स्वप्रयत्नोत्पत्तिमन्तरेणअसिद्धिः । 135
फलसम्बिभन्त्सा - फलसम्बन्धेच्छा । 143
बिभर्ति - स्वीकरोति । 143
भक्तिः - अनन्यप्रयोजनानवरतनिरतिशयप्रियविशदतम प्रत्यक्षतापन्नानु-ध्यानम् । 96
भक्तिः - निरतिशयाप्रियानन्यप्रयोजनस्वेतरवैतृष्ण्यावह ज्ञानविशेषः। 99
भक्तिः - प्रीतिविशेषः। 176
भक्तिः - ज्ञानविशेषः 177
भगवतः प्रियतमः - यस्य भगवति अनवधिकातिशया प्रीतिर्जायते, सः । 176

आ. व्याख्यानतः संगृहीताः पदार्थाः

पृ.सं.

पृ.सं.

अवाकी - अजल्पाकः । *
अविभक्तनामरूपता - प्रलयावस्था । 14
अहिंसा - परदुःखाहेतुत्वम् । 96
आकारः - स्वरूपम् । 10
आकाशात्मा - आकाशवत् स्वच्छरूपः । *
आत्मत्वम् - व्याप्तत्वे सति यावद्द्रव्यभावितया स्वार्थे धारयितुं शक्तत्वम् । 76
आत्मसंस्थितः - स्वनिष्ठः। *
आत्मा - आप्नोतीति आत्मा । *
आद्यवस्था - कारणावस्था । 32
आरभ्यते - सम्बध्यते । 32
आलीढम् - सम्बद्धम्। 2
इष्टम् - श्रौतं कर्म । 143
इतिहासपुराणानि - उपनिषदुपबृंहणभूताः ग्रन्थाः । 168
ईशानः - नियन्ता । 41
उत्पत्तिः - सतो द्रव्यस्य अवस्थान्तरयोगः । 36
उदारः - उत्कृष्टः, प्रशस्यः । 8
उपक्रमः - प्रकरणारम्भः । 9
उपबृंहणम् - अनधीतशाखार्थैः सह अधीतशाखार्थविशदीकरणम् । 45
उपबृंहितम् - पुष्कलीकृतम् । 96
उपसंहृतम् - अनुष्ठानम् । 97
उपादानम् - अभिधानापर्यवसानम् । *
उपादानकारणत्वम् - भाव्यवस्थाविशेषवतः प्रागवस्थायोगः । 34
ऐश्वर्यम् - स्वतन्त्रशक्तिः । 162
औत्पत्तिकः - सत्ताप्रयुक्तः नित्यः । 166
औपादानिकी - उपादानप्रमाणसिद्धा, विध्याक्षेपसिद्धा । 146
औलूक्यः - कणादः । 100
करणमन्त्राः - होमादिसाधनतया विहिता मन्त्राः । 153
कर्णकिसलयः - कर्णपाशः । 161
कल्याणत्वम् - अप्राकृतत्वम् । नित्यानुकूलत्वं वा । 150

पृ.सं

तत्त्वयाथात्म्यावबोधः- धर्मिविपर्यासप्रकारविपर्यासोभयरहितोऽवबोधः। 96
तत्त्वानि - दैवतानि । 101
तदुपरागविशेषाः- तदारोपितविशेषाः। 128
तपः - कृच्छ्रचान्द्रायणादिरूपं कायशोषणपरं कर्म । 96
तमः - यथार्थज्ञानावरणम् । 2
तिरोधानम् - प्रकाशनिवृत्तिः (पू) ज्ञानसंकोचः(सि) 148
दमः - बाह्येन्द्रियजयः । 96
दया - परदुःखासहिष्णुत्वम् । 96
दर्वी - पैतृकं कर्म । 148
दुःखम् - आत्माभिमानप्रतिकूलम् । 173
दुरवगाहत्वम् (वेदानाम्) - अधीयमानशाखानामपि दुरवबोधार्थत्वम् । 168
देवाः - इन्द्रियाणि । 60
दोषाश्रयत्वम् - दोषसम्बन्धः । 39
द्रमिडः - 'द्रमिडाचार्यः' इति 'भाष्यकारः' इति च व्यवहृतःब्रह्मनन्दिकृतवाक्य-व्याख्याता द्रमिडदेशीय आचार्यः। 93
धर्मशास्त्राणि - वेदपूर्वभागोपबृंहणभूताः ग्रन्थाः । 169
धीराः - धियम् ईरयन्ति इति । 176
धृतिः - इन्द्रियाणां विषयवैमुख्यकरणम् । 176
ध्यानम् - आरम्बणसंशीलनम् ध्यानांगभूतम् अविच्छिन्नस्मृतिसन्ततिः। 97
नानारूपम् - नानावस्थम् । 32
नामरूपव्याकरणम् - देवादिपदार्थानां सृष्टिः; तद्योग्यनामधेयकरणं च । 15
नित्यत्वम् - सर्वकालसम्बन्धित्वम् । 167
नियोगत्वम् - प्रेरकत्वम् । 136
नियोज्यः - कार्ये स्वकीयत्वबुद्धिमान् । 141
निरधिष्ठानभ्रमः - आरोप्यधर्मिभूतम् अधिष्ठानं विनैव अर्थप्रतिभासात्मिका सांवृतिकी ख्यातिः (सर्वशून्यवादिबौद्धमाध्यमिकसम्मतः) । 38
निरवद्यम् - कर्मसम्बन्धराहित्यम् । 23
नैर्मल्यम् - हेयप्रत्यनीकत्वम् । 1
न्यायः - प्रमाणानुग्राहकस्तर्कः । 2

	पृ.सं.
मेषविसर्पितम् - उज्जृम्भणम्, जलोन्नतिः ।	148
मोहनम् - अपार्थे सम्यक्त्वधीहेतुः।	2
यतनम् - भगवद्ध्यानादिकरणम् ।	96
याथात्म्यज्ञानम् - यथावस्थितस्वरूपज्ञानम् ।	3
रात्रिसत्रप्रतिष्ठा - रात्रिनामकसत्रयागफलत्वेन निश्चितं प्रतिष्ठाख्यं फलम्।	132
रुक्माभः - आदित्यवर्णः ।	78
रूपम् - जातिः।	*
रूपम् - औज्ज्वल्यम् ।	164
रूपसंहननम् - सर्वांगानां संश्लेषौचित्यम् ।	161
लावण्यम् - समुदायशोभा ।	161
वचनम् - परेभ्यः भगवद्गुणानां प्रतिपादनम् ।	97
वशित्यम् - गुणेन वशीकारः।	41
वस्तु - परमार्थभूतम् ।	1
वाचारम्भणमात्रत्यम् - वागालम्बनमात्रत्वम्, व्यावहारिकत्वम् ।	31
विकारः - कार्यावस्था ।	32
विकाराः - महदाद्याः।	*
विभक्तनामरूपता - कार्यावस्था ।	14
विवशम् - कर्मपरवशम् ।	2
विषयः - अवच्छेदकः ।	131
वेदनम् - उपासन-प्रपदनान्यतरत् ।	*
वेदबाह्याः - वेदप्रामाण्यानभ्युपगन्तारः, तत्स्वतः प्रामाण्यानभ्युपगन्तारश्च ।	100
वेदवित्प्रवरप्रोक्तवाक्यानि - स्मृतीतिहासपुराणादीनि ।	105
वेदाद्यन्तरूपता (प्रणवस्य) - वेदोत्पादकत्वम्, वेदलयस्थानत्वं च ।	112
वैकारिकोऽहंकारः - सात्त्विकाहंकारः।	*
व्यवहारः - प्रवृत्तिः।	129
व्यष्टिसमष्टिरूपः - कार्यकारणावस्थजीवशरीरकः।	*
शमः - अन्तःकरणजयः ।	96
शरीरत्वम् - चेतनं प्रति अनन्यार्हशेषत्वम् ।	1

* सुदर्शनसूरिकृततात्पर्यदीपिकातः संगृहीताः पदार्थाः

** ** **

श्रीः

श्रीमते रामानुजाय नमः

3. सिद्धान्तोक्तयः

पृ.सं.

पृ.सं.

8. अतः सर्वस्य चिदचिद्वस्तुनः ब्रह्शरीरत्वात्, सर्वशरीरं सर्वप्रकारं सर्वैः शब्दैः ब्रह्मैवाभिधीयत इति 'तत्, त्वम्' इति सामानमाधिकरण्येन जीवशरीरतया जीवप्रकारं ब्रह्मैवाभिहितम् । 19

9. तत्र ' तत् पदं जगत्कारणभूतं सकलकल्याणगुणाकरं निरवद्यं निर्विकारमाचष्टे । 'त्वम्' इति च तदेव ब्रह्म जीवान्तर्यामिरूपं सशरीरजीवप्रकारविशिष्टमाचष्टे । तदेवं प्रवृत्तिनिमित्तभेदेन एकस्मिन् ब्रह्मण्येव, 'तत्, त्वम्' इति द्वयोः पदयोर्वृत्तिरूपा । 19

10. अश्रुतवेदान्ताः पुरुषाः 'सर्वे पदार्थाः सर्वे जीवात्मानश्च ब्रह्मात्मकाः' इति न पश्यन्ति । सर्वशब्दानां केवलेषु तत्तत्पदार्थेषु वाच्यैकदेशेषु वाच्य-पर्यवसानं मन्यन्ते । इदानी वेदान्तवाक्यश्रवणेन, ब्रह्मकार्यतया तदन्तर्यामिकतया (च), सर्वस्य ब्रह्मात्मकत्वम् । सर्वशब्दानां तत्तत्प्रकारसंस्थितब्रह्मवाचित्वं च जानन्ति । 20

11. वेदान्तश्रवणेन च व्युत्पत्तिः पूर्यते । 21

12. वैदिका एव सर्वे शब्दाः वेदादेव उद्धृत्योद्धृत्य, परेण ब्रह्मणा सर्वपदार्थान् पूर्ववत् सृष्ट्वा, तेषु परमात्मपर्यन्तेषु पूर्ववत् नामतया प्रयुक्ताः । 21

13. स्वरूपनिरूपणधर्मशब्दा हि; धर्ममुखेन स्वरूपमपि प्रतिपादयन्ति गवादि-शब्दवत् । --- --ज्ञानेन धर्मेण स्वरूपमपि निरूपयितुम् ; न तु ज्ञानमात्रं ब्रह्मेति ; अतः सत्यज्ञानादिपदानि 'स्वार्थभूतज्ञानादिविशिष्टमेव ब्रह्म' इति प्रतिपादयन्ति । 24

14. यथाभूतयोरेव हि द्वयोरैक्यं सामानाधिकरण्येन प्रतीयते । तत्परित्यागेन स्वरूपमात्रैक्यं न सामानाधिकरण्यार्थः । ' भिन्नप्रवृत्तिनिमित्ताानां शब्दानाम् एकस्मिन् अर्थे वृत्तिः सामानाधिकरण्यम्' इति हि तद्विदः । 26

15. अर्थभेद-तत्संसर्गविशेषबोधनकृतपदवाक्यस्वरूपतालब्धप्रमाणभावस्य शब्दस्य निर्विशेषवस्तुबोधनासामर्थ्यात्, न निर्विशेषवस्तुनि शब्दः प्रमाणम् । 26

16. अनन्यसाधनस्वभावतया हि ज्ञप्तेः सिद्धिरुच्यते । 29

17. अतः प्रामाणिकानां न केनापि प्रमाणेन निर्विशेषवस्तुसिद्धिः। 30

18. निर्विकल्पकेऽपि सविशेषमेव वस्तु प्रतीयते । अन्यथा सविकल्पके 'सोऽयम्' इति पूर्वावगतप्रकारविशिष्टप्रत्ययानुपपत्तेः । 30

19. संस्थानरूपप्रकाराख्यस्य पदार्थस्य अनेकवस्तुनिष्ठतया अनेकविशेषणत्वं द्वितीयादिप्रत्ययावगम्यमिति द्वितीयादिप्रत्ययाः 'सविकल्पकाः' इत्युच्यन्ते । 30

20. अत एव -----संस्थानस्य, संस्थानिनः प्रकारतया पदार्थान्तरत्वं, प्रकारत्वादेव च पृथक्सिद्ध्यानर्हत्वं पृथगनुपलम्भश्च इति,--- एकस्य पदार्थस्य न भिन्नाभिन्नरूपेण विरुद्धत्वं द्व्यात्मकम् । 31

*** *** *** ***

श्रीः

श्रीमते रामानुजाय नमः

4. वेदार्थसंग्रहप्रमेयसंग्रहः

नमो रामानुजार्याय तस्मै वेदार्थसंग्रहम् ।
विशिष्टाद्वैतसिद्धान्तस्योपन्यासं वितन्वते ।। 1 ।।
वेदार्थसंग्रहस्यास्य प्रमेयानुक्रमोदयः ।
विशिष्टैकार्थसंसिद्ध्यै लिख्यते कृतिनां कृते ।। 2 ।।
शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ।। 3 ।।
पुराणवाक्यमेतत्स्यात् तत्र कार्यान्तरं पुनः ।
संक्षेपः शास्त्रकायं तु विस्तरस्सम्मतो बुधैः ।। 4 ।।
मंगलं प्रथमे पद्ये श्रौतं विष्णोरुपासनम् ।
आर्थः स्वमतसंक्षेपो ह्युपायोपेयलक्षणः ।। 5 ।।
लीलाभूतिः नित्यभूतिः तथैवोभयलिंगता ।
उपासनं च क्रमशः पादानामर्थ इष्यते ।। 6 ।।
द्वितीये मंगलं श्रौतं गुरूपासनलक्षणम् ।
प्रबन्धारम्भसंरम्भसूचनं च हृदि स्थितम् ।। 7 ।।
विवर्तः प्रथमः पक्षः परिणामस्ततः परः ।
भेदाभेदस्तृतीयस्स्यात् परपक्षा इमे त्रयः ।। 8 ।।
जीवेशयाथात्म्यबुद्धिपूर्वकर्मपरिष्कृता ।
उपायो भक्तिरेव स्यादुपेयो भगवान् हरिः ।। 9 ।।
भगवद्वैभवपरं शास्त्रं तदखिलं मतम् ।
द्विलिंगो द्विविभूतिर्हि भगवानुररीकृतः ।। 10 ।।
निर्विशेषपरं भेदनिरासपरमेव वा ।
सकलं शास्त्रमिति हि विवर्तैकान्तनिर्णयः ।। 11 ।।
तत्त्वमस्यादिवचनं विषयीकृत्य चिन्त्यते ।
न सद्विद्या निर्विशेषपरेत्यादौ निरूप्यते ।। 12 ।।

नापि भेदनिरासेऽपि तत्परेत्यथ वक्ष्यते ।
न तेन पौनरुक्त्यादिशंकावसरसम्भवः ।। 13 ।।
प्रक्रान्तार्थपरित्यागात्तच्छब्दोऽस्वरसोऽग्रिमः ।
पदद्वये लक्षणा चोपक्रमोऽपि विरुध्यते ।। 14 ।।
सामानाधिकरण्यस्य लक्षणं न विचारितम् ।
एवं चतुर्विधा दोषा अखण्डार्थे निरूपिताः ।। 15 ।।
स्वरूपैक्यशरीरात्मस्थलसाधारणं तु तत् ।
सामानाधिकरण्यं हि संगतं परिगृह्यताम् ।। 16 ।।
चिदचिद्वस्तुदेहोक्त्या हेयसंसर्गशून्यता ।
लीलोक्त्या च निमित्तत्वप्रयुक्तानिष्टशून्यता ।। 17 ।।
जायेयेत्युत्पत्तिदशा स्यामा जातदशोच्यते ।
संकल्पे साधनं पश्चात्साध्यं पूर्वमिति क्रमः ।। 18 ।।
सार्वात्म्यं च शरीरात्मभावेनैवेति कण्ठतः ।
अन्तःप्रविष्टश्रुत्योक्तं इतिसिद्धान्तसंग्रहः ।। 19 ।।
त्वमर्थ लोकसंसिद्धमुद्दिश्यात्र तदात्मता ।
विधीयत इति व्याख्या ह्युपसंहारदूषिता ।। 20 ।।
सर्वस्य चैतदात्म्येऽपि शंक्येतात्मस्वतन्त्रता ।
विशेषेणोपसंहारफलं तस्याः परिक्षयः ।। 21 ।।
तद्वारकं भगवतश्चोपादानत्वमुच्यते ।
प्रोक्षणस्य पशोश्चापि तदारुण्यगुणस्य च ।। 22 ।।
व्रीह्यादिद्वारकत्वेऽपि मुख्यत्वं वाक्यविन्मतम् ।
व्यापारिणोन्यथासिद्धिः न व्यापारेण हीष्यते ।। 23 ।।
शरीरवाचकाश्शब्दाश्शरीर्यन्ता इति स्थिते ।
वेदान्तश्रवणेनैव व्युत्पत्तिः परिपूर्यते ।। 24 ।।
सर्वश्शब्दस्तथाचान्तर्यामिणः परमात्मनः ।
स्यादपर्यवसानाख्यवृत्तितो वाचको मतः ।। 25 ।।
सामानाधिकरण्यं तु विशुद्धाद्वैतगोचरम् ।
इत्युक्तेस्तत्प्रतिद्वन्द्वि विशिष्टाद्वैतभाषितम् ।। ।। 26 ।।
निर्विशेषे नैव शब्दः नाप्यस्य स्वप्रकाशता ।
नाविद्यया तदाच्छादः नापि प्रत्यक्षगोचरः ।। ।। 27 ।।

अनुवृत्त्यंशलोपाद्वा संस्कारासचिवत्वतः ।
विषयावारणाच्चापि निर्विकल्पो विशिष्यते ।। 28 ।।
भेदाभेदे न प्रमाणं स्यात्सामान्यविशेषयोः ।
संमुग्धग्रहणं निर्विकल्पं स्यादित्यसाम्प्रतम् ।। 29 ।।
निर्विशेषे तिरोधानं नोपपन्नमिहेर्यते ।
सिद्धान्ते सविशेषत्वात् जीवानामुपपद्यते ।। 30 ।।
अविद्यायाः स्वरूपस्यानुपपत्तिरथोच्यते ।
तत्रान्तरे भवेदेकजीववादनिराकृतिः ।। 31 ।।
निवर्तकनिवृत्त्योश्च कथ्यतेऽनुपपन्नता ।
आश्रयस्यानुपपत्तिरविद्यायास्तथोदिता ।। 32 ।।
प्रामाण्यानुपपत्तिस्तु शास्त्रस्याथ प्रदर्श्यते ।
वादानधिकारवादस्स्यादसद्वादिनामथ ।। 33 ।।
विरोधस्य निरासोऽथ शास्त्रप्रत्यक्षयोरपि ।
द्वितीयेऽथ तृतीयेऽपि पक्षे दोषानुकीर्तनम् ।।34 ।।
सर्वस्य भिन्नाभिन्नत्वं निरस्याथ प्रदर्श्यते ।
संस्थानस्यैव जातित्वं भेदत्वं चेति निर्णयः ।। 35 ।।
संक्षेपेण निरुक्तस्य स्वसिद्धान्ते पुनस्त्वथ ।
सामानाधिकरण्यस्य विस्तरेणानुकीर्तनम् ।। 36 ।।
मुख्यः प्रयोगो धर्म्यैक्यात् एकविज्ञानगीस्तथा ।
सोयं पुंमान् यश्च पूर्वं ज्ञात इत्युच्यते यथा ।। 37 ।।
परिषद्दर्शनिनामी दृष्टा इति यथापि वा ।
यद्वाऽपृथक्सिद्धिरूपसम्बन्धादुपपद्यते ।। 38 ।।
अभिन्नसत्ताकहेतुस्तथोपादानमित्यपि ।
आत्मेत्यपि च पर्यायाः सर्वस्यात्मायमुच्यते ।। 39 ।।
तज्जत्वादिनियाम्यत्वशरीरत्वनिबन्धनम् ।
आत्मत्वं त्वपृथक्त्वं स्यान्न नियन्तृत्वमात्रकम् ।। 40 ।।
अपृथक्त्वं पुनस्तस्मिन्नन्तर्भाव इतीर्यते ।
अन्तर्भावात्मकं चैक्यं तेनैक्यमिति कीर्त्यते ।।41 ।।

इदमेव हि वैशिष्ट्यं विशिष्टाद्वैतगर्भितम् ।
एतादृशापृथक्सिद्ध्या सर्वं ब्रह्मात्मकं ततः ।। 42 ।।
न पृथक्प्रतिपत्त्यादिरपृथक्सिद्धवस्तुनः ।
ब्रह्मणो वेदने सर्वं विदितं तदपृथक्स्थितम् ।।43 ।।
परपक्षे बुद्ध्यभेदे त्वभेदोनृतसत्ययोः ।
सर्वार्थो वाऽखिलाभावः बुद्धिभेदोऽपि नोचितः।।44 ।।
मिथ्यात्वान्न च साधर्म्यं वैधर्म्येऽध्याहृतिर्भवेत् ।
निवृत्तौ लक्षणा वा स्याद्वैरस्यं ज्ञानशब्दयोः ।।45 ।।
स्थालीपुलाके साधर्म्यं प्राधान्ये तु विधर्मता ।
एवं हि दुष्परिहारान् दोषानिह विदुर्बुधाः ।।46 ।।
वाङ्मूलव्यवहारार्थं विकारो नाम चेत्यपि ।
मृत्पिण्डेन स्पृष्टमतः मृदित्येषा यथार्थवाक् ।।47 ।।
वाचारम्भणमित्युक्ते मिथ्येत्यश्रुतकल्पनम् ।
पुनरुक्तिर्नामधेयमितीत्यस्य निरर्थता ।।48 ।।
कार्यकारणभावाच्च शरीरात्मत्वतोऽपि च ।
सामानाधिकरण्येन निर्देश इति निर्णयः ।। 49 ।।
अथ भेदनिषेधस्य तात्पर्यमवधार्यताम् ।
अब्रह्मात्मकनानात्वनिषेधविषयत्वतः ।।50 ।।
अब्रह्मात्मकमित्यत्र द्विविधौ भेद ईप्सितः ।
स्वतन्त्रभेदो लोकस्य भ्रान्तिसिद्ध इहादिमः ।।51 ।।
कार्यकारणभेदश्च कुतर्कायत्त उत्तरः ।
अत्रोत्सर्गापवादादिन्यायत्रयसमन्वयः ।।52 ।।
उपादानमपि ब्रह्म निर्विकारमुदीर्यते ।
शरीरलक्षणं सर्वशब्दानां वाच्यतापि च ।।53 ।।
इदं शरीरात्मभावबोधकश्रुतिमानकम् ।
देहात्मनोर्यथा भेदः यथाचापृथगात्मता ।।54 ।।
तथा प्रपंचेश्वरयोः ततस्स्यादेककण्ठता ।
भेदाभेदादिभिन्नानां श्रुतीनां चिन्त्यतामिति ।।55 ।।
तथा दारागारधनकेदारादिविलक्षणः ।
विभूतिभावो देहस्य पारतन्त्र्यपरिस्थितिः ।।56 ।।

एवं सर्वस्य जगतः पारतन्त्र्यनिरूपणे ।
विहाय देहात्मभावं न नो धीगोचरः परः ॥57 ॥
ततश्च सर्वशास्त्राणामैदम्पर्यसमन्वयात् ।
भेदोऽभेदो द्व्यात्मता च सर्वमत्र समर्थ्यते ॥58 ॥
सर्वप्रकारं ब्रह्मैवावस्थितं देहिभावतः ।
अभेदो रक्षितस्तेन तथा ब्रह्मैकवस्त्वपि ॥ 59 ॥
नानात्मचिदचिद्वस्तुप्रकारत्वादनेकधा ।
अवस्थितमतो भेदाभेदश्चापि सुरक्षितः ॥ 60 ॥
चिदचिद्ब्रह्मधातूनां पृथक्स्वाभाव्यतः पुनः ।
स्वरूपेण त्वभावेन भेदश्चापि समर्थितः ॥ 61 ॥
न सद्विद्या निर्गुणा स्यात् जीवस्यास्ति स्वतन्त्रता ।
वेदान्ते विष्णुपारम्यं सर्वस्मृतिसमन्वयः ॥ 62 ॥
ततो यदुत्तरतरं यद्वेदादौ स्वरस्तथा ।
तस्मिन्यदन्तरिति चेत्यादिश्रुत्यर्थनिर्णयः ॥63 ॥
उपादानं तु भगवान्निमित्तं तु महेश्वरः ।
इति व्योमातीतवादः स एवात्र निरूप्यते ॥64 ॥
तस्मिन् यदन्तरित्यादौ तच्छब्दो व्योमवाचकः ।
सचाकाशो नामरूपनिर्वोढा विष्णुरुच्यते ॥65 ॥
तदतीतः तदन्तस्थः स सदाशिव उच्यते ।
इति वादो निराकारि कामाना व्यपदेशतः ॥66 ॥
विष्णोरथावतारस्स्यात् तथा भारतवर्णना ।
तथा विष्णुपुराणार्थः तत्सारांशोवधार्यताम् ॥67 ॥
विष्णुरेवापरिच्छिन्नः तत्त्वं नारायणात्मकम् ।
तत्र चोभयलिंगत्वं भगवच्छब्दशब्दितम् ॥ 68 ॥
तथोभयविभूतित्वं नारायणपदोदितम् ।
पुरुषोत्तमशब्दार्थः चिदचिद्भ्यां विलक्षणः ॥ 69 ॥
सर्वदोषनिरासाय सत्यसंकल्पतोच्यते ।
सर्वमंगलसंसिद्ध्यै सत्यकामत्वमुच्यते ॥70 ॥

त्रिमूर्तिसाम्यादिशंका ततश्च विनिवार्यते ।
प्राजापत्यमतोच्छित्त्यै मनुस्मृत्यर्थनिर्णयः ।।71 ।।
वेदान्तशास्त्रसिद्ध्यर्थं सिद्धव्युत्पत्तिरादृता ।
शासनाच्छंसनाद्वापि शास्त्रमित्यवधारितम् ।।72 ।।
साध्योपायैकान्तहतिः सिद्धोपायसमर्थनात् ।
उपासनाख्ये साध्येऽपि तात्पर्यं विशदीकृतम् ।।73 ।।
कार्यस्य दूषणमथो लिङर्थस्य च वर्णना ।
औपादानिकबोधस्य निरासोयमथो यथा ।।74 ।।
विध्याक्षेप उपादानं श्रुतार्थापत्तितः पृथक् ।
सा स्यादभिहिता पर्यवसानाच्छब्दकल्पना ।।75 ।।
अभिधानानवसितिः उपादानमितीर्यते ।
तेनौपादानिकीत्युक्ता फलसाधनतामतिः ।। 76 ।।
ततो नित्यविभूतेश्च समर्थनमिहादृतम् ।
अन्तस्तद्धर्मसूत्रार्थः कप्यासश्रुतिवर्णना ।।77 ।।
संकेतमूलो वेदस्स्याच्चेष्टावद्बोधकत्वतः ।
शब्दत्वाद्वा देवदत्तनिनदादिवदित्यसत् ।।78 ।।
संकेतयितुरज्ञानात् सम्प्रदायेऽपि सन्तते ।
बोधकत्वं ततस्सिद्धं स्वाभाविकमिहाक्षतम् ।।79 ।।
बोध्यबोधकभावोऽत्र सम्बन्धः वृद्धशिक्षितः ।
व्याप्तिलक्षणसम्बन्धात् लिंगं गमकमुच्यते ।।80 ।।
धर्मशास्त्रं तु सकलं पूर्वभागोपबृह्मणम् ।
पुराणं चोपनिषदामुपबृह्मणमिष्यते ।।81 ।।
ज्ञानस्यैव विकारोयमिच्छाद्वेषसुखादिकः ।
अनुकूलतया वेद्यं सर्वं सुखमितीष्यते ।।82 ।।
प्रीतिरूपमनुध्यानं भक्तिरित्यभिधीयते ।
भक्तिस्सेवोपास्तिरिति नैघण्टुकवचोऽपि च ।।83 ।।
भज इत्येषधातुर्वै सेवायां परिकीर्तितः ।
तस्मात्सेवा बुधैः प्रोक्ता भक्तिशब्देन भूयसा ।।84 ।।
इतिबोधायनवचः विस्पष्टं समुदाहृतम् ।
प्रकाशिकादीपिकयोः श्रीसुदर्शनसूरिभिः ।। ।। 85 ।।

परभक्तिः परज्ञानं परमा भक्तिरित्यपि ।
व्यवस्थं साधनं त्वाद्यं साक्षात्कार इतीर्यते ॥86 ॥
स च प्रत्यक्षसदृशमनुध्यानमितीर्यते ।
वस्तुस्वभावजं साक्षात्कारेच्छालक्षणं हि तत् ॥87 ॥
साक्षात्कारः कदाचिद्यः परज्ञानं तदुच्यते ।
साक्षात्कृतस्यानुभवाभिनिवेशात्मकोऽपि सः ॥88 ॥
अनुभूतिस्तु परमा भक्तिरित्यभिधीयते ।
भवेदनुबुभूषापि सैषा ज्ञेया निरन्तरम् ॥89 ॥
तत्राप्यनुभवो नामानुकूलत्वप्रकारकः ।
विशिष्टविषयस्साक्षात्कारः सुखरसात्मकः ॥90 ॥
वेदार्थसंग्रहस्येत्थं प्रमेयकुसुमांजलिम् ।
लक्ष्मीपुरं श्रीनिवासो वासुदेवे समार्पिपत् ॥91 ॥